चतुर्दशदले - चतुर्दशदलपद्माय नमः। ६ अं आं इं अतललोकनिलयेत्यादि शत्यम्बादेव्यै नमः।
इस तरह से भुवन न्यास के देवताओं का पूजन करें॥

६ अं......क्षं सकलभुवनाधिपायै श्रीपराम्बादेव्यै नमः स्हौंः ह्सौः श्रीं ह्रीं ऐं ॐ। पुष्पाञ्जलिं दत्त्वा।

अष्टत्रिंशद्दले - मूर्तिन्यास के देवताओं का अर्चन करे।

यथा - **अ केशवायाक्षर शक्त्यै नमः। ६ अं......... क्षं सकलत्रिमूर्त्यात्मिकायै श्रीपराम्बा देव्यै नमः स्हौंः ह्सौंः श्रीं ह्रीं ऐं ॐ।** पुष्पाञ्जलिं दत्त्वा।

षोडशदले - मंत्र न्यास के देवताओं का पूजन करें।

६ अं आं इं एक लक्ष कोटिभेद ईत्यादि एककूटेश्वर्यम्बादेव्यै नमः। इति क्रमात्........... । ६ अं ......क्षं सकलमंत्राधिदेवतायै नमः स्हौंः ह्सौंः श्रीं ह्रीं ऐं ॐ। पुष्पाञ्जलिं दत्त्वा।

षड्विंशतिदले - दैवतन्यास देवताओं का पूजन करे। **६ अं आं इं सहस्त्रकोटीत्यादि निवृत्यम्बादेव्यै नमः। इति क्रमात्......। ६ अं क्षं समस्तदेवताधिपायै श्रीपराम्बादेव्यै नमः स्हौः ह्सौंः श्रीं ह्रीं ऐं ॐ।** पुष्पाञ्जलिं दत्त्वा।

अष्टदले मातृन्यासः- देवताओं का पूजन करे। **६ कं..........ङं अनंततकोटीत्यादि असिताङ्गभैरवाय नमः। इति क्रमात्.......... । ६ अं..........क्षं समस्तमातृभैरवाधि देवतायै नमः स्हौः ह्सौंः श्रीं ह्रीं ऐं ॐ।** पुष्पाञ्जलिं दत्त्वा।

भुपूरे - पूर्वादिक्रम से **इन्द्रादिलोकपालों** व उनके **अस्त्रों** का पूजन करे। चारों द्वारों में **वटुकादि** के लिये बलि देवें।

पश्चिम द्वारे - **ऐं ह्रीं श्रीं देवीपुत्र वटुकनाथ पिङ्गलजटाभार भासुर पिङ्गलत्रिनेत्र ज्वालामुख इमां पूजां बलिगृह्ण बलिगृह्ण स्वाहा।**

उत्तर द्वारे - **ऐं ह्रीं श्रीं सर्वयोगिनीभ्य सर्वभूतेभ्यः सर्वभूतवर्त्तिवन्दिनीभ्यो डाकिनीभ्यः शाकिनीभ्यस्त्रैलोक्य-वासिनीभ्यः इमां पूजां बलिं गृह्ण गृह्ण स्वाहा।**

****

पूर्वद्वारे – **ऐं ह्रीं श्रीं सर्वभूतेभ्यः सर्वभूपतिभ्यो नमः। भूता ये विविधाकारा इमां पूजां बलिं गृह्ण गृह्ण स्वाहा।**

दक्षिण द्वारे – **६ भैरवाधिष्ठितायाऽक्षोभ्यानन्दोदयायाभीष्ट सिद्ध्यर्थं अवतर अवतर क्षेत्रपाल महाशास्त्र मातृपुत्र कुलपुत्र सिद्धपुत्र अस्मिन् स्थानाधिपतये अस्मिन् ग्रामाधिपतये अस्मिन् देशाधिपतये मेघनाद प्रचण्डोग्रकृपाण भीमभीषण सर्वविघ्नाधिपते इमां पूजां बलिं गृह्ण गृह्ण तुरु तुरु मुरु मुरु चूर्णय चूर्णय ज्वल ज्वल प्रज्वल प्रज्वल सर्वविघ्नान् निवारय निवारय नाशय नाशय क्षां क्षीं क्षूं क्षेत्रपालाय वौषट्।**

अग्निकोणे – **राजराजेश्वरमावाह्य गंधादिभिः सम्पूज्यः।**

बलि आधार पात्र रखकर बलि देवे पूजा करे।

ॐ ऐं ह्रीं श्रीं अमुकक्षेत्रपाल राजराजेश्वर इमां पूजां बलिं गृह्ण गृह्ण सर्वविघ्नान् नाशय नाशय स्वाहा।

॥ इति उर्ध्वाम्नाय आवरण पूजनम् ॥

॥ नव चक्रेश्वरी न्यासः॥

साधक अपने आध्यात्मकेन्द्रों में ललितासुन्दरी के नवचक्रों का न्यास करे। सुन्दरी, त्रिपुरा, आद्या, त्रिपुर वासिनी प्रथम चार विद्यायें जानें, शेष यथा क्रम है।

यथा ब्रह्मरंध्रे तथाधारे स्वाधिष्ठाने च नाभिके । अनाहते विशुद्धौ च लंबिके भ्रूयुगान्तरे ॥१॥
विन्दुस्थाने क्रमेणैव नवचक्राणि विन्यसेत् । तत्र विद्याः समुच्चार्य त्रिपुरा त्रिपुरेश्वरी ॥२॥
सुन्दरी त्रिपुराद्या च तथा त्रिपुरवासिनी । त्रिपुराश्रीः पञ्चमी स्यात्षष्ठी त्रिपुरमालिनी ॥३॥
सप्तमी त्रिपुरासिद्धा त्रिपुराम्बाष्टमी भवेत् । नवमी तु महादेवी महात्रिपुरसुन्दरी ॥४॥
नवचक्रेषु विन्यसेदिति न्यासः समीरितः ।

॥ श्री चक्रन्यास कवचम् ॥

इस कवच के करने से श्री यंत्र की पूजा का फल प्राप्त होता है एवं श्री यंत्र के आवरण देवता साधक की रक्षा करते है। तथा इसमें श्रीविद्या खड्गमाला की तरह श्री यन्त्रचक्र देवताओं का पूजन भुपूर, १२ दल, १6 दल, ८ दल, १४ दल, १० दल, १० दल, ८ कोण देवता, त्रिकोण व पीठ पूजन देवताओं के न्यास स्थान लिखे हैं। १6 कलाओं का पूजन नहीं दिया गया है। बिन्दु में पीठ देवता, प्रधान देवताओं के नाम है।

जहां ङन्तं है उसका अर्थ है उस चक्र (आवरण) के सभी देवताओं को नमस्कार है। प्रत्येक च्र आवरण की समाप्ती के पश्चात् न्यास दिया गया है।

॥ पार्वत्युवाच ॥

कैलासशिखरासीनं शिवं पप्रच्छ पार्वती । श्रीचक्रन्यासकवचं ब्रूहि मे देव शङ्कर ॥१॥

॥ शङ्कर उवाच ॥

साधु पृष्टं त्वया देवि लोकानां हितकाम्यया । श्रीचक्रन्यासकवचं प्रस्फुटं कथयामि ते ॥२॥
शरीरं चिन्तयेदादौ निजं श्रीचक्ररूपकम् । त्वगाद्याकारनिर्मुक्तं ज्वलत्कालाग्निसत्प्रभम् ॥३॥

द्वादशान्ते चिदाकाशे शिवशक्त्यात्मकं गुरुम् । परतेजोमयं ध्यायेद्भोगमोक्षफलाप्तये ॥४॥
गणेशो जानु (मे?नी) पातु वामांसं क्षेत्रनायकः । योगिन्यो दक्षिणं (पान्तु) स्कन्धं वटुकभैरवः ॥५॥
दक्षपादाग्रमिन्द्रो मे पात्वग्निर्दक्षजानुकम् । दक्षपार्श्वं यमः पातु दक्षांसं निर्ऋतिर्मम ॥६॥
वरुणः पातु वामांसं वामपार्श्वं समीरणः । वामजानु धनाध्यक्षो वामपादाग्रमीश्वरः ॥७॥
ब्रह्मरन्ध्रं विधिः पातु मूलाधारमनन्तकः । चतुरस्रादिरेखायै नम इत्याद्यनुक्रमात् ॥८॥
व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि । निधिवाहनमारूढा वराभयकराम्बुजाः ॥९॥
पद्मरागप्रतीकाशाः प्रसीदन्त्वणिमादयः । दक्षांसपृष्ठमणिमा करांग्रंलघिमावतु ॥१०॥
दक्षस्फिचं तु महिमा ईशित्वं चरणाग्रकम् । वशित्वं वामपादेऽव्यात् प्राकाम्यं स्फिचकेतरे ॥११॥
इच्छासिद्धिस्तु वामांसं कराग्रं भुक्तिसिद्धिका । रससिद्धिः शिरो मेऽव्याच्छिरः पृष्ठं तु मोक्षदा ॥१२॥
चतुरस्रमध्यरेखायै नम इत्याद्यनुक्रमात् । व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि ॥१३॥
पादांगुष्ठौ तु ब्रह्माणी माहेशी दक्षपार्श्वकम् । कौमारी च शिरः पातु वैष्णवी वामपार्श्वकम् ॥१४॥
वामजानुनि वाराही चेन्द्राणी दक्षजानुनि । चामुण्डा पातु दक्षांसे महालक्ष्मीस्तु वामके ॥१५॥
चतुरस्रान्तरेखायै नम इत्याद्यनुक्रमात् । व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि ॥१६॥
मुद्रादेव्यः प्रसीदन्तु वराभयकराम्बुजाः । भक्तानुग्रहसंधानदेवतामोद हेतवे ॥१७॥
पादांगुष्ठद्वयं मुद्रा सर्वसंक्षोभिणी मम । सर्वविद्राविणी मुद्रा पार्श्वं रक्षतु दक्षिणम् ॥१८॥
आकर्षिणी मूर्ध्नि देशं वामपार्श्वं वशङ्करी । उन्मादिनी वामजानुं दक्षजानुं महांकुशा ॥१९॥
दक्षांसं खेचरी पातु वामांसं बीजमु[illegible]का । त्रिखण्डा द्वादशान्तं तु योन्यंगुष्ठद्वयं पदोः ॥२०॥
हृन्मध्यं त्रिपुरा पातु सिद्धिमुद्रासमन्विता । सर्वाशापूरकं ङऽन्तं षोडशाराय वै नमः ॥२१॥
व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि । कलादेव्यः प्रसीदन्तु पाशांकुशकरोद्यताः ॥२२॥
रक्तांग्यो रक्तवसनाः सर्वाभरणभूषिताः । कामाकर्षिणिका पातु कर्णपृष्ठं तु दक्षिणम् ॥२३॥
बुद्ध्याकर्षिणिका नित्या रक्षताद् दक्षिणांसकम् । अहङ्काराकर्षिणी मे कूर्परं पातु दक्षिणम् ॥२४॥
दक्षिणं पाणिपृष्ठं मे शब्दाकर्षिणिकावतु । स्पर्शाकर्षिणिका पायाद्दक्षिणोरुतटं मम ॥२५॥
रूपाकर्षिणिका जानु रसाकर्षी तु गुल्फकम् । गन्धाकर्षिणिका रक्षेद्दक्षपादतलं मम ॥२६॥
वामपादतलं देवी चित्ताकर्षिणिकावतु । पादाधोयावता गुल्फं धैर्याकर्षणिकावतु ॥२७॥
स्मृत्याकर्षिणिका जानुं वामोरुं नामाकर्षिणी । बीजाकर्षिणिका पातु करपृष्ठमदक्षिणम् ॥२८॥
कूर्परं पातु मे सव्यमात्माकर्षणकारिणी । अमृताकर्षिणी वामांसं शरीराकर्षिणी श्रुतिम् ॥२९॥
सिद्धिमुद्रान्विता यावदहृन्मध्यं त्रिपुरेश्वरी । सर्वसक्षोभणं ङेऽन्तं चक्राय नम इत्यपि ॥३०॥
व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि । अनङ्गकुसुमादेव्याः प्रसन्ना रक्तकंचुकाः ॥३१॥

****

वेणीकृतजगत्केशाः शरकार्मुकपाणयः । अनङ्गकुसुमा पातु दक्षशङ्खं सदा मम ॥३२॥
अनङ्गमेखलादेवी त्रायतां दक्षजानुकम् । अनङ्गमदनाशक्तिरूरुं पायात् सदा मम ॥३३॥
गुल्फमध्यान्तरं मेऽव्यादनङ्गमदनातुरा । अनङ्गरेखा वामाङ्गं रक्षतां गुल्फमन्तरम् ॥३४॥
अनङ्गवेगिनी पायादूरुप्रान्तं सदा मम । ममानङ्गांकुशा जानुदेशं रक्षतु वामकम् ॥३५॥
अनङ्गमालिनी शङ्खं वामे रक्षतु मेऽनिशम् । सुन्दरी सिद्धिमुद्राभ्यां पातु में हृदयान्तरम् ॥३६॥
सर्वसौभाग्यदं ङेऽन्तं चक्राय नम इत्यपि । व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि ॥३७॥
शक्तिदेव्यः प्रसीदन्तु बाणकार्मुकपाणयः । सर्वाभरणसम्पन्ना वैडूर्यमणिरोचिषः ॥३८॥
सर्वसंक्षोभिणी फालं तदन्तं द्राविणी मम । दक्षिणं पालयेद्गण्डं सर्वाकर्षिणिका सदा ॥३९॥
सर्वाह्लादकरी दक्षमंसान्तं पातु मे सदा । सर्वसम्मोहनीशक्तिः पार्श्वान्तं पातु दक्षिणम् ॥४०॥
सर्वसंस्तम्भिनी रक्षेद्दक्षमूरुं तु पृष्ठकम् । जङ्घान्तं जृम्भिणी दक्षं वामं सर्ववशङ्करी ॥४१॥
रञ्जिनी वामपूर्वं तु पृष्ठं पालयतान्मम । पार्श्वान्तं सर्वमव्यान्मे सर्वोन्मादनकारिणी ॥४२॥
सर्वार्थसाधिनी पायादंसान्तं दक्षिणेतरम् । वामं पातु कपोलं मे सर्वसम्पत्प्रपूरणी ॥४३॥
सर्वमन्त्रमयी भालं वामभागं ममावतु । पालयेद्द्वारकूपं मे सर्वद्वन्द्वक्षयङ्करी ॥४४॥
त्रिपुरवासिनी सिद्धिमुद्राभ्यां पातु हृन्मम । सर्वार्थसाधकं ङेऽन्तं चक्राय नम इत्यपि ॥४५॥
व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि। दशदेव्यः प्रसीदन्तु सर्वसिद्धिप्रदायिकाः ॥४६॥
कुन्दमन्दारहाराभा वराभयकराम्बुजाः । सर्वसिद्धिप्रदा मेऽव्याद्दक्षिणेक्षणकोणकम् ॥४७॥
पालयेन्नासिकामूलं सर्वसम्पत्प्रदा मम । नित्यं रक्षतु वामाक्षिकोणं सर्वप्रियङ्करी ॥४८॥
रक्षेत् कुक्षिं सकोणं मे सर्वमङ्गलकारिणी । तथैव कुक्षिवायव्यं सर्वकामप्रदावतु ॥४९॥
वामजान्वन्तरं पातु सर्वदुःखविमोचनी । सर्वमृत्युप्रशमनी दक्षिणं जानुकान्तरम् ॥५०॥
सदा पायादपानं मे सर्वविघ्ननिवारिणी । सर्वाङ्गसुन्दरी देवी रक्षतात् कुक्षिनैर्ऋतम् ॥५१॥
आग्नेयं पालयेत् कुक्षिं सर्वसौभाग्यदायिनी । हृन्मध्यं त्रिपुराश्रीर्मे सिद्धिमुद्रान्वितावतु ॥५२॥
सर्वरक्षाकरं ङेऽन्तं चक्राय नम इत्यपि । व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि ॥५३॥
अन्तर्दशारवासिन्यः प्रसीदन्तु ममानिशम् । देव्यः स्फटिकसङ्काशाः पुस्तकाक्षालिबाहवः ॥५४॥
सर्वज्ञा सर्वशक्तिश्च दक्षिणघ्राणसृक्विणी । सर्वैश्वर्यप्रदा ज्ञानमयी च स्तनमुष्ककौ ॥५५॥
सीवनीमनिशं पातु सर्वव्याधिविनाशिनी । वामं मे वृषणं पातु सर्वाधारस्वरूपिणी ॥५६॥
सर्वपापहरानन्दमयी च स्तनसृक्विणी । वामनासापुटं पातु सर्वरक्षास्वरूपिणी ॥५७॥
अग्रदेशं नासिकायाः सर्वेप्सितफलप्रदा । हृत्पद्मं सिद्धिमुद्राभ्यां पातु त्रिपुरमालिनी ॥५८॥
सर्वरोगहराष्टारचक्राय नम इत्यपि । व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि ॥५९॥

वाग्देव्यो नः प्रसीदन्तु सिन्दूरकनकाम्बराः । पुस्तकाक्षालिविलसद्वरदाभीतिबाहवः ॥६०॥
दक्षिणं चिबुकस्यांशं वशिनी पातु सर्वदा। कण्ठं कामेश्वरी दक्षं हृदयं पातु मोदिनी ॥६१॥
विमला दक्षिणं नाभेस्तद्वाममरुणावतु । हृद्वामं जयिनी पातु कण्ठं सर्वेश्वरी तथा ॥६२॥
कौलिनी चिबुकं सिद्धा त्रिपुरा हृदयाम्बुजम् । सर्वसिद्धिप्रदान्तरालचक्राय नम इत्यपि ॥६३॥
व्यापकत्वेन विन्यसेत् कुसुमाञ्जलिमीश्वरि । कामकामेश्वरीबाणचापपाशांकुशाः क्रमात् ॥६४॥
परितो हृदि कोणस्य चतुरस्त्रं ममावतु । महामोक्षप्रदां योनिं हृदयोपरि राजिताम् ॥६५॥
कामेश्वर्यादिकं पातु नित्याषोडशकं मम । कामप्रदा रुद्रशक्तिः कामरूपनिवासिनी ॥६६॥
अग्रकोणं महायोनेः पातु कामेश्वरी मम । धर्मदा वैष्णवी शक्तिर्जालन्धकृतमन्दिरा ॥६७॥
दक्षकोणान्तरं योनेः पायान्मे वैष्णवी सदा। अर्थदा ब्रह्मणः शक्तिः पूर्णशैलुकृतालया ॥६८॥
वामकोणान्तरं पातु सुभगा भगमालिनी । त्रिपुराम्बा योनिमध्यं सिद्धिमुद्रा ममावतु ॥६९॥
उड्यानपीठनिलया परब्रह्मस्वरूपिणी । पञ्चश्रीकोशकल्पद्रुकामधुग्रत्नदैवतैः ॥७०॥
मण्डितासनसंस्थाना सर्वदर्शनसंस्थिता । स्तुता षडङ्गदेवीभिश्चतुः समयपूजिता ॥७१॥
महासौभाग्यजननी महामोक्षप्रदायिनी । हृदि दोरन्तरं पातु महात्रिपुरसुन्दरी ॥७२॥
सैव चक्रेश्वरी देवी सिद्धिमुद्रासमन्विता । आपादमस्तकं देवी पातु त्रिपुरभैरवी ॥७३॥
एतत्ते कवचं भद्रे रहस्यं सर्वकामदम् । तुरीयविद्यामुच्चार्य परब्रह्मस्वरूपिणी ॥७४॥
श्रीमहात्रिपुरशून्याशून्यवर्जितशक्तिपर बैन्दवचक्रवासिन्यनाख्या भासाश्रीपादुकां पूजयामि तर्पयामि नमः। तत्रैव नवचक्रेश्वरीः पूजयेत्। कएईलह्रीं हसकहलह्रीं सकलह्रीं त्रिपुरशून्याशून्य परबैन्दव चक्रवासिन्यनाख्याभासां श्री पादुकां पूजयामि नमः। इति विन्यस्य स्वमुद्रां प्रदर्शयेत्।
यन्न कस्यचिदाख्यातं तदद्य प्रकटीकृतम्। य इदं विन्यसेद्देहे साधकः स्थिरमानसः ॥७५॥
विमुच्य मानुषं भावं स सद्यः शिवतां व्रजेत् । त्रिकालं भावयेद्यस्तु तस्य सर्वाङ्गसङ्गतम् ॥७६॥
आमस्तं योगिनीवृन्दं स्फुरद्रूपं प्रकाशते । भूतप्रेतपिशाचाद्यैर्बाधितुं नैव शक्यते ॥७७॥
सिद्धवद्विचरेल्लोके तापत्रयविवर्जितः । यत्र योगी स्मरेदेतत् तस्मादारभ्य सर्वतः ॥७८॥
धरणी क्षेत्रतां याति यावद् द्वादशयोजनम् ।

॥ इति संहारश्रीचक्रन्यासः ॥

॥ अथ सृष्टिचक्र न्यासः॥

श्रीचक्र के बिन्दु के 16 कलाओं व त्रिकोण देवताओं का शिर में पूजन पश्चात् अस्त्र पूजन नेत्रादि में, भ्रू मध्य, कण्ठ हृदय, नाभि, मूलाधार चक्र में १४, १०, १०, ८ देवताओं के स्थान दिये गये हैं। ८, 16 देवता नाभि व पार्श्व में कहें है, तथा भूपुर में ब्राह्म्यादि व अणिमादि देवता जंघा से पाद तल में कहें हैं।

****

सचमूलदे व्याद्यणिमान्तः । तत्र क्रममाह योगिनी हृदये: ।
मूलदेव्यादिकं न्यासमणिमान्तं पुनर्न्यसेत् । शिरस्त्रिकोणे पूर्वादि कामेश्वर्यादिकं न्यसेत् ॥१॥
बाणा नेत्रे भ्रुवौ चापौ कर्णौ पाशद्वयं पुनः । सृणिद्वयं च नासाग्रं दक्षिणाद्यं च विन्यसेत् ॥२॥
मुण्डमालाक्रमेणैव न्यसेद्वाग्देवताष्टकम् । वैन्दवादीनि चक्राणि न्यस्तव्यानि वरानने ॥३॥
नेत्रमूले त्वपाङ्गे च कर्णपूर्वोत्तरे तथा । चूलिकायाश्च निम्नार्धे शेषार्धे कर्णपृष्ठके ॥४॥
कर्णमूले त्वपाङ्गे च तस्य मूले च विन्यसेत् । सर्वसिद्ध्यादिकं कण्ठे प्रादक्षिण्येन विन्यसेत् ॥५॥
हृदये मनुकोणस्थाः शक्तयोऽपि च पूर्ववत् । नाभौ त्वष्टदलं तत्र वंशे वामे च पार्श्वयोः ॥६॥
उदरे सव्यपार्श्वे च न्यसेदादिचतुष्टयम् । वंशवामान्तरालादि न्यसेदन्यचतुष्टयम् ॥७॥
स्वाधिष्ठाने न्यसेत् स्वस्य पूर्वादक्षावसानकम् । मूलाधारे न्यसेन्मुद्रादशकं साधकोत्तमः ॥८॥
पुरः सव्ये च वंशे च वामे चैवान्तरालके । ऊर्ध्वाधो दश मुद्राश्च ऊर्ध्वाधोवर्जितं पुनः ॥९॥
ब्रह्माण्याद्यष्टकं दक्षजङ्घायां ताश्च पूर्ववत् । वामजङ्घां समारभ्य वामादिक्रमतोऽपि वा ॥१०॥
सिद्ध्यष्टकं न्यसेच्छेषद्वयं पादतले न्यसेत् । कारणात् प्रसृतं न्यासं दीपाद्दीपमिवोदितम् ॥११॥
एवं विन्यस्य देवेशि स्वाभेदेन विचिन्तयेत् ।

श्रीविद्या का ब्रह्मरन्ध्र में पश्चात् गुरु का शिर के चारों ओर 16 स्वर युक्त मातृका पूजन करें।

श्रीविद्यां ब्रह्मरन्ध्रे तु पृष्ठतो गुरवः क्रमात् ।
तिथिनित्यास्ततो देवि मातृकास्वरसंयुताः ॥१॥
मातृकावन्न्यसेद्वक्त्रे सर्वसौभाग्यदायिनी ।
अःस्वरे परमेशानि श्रीविद्यां विश्वमातृकाम् ॥२॥
स्वरवद्विन्यसेन्नित्यां नीरजायतलोचने ।
भ्रूमध्ये हृदये नाभौ स्वाधिष्ठाने ततः परम् ।
मूलाधारे तथैवोरुयुगले जानुनोरपि ॥३॥
जङ्घयोः पादयोश्चैव क्रमाद्विन्द्वादिकेश्वरीः ।
विन्यसेत् साधकश्रेष्ठस्त्रिपुरान्तः समाहितः ॥४॥
ततस्तु व्यापकं कुर्यात् तत्तच्चक्रार्पणाणुना ।

॥ अथ स्थितिचक्र न्यास:॥

श्रीचक्र के नवचक्रों की ९ प्रकार के नाम त्रिपुरसुन्दरी देवता के दिये गये हैं, न्यास अरु जंघादि से पादाङ्गुलि अग्र तथा मूलाधार से सहस्त्रार तक न्यास व चक्र देवता के स्वरूप एवं डाकिन्यादि देवियों का स्मरण लिखा है।

निरूप्यते योगिनीहृदयेततस्तु करशुद्ध्यादिन्यासं कुर्याद्विचक्षणः। मूर्ध्नि गुह्ये च हृदये नेत्रत्रितय एव च ॥१॥
श्रोत्रयोर्युगले देवि मुखे च भुजयोः पुनः । पृष्ठे जानौ च नाभौ च विद्यान्यासं विधाय च ॥२॥

[पुनः] सृष्टिः स्यान्नवयोन्यादिपृथ्व्यतं संहृतिः पुनः । पृथ्व्यादिनवयोन्यन्तमिति शास्त्रस्य निश्चयः ॥१॥

इति तत्रैवोक्तत्वात्।

तथा- करशुद्धिकरी त्वाद्या द्वितीया चात्मरक्षिका । आत्मासनगता देवी तृतीया तदनन्तरम् ॥१॥
चक्रासनगता पश्चाद् सर्वमन्त्रासनस्थिता । साध्यसिद्धासना षष्ठी मायालक्ष्मोमयी परा ॥२॥
मूर्तिविद्या च सा देवी सप्तमी परिकीर्तिता । अष्टम्यावाहनी मुद्रा नवमी भैरवी परा ॥३॥
मूलविद्या तथा ख्याता त्रैलोक्यवशकारिणी । एवं नवप्रकाराः स्युः पूजाकाले प्रयत्नतः ॥४॥
एताः क्रमेण न्यस्तव्याः साधकेन कुलेश्वरि । पादाग्रजङ्घाजानूरुगुदलिङ्गाग्रकेषु च ॥५॥
आधारे विन्यसेन्मूर्तिं तस्यामावाहनीं न्यसेत् । मूलेन व्यापकन्यासः कर्तव्यः परमेश्वरि ॥६॥
अकुलादिषु पूर्वोक्तस्थानेषु परिचिन्तयेत् । चक्रेश्वरीसमायुक्तं नवचक्रं पुरोदितम् ॥७॥
आसां नामानि वक्ष्यामि यथानुक्रमयोगतः । तत्राद्या त्रिपुरादेवी द्वितीया त्रिपुरेश्वरी ॥८॥
तृतीया च तथा प्रोक्ता देवी त्रिपुरसुन्दरी । चतुर्थी च महादेवि देवी त्रिपुरवासिनी ॥९॥
पञ्चमी त्रिपुराश्रीः स्यात् षष्ठी त्रिपुरमालिनी । सप्तमी त्रिपुरासिद्धिरष्टमी त्रिपुराम्बिका ॥१०॥
नवमी तु महादेवी महात्रिपुरसुन्दरी । पूजयेच्च क्रमादेता नवचक्रे पुरोदिते ॥११॥
एवं नवप्रकाराद्या पूजाकाले तु पार्वती । एकाकारा ह्यादिशक्तिरजरामरकारिणी ॥१२॥

तथा च -

अकुले विषुसंज्ञे च शाक्ते वह्नौ तथा पुनः । नाभावनाहते शुद्धौ लम्बिकाग्रे भ्रुवोन्तरे ॥१॥
अधश्चोर्ध्वं सुषुम्नायाः सहस्रदलसंयुतम् । रक्तं श्वेतं च साहस्रदलस्थशक्तिभिर्युतम् ॥१॥
ऊर्ध्वाधोमुखमीशानि कर्णिकाकेसरान्वितम् । शक्तिरूपं महादेवि कुलाकुलमयं शुभम् ॥२॥
पङ्कजद्वयमीशानि स्थितं शाश्वतमव्ययम् । तयोर्मध्ये सुषुम्नान्तस्त्रिदशाधाराङ्कजम् ॥३॥
शक्तिरूपं शिवाकारं शर्वाण्याः सन्निजालयम् । तेषां रूपक्रमं चैव क्रमाद्वक्ष्येऽधुना शृणु ॥४॥
गुदमेढ्रान्तरं देवि पञ्चांगुलसमुच्छ्रितम् । गुदमेकांगुलं मध्ये द्वयांगुलविसारणम् ॥५॥
तस्य मूले महायोनिस्त्रिकोणाकाररूपिणी । सुषुम्ना योनिमध्यस्था तस्या मूले महेश्वरि ॥६॥
अधः पद्मं सहस्रारं कर्णिकाकेसरान्वितम् । तैजसं रक्तवर्द्दीमं तद्दलस्थितशक्तिभिः ॥७॥
प्रतिकिञ्जल्कसंस्थाभिः शक्तिभिः सहिता प्रिये । कर्णिकामध्यतो देवी कुलदेवी च संस्थिता ॥८॥
तत्पद्मोर्ध्वे सुषुम्नायां मध्ये त्वेकांगुलोपरि । पद्ममष्टदलैर्युक्तमष्टग्रन्थिसमन्वितम् ॥९॥
रक्तं स्वकर्णिकोपेतं रक्तकिञ्जल्कशोभितम् । ग्रन्थ्यग्रस्थं त्रिश्रृङ्गं च ब्रह्माण्याद्यष्टभैरवैः ॥१०॥
अष्टपत्रस्थितग्रन्थिस्थितवर्गादिशक्तिभिः । तदन्यशक्तिभिश्चैव संगताभिः समावृतम् ॥११॥
तन्मध्ये कौलशक्त्या च सेवितं संस्मरेत् ततः । एकांगुलप्रमाणोर्ध्वे षड्दलं कुलपङ्कजम् ॥१२॥

आधारपङ्कजं पीतं चतुष्पत्रं सुकेसरम् । अधोमुखं च तन्मध्ये कुण्डली परमेश्वरि ॥१३॥
स्वयम्भूमध्यगा चिन्त्या वरदादिभिरावृता । पार्थिवं पङ्कजं ह्येतत् तस्याधः पङ्कजं परम् ॥१४॥
तैजसं परमेशानि तन्मध्यस्थितशक्तयः । निष्कलाः परमेशानि विद्युत्पुञ्जनिभाः स्मरेत् ॥१५॥
तदूर्ध्वे कर्णिकामध्ये वह्निबिम्बं तदूर्ध्वगम् । पूर्णपीठं च तस्योर्ध्वे शाकिनी संस्थिता शिवे ॥१६॥
आधारपङ्कजस्योर्ध्वे सार्धद्वयंगुलकोपरि । तैजसं साष्टापत्रं च पीतकर्णिकया युतम् ॥१७॥
हृल्लेखा कर्णिकामध्ये स्थितानङ्गादिसेविता । एतस्मादद्वयंगुलादूर्ध्वे स्वाधिष्ठानं षडस्त्रकम् ॥१८॥
आप्यं च बन्धिनीशक्तिपूर्वाभिः शक्तिभिर्वृताम् । काकिनीमभिचिन्त्याथ नाभावष्टांगुलोपरि ॥१९॥
तत्पद्मं मणिपूरं च दशपत्रं सुशोभनम् । लाकिनीमध्यगं तच्च डामर्यादिभिरावृतम् ॥२०॥
चतुर्दशांगुलादूर्ध्वे मणिपूराख्यपङ्कजात् । पङ्कजं राकिणीमध्यं द्वादशारमनाहतम् ॥२१॥
पत्रस्थकालरात्र्यादिशक्तिभिश्च समावृतम् । मध्यस्थसूर्यबिम्बे तु नादोड्यानाख्यपीठकम् ॥२२॥
तस्मादेकांगुलादूर्ध्वे विशुद्धं षोडशारकम् । मध्यगा डाकिनी बाह्यपत्रेषु परमेश्वरि ॥२३॥
अमृताद्यक्षरान्तःस्था चन्द्रबिम्बं तदूर्ध्वतः । कण्ठोर्ध्वं परमेशानि लम्बिका चतुरंगुले ॥२४॥
तस्मादष्टदलं पद्मं रसिकादिभिरावृतम् । आज्ञाचक्रं द्विपत्राब्जं हक्षद्विदलसंयुतम् ॥२५॥
हंसवतीक्षमापार्श्वद्वये मध्ये तु हाकिनी । ततो ललाटगं वृत्तं बिन्द्वावरणमूर्ध्वतः ॥२६॥
सूर्यकोटिप्रतीकाशमतिदीप्तं महद्गुणम् । तन्मध्ये दशकोटीनां संख्यायोजनपङ्कजम् ॥२७॥
तत्कर्णिका समासीनः शान्त्यतोतेश्वरः प्रभुः । पञ्चवक्त्रो दशभुजो विद्युत्पुञ्जनिभाकृतिः ॥२८॥
निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिरनुक्रमात् । परिवार्य्य स्थिताश्चैताः शान्त्यतीतस्य सुन्दरि ॥२९॥
वामभागे समासीना शान्त्यतीता मनोन्मनी । पञ्चवक्त्रधराः सर्वाः दशबाह्विन्दुभूषणाः ॥३०॥
बिन्दुतत्त्वं समाख्यातं कोट्यर्बुदशतैर्वृतम् ।

॥ त्रिपुरसुन्दरी पूजाङ्गत्वेन वहिश्चक्रन्यासः॥

ऐं ह्रीं श्रीं अं आं सौः चतुरस्र त्रयात्मक त्रैलोक्यमोहन चक्राधिष्ठात्र्यै अणिमाद्यष्टाविंशति शक्तिसहित प्रकटयोगिनी रूपायै त्रिपुरादेव्यै नमः (पादयोः)।

ऐं ह्रीं श्रीं ऐं क्लीं सौः षोडशदलपद्मात्मक सर्वाशापरिपूर चक्राधिष्ठात्र्यै कामाकर्षिण्यादि षोडशशक्तिसहित गुप्तयोगिनी रूपायै त्रिपुरेश्वरी देव्यै नमः (जान्वो)।

ऐं ह्रीं श्रीं ह्रीं क्लीं सौः अष्टदलपद्मात्मक सर्वसंक्षोभण चक्राधिष्ठात्र्यै अनङ्गकुसुमाद्यष्ट शक्तिसहित गुप्ततरयोगिनी रूपायै त्रिपुरसुन्दरी देव्यै नमः (ऊरु मूले)।

ऐं ह्रीं श्रीं हैं ह्क्लीं ह्सौः चतुर्दशारात्मक सर्वसौभाग्यदायक चक्राधिष्ठात्र्यै सर्वसंक्षोभिण्यादि चतुर्दश शक्तिसहित संप्रदाययोगिनी रूपायै त्रिपुरवासिनी देव्यै नमः (नाभौ)।

ऐं ह्रीं श्रीं ह्स्क्लीं ह्स्सौः बहिर्दशारात्मक सर्वार्थसाधक चक्राधिष्ठात्र्यै सर्वसिद्धिप्रदादि दश शक्तिसहित कुलोत्तीर्ण योगिनी रूपायै त्रिपुराश्री देव्यै नमः (हृदये)।

ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें अंतर्दशारात्मक सर्वरक्षाकर चक्राधिष्ठात्र्यै सर्वाज्ञादि दश शक्ति सहित निगर्भयोगिनी रूपायै त्रिपुरमालिनी देव्यै नमः (कण्ठे)।

ऐं ह्रीं श्रीं ह्रीं श्रीं सौः अष्टारात्मक सर्वरोगहर चक्राधिष्ठात्र्यै वशिन्याद्यष्टशक्ति सहित रहस्ययोगिनी रूपायै त्रिपुरासिद्धा देव्यै नमः (मुखे)।

ऐं ह्रीं श्रीं हस्त्रैं ह्स्क्लॄीं ह्स्त्रौं त्रिकोणात्मक सर्वसिद्धिप्रद चक्राधिष्ठात्र्यै कामेश्वर्यादि त्रिशक्ति सहित अतिरहस्य योगिनी रूपायै त्रिपुराम्बा देव्यै नमः (नेत्रयोः)।

ऐं ह्रीं श्रीं पञ्चदशी बिन्द्वात्मक सर्वानन्दमय चक्राधिष्ठात्र्यै षडङ्गायुध दशशक्ति सहित परापरातिरहस्य योगिनी रूपायै महात्रिपुर सुन्दरी देव्यै नमः (मूर्ध्नि)।

॥ अन्तश्चक्र न्यासः॥

ऐं ह्रीं श्रीं अं आं सौः चतुरस्त्र त्रयात्मक त्रैलोक्यमोहन चक्राधिष्ठात्र्यै अणिमाद्यष्टाविंशति शक्तिसहित प्रकटयोगिनी रूपायै त्रिपुरादेव्यै नमः (अधः सहस्त्रारे)।

ऐं ह्रीं श्रीं ऐं क्लीं सौः षोडशदलपद्मात्मक सर्वाशापरिपूर चक्राधिष्ठात्र्यै कामाकर्षिण्यादि षोडशशक्तिसहित गुप्तयोगिनी रूपायै त्रिपुरेश्वरी देव्यै नमः (मूलाधारे)।

ऐं ह्रीं श्रीं ह्रीं क्लीं सौः अष्टदलपद्मात्मक सर्वसंक्षोभण चक्राधिष्ठात्र्यै अनङ्गकुसुमाद्यष्ट शक्तिसहित गुप्ततरयोगिनी रूपायै त्रिपुरसुन्दरी देव्यै नमः (स्वाधिष्ठाने)।

ऐं ह्रीं श्रीं हैं ह्क्लीं ह्सौः चतुर्दशारात्मक सर्वसौभाग्यदायक चक्राधिष्ठात्र्यै सर्वसंक्षोभिण्यादि चतुर्दश शक्तिसहित संप्रदाय योगिनी रूपायै त्रिपुरवासिनी देव्यै नमः (मणिपूरे)।

ऐं ह्रीं श्रीं ह्स्क्लीं ह्स्सौः बहिर्दशारात्मक सर्वार्थसाधक चक्राधिष्ठात्र्यै सर्वसिद्धिप्रदादि दश शक्तिसहित कुलोत्तीर्ण योगिनी रूपायै त्रिपुराश्री देव्यै नमः (अनाहते)।

ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें अंतर्दशारात्मक सर्वरक्षाकर चक्राधिष्ठात्र्यै सर्वाज्ञादि दश शक्ति सहित निगर्भ योगिनी रूपायै त्रिपुरमालिनी देव्यै नमः (विशुद्धौ)।

ऐं ह्रीं श्रीं ह्रीं श्रीं सौः अष्टारात्मक सर्वरोगहर चक्राधिष्ठात्र्यै वशिन्याद्यष्टशक्ति सहित रहस्य योगिनी रूपायै त्रिपुरासिद्धा देव्यै नमः (लंबिकाग्रे)।

ऐं ह्रीं श्रीं हस्त्रैं ह्स्क्लॄीं ह्स्त्रौं त्रिकोणात्मक सर्वसिद्धिप्रद चक्राधिष्ठात्र्यै कामेश्वर्यादि त्रिशक्ति सहित अतिरहस्य योगिनी रूपायै त्रिपुराम्बा देव्यै नमः (आज्ञाचक्रे)।

ऐं ह्रीं श्रीं पञ्चदशी बिन्द्वात्मक सर्वानन्दमय चक्राधिष्ठात्र्यै षडङ्गायुध दशशक्ति सहित परापरातिरहस्य योगिनी रूपायै महात्रिपुर सुन्दरी देव्यै नमः (सहस्त्रारे)।

पुनः आज्ञाचक्र के एक अंगुल ऊपरी भाग में -

अं आं सौः - बिन्दौ। ऐं क्लीं सौः नमः - अर्धचन्द्रे। ह्रीं क्लीं सौः नमः - रोधिन्यां। हैं ह्क्लीं ह्सौः नमः -

****

नादे। ह्सै ह्स्क्लीं ह्स्सौ: नम: - नादान्ते। ह्रीं क्लीं ब्लें नम: - शक्तौ। ह्रीं श्रीं सौ: नम: - व्यापिकायां। हस्त्रैं ह्स्क्लृरीं ह्स्त्रौं नम: - समनायां। पञ्चदशी नम: - उन्मनायां। षोडशी नम: - ब्रह्मरंध्रे महाबिन्दौ।

॥ कामेश्वर्यादिन्यास:॥

ऐं ह्रीं श्रीं ऐं कएईलह्रीं अग्निचक्रे कामगिरिपीठे मित्रेशनाथ नवयोनिचक्रात्मक आत्मतत्त्व सृष्टिकृत्य जाग्रत् दशाधिष्ठायकेच्छाशक्ति वाग्भवात्मक वागीश्वरीस्वरूप ब्रह्मात्मशक्ति श्रीपादुकां पूजयामि नम: (मूलाधारे)।

ऐं ह्रीं श्रीं क्लीं हसकहल ह्रीं सूर्यचक्रे जालन्धरपीठे षष्ठीशनाथ दशारद्वय चतुर्दशार चक्रात्मक विद्यातत्त्व स्थितिकृत्य स्वप्नदशाधिष्ठायक ज्ञानशक्ति कामराजात्मक कामकलास्वरूप महावज्रेश्वरी विष्ण्वात्मकशक्ति श्रीपादुकां पूजयामि नम: (अनाहते)।

ऐं ह्रीं श्रीं सौ: सकल ह्रीं सोमचक्रे पूर्णागिरिपीठे उड्डीशनाथ अष्टदल षोडशदल चतुरस्त्रचक्रात्मक शिवतत्त्वात्मक परापरशक्ति स्वरूप महाभगमालिनी रुद्रात्मशक्ति श्रीपादुकां पूजयामि नम: (आज्ञाचक्रे)।

ऐं ह्रीं श्रीं ऐं कएईलह्रीं क्लीं हसकहलह्रीं सौ: सकल ह्रीं परब्रह्मचक्रे महोड्याणपीठे चर्यानन्दनाथ समस्तचक्रात्मक सपरिवार परमतत्त्व सृष्टिस्थितिसंहारकृत्य तुरीयदशाधिष्ठायक इच्छाज्ञानक्रिया शान्ता शक्ति वाग्भव कामराज शक्ति बीजात्मक परमशक्तिस्वरूप श्रीमहात्रिपुरसुन्दरी परब्रह्मात्मशक्ति श्रीपादुकां पूजयामि नम: (ब्रह्मरंध्रे)।

॥ मूलविद्या न्यास:॥

ऐं ह्रीं श्रीं कं नम: - शिरसि। **ऐं ह्रीं श्रीं ऐं नम:** - मूलाधारे। **ऐं ह्रीं श्रीं ईं नम:** - हृदि। **ऐं ह्रीं श्रीं लं नम:** - दक्षनेत्रे। **ऐं ह्रीं श्रीं ह्रीं नम:** - वामनेत्रे। **ऐं ह्रीं श्रीं हं नम:** - भ्रूमध्ये। **ऐं ह्रीं श्रीं सं नम:** - दक्षश्रोत्रे। **ऐं ह्रीं श्रीं कं नम:** - वामश्रोत्रे। **ऐं ह्रीं श्रीं हं नम:** - मुखे। **ऐं ह्रीं श्रीं लं नम:** - दक्षभुजे। **ऐं ह्रीं श्रीं ह्रीं नम:** - वामभुजे। **ऐं ह्रीं श्रीं सं नम:** - पृष्ठे। **ऐं ह्रीं श्रीं कं नम:** - दक्षजानुनि। **ऐं ह्रीं श्रीं लं** - वामजानुनिं। **ऐं ह्रीं श्रीं ह्रीं नम:** - नाभौ।

॥ षोडश्युपासकानां विशेष न्यासा:॥

इस न्यास के अर्न्तगत षोडशी मन्त्र से ही सभी न्यास किये जाते हैं।

मूल मन्त्र - कएईल ह्रीं हसकहलह्रीं सकलह्रीं श्रीं।

जहां मूलं शब्द है उसका तात्पर्य षोडशी मन्त्र से है।

१. ऐं ह्रीं श्रीं मूलं नम: शिरसि - (दाहिने हाथ की मध्यमा, अनामिका संयोग से)

तत्र तां दीपाभां स्त्रवत्सुधारसां महासौभाग्यदां ध्यात्वा।

भगवती का दीपज्योति की तरह सुधारस से महासौभाग्य देने वाली का ध्यान करें।

२. ऐं ह्रीं श्रीं मूलं नम: - वामाङ्ग में दण्डिनी मुद्रा से वामकर्ण होते हुये शिर से मस्तक तक न्यास करें।

३. ऐं ह्रीं श्रीं मूलं नम: - **मम शत्रुन् निगृह्णामि।**

शत्रु की जिह्वा को पकड़ने का ध्यान करते हुये, बायें पैर के नीचे न्यास करें।

४. ऐं ह्रीं श्रीं मूलं नम: - **त्रैलोक्यस्याहं कर्ता॥** (ललाट पर त्रिखण्ड मुद्रा में)

५. ऐं ह्रीं श्रीं मूलं नमः - (त्रिखण्ड मुद्रा से अपने मुख पर फेरें)

६. ऐं ह्रीं श्रीं मूलं नमः - (त्रिखण्ड मुद्रा से अपने दाहिने कान से बांये कान को मुख वेष्टन करते हुये)

७. ऐं ह्रीं श्रीं मूलं नमः - (त्रिखण्ड मुद्रा से गले से ऊपर मस्तक तक)

८. ऐं ह्रीं श्रीं मूलं नमः - (त्रिखण्ड मुद्रा से मस्तक से पैर तक तथा पैर से मस्तक तक व्यापक न्यास करें)

९. ऐं ह्रीं श्रीं मूलं नमः - (योनिमुद्रा से मुख का न्यास करें)

१०. ऐं ह्रीं श्रीं मूलं नमः - (योनिमुद्रा से ललाट का न्यास करें)

॥ सम्मोहन न्यासः॥

१. ऐं ह्रीं श्रीं मूलं - मूल विद्या का स्मरण करें, भावना करें कि उसके प्रकाश से संसार की लालिमा है। अनामिका को ३ बार मूर्ध्नि पर घुमायें।

२. ऐं ह्रीं श्रीं मूलं - अंगुष्ठ अनामिका संयोग से ब्रह्मरंध्र पर न्यास करें।

३. ऐं ह्रीं श्रीं मूलं - अंगुष्ठ अनामिका संयोग से दोनों मणिबन्धों पर न्यास करें।

४. ऐं ह्रीं श्रीं मूलं - अंगुष्ठ अनामिका संयोग से ललाट पर न्यास करें।

५. ऐं ह्रीं श्रीं मूलं - शाक्त तिलक धारण करें।

॥ महाषोडशी अक्षर न्यासः॥

॥ संहार न्यासः॥

ॐ ऐं ह्रीं श्रीं श्रीं नमः पदयोः। ह्रीं नमः जङ्घयोः। क्लीं नमः जान्वो। ऐं नमः कटिद्वये। सौः नमः पृष्ठे। ॐ नमः लिङ्गे। ह्रीं नमः नाभौ। श्रीं नमः पार्श्वयोः। कएईलह्रीं नमः स्तनयोः। हसकहलह्रीं नमः अंसयोः। सकलह्रीं नमः कर्णयोः। सौः नमः मूर्ध्नि। ऐं नमः मुखे। क्लीं नमः नेत्रयोः। ह्रीं नमः कर्णयुगसन्निधौ। श्रीं नमः कर्णवेष्टयोः।

॥ सृष्टि न्यासः॥

ॐ ऐं ह्रीं श्रीं श्रीं नमः ब्रह्मरन्ध्रे। ह्रीं नमः भाले। क्लीं नमः नेत्रयो। ऐं नमः कर्णयो। सौः नमः नासापुटे। ॐ नमः गण्डयोः। ह्रीं नमः दन्तपंक्तौ। श्रीं नमः ओष्ठयोः। कएईलह्रीं नमः जिह्वायाम्। हसकहलह्रीं नमः कण्ठे। सकलह्रीं नमः पृष्ठे। सौः नमः सर्वाङ्गे। ऐं नमः हृदि। क्लीं नमः स्तनयोः। ह्रीं नमः उदरे। श्रीं नमः लिङ्गे।

मूल मन्त्र से व्यापक न्यास करें।

॥ स्थिति न्यासः॥

ॐ ऐं ह्रीं श्रीं श्रीं नमः अंगुष्ठयोः। ह्रीं नमः तर्जन्योः। क्लीं नमः मध्यमयोः। ऐं नमः अनामिकायोः। सौः नमः कनिष्ठिकयोः। ॐ नमः मूर्ध्नि। । ह्रीं नमः मुखे। श्रीं नमः हृदि। कएईलह्रीं नमः नाभौ। हसकहलह्रीं नमः कण्ठादिनाभ्यन्तम्। सकलह्रीं नमः मूर्धादिकण्ठान्तम्। सौः नमः पादाङ्गुष्ठयोः। ऐं नमः पादतर्जन्योः। क्लीं नमः पादमध्यमयोः। ह्रीं नमः पादानामिकयोः। श्रीं नमः पादकनिष्ठिकयोः।

॥ अथ स्वशरीरे श्रीचक्रन्यासः॥

अपने शरीर को श्रीचक्र मानें तथा ध्यान करें कि श्रीयन्त्र में जो-जो देवता हैं वे यथा यथा स्थान मेरे शरीर में विराजमान होकर मेरे शरीर को देवीमय बना रहें हैं।

शरीरं चिन्तयेदादौ निजं श्रीचक्ररूपकम्।
त्वगाद्याकार निर्मुक्तं ज्वलत्कालाग्नि सन्निभाम्॥

ऐं ह्रीं श्रीं समस्तप्रकट गुप्त गुप्ततर सम्प्रदाय कुलोत्तीर्ण निगर्भ रहस्यातिरहस्य परापररहस्य योगिनी चक्र देवताभ्यो नमः।

(इस मन्त्र से व्यापक न्यास करें।)

ऐं ह्रीं श्रीं गं गणपतये नमः दक्षौरौ। ऐं ह्रीं श्रीं क्षं क्षेत्रपालाय नमः दक्षांसे। ऐं ह्रीं श्रीं यां योगिनीभ्यो नमः वामांसे। ऐं ह्रीं श्रीं बं बटुकाय नमः वामोरौ। ऐं ह्रीं श्रीं लं इन्द्राय नमः पादाङ्गुष्ठद्वये। ऐं ह्रीं श्रीं रं आग्नये नमः दक्षजानुनि। ऐं ह्रीं श्रीं टं यमाय नमः दक्षपार्श्वे। ऐं ह्रीं श्रीं क्षं निर्ऋतये नमः दक्षांसे। ऐं ह्रीं श्रीं वं वरुणाय नमः मूर्धि। ऐं ह्रीं श्रीं यं वायवे नमः वामांसे। ऐं ह्रीं श्रीं सं सोमाय नमः वामपार्श्वे नमः। ऐं ह्रीं श्रीं हं ईशानाय नमः वामजानुनि। ऐं ह्रीं श्रीं हंसः ब्रह्मणे नमः मूर्धि। ऐं ह्रीं श्रीं अं अनंताय नमः मूलाधारे।

॥ त्रैलोक्यमोहनचक्र न्यासः॥

ऐं ह्रीं श्रीं अं आं सौः त्रैलोक्यमोहन चक्राय नमः। इस मन्त्र से व्यापक न्यास करें।

ऐं ह्रीं श्रीं आद्य चतुरस्त्र रेखायै नमः। दक्षांस पृष्ठ वक्ष्यमाण भागेषु। अपनी अंजुली में व्यापक न्यास करें।

ऐं ह्रीं श्रीं अणिमासिद्ध्यै नमः दक्षांस पृष्ठे। ऐं ह्रीं श्रीं लघिमासिद्ध्यै नमः दक्षपाण्यङ्गुल्यग्रेषु (दाहिने हाथ की अंगुलियों में)। **ऐं ह्रीं श्रीं महिमा सिद्ध्यै नमः दक्षोरुसन्धौ। ऐं ह्रीं श्रीं ईशत्वसिद्ध्यै नमः दक्षपादाङ्गुल्ये। ऐं ह्रीं श्रीं वशित्वसिद्ध्यै नमः वामपादाङ्गुल्यग्रे। ऐं ह्रीं श्रीं प्राकाम्यसिद्ध्यै नमः वामोरुसन्धौ। ऐं ह्रीं श्रीं भुक्तिसिद्ध्यै नमः वामपाण्यङ्गुल्यग्रेषु** (बायें हाथ की अंगुलियों में)। **ऐं ह्रीं श्रीं इच्छासिद्ध्यै नमः वामांसपृष्ठे। ऐं ह्रीं श्रीं प्राप्तिसिद्ध्यै नमः शिखामूले। ऐं ह्रीं श्रीं सर्वकामसिद्ध्यै नमः शिरपृष्ठे।**

ऐं ह्रीं श्रीं चतुरस्त्रमध्यरेखायै नमः। व्यापक न्यास करें। **ऐं ह्रीं श्रीं ब्राह्मयै नमः पादाङ्गुष्ठद्वये। ऐं ह्रीं श्रीं माहेश्वर्यै नमः दक्षपार्श्वे। ऐं ह्रीं श्रीं कौमार्यै नमः मूर्धि। ऐं ह्रीं श्रीं वैष्णव्यै नमः वामपार्श्वे। ऐं ह्रीं श्रीं वाराह्यै नमः वामजानुनि। ऐं ह्रीं श्रीं इन्द्राण्यै नमः दक्षजानुनि। ऐं ह्रीं श्रीं चामुण्डायै नमः दक्षांसे। ऐं ह्रीं श्रीं महालक्ष्म्यै नमः वामांसे।**

ऐं ह्रीं श्रीं चतुस्त्रान्त्य रेखायै नमः। व्यापक न्यास करें।

ऐं ह्रीं श्रीं सर्वसंक्षोभिण्यै नमः पादाङ्गुष्ठद्वये। ऐं ह्रीं श्रीं सर्वविद्राविण्यै नमः दक्षपार्श्वे। ऐं ह्रीं श्रीं सर्वाकर्षिण्यै नमः मूर्धि। ऐं ह्रीं श्रीं सर्ववशङ्कर्यै नमः वामपार्श्वे। ऐं ह्रीं श्रीं सर्वोन्मादिन्यै नमः वामजानुनि। ऐं ह्रीं श्रीं सर्वमहाङ्कुशायै नमः दक्षजानुनि। ऐं ह्रीं श्रीं सर्वखेचर्ये नमः दक्षांसे। ऐं ह्रीं श्रीं सर्वबीजायै नमः वामांसे। ऐं ह्रीं श्रीं सर्वयोन्यै नमः द्वादशान्ते। ऐं ह्रीं श्रीं सर्वत्रिखण्डायै नमः पादाङ्गुष्ठद्वये। ऐं ह्रीं श्रीं अं आं सौः त्रैलोक्यमोहन चक्रेश्वर्यै त्रिपुरायै नमः हृदये।

एताः प्रकट योगिन्यः त्रैलोक्य मोहने चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदि चक्र समर्पणं न्यस्य॥

॥ सर्वाशापरिपूरकचक्र न्यासः॥

ऐं ह्रीं श्रीं सौः सर्वाशापरिपूरक चक्राय नमः। व्यापक न्यास करें।

आकर्षिणी शक्तियों का नित्याकला के रूप में न्यास करें। सभी के नाम के पश्चात् **''नित्या कलायै नमः''** जोड़कर न्यास करें।

ऐं ह्रीं श्रीं कामाकर्षिण्यै नित्याकलायै नमः दक्षकर्णपृष्ठे। ऐं ह्रीं श्रीं बुद्ध्याकर्षिण्यै नित्या० दक्षांसे। ऐं ह्रीं श्रीं अहङ्काराकर्षिण्यै नित्या० दक्षकर्पूरे। ऐं ह्रीं श्रीं शब्दाकर्षिण्यै नित्या० दक्षकरतले च पृष्ठे। ऐं ह्रीं श्रीं स्पर्शाकर्षिण्यै नित्या० दक्षौरौ दक्षस्फिच। ऐं ह्रीं श्रीं रूपाकर्षिण्यै नित्या० दक्षजानुनि। ऐं ह्रीं श्रीं रसाकर्षिण्यै नित्या० दक्षगुल्फे। ऐं ह्रीं श्रीं गंधाकर्षिण्यै नित्या० दक्षपादतले, दक्षप्रपदे। ऐं ह्रीं श्रीं चित्ताकर्षिण्यै नित्या० वामपादतले, वामप्रपदे। ऐं ह्रीं श्रीं धैर्याकर्षिण्यै नित्या० वामगुल्फे। ऐं ह्रीं श्रीं स्मृत्याकर्षिण्यै नित्या० वामजानुनि। ऐं ह्रीं श्रीं नामाकर्षिण्यै नित्या० वामोरौ, वामस्फिचि। ऐं ह्रीं श्रीं बीजाकर्षिण्यै नित्या० वामकरतलपृष्ठयोः। ऐं ह्रीं श्रीं आत्माकर्षिण्यै नित्या० वामकर्पूरे। ऐं ह्रीं श्रीं अमृताकर्षिण्यै नित्या० वामांसे। ऐं ह्रीं श्रीं शरीराकर्षिण्यै नित्या० वामकर्णपृष्ठे। ऐं ह्रीं श्रीं ऐं क्लीं सौः सर्वाशापरिपूरक चक्रेश्वर्यै त्रिपुरेश्यै नमः हृदये।

एताः गुप्तयोगिन्य सर्वाशापरिपूरक चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्र समर्पणं न्यस्यः॥

॥ सर्वसंक्षोभणचक्र न्यासः॥

ऐं ह्रीं श्रीं ह्रीं क्लीं सौः सर्वसंक्षोभण चक्राय नमः। व्यापक न्यास करें।

ऐं ह्रीं श्रीं अनङ्ग कुसुमायै दक्षशंखे (ललाटास्थि)**। ऐं ह्रीं श्रीं अनङ्ग मेखलायै नमः दक्षजत्रुणि** (बाहूमूलसन्धिः)**। ऐं ह्रीं श्रीं अनङ्गमदनायै नमः दक्षोरौ। ऐं ह्रीं श्रीं अनङ्गमदनातुरायै नमः दक्षगुल्फे। ऐं ह्रीं श्रीं अनङ्ग रेखायै नमः वामगुल्फे। ऐं ह्रीं श्रीं अनङ्ग वैगिन्यै नमः वामोरौ। ऐं ह्रीं श्रीं अनङ्गाङ्कुशायै नमः वामजत्रुणि। ऐं ह्रीं श्रीं अनङ्ग मालिन्यै नमः वामशङ्खे। ऐं ह्रीं श्रीं ह्रीं क्लीं सौः सर्वसंक्षोभण चक्रेश्यै त्रिपुरसुन्दर्यै नमः हृदये।**

एताः गुप्ततरयोगिन्य सर्वसंक्षोभण चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः॥

॥ सर्वसौभाग्यदायकचक्र न्यासः॥

ऐं ह्रीं श्रीं हैं ह्क्लीं ह्सौः सर्वसौभाग्यदायक चक्राय नमः। व्यापक न्यास करें।

ऐं ह्रीं श्रीं सर्वसंक्षोभिण्यै नमः ललाटमध्ये। ऐं ह्रीं श्रीं सर्वविद्राविण्यै नमः ललाटदक्षभागे। ऐं ह्रीं श्रीं सर्वाकर्षिण्यै नमः दक्षगण्डे। ऐं ह्रीं श्रीं सर्वाह्लादिन्यै नमः दक्षांसे। ऐं ह्रीं श्रीं सर्वसंमोहिन्यै नमः दक्षपार्श्वे। ऐं ह्रीं श्रीं सर्वस्तंभिन्यै नमः दक्षोरौ। ऐं ह्रीं श्रीं सर्वजृंभिण्यै नमः दक्षजङ्घायाम्। ऐं ह्रीं श्रीं सर्ववश्यङ्कर्यै नमः वामजङ्घायाम्। ऐं ह्रीं श्रीं सर्वरंजिन्यै नमः वामोरौ। ऐं ह्रीं श्रीं सर्वोन्मादिन्यै नमः वामपार्श्वे। ऐं ह्रीं श्रीं सर्वार्थसाधिन्यै नमः वामांसे। ऐं ह्रीं श्रीं सर्वसम्पत्तिपूरिण्यै नमः वामगण्डे। ऐं ह्रीं श्रीं सर्वमन्त्रमय्यै नमः ललाटवामभागे। ऐं ह्रीं श्रीं सर्वद्वन्द्वक्षयङ्कर्यै नमः शिरपृष्ठे। ऐं ह्रीं श्रीं हैं ह्क्लीं ह्सौः सर्वसौभाग्यदायकचक्रेश्वर्यै त्रिपुरमालिन्यै नमः हृदये।

एताः सम्प्रदाययोगिन्य सर्वसौभाग्यदायके चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः॥

॥ सर्वार्थसाधकचक्र न्यासः॥

ऐं ह्रीं श्रीं ह्सैं ह्स्क्लीं ह्स्सौः सर्वार्थसाधक चक्राय नमः। व्यापक न्यास करें।

ऐं ह्रीं श्रीं सर्वसिद्धप्रदायै नमः दक्षनेत्रे, दक्षनासापुटे। ऐं ह्रीं श्रीं सर्वसम्पत्प्रदायै नमः नासामूले, दक्षसृक्किणि। ऐं ह्रीं श्रीं सर्वप्रियङ्कर्यै नमः वामनेत्रे, दक्षस्तने। ऐं ह्रीं श्रीं सर्वमङ्गलकारिण्यै नमः वामबाहूमूले, दक्षवृषणे। ऐं ह्रीं श्रीं सर्वकामप्रदायै नमः वामोरुमूले, सीविन्यादक्षभागे। ऐं ह्रीं श्रीं सर्वदुःखविमोचिन्यै नमः वामजानुनि, सिविन्या (दानों अण्ड के मध्य की शिरा) **वामभागे। ऐं ह्रीं श्रीं सर्वमृत्युप्रशमन्यै नमः दक्षजानुनि, वामस्तने। ऐं ह्रीं श्रीं सर्वविघ्ननाशिन्यै नमः गुदे, वामवृषणे। ऐं ह्रीं श्रीं सर्वाङ्गसुन्दर्यै नमः दक्षोरुमूले, वामसृक्किणि। ऐं ह्रीं श्रीं सर्वसौभाग्यदायिन्यै नमः दक्षबाहुमूले, वामनासापुटे। ऐं ह्रीं श्रीं ह्सैं ह्स्क्लीं ह्स्सौः सर्वार्थसाधक चक्रेश्वर्यै त्रिपुराश्रिये नमः हृदये।**

एताः कुलोत्तीर्ण योगिन्य सर्वार्थसाधके चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः॥

॥ सर्वरक्षाकरचक्र न्यासः॥

ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें सर्वरक्षाकर चक्राय नमः। व्यापक न्यास करें।

ऐं ह्रीं श्रीं सर्वज्ञायै नमः दक्षनासापुटे। ऐं ह्रीं श्रीं सर्वशक्त्यै नमः दक्षसृक्किणि (ओष्ठप्रान्ते)। **ऐं ह्रीं श्रीं सर्वैश्वर्यप्रदायिन्यै नमः दक्षस्तने। ऐं ह्रीं श्रीं सर्वज्ञानमय्यै नमः दक्षमुष्के। ऐं ह्रीं श्रीं सर्वव्याधिविनाशिन्यै नमः सीविन्यां दक्षभागे** (सिवनी = अण्डद्वय मध्यवर्तिनी शिरा) । **ऐं ह्रीं श्रीं सर्वाधारस्वरूपायै नमः वाममुष्के, सीविन्यां वामभागे। ऐं ह्रीं श्रीं सर्वपापहरायै नमः वामस्तने। ऐं ह्रीं श्रीं सर्वानन्दमय्यै नमः वामसृक्किणी। ऐं ह्रीं श्रीं सर्वरक्षास्वरूपिण्यै नमः वामनासापुटे। ऐं ह्रीं श्रीं सर्वप्सितफलप्रदे नमः नासाग्रे। ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें सर्वरक्षाकर चक्रेश्वर्यै त्रिपुरमालिन्यै नमः हृदि।**

एताः निगर्भ योगिन्यः सर्वरक्षाकर चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः॥

|| सर्वरोगहरचक्र न्यास:||

ऐं ह्रीं श्रीं ह्रीं श्रीं सौः सर्वरोगहर चक्राय नमः। व्यापक न्यास करें।

ऐं ह्रीं श्रीं अं आं........अं अः ब्लूं वशिनिवाग्देवतायै नमः दक्षचिबुके। ऐं ह्रीं श्रीं कं खं गं घं ङं क्ल् ह्रीं कामेश्वरी वाग्देवतायै नमः दक्षकण्ठे। ऐं ह्रीं श्रीं चं छं जं झं ञं न्व्लीं मोदिनीवाग्देवतायै नमः दक्षहृदय भागे। ऐं ह्रीं श्रीं टं ठं डं ढं णं य्लूं विमलावाग्देवतायै नमः नाभिदक्षभागे। ऐं ह्रीं श्रीं तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमः नाभिवामभागे। ऐं ह्रीं श्रीं पं फं बं भं मं ह्स्ल्व्यूं जयनिवाग्देवतायै नमः हृदयवामभागे। ऐं ह्रीं श्रीं यं रं लं वं झ्म्र्यूं सर्वेश्वरीवाग्देवतायै नमः वामकण्ठे। ऐं ह्रीं श्रीं शं षं सं हं लं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः वामचिबुके। ऐं ह्रीं श्रीं ह्रीं श्रीं सौः सर्वरोगहर चक्रेश्वर्यै त्रिपुरासिद्धायै नमः हृदि।

एताः रहस्य योगिन्यः सर्वरोहर चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः॥

|| आयुध न्यास:||

हृदि त्रिकोण विभाव्य। त्रिकोण के चारों ओर आयुध न्यास करें।

ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः सर्वजम्भनेभ्यो वाणेभ्यो नमः त्रिकोण पृष्ठे।

ऐं ह्रीं श्रीं धं सर्वसम्मोहनाय धनुषे नमः त्रिकोणदक्षे (स्ववामे)। **ऐं ह्रीं श्रीं ह्रीं सर्ववशीकरणाय पाशाय नमः** त्रिकोणाग्रे। **ऐं ह्रीं श्रीं क्रों सर्वस्तम्भनाय अङ्कुशाय नमः त्रिकोणवामे** (स्वदक्षभागे)।

|| सर्वसिद्धिप्रदचक्र न्यास:||

ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्लीं ह्सौः सर्वसिद्धिप्रदचक्राय नमः। व्यापक न्यास करें।

हृदय में जो त्रिकोण की कल्पना की थी वहीं न्यास करें।

ऐं ह्रीं श्रीं कएईलह्रीं कामरूपपीठस्थायै महाकामेश्वर्यै नमः त्रिकोणाग्रकोणे। ऐं ह्रीं श्रीं हसकहलह्रीं पूर्णागिरिपीठस्थायै महावज्रेश्वर्यै नमः तद्दक्षकोणे।

ऐं ह्रीं श्रीं सकलह्रीं जालंधरपीठस्थायै महाभगमालिन्यै नमः तद्वामकोणे।

ऐं ह्रीं श्रीं मूलमन्त्रं ओड्याणपीठस्थायै महात्रिपुरसुन्दर्यै नमः तन्मध्ये।

हृदय में षोडशी की नित्याओं का उनके नाम से या मन्त्र सहित षोडश स्वरों से न्यास करें।

अं (कामेश्वरी नित्या मन्त्र) कामेश्वरी नित्यायै नमः।

आं भगमालिनि नित्यायै नमः। इं नित्यक्लिन्नायै नमः। ईं भेरुण्डायै नमः। उं वह्निवासिन्यै नमः। ऊं महावज्रेश्वर्यै नमः। ऋं शिवदूत्यै नमः। ॠं त्वरितायै नमः। लृं कुलसुन्दर्यै नमः। ॡं नित्यनित्यायै नमः। एं नीलपताकायै नमः। ऐं विजयायै नमः। ओं सर्वमङ्गलायै नमः। औं ज्वालामालिन्यै नमः। अं चित्रायै नमः। अः ललिता महानित्यायै नमः।

मूलमन्त्र से हृदय में **महात्रिपुरसुन्दर्यै नमः।**

ऐं ह्रीं श्रीं ह्स्रैं ह्स्क्लीं ह्स्रौः सर्वसिद्धिप्रद चक्रेश्वर्यै त्रिपुराम्बायै नमः हृदि।

एताः अतिरहस्य योगिन्यः सर्वसिद्धिपद्रे चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः ॥

॥ सर्वानन्दमयचक्र न्यासः॥

ऐं ह्रीं श्रीं मूलं सर्वानन्दचक्राय नमः। व्यापक न्यास करें।

ऐं ह्लीं श्रीं मूलं श्रीललितायै नमः हृदि। ऐं ह्लीं श्रीं मूलं सर्वानन्दमय चक्रेश्वर्यै श्रीललितायै नमः हृदि।

एताः परापरातिरहस्य योगिनी सर्वानन्दमये चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वाः न्यस्तास्सन्त्विति हृदये चक्रसमर्पणं न्यस्यः ॥

देवि को योनिमुद्रा से प्रणाम करें। कराङ्गन्यासादि करें।

॥ अथ हादिविद्यान्यास ध्यानानि ॥

विनियोग – अस्य हादिपञ्चदशी श्रीविद्यामहामन्त्रस्य दक्षिणामूर्ति ऋषिः, पंक्ति छन्दः, श्रीदेवीभूषितोत्सङ्ग, श्रीकामेश्वरी देवता हसकल ह्रीं बीजं, सकल ह्रीं शक्तिं, हसकहलह्रीं कीलकं, श्रीदेविभूषितो श्रीकामेश्वर देवता प्रीत्यर्थे जपे विनियोगः।

॥ अथ न्यास :॥

मन्त्र	कराङ्गन्यास	हृदयादिन्यास
हसकल ह्रीं सर्वज्ञताशक्ति धाम्ने	अंगुष्ठाभ्यां नमः।	हृदयाय नमः।
हसकहल ह्रीं नित्यतृप्तिशक्ति धाम्ने	तर्जनीभ्यां नमः।	शिरसे स्वाहा।
सकल ह्रीं अनादिबोधेशक्ति धाम्ने	मध्यमाभ्यां नमः।	शिखायै वषट्।
हसकल ह्रीं स्वतन्त्रता शक्ति धाम्ने	अनामिकाभ्यां नमः।	कवचाय हुम्।
हसकहल ह्रीं नित्यमलुप्तशक्ति धाम्ने	कनिष्ठिकाभ्यां नमः।	नेत्रत्रयाय वौषट्।
सकल ह्रीं अनन्तशक्ति धाम्ने	करतलकरपृष्ठाभ्यां नमः।	अस्त्राय फट्।

॥ ध्यानम् ॥

श्रीदेविभूषितोत्सङ्ग सान्द्रसिन्दूररोचिषम् ।
हकारादिमनोर्वाच्यं वन्दे कामेश्वरं हरम् ॥
उद्यद्दिनकरप्रख्यं जपाकुसुमसन्निभम् ।
नवरत्नसमायुक्तं मुकुटेन विराजिताम् ॥
चतुर्बाहुमुदाराङ्ग मोहयन्तं जगत्त्रयम् ।
श्रीदेवीभूषितोत्सङ्गं ध्यायेत् परशिवं प्रभुम् ॥
एवं ध्यायेन्महादेवं भुक्तिमुक्ति फलप्रदम् ।

॥ अथ श्रीबाला मन्त्रः॥

मन्त्र – ऐं क्लीं सौः।

विनियोग – अस्य श्रीबाला त्रिपुरसुन्दरी मन्त्रस्य दक्षिणामूर्ति ऋषिः, पंक्ति छन्दः, श्रीबालात्रिपुरसुन्दरी देवता, ऐं बीजं, सौः शक्तिः, क्लीं कीलकं श्रीबालात्रिपुरसुन्दरी देवता प्रीत्यर्थे जपे विनियोगः।

ऋषिन्यास – दक्षिणामूर्ति ऋषये नमः शिरसि, पंक्ति छन्दसे नमः मुखे, श्रीबालात्रिपुरसुन्दरी देवतायै नमः हृदये, ऐं बीजाय नमः गुह्ये, सौः शक्तये नमः पादयोः, क्लीं कीलकाय नमः नाभौ, विनियोगाय नमः सर्वाङ्गे।

कराङ्गन्यास – ऐं अंगुष्ठाभ्यां नमः। क्लीं तर्जनीभ्यां नमः। सौः मध्यमाभ्यां नमः। ऐं अनामिकाभ्यां नमः। क्लीं कनिष्ठिकाभ्यां नमः। सौः करतलकरपृष्ठाभ्यां नमः।

षडङ्गन्यास – ऐं हृदयाय नमः। क्लीं शिरसे स्वाहा। सौः शिखायै वषट्। ऐं कवचाय हुम्। क्लीं नेत्रत्रयाय वौषट्। सौः अस्त्राय फट्।

॥ ध्यानम् ॥

अरुणकिरणजालै रंजितासावकाशा
विधृतजपवटीका पुस्तकाभीतिहस्ता।
इतरकरवराढ्या फुल्लकल्हारसंस्था
निवसतु हृदि बाला नित्यकल्याणशीला ॥१॥

ऐंकाराङ्कितगर्भितानलशिखाः सौः क्लीं कलांबिभ्रतीम्।
सौवर्णाम्बुजधारिणींवरधरां धाराधराङ्गोज्जवलाम्॥
वन्दे साङ्कुश पाशपुस्तकधरां स्त्रग्भासितोद्यत्कराम्।
तां बालां त्रिपुरां पदत्रयतनु षट्चक्रसंचारिणीम् ॥२॥

मालासृणी पुस्तक पाशहस्तां, बालाम्बिकां श्रीललितां कुमारीम्।
कुमारकामेश्वर केलिलोलां, नमामि गौरीं नववर्ष वेषाम् ॥३॥

॥ इति ॥

॥ अथ श्रीयन्त्रस्य वृत्तत्रय पूजनम् ॥

षोडशदल व भुपूर के मध्य में तीन वृत्त बनाये जाते हैं। संप्रदाय भेद से उनके पूजन क्रम में भी भेद हैं।

(१) हयग्रीव सम्प्रदाय के अनुसार त्रिवृत्त में पूजन का उल्लेख नहीं है।

(२) आनन्दभैरव सम्प्रदाय में तीन वृत्त बनाये जाते हैं किन्तु उनके पूजन का उल्लेख नहीं है।

(३) दक्षिणामूर्ति सम्प्रदाय में तीन वृत्त बनाये जाते हैं तथा उनके पूजन का क्रम भी है।

ॐ ऐं ह्रीं श्रीं त्रिवर्गसाधक चक्राय नमः।

संहारक्रम में शुक्ल, अरुण एवं कृष्णवर्ण की वृत्तरेखाओं का पूजन करें।

संहारक्रमेण शुक्लारुणकृष्णवर्ण रेखात्रयस्य मायाबीज प्रकृतिकस्य गुण प्रकृति परादिवागात्मकस्य प्रथमवृत्तरेखायां देव्यग्रमारभ्या प्रादक्षिण्येन।

देवता के नाम से पहले (४ अर्थात्) **"ॐ ऐं ह्रीं श्रीं"** तथा पश्चात् (श्री० अर्थात्) **"श्रीपादुकां पूजयामि"** जोड़कर अर्चना करें।

१. ॐ ऐं ह्रीं श्रीं कं कालरात्रि श्रीपादुकां पूजयामि। २. ४ खं खण्डिता श्री०। ३. ४ गायत्री श्री०। ४. ४ घण्टाकर्णी श्री०। ५. ४ ङ ङार्णा श्री०। ६. ४ चं चण्डा श्री०। ७. ४ छं छाया श्री०। ८. ४ जं जया श्री०। ९. ४ झं झङ्कारिणी श्री०। १०. ४ ञं ज्ञानरूपा श्री०। ११. ४ टं टङ्कहस्ता श्री०। १२. ४ ठं ठङ्कारिणी श्री०। १३. ४ डं डामरी श्री०। १४. ४ ढं ढङ्कारिणी श्री०। १५. ४ णं णार्मा श्री०। १६. ४ तं तामसी श्री०। १७. ४ थं स्थाण्वी श्री०। १८. ४ दं दाक्षायणी श्री०। १९. ४ धं धात्री श्री०। २०. ४ नं नारी श्री०। २१. ४ पं पार्वती श्री०। २२. ४ फं फट्कारिणी श्री०। २३. ४ बं बंधिनी श्री०। २४. ४ भं भद्रकाली श्री०। २५. ४ मं महामाया श्री०। २६. ४ यं यशस्विनी श्री०। २७. ४ रं रक्ता श्री०। २८. ४ लं लम्बोष्ठी श्री०। २९. ४ वं वरदा श्री०। ३०. ४ शं श्री०। ३१. ४ षं षण्ढा श्री०। ३२. ४ सं सरस्वती श्री०। ३३. ४ हं हंसवती श्री०। ३४. ४ क्षं क्षमवती।

द्वितीय वृत्त रेखायां अप्रादक्षिण्य क्रमेण -

१. अं अमृता श्री०। २. ४ आं आकर्षिणी श्री०। ३. ४ इं इन्द्राणी श्री०। ४. ४ ईं ईशानी श्री०। ५. ४ उं उमा श्री०। ६. ४ ऊं ऊर्ध्वकेशी श्री०। ७. ४ ऋं ऋद्धिदा श्री०। ८. ४ ॠं ॠकारा श्री०। ९. ४ लृं लृकारा श्री०। १०. ४ लॄं लॄकारा श्री०। ११. ४ एं एकपदा श्री०। १२. ४ ऐं ऐश्वर्यात्मिका श्री०। १३. ४ ओं ओङ्कारा श्री०। १४. ४ औं औषधि श्री०। १५. ४ अं अम्बिका श्री०। १६. ४ अः अक्षरा श्री०।

तृतीय वृत्त रेखायां प्रादक्षिण्य क्रमेण -

१. ४ अं कामेश्वरी श्री०। २. ४ आं भगमालिनी श्री०। ३. ४ इं नित्यक्लिन्ना श्री०। ४. ४ ईं भेरुण्डा श्री०। ५. ४ उं वह्निवासिनी श्री०। ६. ४ ऊं महावज्रेश्वरी श्री०। ७. ४ ऋं शिवदूति श्री०। ८. ४ ॠं त्वरिता श्री०। ९. ४ लृं कुलसुन्दरी श्री०। १०. ४ लॄं नित्या श्री०। ११. ४ एं नीलपताका श्री०। १२. ४ ऐं विजया श्री०। १३. ४ ओं सर्वमङ्गला श्री०। १४. ४ औं ज्वालामालिनी श्री०। १५. ४ अं चित्रा श्री०। १६. ४ अः ललितामहानित्या श्री०। १७. ४ कामेश्वरी श्री०।

एता मातृका योगिन्यः त्रिवर्ग साधकचक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारै संपूजिता संतर्पिता सन्तुष्टा संत्विति तासां समष्ट्यर्चनं विधाय कालरात्र्याः पुरतः ऐं ह्रीं श्रीं त्रिपुरेशिनी चक्रेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः।

गं गरिमा सिद्धि श्रीपादुकां पूजयामि तर्पयामि नमः। ऐं महायोनिमुद्राशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः। ऐं महायोनि मुद्रा प्रदर्श्य -

श्रीचक्र पूजनः- संहार क्रम में यह द्वितीय आवरण पूजा क्रम होगा।

अभिष्ट सिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

इस रीति से सर्वाशापरिपूरक चक्र तृतीय आवरण होगा। पश्चात् शेष आवरणों की पूजा कर, दशावरण पूजा का संपादन करें।

अन्तश्चक्रन्यासेऽपि (वृत्त पूजने)

ॐ ऐं ह्रीं श्रीं त्रिवर्गसाधक चक्राधिष्ठात्र्यै कालरात्र्यादि सहित मातृका योगिनी रूपायै त्रिपुरेशिनी देव्यै नमः।

॥ इति त्रिवृत्तार्चनम् ॥

॥ अथ श्रीललिताया चतुःषष्ट्युपचारपूजाः॥

नवदुर्गा दशमहाविद्या रहस्य अनु० प्रकाशः भाग ३ में श्रीमहादुर्गा की वृहत् ६४ उपचारों से सश्लोक पूजा दी गई है। यहां श्रीललिता की ६४ भावोपचार पूजा दी गई है। जो वस्तु द्रव्य उपलब्ध हो उसे भगवती के चढ़ावें एवं जो वस्तु द्रव्य उपलब्ध नहीं हो उसकी भावना करके अक्षत पुष्प चढ़ावें।

ऐं ह्रीं श्रीं श्रीललितायै पाद्यं निवेदयामि (कल्पयामि) नमः।

मानसिक पूजन करें तो केवल "**कल्पयामि नमः**" प्रत्येक उपचार के साथ कहें।

ऐं ह्रीं श्रीं आभरणावरोपणं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं सुगंधितैलाभ्याङ्गं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं मज्जनशाला प्रवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै मज्जनशालामणि पीठोपवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं दिव्यस्नानीयोद्वर्त्तनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै उष्णोदक स्नानं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कनककलशाच्युत स्नानं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै सकलतीर्थाभिषेकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै धौतवस्त्रपरिमार्जनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै अरुणदुकूलपरिधानं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै अरुणकुचोत्तरीयं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै आलेपमण्डल प्रवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै आलेपमण्डलमणिपीठोपवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै दिव्यगंध सर्वाङ्गीण विलेपनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै केशभारस्य कालागरुधूपं घ्रापयामि निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कुसुममाला निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै भूषणमण्डप प्रवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै भूषण मण्डप मणिपीठोपवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै नवमणिमुकुटं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै चन्द्रशकलं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै सीमन्त सिन्दूरं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै तिलकरत्नं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कालाञ्जनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै वालीयुगल निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै मणिकुण्डल युगलं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै नासाभरणं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै अधरयावकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै माङ्गल्यसूत्रं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कनकचिन्ताकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै पदकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै महापदकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै मुक्तावलिं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै एकावलिं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै छन्नवीरं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै केयूरयुगलचतुष्टयं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै वलयावलिं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै ऊर्मिकावलिं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै काञ्चीदाम निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कटिसूत्रं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै सौभाग्याभरणं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै पादकटकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै

रत्ननूपुरं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै पादाङ्गुलीयकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै एककरेपाशं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै अन्यकरे अङ्कुशं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै इतरकरे पुण्ड्रेक्षुचापं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै अपरकरे पुष्पबाणान् निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै श्रीमन्माणिक्य पादुके निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै स्वसमानवेषाभिरावरण देवताभिः सह महाचक्राधिरोहणं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कामेश्वराङ्कपर्यङ्कोपवेशनं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै अमृतासवचषकं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै आचमनीयं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै कर्पूरवीटिकां (एला, लवंग, कर्पूर, कस्तूरी, केसर, जायफल, सुपारी, लौंग एवं पानपत्र) निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै आनन्दोल्लास विलासहासं निवेदयामि (कल्पयामि) नमः।

॥ अथ मङ्गलारार्तिकम् ॥

कलधौतादिभाजने कुङ्कुम चन्दनादि लिखितस्याष्ट षट्चतुर्दलाद्यन्यतमस्य कमलस्य चन्द्राकार चरुगोलकवत्यां चणक मुद्गजुषि वा कर्णिकायां दलेषु च पयः शर्करापिण्डीकृत यवगोधूमादिपिष्टो पादानकानि त्रिकोणशिरस्कडमर्वाकृतीनि चतुरङ्गलोत्सेधानि घृतपाचितानि नवसप्तपञ्चान्य तम संख्यानि दीपपात्राणि निधाय तेषु गोघृतं कर्षप्रमितं (१ तोला) आपूर्य कर्पूरगर्भिता वर्तिका हृल्लेखया (ह्रीं मन्त्र से) प्रज्वाल्य ऐं ह्रीं श्रीं श्रीं ह्रीं ग्लूं स्लूं म्लूं प्लूं न्लूं ह्रीं श्रीं - इति नवाक्षर्या रत्नेश्वरी विद्यया अभिमन्त्र्य चक्रमुद्रां प्रदर्श्य मूलेनाभ्यर्च्य।

ऐं ह्रीं श्रीं जगद्ध्वनिमन्त्रमातः स्वाहा- इति मंत्र पूर्वकं गंधाक्षतादिना घण्टां संपूज्य तां वादयन् जानुचुम्बितभूतल तत्पात्रं आमस्तकमुद्धृत्य।

ऐं ह्रीं श्रीं श्रीललितायै मङ्गलारार्तिकं कल्पयामि नमः॥

समस्त चक्र चक्रेशीयुते देवी नवात्मिके ।
आरार्तिकमिदं तुभ्यं गृहाण मम सिद्धये ॥

इति नववारं श्रीदेव्या आचूडं आरणाब्जं परिभ्राम्य दक्षभागे स्थापयेत्।

प्रात:कालीन आरार्ति मङ्गला आरती कहलाती है। पश्चात् नैवेद्यादि अर्पण के बाद की आरती महाआरती कहलाती है।

ऐं ह्रीं श्रीं श्रीललितायै छत्रं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै चामरयुगलं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै दर्पणं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै तालवृन्तं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै गंधं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै पुष्पं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै धूपं निवेदयामि (कल्पयामि) नमः। ऐं ह्रीं श्रीं श्रीललितायै दीपं निवेदयामि (कल्पयामि) नमः।

॥ अथ नैवेद्यम् ॥

देव्याः पुरतः स्वदक्षिणे चतुरस्त्र मण्डलं निर्माय तत्र आधारोपरि नैवेद्यं निधाय मूलेन प्रोक्ष्य, वं इति धेनुमुद्रया अमृतीकृत्य मूलेन त्रिवारं अभिमन्त्र्य आपोशनं दत्वा।

ऐं ह्रीं श्रीं श्रीललितायै नैवेद्यं निवेदयामि (कल्पयामि) नमः। अथ श्रीललिता पानीयं उत्तरापोशनं हस्तप्रक्षालनं

गण्डूषं आचमनीयं ताम्बूलञ्च निवेदयेत् वा कल्पयेत्।

ऐं ह्रीं श्रीं द्रां द्रीं क्लीं ब्लूं सः क्रों ह्स्ख्फ्रें ह्सौः ऐं इति संर्वसंक्षोभिण्यादि नवमुद्रा प्रदर्शयेत्।

षोडश्युपासकास्तु हस्त्रैं ह्स्क्लरीं ह्सौः इति त्रिखण्डामपि प्रदर्शयेयुः।

॥ चतुरायतन पूजा ॥

नित्योत्सवे तु तत्तद् देवतामन्त्रैः तर्पणमात्रमेव । विस्तरेणापि लिख्यते यथेच्छं विधेयम् । नैऋते च गणेशानं सूर्यं वायव्य एव च । ईशाने विष्णुमाग्नेये शिवं चैव प्रपूजयेत् ॥

विशेष उत्सव में प्रत्येक देवता की विशेष मन्त्रों से पूजा करें। नित्योत्सव में साधारण पूजा करें।

॥ षडाधार पूजा ॥

ऐं ह्रीं श्रीं सां हंसः मूलाधाराधिष्ठान देवतायै साकिनी सहित गणनाथ स्वरूपिण्यै नमः। गणनाथस्वरूपिण्यम्बा श्री पादुकां पूजयामि तर्पयामि नमः।

ऐं ह्रीं श्रीं कां सोऽहं स्वाधिष्ठानाधिष्ठान देवतायै काकिनी सहित ब्रह्मस्वरूपिण्यै नमः। ब्रह्मस्वरूपिण्यम्बा श्री पा. पू. त. नमः।

ऐं ह्रीं श्रीं लां हंसोस्सोऽहं मणिपूरकाधिष्ठान देवतायै लाकिनी सहित विष्णुस्वरूपिण्यै नमः। विष्णुस्वरूपिण्यम्बा श्री पा. पू. त. नमः।

ऐं ह्रीं श्रीं रां हंसश्शिवस्सोऽहं अनाहताधिष्ठान देवतायै राकिनी सहित सदाशिवस्वरूपिण्यै नमः। सदाशिवस्वरूपिण्यम्बा श्री पा. पू. त. नमः।

ऐं ह्रीं श्रीं डां सोऽहं हंसशिवः विशुद्ध्यधिष्ठान देवतायै डाकिनी सहित जीवेश्वरस्वरूपिण्यै नमः। जीवेश्वरस्वरूपिण्यम्बा श्री पा. पू. त. नमः।

ऐं ह्रीं श्रीं हां हंसश्शिवस्सोऽहं सोहं हंसश्शिव आज्ञाधिष्ठान देवतायै डाकिनी सहित परमात्मस्वरूपिण्यै नमः। परमात्मस्वरूपिण्यम्बा श्री पा. पू. त. नमः।

॥ आम्नायसमष्टि पूजा ॥

ऐं ह्रीं श्रीं ह्सैं ह्स्क्लीं ह्स्त्रौं पूर्वाम्नाय समय विद्येश्वर्युग्मोदिनी देव्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

ऐं ह्रीं श्रीं ॐ ह्रीं ऐं क्लिन्ने क्लिन्नमदद्रवेकुल ह्सौः। दक्षिणाम्नाय समयविद्येश्वरी भोगिनी देव्याम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

ऐं ह्रीं श्रीं ह्सैं ह्स्त्रीं ह्स्त्रौं ह्स्ख्फ्रें भगवत्यम्बे हसक्षमलवरयू ह्स्ख्फ्रें अघोरमुखि छ्रीं छ्रीं किणि किणि विच्चे ह्स्त्रौः ह्स्ख्फ्रें ह्स्त्रौः। पश्चिमाम्नाय समयविद्येशेश्वरी कुब्जिकादेव्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

ऐं ह्रीं श्रीं ह्स्ख्फ्रें महाचण्डयोगेश्वरि कालिके फट्। उत्तराम्नाय समय विद्येश्वरी कालिकादेव्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

षोडश्युपासकानां विशेष -

ऐं ह्रीं श्रीं मखपरयघच् महिचनडयङगंशफर उर्ध्वाम्नाय समयविद्येश्वर्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

ऐं ह्रीं श्रीं भगवति विच्चे महामाये मातङ्गिनि ब्लूं अनुत्तर वाग्वादिनी हस्ख्फ्रें हस्ख्फ्रें ह्स्त्रौः। अनुत्तर शाङ्कर्यम्बा श्रीपादुकां पूजयामि तर्पयामि नमः।

॥ अथ दण्डनाथा एवं मन्त्रिणी नामानि ॥

श्रीत्रिपुरसुन्दरी की दण्डिनी शक्ति **वाराही वार्त्ताली** है तथा मन्त्रिणी शक्ति **भगवति मातंगी** है। उनकी विविध नामों से पूजा करें।

॥ दण्डनाथानामानि ॥

ॐ पञ्चम्यै नमः। ॐ दण्डनाथायै नमः। ॐ संकेतायै नमः। ॐ समयेश्वर्यै नमः। ॐ समयसङ्केतायै नमः। ॐ वाराह्यैनमः। ॐ पोत्रिण्यै नमः। ॐ शिवायै नमः। ॐ वार्त्तात्यै नमः। ॐ महासेनायै नमः। ॐ आज्ञाचक्रेश्वर्यै नमः। ॐ अरिघ्न्यै नमः।

॥ मन्त्रिणी नामानि ॥

८. **महावाक्यम् - प्रज्ञानं ब्रह्म। अहं ब्रह्मास्मि। तत्त्वमसि। अयमात्मा ब्रह्म। महावाक्याम्बा पा. पू. त. नमः।**

९. **शिव** -

(क) ॐ नमः शिवाय। शिवपञ्चाक्षर्याम्बा पा. पू. त. नमः।

(ख) ॐ ह्रीं नमः शिवाय। शिवपञ्चाक्षर्याम्बा पा. पू. त. नमः।

१०. तारक -

(क) ॐ।

(ख) ॐ ह्रीं।

११. **ईशान - ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपति र्ब्रह्मणोधिपति र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्।**

मन्त्रातीत स्वरूपायानुग्रहकर्त्रे सदाशिवाय नमः।

१२. **मखपरयघच् महिचनचडयङ्गंशफर्। उर्ध्वाम्नाय समय विद्येश्वर्यम्बा श्रीमूलमन्त्रम् श्रीमन्मालिनि मन्त्रराज गुरुमण्डल सहितायै पराम्बादि समय विद्येश्वरी पर्यन्त अशीतिसहस्त्र देवता परिसेवितायै शांभवपीठ स्थितायै उर्ध्वाम्नाय समष्टिरूपिण्यै श्रीमहात्रिपुरसुन्दर्यै नमः। श्रीमहात्रिपुरसुन्दरी पराभट्टारिकां श्री पदुकां पूजयामि नमः।**

॥ इति उर्ध्वाम्नायः॥

॥ अथ अनुत्तराम्नाय मन्त्राः॥

॥ गुरुमण्डल॥

१. **महापादुका - ऐं ह्रीं श्रीं ऐं क्लीं सौः ऐं ग्लौं ह्स्ख्फ्रे हसक्षमलवरयूं सहक्षमलवरयीं ह्सौः स्हौः। श्रीविद्यानन्द -नाथात्मक चर्यानन्दनाथ श्री पा. पू. त. नमः।**

२. **संप्रदाय पादुका - श्रीं ह्रीं क्लीं अमृतवर्षिणी पादुका परमेश्वरी वौषट्। संप्रदाय श्री पा. पू. त. नमः।**

३. कादिविद्या गुरुपरम्परा की सभी नामावलियों से पूर्व ''ऐं ह्रीं श्रीं'' तथा नाम के पश्चात् **पादुकां पूजयामि तर्पयामि** कहें। यथा -

ऐं ह्रीं श्रीं परप्रकाशानन्दनाथ श्री पा. पू. त. नमः। परशिवानन्दनाथ, पराशक्त्याम्बा, कौलेश्वरानन्दनाथ,

शुक्लदेव्यम्बा, कुलेश्वरानन्दनाथ, कामेश्वर्यम्बा, भोगानन्दनाथ, क्लिन्नानन्दनाथ, समयानन्दनाथ, सहजानन्दनाथ, गगनानन्दनाथ, विश्वानन्दनाथ, विमलानन्दनाथ, मदनानन्दनाथ, भुवनानन्दनाथ, लीलाम्बा, स्वात्मानन्दनाथ, प्रियानन्दनाथ।

४. कामराज चरणाः –

१. ऐं ह्रीं श्रीं योऽहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्माहमास्मि सोहं स्वच्छप्रकाश परिपूर्ण परापरमहाप्रकाश परिपूर्णानन्दनाथ पा. पू. त. नमः।

२. ऐं कएईल ह्रीं हंसः रक्तचरण पा. पू. त. नमः।

३. ऐं कएईल ह्रीं हंसः रक्तचरणाम्बा पा. पू. त. नमः।

४. क्लीं हसकहल ह्रीं सोहं शुक्लचरण पा. पू. त. नमः।

५. क्लीं हसकहल ह्रीं सोहं शुक्लचरणाम्बा पा. पू. त. नमः।

६. सौः सकल ह्रीं हंसः सोहं मिश्रचरण पा. पू. त. नमः।

७. सौः सकल ह्रीं हंसः सोहं मिश्रचरणाम्बा पा. पू. त. नमः।

८. ऐ कएईल ह्रीं क्लीं हसकहल ह्रीं सौः सकल ह्रीं हंस सोहं निर्वाणचरण पा. पू. त. नमः।

९. ऐ कएईल ह्रीं क्लीं हसकहल ह्रीं सौः सकल ह्रीं हंस सोहं निर्वाणचरणाम्बा पा. पू. त. नमः।

॥ देवता ॥

१. पञ्चाम्बा – ऐं ह्रीं श्रीं आदिनाथ व्योमातीताम्बा पा. पू. त. नमः। ऐं ह्रीं श्रीं आदिनाथ व्योमेश्वर्यम्बा पा. पू. त. नमः। ऐं ह्रीं श्रीं अनामयानंदनाथ व्योममाम्बा पा. पू. त. नमः। ऐं ह्रीं श्रीं अनंतानंदनाथ व्योमचारिण्यम्बा पा. पू. त. नमः। ऐं ह्रीं श्रीं चिदाभासव्योमस्थाम्बा पा. पू. त. नमः।

२. नवनाथ – हं उन्मयाकाशानन्दनाथ पा. पू. त. नमः। सं समाकाशानन्दनाथ पा. पू. त. नमः। व्यापकानन्दनाथ पा. पू. त. नमः। शक्त्याकाशानन्दनाथ पा. पू. त. नमः। लं ध्वन्याकाशानन्दनाथ पा. पू. त. नमः। वं ध्वनिमात्राकाशानन्दनाथ पा. पू. त. नमः। रं इन्द्राकाशानन्दनाथ पा. पू. त. नमः। यं चिदाकाशानन्दनाथ पा. पू. त. नमः ॐ व्यस्ताकाशानन्दनाथ पा. पू. त. नमः। हसक्षमलवरय ॐ समस्ताकाशानन्दनाथ पा. पू. त. नमः।

३. मूलविद्या

(क) ह्रीं स्वच्छ प्रकाश परिपूर्ण परापर महासिद्धविद्या कुलयोगिनि ह्रीं।

(ख) प्रसादपरा विद्या – ह्सौः स्वात्मानं बोधय बोधय स्हौः।

(ग) अतिरहस्य योगिनि – ऐं ब्लूं क्लिन्ने क्लेदिनि महामदद्रवे क्लीं क्लेदय क्लां क्लीं मोहय मोहय क्लीं नमः स्वाहा।

(घ) शांभवीविद्या – हंसः स्वच्छप्रकाश परिपूर्णानन्द परमहंस महात्मने स्वाहा ह्सौः ह्स्क्ष्मय्रं।

(ङ) हृल्लेखा विद्या – ह्रीं नित्यस्फुरण चैतन्यानन्दमयी महाबिन्दुव्यापक मातृकारूपिणी ऐं ह्रीं श्रीं ईं।

(च) समयविमलामूलविद्या – **ऐं ह्रीं श्रीं स्वच्छप्रकाशात्मिके ह्रीं कुलमहामालिनि ऐं कुलमातृके ह्रीं ऐं समयविमले श्रीं।**

(छ) परबोधिनीमूलविद्या – **हंसः स्वच्छप्रकाश परिपूर्ण परापर महाप्रकाशात्मिके कुलकुण्डलिनि आज्ञासिद्धि महाभैरवि आत्मानं बोधय बोधय अम्बे भगवति ह्रीं हुं।**

(ज) कौलपंचाक्षरीमूलविद्या – **ॐ मोक्षं कुरु कुरु।**

(झ) चैतन्यमूलविद्या – **हसकल ह्रीं हसकहल ह्रीं सकल ह्रीं।**

(ञ) अनुत्तर विद्या – **ऐं शुद्ध सूक्ष्म निराकार निर्विकल्प परब्रह्मस्वरूपिणी क्लीं परमानन्द शक्तिः सौः। शांभवानंदनाथानुत्तर कौलिनी मूलविद्याम्बा पा. पू. त.।**

(ट) विमर्शिनीविद्या – **हंसः सोहं स्वच्छानन्द परमहंस परमात्मने सवाहा। गुरूत्तम विमर्शिनी मूलविद्याम्बा पा. पू. त. नम.।**

(ठ) अनामाख्यमूलविद्या – **अनामाख्य व्योमातीतानन्दनाथ परापर व्योमातीत व्योमेश्वर्यम्बायै नमः।**

(ड) संकेतसार विद्या – **ऐं ईं ॐ।**

(ढ) अनुत्तर वाग्वादिनी विद्या – **ह्रीं भगवति विच्चे वाग्वादिनी क्लीं महाहृदय मातङ्गिनि ऐं क्लिन्ने ब्लूं स्त्रीं।**

४. **पंचदशाक्षरी – क ए ई ल ह्रीं हसकहल ह्रीं सकल ह्रीं।**

५. **महाषोडशी – श्रीं ह्रीं क्लीं ऐं सौः ॐ ह्रीं श्रीं क ए ई ल ह्रीं हसकहल ह्रीं सकल ह्रीं सौः ऐं क्लीं ह्रीं श्रीं।**

६. **मूर्तिविद्या – हसकल हसकहल सकल ह्रीं सर्वानन्दमय वैन्दवचक्रे परब्रह्मस्वरूपिणी परामृतशक्ति सर्वमंत्रेश्वरि सर्वयंत्रेश्वरि सर्वतंत्रेश्वरि सर्ववीरेश्वरी सर्वयोगीश्वरी सकलजगदधिष्ठान देवतायै श्रीमहामूर्ति विद्यायै नमः।**

७. **षडाधार मनु –**

(क) गणनाथरूपिण्यकाम्बा – **सां हंसः मूलाधार अधिष्ठान देवतायै साकिनी सहित गणनाथ स्वरूपिण्यै नमः।**

(ख) ब्रह्मरूपिणी – **कां सोऽहं स्वाधिष्ठान अधिष्ठान देवतायै काकिनी सहित ब्रह्मस्वरूपिण्यै नमः।**

(ग) विष्णुरूपिणी – **लां हंसः सोऽहं मणिपूरक अधिष्ठान देवतायै लाकिनी सहित विष्णुस्वरूपिण्यै नमः।**

(घ) सदाशिवरूपिणी – **रां हंसश्शिवस्सोऽहं अनाहताधिष्ठान देवतायै राकिनी सहित सदाशिवस्वरूपिण्यै नमः।**

(ङ) जीवेश्वर रूपिणी – डां सोऽहं हंसः शिव विशुद्ध्यधिष्ठान देवतायै डाकिनी सहित जीवेश्वर स्वरूपिण्यै नमः।

(च) परमात्मरूपिणी – **हां हंसशिवस्सोऽहं सोहं हंसः शिवः आज्ञाधिष्ठान देवतायै हाकिनी सहित परमात्म**

स्वरूपिण्यै नमः।

८. चरणविद्या -

(क) चरणविद्या - ऐं क्लीं सौः श्रीं ह्रीं क्लीं क ए ई ल ह्रीं हसकहल ह्रीं सकल ह्रीं हसकल ह्रीं हसकहल ह्रीं सकल ह्रीं हसकल ह्रीं हसकहल सकल ह्रीं क्लीं ह्रीं श्रीं श्रीं सौः क्लीं श्रीं ह्रीं ऐं प्रकाशचरणाभ्यां नमः।

(ख) ऐं क्लीं सौः श्रीं ह्रीं क्लीं क ए ई ल ह्रीं हसकहल ह्रीं सकल ह्रीं हसकल ह्रीं हसकहल ह्रीं सकल ह्रीं हसकल हसकहल सकल ह्रीं क्लीं ह्रीं श्रीं श्रीं सौः क्लीं श्रीं ह्रीं ऐं विमर्शचरणाभ्यां नमः।

९. भगवति विच्चे महामाये मातङ्गिनि ब्लूं अनुत्तरवाग्वादिनि ह्स्ख्फ्रें ह्स्ख्फ्रें ह्सौः। अनुत्तरशाङ्कर्यम्बा पा. पू. त. नमः।

ऐं ह्रीं श्रीं परिपूर्णानन्दनाथादि नवनाथ सहितायै चतुर्दश मूलविद्यादि अनुत्तर शाङ्कर्यनन्तान्त देवता परिसेवितायै अनुत्तर आम्नाय समष्टिरूपिण्यै श्रीमहात्रिपरसुन्दर्यै नमः। श्रीमहात्रिपुरसुन्दरी पराभट्टारिका श्री पा. पू. त. नमः।

॥ इति अनुत्तराम्नाय ॥

॥ इति षडाम्नाय पूजा प्रयोगम् ॥

॥ अथ श्रीचक्रपूजायां त्रिपुरसुन्दरी महाध्यानम् ॥

ततो ध्यानं प्रवक्ष्यामि त्रिदशैः सेवनीयम्।
ततः पद्मनिभां देवीं बालार्ककिरणारुणाम्।
जपा कुसुमसंकाशां दाडिमी कुसुमोपमाम् ॥१॥

पद्मरागप्रतीकाशां कुंकुमोदर संनिभाम्। स्फुरन्मुकुट माणिक्य किङ्किणीजाल मण्डिताम् ॥२॥
कालालिकुल संकाश कुटिलालक पल्लवाम्। प्रत्यग्रारुण संकाश वदनाम्भोज मण्डलाम् ॥३॥
किञ्चिदर्धेन्दु कुटिल ललाट मृदुपट्टिकाम्। पिनाकधनुराकार भ्रूलतां परमेश्वरीम् ॥४॥
आनन्द मुदितोल्लोल लीलान्दोलित लोचनाम्। स्फुरन्मयूख सङ्घात विलसद्धेम कुण्डलाम् ॥५॥
सुगण्ड मण्डलाभोग जितेन्द्वमृत मण्डलाम्। विश्वकर्मा विनिर्माण सूत्र सुस्पष्ट नासिकाम् ॥६॥
ताम्रविद्रुम बिम्बाभरक्तोष्ठी ममृतोपमाम्। दाडिमीबीज वज्राभदन्तपंक्ति विराजिताम् ॥७॥
रत्नद्वीप समुद्भासि जिह्वां मधुरभाषिणीम्। स्मित माधुर्यविजित माधुर्य रससागराम् ॥८॥
अनौपम्यगुणोपेत चिबुकोद्देश शोभिताम्। कम्बुग्रीवा महादेवीं मृणाल ललितैर्भुजै ॥९॥
मणिकङ्कण केयूरभारखिन्नैः प्रशोभिताम्। रक्तोत्पलदलाकार सुकुमार कराम्बुजाम् ॥१०॥
कराम्बुज नख ज्योतिर्वितानित नभस्तलाम्। मुक्ताहार लतोपेत समुन्नत पयोधराम् ॥११॥

****

त्रिवलीवलयायुक्त मध्यदेश सुशोभिताम् । लावण्यसरिदावर्त्ताकार नाभि विभूषिताम् ॥१२॥
अनर्घरत्नघटित काञ्चियुक्त नितम्बिनीम् । नितम्बबिम्बद्विरद रोमराजीवाराङ्कुशाम् ॥१३॥
कदलीललित स्तम्भ सुकुमारोरुमीश्वरीम् । लावण्यकदली तुल्य जङ्घायुगल मण्डिताम् ॥१४॥
गूढगुल्फ पदद्वन्द्व प्रपदाजित कच्छपाम् । नूपुरैर्विलसत् पादपङ्कजाति मनोहराम् ॥१५॥
ब्रह्मविष्णुशिरोरत्न निर्घृष्ट चरणाम्बुजाम् । तनुदीर्घाङ्गुलीभास्वन्नख चन्द्र विराजिताम् ॥१६॥
शीतांशु शतसङ्काश कान्ति सन्तानहासिनीम् । लौहित्यजित सिन्दूररजपादाडिमरागिणीम् ॥१७॥
रक्तवस्त्र परिधानां पाशाङ्कुशकरोद्यताम् । रत्नपुष्प विनिष्टां च रक्ताभरणमण्डिताम् ॥१८॥
चतुर्भुजां त्रिनेत्रां च पञ्चबाणधनुर्धराम् । कर्पूरशकलोन्मिश्र ताम्बूलापूरिताननाम् ॥१९॥
महामृगमदोद्दाम कुंकुमारुण विग्रहाम् । सर्वशृङ्गार वेषाढ्यां सर्वाभरणभूषिताम् ॥२०॥
जगदाह्लादजननीं जगद्रञ्जनकारिणीम् । जगदाकर्षणकरीं जगत्कारणरूपिणीम् ॥२१॥

सर्वमन्त्रमयीं देवीं सर्वसौभाग्य सुन्दरीम् ।
सर्वलक्ष्मीमयीं नित्यां परमानन्दनन्दिताम् ॥२२॥
एवं ध्यायेत् परेशानीं महात्रिपुरसुन्दरीम् ॥

इस प्रकार महात्रिपुर सुन्दरी का ध्यान कर श्रीयन्त्रार्चन करें। पञ्चपञ्चिका एवं नित्याओं का पूजन करें।

॥ अथ श्रीविद्यायां पञ्चकोश विद्या ॥

॥ १. श्री विद्या कोशेश्वरी ॥

मन्त्र - ऐं ह्रीं श्रीं (त्रिपुर सुन्दरी मूल मंत्र) महाकोशेश्वरी वृन्दमण्डितासन संस्थिता सर्व सौभाग्यजननी पादुकां पूजयामि।

॥ २. परंज्योति कोशेश्वरी ॥

मन्त्र - ॐ ह्रीं हंसः सोऽहं स्वाहा।

विनियोग :- अस्य मंत्रस्य ब्रह्माऋषिः गायत्री छन्दः परंज्योति कोशेश्वरी देवता ॐ बीजं ह्रीं हंसः सोहं शक्ति स्वाहा कीलकं श्री विद्या प्रीतये जपे विनियोगः।

श्री विद्यार्णव तंत्र में लिखा हुआ हैं-

प्रणवान्त्यद्वयं बीजशक्ती शेषं तु कीलकं । स्वाहा तु हृदयं सोऽहं शिरो हंसः शिखा भवेत् ॥
मायया कवचं तारबीजेन नयनत्रयम् । सृष्ट्यान्मंत्रेण देवेशि समग्रणास्त्रकं भवेत् ॥

मंत्र के प्रारम्भ में शिर बाद में शिखा मध्य में हृदय उत्तरार्ध में पल्लव गिना जाता है। उपरोक्त मंत्र में **स्वाहा** पल्लव है परन्तु विद्यार्णव तंत्र में इस टीका से मंत्र दूसरा बनता है जबकि मंत्र उपरोक्त ही लिखा है।

षडङ्गन्यास - (१) स्वाहा (२) सोहं (३) हंसः (४) ह्रीं (५) ॐ (६) मूलमंत्र अथवा ह्रीं से

षडङ्गन्यास करे।

यस्मादतिशयः क्वापि तेजसां नैव विद्यते ।
परं पदेव तत् परं ज्योतिश्च देवता ॥

ॐ ह्रीं हंसः सोऽहं स्वाहा परंज्योति श्री पादुकां पूजयामि।

॥ ३. परनिष्कल देवता (शाम्भवी) कोशेश्वरी ॥

मन्त्र – ॐ परनिष्कल शांभवी ॥

विनियोग :- अस्य मंत्रस्य ब्रह्मा ऋषिः, गायत्री छंदः, ब्रह्म देवता, ''अ'' बीजं, ॐ शक्ति, मः कीलकं, श्री विद्या प्रीतये विनियोगः।

षडङ्गन्यास – अं आं, इं ईं, उं ऊं, एं ऐं, ओं औं, अं अः से हृदयादि न्यास करे।

अनुग्रहादिर्देवेशि बिन्दुनादकलात्मकः । पर निष्कलदेवीयं पर ब्रह्मस्वरूपिणी ॥
शुक्लाम्बर परीधाना शुक्लमाल्यानुलेपना । ज्ञानमुद्राङ्किता योगपतिवृन्देन सेविता ॥

॥ ४. अजपाकोशेश्वरी ॥

मन्त्र – ''हंसः''।

विनियोग :- अस्य मंत्रस्य अव्यक्त हंस ऋषिः, गायत्री छंदः, परमहंस देवता, ''हं'' बीजं, ''सः'' शक्ति, सोहं कीलकंमोक्षार्थे विनियोगः।

षडङ्गन्यास :- (१) सूर्यायस्वाहा (२) सोमाय स्वाहा (३) निरञ्जनाय स्वाहा (४) निराभासाय स्वाहा (५) अनन्ततनु सूक्ष्माय स्वाहा (६) अव्यक्त नयन प्रबोधात्मने स्वाहा।

॥ ध्यानम् ॥

अस्य हंसस्य देवेशि निगमागम पक्षकौ, अग्नीषामवथो वापि पक्षौ तारः शिरो भवेत् ।
विन्दुत्रयं शिखा नेत्रे मुखेनादः प्रतिष्ठितः, शिवशक्ति पदद्वन्द्वं कालाग्नि पार्श्वयुग्मकम् ।
अयं परमहंस्तु सर्वव्यापी प्रकाशवान्, सूर्यकोटि प्रतीकाशः स्वप्रकाशेन भासते ।
संहाररूपी हंसोऽयं विवेकं दर्शयत्यपि, अजपा नाम गायत्री त्रिषु लोकेषु दुर्लभा ॥

॥ ५. मातृका कोशेश्वरी ॥

मन्त्र – श्री विद्यार्णव तंत्र में इतना ही लिखा है कि ''मातृका प्रागेव प्रपञ्चिता।'' अतः.....अं आं.....हं लं क्षं श्री मातृका कोशेश्वरी श्री पादुकां पूजयामि से पूजन तर्पण करे।

॥ श्रीविद्यायां पञ्चकल्पलता विद्या ॥

॥ १. श्री विद्या कल्पलतेश्वरी ॥

मन्त्र – ऐं ह्रीं श्रीं ''त्रिपुरा मूलमंत्र''

महाकल्पलतेश्वरी वृन्दमण्डितासन संस्थिता सर्वसौभाग्य जननी श्रीविद्या कल्पलता श्री पादुकां पूजयामि।

॥ २. पारिजातेश्वरी ॥

मन्त्र – **(१) ॐ ह्रीं हस्त्रैं ह्रीं ॐ सरस्वत्यै नमः।** (इसका प्रयोग पूर्व में दिया जा चुका है।)

(२) ॐ ह्रीं हं सं क ल ह हैं ह्रीं ॐ सरस्वत्यै नमः।

(३) ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षें फट् श्री त्वरिता कल्पलता देवतायै पादुकां पूजयामि नमः।

(४) ॐ ह्रीं हसकलह्रैं ह्रीं ॐ सरस्वत्यै नमः पारिजातेश्वरी श्रीपादुकां पूजयामि।

हंसारूढां लसन्मुक्ता धवलां शुभ्रवाससं,
शुचिस्मितां चन्द्रमौलिं वज्रयुक्ता विभूषणाम् ।
विद्यां वीणां सुधाकुंभमक्षमालां च विभ्रतीम् ॥

॥ ३. पञ्चवाणेश्वरी ॥

मन्त्र – **द्रां द्रीं क्लीं ब्लूं सः।**

विनियोग :- **अस्य मन्त्रस्य मदन ऋषिः गायत्रीछन्दः कामेश्वरीवत् बीजं, पञ्चवाणेशी देवता श्री विद्या प्रीतये विनियोगः।**

पञ्चाङ्गन्यास – **ॐ द्रां हृदयाय नमः। ॐ द्रीं शिरसे स्वाहा। क्लीं शिखायै वषट्। ब्लूं कवचाय हुं। सः अस्त्राय फट्।**

उद्यद्दिवाकरभासां नानालङ्कार भूषितां
बन्धूक कुसुमाकार रक्तवस्त्राङ्ग रागिणीम् ।
इक्षुकोदण्ड पुष्पेषु विराजित भुजद्वयाम् ॥

॥ ४. पञ्चकामेशी ॥

मन्त्र – **ह्रीं क्लीं ऐं क्लूं स्त्रीं।**

विनियोग :- **अस्य मंत्रस्य संमोहन ऋषिः गायत्रीछन्दः कामदा पंचकामेशी देवता श्री विद्या प्रीतये विनियोगः।**

एक एक बीज से उपरोक्त विधान की तरह पञ्चाङ्ग न्यास करे।

रक्तां रक्तदुकूलाङ्ग लेपनां रक्त भूषणां,
पाशांकुशौ धनुर्वाणान् पुस्तकं चाक्षमालिकाम् ।
वराभीती च दधतीं त्रैलोक्य वशकारिणीम् ॥

॥ ५. कुमारी ॥

मन्त्र – **"क्लीं ऐं सौः"।** ऋषादि त्रिपुरसुन्दरी वत्।

षडङ्गन्यास – **क्लीं, ऐं, सौः, सौः, ऐं, क्लीं** से षडङ्गन्यास करें।

उद्यत् सूर्यसहस्त्राभां माणिक्यवर भूषणां, स्फुरद्रत्न दुकूलाढ्यां नानालङ्कार भूषिताम् ।
इक्षु कोदण्ड वाणांश्च पुस्तकं चाक्षमालिकां, दधतीं चिन्तयेन्नित्यं सर्वराज वशङ्करीम् ॥

मंत्रमहोदधि के अनुसार पंचकल्पलता के अन्तर्गत- (१) श्री विद्या २. त्वरिता ३. पारिजातेश्वरी ४. त्रिपुटा ५.

पंचवाणेशी इत्यादि विद्यायें आती हैं-

त्वरिता मंत्र - ॐ ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षे ह्रीं फट् । श्री विद्या के पूर्वभाग में पूजन करे।

त्रिपुटा - "श्रीं ह्रीं क्लीं" श्रीं ह्रीं क्लीं मूलमंत्र त्रिपुटा श्री पादुकां पूजयामि। श्री विद्या के पश्चिम भाग में पूजन करे। मंत्र महोदधि में ऋष्यादि नहीं दिये गये हैं।

॥ श्रीविद्यायां पंचकामदुधा (कामधेनु) विद्या ॥

॥ १. श्री विद्याकामदुधा ॥

मन्त्र - ॐ ऐं ह्रीं श्रीं (त्रिपुटा मूलमंत्र) महाकाम दुधेश्वरी वृन्दमण्डितासन संस्थिता सर्वसौभाग्य जननी श्रीविद्या कामदुधा श्री पादुकां पूजयामि।

॥ २. अमृतपीठेश्वरी ॥

मन्त्र - (१) ह्रीं हंसः संजीवनी जूं जीवं प्राणग्रंथिस्थं कुरु कुरु सः स्वाहा।

(२) ऐं क्लीं सौः।

॥ ३. अमृतेश्वरी ॥

मन्त्र - १. ऐं ब्लूं ॐ जूं सः अमृते अमृतोद्भवे अमृतेश्वरि अमृतवर्षिणि अमृतं स्त्रावय स्त्रावय स्वाहा।

ऋष्यादि प्राग्वत्। अमृताऽमृत रश्म्योघ संतर्पित चराचरम्। भवशान्त्यै त्वां भावयाम्यमृतेश्वरीम्॥

२. मंत्रमहोदधि में पूजन मंत्र - सौः क्लीं हैं अमृतेश्वरी श्रीपादुकां पूजयामि।

॥ ४. अन्नपूर्णा ॥

मन्त्र - ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा।

विनियोग :- अस्य मंत्रस्य ब्रह्माऋषिः उष्णिक छंदः, अन्नपूर्णेश्वरी देवता, ह्रीं बीज, श्रीं शक्ति क्लीं कीलकं अन्नपूर्णा प्रीतये विनियोगः।

श्री विद्या के उत्तर भाग में पूजन करे।

उद्यत् सूर्यसमाभासां विचित्र - वसनोज्ज्वलां,
चन्द्रचूडामन्नदान - निरतां रत्नभूषिताम् ।
सुवर्णकलशाकार स्तनभारनतां परां,
रुद्रताण्डव सानन्दां द्विभुजां परमेश्वरीम्॥
वरदाभय शोभाढ्यामन्नदानरतां सदा॥

॥ ५. सुधाश्री ॥

मन्त्र - ह्स्त्री स्ह्रीं श्रीं क्लीं॥ श्री सुधा देव्यै नमः।

श्री विद्या के दक्षिण भाग में पूजन करे।

॥ पञ्चरत्नेश्वरी विद्या ॥

॥ १. श्रीविद्या रत्नेश्वरी ॥

मन्त्र – ॐ ऐं ह्रीं श्रीं (त्रिपुरा मूलमंत्र) महारत्नेश्वरी वृन्दमण्डितासन संस्थिता सर्वसौभाग्य जननी श्री विद्या रत्नेश्वरी श्री पादुकां पूजयामि।

॥ २. सिद्धलक्ष्मी रत्नेश्वरी ॥

१. इसका माला मंत्र पूर्व में दिया जा चुका है।

२. ऐं क्लिन्ने क्लीं मदद्रवे कुले ह्स्त्रौः। श्री सिद्ध लक्ष्म्यै नमः।

श्री विद्या के पूर्वभाग में पूजन करे।

॥ ३. मातङ्गी रत्नेश्वरी ॥

मन्त्र – ऐं क्लीं सौः ऐं ह्रीं श्रीं ॐ नमो भगवति मातङ्गीश्वरि सर्वजनमनोहारि सर्वराजवशङ्करि सर्वमुखरञ्जिनि सर्वस्त्रीपुरुष वशङ्करि सर्वदुष्टमृग-वशङ्करि सर्वलोक वशङ्करि ह्रीं श्रीं क्लीं ऐं।

विनियोग :- अस्य मंत्रस्य मतङ्ग ऋषिः गायत्री छन्दः नादमूर्ति मातङ्गी देवता क्लीं बीजं ऐं शक्तिः सौः कीलकं सर्वजन वशमानार्थे जपे विनियोगः।

षडङ्गन्यास :- ऐं, क्लीं, सौः, ऐं, क्लीं, सौः से हृदयादि न्यास करे।

आम्भोजार्पित दक्षांघ्रि क्षौमां ध्यायेन्मतङ्गिनीं
क्वणद् वीणा लसन्नाद श्लाघान्दोलित कुण्डलाम् ।
दंतपंक्ति प्रभारम्यां शिवां सर्वाङ्गसुन्दरीं ,
कदम्बपुष्प दामाढ्यां वीणावादन तत्पराम् ॥
श्यामाङ्गी शङ्खवलयां ध्यायेत् सर्वार्थसिद्धये ॥

॥ ४. भुवनेश्वरी रत्नेश्वरी ॥

मन्त्र – "ह्रीं"। ह्रीं भुवनेश्वरी श्रीपादुकां पूजयामि।

॥ ५. वाराही रत्नेश्वरी ॥

मन्त्र – १. ऐं ग्लौं ऐं नमो भगवति वार्तालि वार्तालि वाराहि वाराहि वाराहमुखि वाराहमुखि अन्धे अंधिनि नमः रुन्धे रुन्धिनि नमः जंभेजंभिनि नमः, मोहे मोहिनि नमः, सर्वदुष्ट प्रदुष्टानां सर्वेषां सर्ववाक् चित्त चक्षुर्मुख गति जिह्वास्तभं कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ठः ठः ठः ठः हुं फट् स्वाहा।

प्रलयारुण सङ्काश पद्मान्तर्गतवासिनीं ,
इन्द्रनील महातेजप्रकाशां विश्वमातरम् ।
कदम्बमुण्डमालाढ्यां नवरत्न विभूषितां ,
अनर्घ्यरत्न घटित मुकुटश्री विराजिताम् ॥
कोशेयार्धोरुकां चारु प्रवालमणि भूषणां ,

हलेन मुसलेनापि वरदेनाभयेन च ।
विराजित चतुर्बाहुं कपिलाक्षीं सुमध्यमां ,
नितम्बिनीमुत्पलाभां कठोरघन सत्कुचाम् ।
कोलाननां ध्यायामि वाराहीं कल्याण दायिनीम् ॥

श्री विद्यार्णव तंत्र में ऋष्यादि नहीं दिये हैं।

मन्त्र – २. ॐ ऐं ग्लौं ऐं नमो भगवति वार्तालि वाराहि वाराहि वाराहमुखि ऐं ग्लौं ऐं अंधे अंधिनि नमः रुन्धे रुन्धिनि नमः जम्भेजंभिनि नमः मोहे मोहिनि नमः स्तंभे स्तंभिनि नमः ऐं ग्लौं ऐं सर्वदुष्ट प्रदुष्टानां सर्वेषां सर्व वाक्चित्त चक्षुर्मुख गति जिह्वा स्तम्भं कुरु कुरु शीघ्रं वश्यं कुरु कुरु ऐं ग्लौं ऐं ठः ठः ठः ठः हुं फट् स्वाहा।

विनियोग :– अस्य मंत्रस्य शिव ऋषिः अतिजगती छंदः वार्ताली देवता सर्वशत्रु स्तंभनार्थे जपे विनियोगः।

षडङ्गन्यास :– १. वार्तालि २. वाराहि ३. वाराहमुखि, ४. अंधे अंधिनि ५. रुन्धे रुन्धिनि ६. जंभे जंभिनि नमः से हृदयादि न्यास करे।

**रक्ताम्भोरुह कर्णिकोपरिगते शवासनेसंस्थितां, मुण्डस्त्रक परिराजमान हृदयां नीलाश्म सद्रोचिषम्।
हस्ताब्जैर्मुसलं हलाभयवरान् संबिभ्रन्तीं सत्कुचाम्, वार्तालीमरुणाम्बरां त्रिनयनां वन्दे वराहाननाम् ॥**

॥ इति श्रीविद्यायां पञ्चपञ्चिका प्रयोगाः ॥

॥ अथ श्रीविद्यायां पञ्चदशीनित्या अर्चन प्रयोगा:॥

श्री विद्या की १५ नित्यायें प्रधान है, षोडशी कला स्वयं चित्राषोड़शी है। १५ नित्याओं का अर्चन नामावलि से श्रीयंत्र पूजन में आता है नित्याओं का आध्यात्मकेन्द्र हमारे नजदीक है अत: शीघ्र सिद्धि प्रदा है। यहां ''**श्रीविद्या**'' क्रम से कलाओं का नित्यार्चन ''**श्रीविद्याक्रम**'' से दिया गया है। उनके साध्य, प्रयोग षट्काम्यप्रयोग हेतु इनके **पुस्तक के उत्तर भाग ''प्रयोग कादिक्रम** '' विधि में दिये गये है। पूर्णाभिषेक दीक्षा हेतु नित्याओं की दीक्षा भी लेवे।

प्रतिप्रदा को भगवती का पूजन करें। चन्द्रोदय द्वितीया से होता है अत: नित्या कला पूजन द्वितीया से होगा। तथा क्रमश: पूजन होकर पूर्णिमा को ज्वालामालिनी का पूजन करें। चित्राकला (विचित्रा) अमावस्या को करें।

चक्रपूजा के समय त्रिकोण मध्य में १५ नित्याओं का पूजन कर १६ वीं कला भगवती का पूजन करें।

श्रीविद्यारत्नाकर में तान्त्रिक पञ्चाङ्ग के अनुसार शुक्ला प्रतिप्रदा को कामेश्वरी बाद में क्रमश: व पूर्णिमा को चित्रा पूजन। कृष्णा प्रतिप्रदा को चित्रा से पुन: विलोम क्रम में पूजा करते हुए अमावस्या को कामेश्वरि पूजन। पुन: शुक्ला प्रतिप्रदा को कामेश्वरि से क्रमश: पूर्णिमा को चित्रा पूजन। कृष्णा प्रतिप्रदा को चित्रा से ज्वालामालिनी, सर्वमङ्गला, विलोम क्रम में पूजा करते हुए अमावस्या को कामेश्वरि का पूजन करें।

॥ १. अथ कामेश्वरी नित्या प्रयोग:॥

मन्त्र - **१. ऐं सकल ह्रीं नित्यक्लिन्ने मदद्रवे सौ:।**

२. ऐं क्लीं सौ: ॐ नम: कामेश्वरीच्छा कामफलप्रदे सर्वतत्त्व वशङ्करि सर्वजगत् क्षोभकरे हूं हूं द्रां द्रीं क्लीं ब्लूं स: सौ: क्लीं ऐं।

विद्यार्णव तंत्र में लिखा है- **एषा कामेश्वरी नित्या कामदैकादशाक्षरी**। परन्तु बीज पुटित होने से यह १४ अक्षर मंत्र है। इस विद्या के प्रभाव से मेघनाद ने इन्द्र को बांध लिया था।

विनियोग - **अस्य मंत्रस्य संमोहन ऋषि, त्रिष्टुप् छंद: कामश्वरी देवता, कं बीजं, ईं शक्ति: लं कीलकं कामेश्वरी दीक्षाफल सिद्धये विनियोग:।**

न्यास - **शिरसि संमोहन ऋषये नम:। मुखे त्रिष्टुप् छन्दसे नम:। हृदये कामेश्वरी देवतायै नम:। गुह्ये कं बीजाय नम:। पादयो: ईं शक्तये नम:। नाभौ लं कीलकाय नम:। विनियोगाय नम: सर्वाङ्गे।**

षडङ्गन्यास - **ऐं हृदयाय नम:। सकल ह्रीं शिरसे स्वाहा। नित्य शिखायै वषट्। क्लिन्ने कवचाय हुं। मदद्रवे नेत्रत्रयाय वौषट्। सौ: अस्त्राय फट्।**

वर्णन्यास - **दक्षनेत्रे ऐं नम:। वामे सकल ह्रीं नम:। दक्षश्रोत्रे नि नम:। वामे त्य नम:। दक्षनसि क्लि नम:।**

वामे त्रे नमः। जिह्वायां म नमः। हृदये द नमः। नाभौ द्र नमः। गुह्ये वे नमः। सौः इति सर्वाङ्गे।

॥ ध्यानम् ॥

बालार्क कोटि सङ्काशां माणिक्य मुकुटो ज्ज्वलाम् । **हारग्रैवेयकांचीमिरूर्मिका नूपुरादिभिः** ॥
मंडितां रक्तवसनां रक्ताभरण शोभितां । **षडभुजां त्रीक्षणामिन्दुकला कलित मौलिकाम्** ॥
पाशांकुशौ च पुण्ड्रेक्षुचापं पुष्पशिली मुखम् । **रत्नपात्रं सुधापूर्णं वरदं विभ्रतीं करैः** ॥

॥ यंत्र पूजनम् ॥

स्वर्णपट्ट पर कुंकुमादि से पंचदलकमल, अष्टदल, षोडशदल उसके बाहर षट्कोण के बाद चार द्वार युक्त भूपुर बनाये। जयादि पीठशक्तियों का अर्चन करे पुष्पांजलि लेकर देवि से पूजन की आज्ञा मांगे।

॥ श्री कामेश्वरी यन्त्रम् ॥

प्रथमावरणम् - (पंचदलेकेसरेषु) अग्नि, ईशान, नैर्ऋति, वायव्य, अग्रभाग एवं दिक्षु दिशा में हृदयादि न्यास शक्तियों का पूजन करे। पंचदल एवं अष्टदल के मध्य में देवी के पृष्ठ भाग में । **प्रकाशानंदादि गुरु त्रय। ज्ञानानन्दनाथादि गुरुत्रय। स्वभावानन्दादि** गुरुत्रय का पूजन करे।

द्वितीयावरणम् - (पंचदले) देवी के अग्रभाग से प्रदक्षिणा पूर्वक **ह्रीं श्रीं** सभी युक्त सभी आवरणों के देवताओं का पूजन करे। **ह्रीं श्रीं द्रां मदनवाणाय नमः। द्रीं उन्मादन वाणाय नमः। क्लीं दीपनवाणाय नमः। ब्लूं मोहनवाणाय नमः। सः शोषणवाणाय नमः।**

तृतीयावरणम् - (अष्टदलेषु) **ह्रीं श्रीं अनङ्गकुसुमा श्री पादुकां पूजयामि। अनङ्गमेखला पा.। अनङ्ग मदना पा.। अनङ्ग मदनातुरा। । अनङ्ग मदवेगिनी पा.। अनङ्ग भुवनपाला पा.। अनङ्गशशिरेखा पा.। अनङ्गगगनरेखा पा.।**

चतुर्थावरणम् - (षोडशदले) **ह्रीं श्रीं अं श्रद्धा पादुकां** पूजयामि नमः। **आं प्रीति पा.। इं रति पा.। ईं धृति पा.। उं कान्ति पा.। ऊं मनोरमा पा.। ऋं मनोहरा पा.। ॠं मनोरथा पा.। लृं मदना पा.। लॄं उन्मादिनी पा.। एं मोहिनी पा.। ऐं शांति (शंखिनी) पा.। ओं शोषिणी पा.। औं वशंकरी पा.। अं शिञ्जिनी पा.। अः सुभगा पा.।**

पंचमावरणम् - (षोडशदलाग्रेषु) - **अं पूषा पा.। आं इद्धा पा.। इं सुमन पा.। ईं रति पा.। उं प्रीति पा.। ऊं धृति पा.। ऋं ऋद्धि पा.। ॠं सौम्या पा.। लृं मरी पा.। लॄं अंशुमालिनी पा.। एं शशिनी पा.। ऐं अङ्गिरा पा.। ओं छाया पा.। औं संपूर्णमंडला पा.। अं तुष्टि पा.। अः अमृता पा.।**

षष्ठमावरणम् - (षट्कोणे) **दक्षिणाग्रकोणे ऐं डाकिनी पा.**। वामाग्रकोणे ऐं राकिनी पा.। **पृष्ठकोणे ऐं**

लाकिनी पा.। पृष्ठवामे ऐं काकिनी पा.। पृष्ठदक्षिणे ऐं शाकिनी पा.। देव्यग्रे ऐं हाकिनी पा.।

सप्तमावरणम् – (षट्कोण एवं भूपुर के अभ्यंतर) **आग्नेये ऐं वटुक पा.। नैर्ऋति गं गणपति पा.। वायवे ऐं दुर्गा पा.। ईशाने ऐं क्षं क्षेत्रेश पा.।**

अष्टमावरणम् – (भूपुरे) पूर्वादिक्रमेण इन्द्रादि दश दिक्पालों का एवं नवम् आवरण में उनके आयुधों का पूजन करे। धूपदीप नैवेद्यादि प्रदान कर कुरुकुल्ला को बलिप्रदान करे।

नित्या गायत्री मन्त्र – कामेश्वर्यै विद्महे नित्यक्लिन्नायै धीमहि तन्नो नित्या प्रचोदयात्॥

विनियोग – अस्य मन्त्रस्य सुभगाय ऋषि, गायत्री छन्दः, भगमालिनी देवता, हरब्ले बीजं, श्रीं शक्तिः, ह्रीं कीलकं, श्री त्रिपुरा सिद्धये जपे विनियोगः।

॥ अथ कादीक्रमानुसार कामेश्वरीनित्या प्रयोगः ॥

अथ कादिमते कामेश्वर्यादिनित्यानां प्रयोगविधिर्लिख्यते॥ ''ह्लींक्लींऐंब्लूंस्त्रीं'' इति पञ्चकामा भवन्ति। तन्त्रराजे- (प. ७ श्लो० ३९)

एषां यन्त्राणि सर्वाणि त्रैलोक्यक्षोभणानि च । तानि क्रमेण कथाम्याकर्ण समाहिता ॥१॥
तेषु पञ्चसु बीजेषु पुनरुक्तविवर्जितैः । योजयेदष्टभिस्तैस्तैः स्वरान् षोडश मायया ॥२॥
अष्टाविंशतिसंयुक्तं शतं तेन भवन्ति वै । तैर्यन्त्राणि विधेयानि पञ्चानां क्रमतः शिवे ॥३॥

अस्यार्थः – **प्रोक्तपञ्चसु बीजेषु द्वितीयबीजस्य जठरे प्रथमबीजं ॥१॥ तृतीयबीजजठरे द्वितीयं बीजं ॥२॥ चतुर्थबीजजठरे तृतीयं बीजं ॥३॥ पञ्चमबीजजठरे चतुर्थ बीजं ॥४॥ चतुर्थबीजजठरे पञ्चमं बीजं ॥५॥ तृतीयबीजजठरे चतुर्थ बीजं ॥६॥ द्वितीयबीजजठरे तृतीयं बीजं ॥७॥ प्रथमबीजजठरे द्वितीयं बीजं ॥८॥ एवमष्टौ बीजानि पुनरुक्तवर्जितानि भवन्ति। एतानि प्रत्येकं षोडशस्वरयुक्तानि कर्तव्यानि, तदा संख्यया १२८ बीजानि भवन्ति। एतैर्यन्त्राणि विधेयानीत्यर्थः॥**

यन्त्ररचनाप्रकारमाह –**वृत्तत्रयस्थं षट्कोणं कृत्वा मध्ये स्वमक्षरम्। लिखेत्साध्याख्ययोपेतं षट्कोणेषु च तत्पुनः ॥१॥ विभज्य बिन्दुमायाभ्यामध ऊर्ध्व लिखेत्क्रमात्। वृत्तान्तरालयोर्बाह्ये चतुःषष्ट्या द्विरालिखेत् ॥२॥ एवं यन्त्राणि पञ्च स्युः पञ्चानां क्रमतः शिवे। इति।**

अस्यार्थः:- **प्रथमतः षट्कोणं कृत्वा तद्बहिर्वृत्तत्रयं विधाय मध्ये साध्यनामसहितं प्रकृतिस्थपञ्चकामेषु प्रथमं बीजं विलिख्य षट्षु कोंणेषु तदेव बीजं विलिख्य प्रोक्ताष्टाविंशत्युत्तरशतं बीजानि चतुःषष्ट्या चतुः षष्ट्या द्विधा विभज्य वृत्तत्रयान्तरालद्वयेऽभ्यन्तरान्तराले बिन्दुयुक्तानि प्रथमचतुः षष्टिबीजानि पंक्त्यात्याकारेण विलिख्य, तद्बाह्यान्तराले द्वितीयचतुःषष्टिबीजानि विसर्गयुक्तानि लिखेत्, इदं प्रथमं यन्त्रम्। द्वितीयबीजं मध्ये साध्यसहितं विलिख्य षट्कोणेषु द्वितीयमेव बीजं विलिख्य बहिरन्तरालद्वये प्राग्वद्विलिखेदिति द्वितीययन्त्रम्॥ एवं तृतीयबीजेन तृतीयं यन्त्रम्॥ चतुर्थबीजेन चतुर्थ यन्त्रम्॥ पञ्चमबीजेन पञ्चमं यन्त्रम्॥ इति पञ्चयन्त्राणि भवन्तीत्यर्थः॥**

अथ पञ्चबीजैरेकमेव यन्त्रं लेखनीयमित्याह- **पञ्चभिस्त्वेकमस्त्यन्यद्यन्त्रं सुमहदद्भुतम्। द्वितीयजठरे त्वाद्यं सनामाभिलिखेत् तयोः ॥१॥ बहिस्तृतीयरूपेण षट्कोणेन प्रवेष्टयेत्। चतुर्थ विलिखेत् कोणेष्वेयु षट्स्वपि**

पार्वति ॥२॥ वेष्टयेत्पञ्चमेनैव सर्वमोहनम्। इति।

अस्यार्थ :- द्वितीयबीजस्य क्लींकारस्य जठरे प्रथमबीजं ह्रीमिति बीजं साध्यनामगर्भं विलिख्य, तद्बहिस्तृतीयबीजेन ऐंकारेण अधरोत्तरयोगेन षट्कोणं कुर्यात्। अत्र ऐंकारस्य त्रिकोणरूपत्वाद्बीजद्वयरूप त्रिकोणद्वयेन षट्कोणेनावेष्ट्य षट्कोणेषु चतुर्थबीजं ब्लूंकारं विलिख्य पञ्चमबीजेन स्त्रींकारेण षट्कोणाद्बहिर्वेष्टयेत्, यथा स्त्रींकारगर्भे सर्व भाति तथा कुर्यादित्यर्थः। एवं षट्चक्राणि जातानि॥

अथ समययन्त्रयोरुद्धारक्रममाह- तस्यापि परतो बाह्ये तैरावेष्ट्य पुरोदितैः। यन्त्रान्तरं तु जनयेद्बहिर्मातृकयापि च ॥१॥ इति। प्रोक्तषष्ठयन्त्रस्य बहिर्वृत्तत्रयं विधाय प्राग्वत् १२८ बीजैश्चतुः षष्ट्या द्विरालिखेत् सप्तमं यन्त्रं भवन्ति। एतस्यैव षष्ठयन्त्रस्य बहिर्वृत्तत्रयान्तरालद्वये प्राग्वद्बिन्दुयुक्तां विसर्गयुक्तां च लिखेत्, इदमष्टमं यन्त्रं भवतीति॥

यन्त्राण्यष्टौ भवन्त्येव पञ्चकामात्मकानि वै । तैरसाध्यं जगत्स्वेषु किञ्चित्तु न कदाचन ॥१॥
मनुजं मनुजेशं वा महिलां वा मदाबिलाम् । अष्टसूक्तेषु मध्यस्थं भावयेत्स्वेन तेजसा ॥२॥
एकीभूतं जपेदेतान्यक्षराण्यपि पञ्च वै । तेन ते वशगाः क्षिप्रं यावज्जीवं न संशयः ॥३॥
तेष्वष्टमस्य मध्यस्थमात्मसाध्यं जपारुणम् । तन्मन्त्रार्णप्रकाशैश्च तथारुणतरैर्वृतम् ॥४॥
भावयन्नात्मना ग्रस्तं जपेत्ताराक्षराण्यपि । तेन ते वशगाः क्षिप्रं दद्युः प्राणान् धनानि च ॥५॥
तस्य षष्ठस्य मध्यस्यबीजं मन्त्रेण वेष्टयेत् । प्राग्वन्नि (व?ज) सुषुम्नान्तर्भावयेद्योनिमुद्रया ॥६॥
एतदष्टकमध्यस्थं कुम्भं कृत्वा यथाविधि । तेनाभिषिञ्चेद्दौर्भाग्यरोगदारिद्र्यमुक्तये ॥७॥
कुचन्दनैर्वा सिन्दूरैर्गैरिकैर्दरदैस्तु वा । कृत्वा चक्राष्टकं भूमौ फलकायां शिलासु च ॥८॥
मध्ये विद्यावृतं कृत्वा तत्रावाह्याभिपूज्य ताम् । कामेश्वरीं तदग्रस्थो जपेल्लक्षं पयोव्रतः ॥९॥
तेनास्य पूर्वजन्मान्तर्दुष्कृतान्यपयान्ति वै । अस्मिञ्जन्मनि सल्लक्ष्मीमवाप्य सुखमेधते ॥१०॥
नरं नारीं नृपं वान्यं नगरं वाथ पत्तनम् । देशं जनपदं विश्वं तन्मध्ये प्रविलिख्य तत् ॥११॥
पूजयेदरुणैः पुष्पैर्गन्धैः काश्मीरसम्भवैः । नैवेद्यैः कदलीदुग्धशर्करापायसादिभिः ॥१२॥
मण्डलं वा तदर्धं वा सप्तवासरमेव वा । कन्दर्पसमसौभाग्यो जायते नियतं नरः ॥१३॥
सुवर्णादिषु संलिख्य धारणाद्धरणीतले । लक्ष्मीकान्तिधनारोग्यैरायुः पूर्णमवाप्नुयात् ॥१४॥
अनावृत्तैस्तु विद्यार्णैः षोडशस्वरयोजनात् । द्वानवत्या शतं वर्णा जायन्ते मन्त्रसम्भवाः ॥१५॥

अस्यार्थ :- कामेश्वर्या मन्त्रस्यैकादशाक्षरस्यानावृत्ताक्षराणि "असकलहरनतयमदव" इति द्वादशा. क्षराणि भवन्ति। ते षोडशस्वरयोगेनाङ्कतः १९२ वर्णा भवन्तीति॥

स्वराणां सर्वमन्त्रेषु योजनं केन हेतुना । क्रियते परमेशान तन्मे कथय साम्प्रतम् ॥१॥
स्वराः षोडश देवेशि व्यञ्जनानि तथा पुनः । पञ्चत्रिंशत् समाख्यातं तयोरन्योन्यसङ्गतैः ॥२॥
भारत्या देहभूतैस्तैर्व्यञ्जनैः स्वरयोजनम् । तत्प्राणयोजनं विद्धि रहस्यं परमेश्वरि ॥३॥

भारत्या वर्णरूपाया हसौ नेत्रे समीरिते । प्राणाः स्वराः समाख्याता बिन्दुसर्गौ तु चेतना ॥४॥
अन्यान्यवयवानि स्युरन्यानि परमेश्वरि । तेन तद्युक्तितो वर्णाः प्रसीदन्ति नचान्यथा ॥५॥
बिन्दुसर्गौ हसौ तुर्यस्वरश्चेति च पञ्चमम् । भारत्या मातृकादेहे विद्धि चैतन्यजृम्भणम् ॥६॥
तेन तैर्हीनरूपास्तु मन्त्रविद्यास्तथापरे । निष्प्राणदेहवत् कार्यकरणेष्वक्षमाः स्मृताः ॥७॥
तेन सर्वत्र तु मया स्वरयोग उदीर्यते । ये ये मन्त्राः प्रोक्तवर्णविहीनास्तैश्च योजयेत् ॥८॥
तेन ते बलवन्तः स्युः कार्येषु च फलान्विताः । तस्मात् सर्वत्र संयोगात् स्वैरः सर्वार्थसिद्धिदाः ॥९॥
एवं तैरेव जायन्ते यन्त्राणि सबलानि वै । द्वात्रिंशद्विनियोगांश्च वक्ष्ये तेषामनुक्रमात् ॥१०॥
वृत्तद्वयान्तः षट्कोणं कृत्वा मध्ये निजेप्सितम् । मायागर्भ समालिख्य वेष्टयेन्मातृकाक्षरैः ॥११॥

अस्यार्थ :- प्रथमतः षट्कोणं विलिख्य तद्बहिर्वृत्तद्वयं विधाय मध्ये साध्यनामगर्भ ह्रींकारं विलिख्य, षट्सु कोणेषु द्वानवत्युत्तरशतवर्णेषु प्रथमतः षडक्षराणि विलिख्य बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयेदिति प्रथमं यन्त्रं भवति॥ द्वितीययन्त्रस्य षट्सु कोणेषु प्रोक्तवर्णसमुदायस्य प्रथमतः षड्वर्णान् विहाय सप्तमाक्षरतः षड्वर्णान् विलिखेदिति द्वितीयं यन्त्रं भवति। एवं तृतीययन्त्रादिषु च क्रमेण पुनरुक्तवर्जिता षट्षडवर्णा लेखनीयाः। अन्यत्समानम्। एवं यन्त्राणि ३२ जायन्ते॥

॥ तेषां फलान्याह ॥

प्रथमे कनकावाप्तिर्द्वितीये भूषणोदयः । तृतीये कन्यकासिद्धिश्चतुर्थे भूप्रतिग्रहः ॥१॥
पञ्चमे वाहनावाप्तिः षष्ठे स्त्रीवश्यमीरितम् । सप्तमे भवनावाप्तिरष्टमे धेनुसङ्गमः ॥२॥
नवमे वशयेद्भूपं दशमे वारणं हयम् । एकादशेन विजयी नरः समरसीमनि ॥३॥
वादेषु व्यवहारेषु द्यूतेषु द्विविधेष्वपि । द्वादशे चेप्सितावाप्तिः परेणारिविनाशनम् ॥४॥
गजवाजिखरोष्ट्राणां नरगोमृगपक्षिणाम् । भुजङ्गमेषमहिषवाजिनां त्वाशु नाशनम् ॥५॥
तत्तत्त्वचिच तद्रक्तलिखितं तत्र तत्र च । स्थापितं मण्डलान्मासात्सप्तरात्रादथापि वा ॥६॥
चतुर्दशेन वृष्टिः स्यात्परेण स्तम्भनं रिपोः । क्रोधवैरिसमुद्योगगमनादेरपि ध्रुवम् ॥७॥
षोडशेन धृतेनाशौ भूताद्यैर्नैव बाध्यते । ततः परेण यन्त्रेण खातेन धरणीतले ॥८॥
रक्षा भवति सर्वत्र प्राणिनां जगति ध्रुवम् । अनन्तरानन्तराभ्यां खननात्फलकद्वये ॥९॥
शस्यानां बहुभिः क्लेशैर्नाशः स्याद्भूरुहामपि । देशानामपि वान्योन्यकलहात्पीडनं भवेत् ॥१०॥
अनन्तरेण यन्त्रेण विरोधो भूभुजां भवेत् । राज्य संधि तलेतस्य खननेनाल्प कालतः ॥११॥
एक विंशेन यन्त्रेण रोगार्ता वैरिणो ध्रुवम् । द्वाविंशेन गवां रोगस्त्रयोविंशेन दन्तिनाम् ॥१२॥
चतुर्विंशेन वाहानां पञ्चविंशेन भूभुजाम् । षड्विंशेन प्रधानानां रोगावाप्तिर्दृढं भवेत् ॥१३॥
सप्तविंशेन तेषां तु प्रोक्तानां क्लेशनाशनम् । अष्टाविंशेन यन्त्रेण कृत्या प्रतिनिवर्तते ॥१४॥
धारणाद्भूषु खननाद्वृक्षाग्रादिषु बन्धनात् । तडागकूपवाप्यादिष्वर्पणात्पाति ता ध्रुवम् ॥१५॥

ततः परेण यन्त्रेण वाग्मी मूकोऽपि जायते । अत ऊर्ध्वेन यन्त्रेण वैरिवाक्स्तम्भनं भवेत् ॥१६॥
एकत्रिंशेन यन्त्रेण वाहानां दन्तिनामपि । रक्षा भवति तद्भूषु खननाद्धारणादपि ॥१७॥
द्वात्रिंशेनाम्बुधौ पोता न क्लिष्यन्ति कदाचन । पारं प्रयान्ति चाक्लेशाद्विचित्रा यन्त्रशक्तयः ॥१८॥
षोडशानां तु नित्यानां प्रत्येकं तिथिषु क्रमात् । तत्तत्तिथौ तद्भजनं जपहोमादिना चरेत् ॥१९॥
घृतं च शर्करा दुग्धमपूपं कदलीफलम् । क्षौद्रं गूडं नालिकेरं फलं लाजा तिलं दधि ॥२०॥
पृथुकं चणकं मुद्गं पायसं च निवेदयेत् । प्रतिपत्तिथिमारभ्य क्रमात् पञ्चदशस्वपि ॥२१॥
कामेश्वर्यादिशक्तीनां सर्वासामपि चोदितम् । आद्याया ललितायास्तु सर्वाण्येतानि सर्वदा ॥२२॥
निवेदयेच्च जुहुयाद्वह्नौ दद्यान्नृणामपि । विद्याभक्तिमतां नित्यमभीष्टावाप्तयेऽनिशम् ॥२३॥
तत्तद्विद्याक्षरप्रोक्तमौषधं तत्प्रमाणतः । संपिष्य गुलिकीकृत्य ताभिः सर्व च साधयेत् ॥२४॥
अर्घ्यान्ततर्पणं नित्यं स्नानपानानुयोजनम् । पाटीरसंयुतं भाले धारणं सर्वसिद्धिकृत् ॥२५॥
राज्ञां विशेषतो रक्षां कुर्यादेतैस्तु नित्यशः । स्नाने पाने धारणे च गुलिकायोजनेन वै ॥२६॥
रोगापमृत्युकृत्यादिदोषा ग्रहसमुद्भवाः । न बाधन्ते ततो नित्यमर्चयेत् स्वगृहे क्वचित् ॥२७॥

॥ कामेश्वरी प्रयोगः ॥

सारांश – उत्तरार्ध में श्लोक २१ के अनुसार प्रतिपदा को कामेश्वरी नित्या व ललिता त्रिपुर सुन्दरीका पूजन करें। अन्य मत से प्रतिपदा को ललिता तथा द्वितीया से जब चन्द्रकला बढ़नी शुरु होती है तब से कामेश्वरी आदि नित्याओं का प्रत्येक तिथि के अनुसार पूजन करें। पूर्णिमा को ज्वालामालिनी का पूजन करें पश्चात् पुनः कृष्णा प्रतिपदा से कामेश्वरी तथा अमावास्या को चित्रा का पूजन करें।

अधिकांशतः प्रतिपदा को कामेश्वरी से क्रमशः पूजन कर पूर्णिमा को चित्रा का पूजन करते हैं। पश्चात् कृष्ण पक्ष में विलोम क्रम से पूजन करते हैं।

कामेश्वरी मूल मन्त्र – **ऐं सकल ह्रीं नित्यक्लिन्ने मदद्रवे सौः।**

कादिमत से पंचकामा मन्त्र – **ह्रीं क्लीं ऐं ब्लूं स्त्रीं।**

इस विद्या के आठ तरह के काम्य मंत्र प्रयोग बनते हैं।

१. ह्रीं ह्रीं क्लीं ऐं ब्लूं स्त्रीं। **२. ह्रीं क्लीं क्लीं ऐं ब्लूं स्त्रीं।**
३. ह्रीं क्लीं ऐं ऐं ब्लूं स्त्रीं। **४. ह्रीं क्लीं ऐं ब्लूं ब्लूं स्त्रीं।**
५. ह्रीं क्लीं ऐं स्त्रीं ब्लूं स्त्रीं। **६. ह्रीं क्लीं ऐं ब्लूं ऐं ब्लूं स्त्रीं।**
७. ह्रीं ऐं क्लीं ऐं ब्लूं स्त्रीं। **८. क्लीं ह्रीं क्लीं ऐं ब्लूं स्त्रीं।**

यदि विद्या को पंचाक्षरीं विद्या रूप में काम में लेना है तो मंत्र इस प्रकार से होंगे –

१. ह्रीं ह्रीं ऐं ब्लूं स्त्रीं। **२. ह्रीं क्लीं क्लीं ब्लूं स्त्रीं।**

३. ह्रीं क्लीं ऐं ऐं स्त्रीं। **४. ह्रीं क्लीं ऐं ब्लूं ब्लूं।**

५. ह्रीं क्लीं ऐं स्त्रीं स्त्रीं। **६. ह्रीं क्लीं ब्लूं ब्लूं स्त्रीं।**

७. ह्रीं ऐं ऐं ब्लूं स्त्रीं। **८. क्लीं क्लीं ऐं ब्लूं स्त्रीं।**

इन अष्ट मन्त्रों को **अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं ऐं ऐं ओं औं अं अ:** इन १६ स्वरों से अलग-अलग संयोजन करें तो ८×१६ = १२८ मन्त्र बनेंगे।

॥ यन्त्र रचना ॥

सर्व प्रथम षट्कोण बनायें उसके बाहर तीन वृत्त बनायें। तीन वृत्त को बनाने से दो वीथिका (गली) बनेगी उन वीथिकाओं में एक में ८ स्वरों से युक्त ८ मन्त्र लिखे (या कल्पना करें) दूसरी विथिका में ८ स्वरों से युक्त पूर्व वाले ८ मन्त्र लिखें तो ८×८ = ६४ (चौसठ-चौसठ) मन्त्र दोनों वीथिकाओं में होंगे। षट्कोण के मध्य में **ह्रीं** बीज युक्त साध्य व्यक्ति का नाम लिखें। (यदि सकाम प्रयोग नहीं करना है तो कामेश्वरी का ध्यान करें)। षट्कोण में भी **ह्रीं** लिखें। दूसरा बीज **क्लीं** लिख कर साध्य का नाम लिखे। सभी कोणों में दूसरा बीज **क्लीं** लिखें ॥२॥

इस तरह पाँचों बीजो को लिखने से ५ तरह के यंत्र बनेंगे।

पुन: **ह्रीं** साध्य का नाम फिर **क्लीं** मध्य में लिखे। उल्टे व सीधे दो त्रिकोण बनाने से षट्कोण बनता है, उन कोणों में **ऐं** बीज लिखें। कोणों के पास में **ब्लूं** बीज लिखें, षट्कोण के बाहर **स्त्रीं** बीज छ: जगह लिखें तो ये तीन प्रकार के अलग यन्त्र प्राप्त होंगे। इन यन्त्रों को अलग-अलग बीजकूटों से बनाने से छ: यन्त्र बनेंगे।

यदि पूर्व की तरह तीन वृत्त बनायें तथा दोनों यन्त्रों के बीच की विथिकाओं में ४-४ मन्त्र बीजाक्षर व स्वरो के योग से लिखें तो यह सातवां यन्त्र बनेगा।

यदि स्वरों के अनुस्वार के साथ विसर्ग लगाकर मन्त्र लिखें तो यह आठवाँ यन्त्र बनेगा।

॥ यन्त्र पूजन ॥

अष्ट यन्त्रों के मध्य कलश रखकर कामेश्वरी का पञ्चाक्षरी बीज मन्त्र से पूजन करें तथा उस कलश के द्रव्य से अभिषेक करने से सभी कष्ट दूर होवे।

गन्ध, पुष्प, केसर, नैवेद्य, कदलीफल, दूध, क्षीरान्न, शर्करा आदि अर्पण से सभी ऐश्वर्य की प्राप्ति होवे।

द्वादशाक्षर अनावृत्त मन्त्र - असकल हरनत यमदव।

इस मन्त्र के प्रत्येक अक्षर को सोहल स्वरों के साथ जपने से १६×१२ = १९२ वर्णों का मन्त्र बनता है।

यदि इन १९२ अक्षरों के ६-६ अक्षरों के यन्त्र बनायें तो १९२/६=३२ यन्त्र बनेंगे।

अर्थात् यदि प्रत्येक षट्कोण में ६ अक्षर लिखें, दूसरे में ७-१२, तीसरे में १३ से १८ इस तरह ३२ यन्त्र बनेंगे। प्रत्येक यंत्र का पूजाफल उत्तरार्ध में श्लोक १ से १८ तक दिया गया है।

घृत, शर्करा, अपूप, दुग्ध, पायस, गुड़, नारिकेल, अर्पण करें। तिल व लाजा सहित होम करें तो अभिष्ट पूर्ण होवे।

॥ इति कामेश्वर्या: प्रयोगविधि: ॥

॥ २. अथ भगमालिनी नित्या प्रयोग:॥

मन्त्र – ऐं भगभुगे भगिनी भगोदरि भगमाले भगावहे भगगुह्ये भगयोनेभगनिपातिनि सर्वभगवशङ्करि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्त्वान् भगेश्वरि ऐं ब्लूं जूं ब्लूं भें ब्लूं मों ब्लूं हें ब्लूं हें क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं हृः ब्लें ह्रीं।

विनियोग – अस्य मन्त्रस्य श्री सुभगाय ऋषिः, गायत्री छन्दः, भगमालिनी देवता, हरब्ले बीजं, श्रीं शक्तिः, ह्रीं कीलकं, श्रीत्रिपुरा सिद्धये विनियोगः।

ऋष्यादिन्यास – ॐ सुभगाय ऋषये नमः शिरसि। मुखे गायत्रीछन्दसे नमः। हृदये श्रीभगमालिनी देवतायै नमः। गुह्ये हरब्लें बीजाय नमः। पादयो श्रीं शक्तये नमः। नाभौ ह्रीं कीलकाय नमः। ममाभीष्टसिद्धये जपे विनियोगः नमः सर्वाङ्गे।

षडङ्गन्यास – ॐ हृदयाय नमः। ॐ भगसुभगे शिरसे स्वाहा। ॐ भगिनी शिखायै वषट्। ॐ भगोदरि कवचाय हुं। ॐ भगमाले नेत्रत्रयाय वषट्। ॐ भगावहे अस्त्राय फट्।

॥ ध्यानम् ॥

अरुणामरुणाकल्पां सुन्दरीं सुस्मिताननाम् । त्रिनेत्रां बाहुभिः षड्भिरुपेतां कमलासनाम् ॥
कह्लार पाश पुण्ड्रेक्षुकोदण्डान् वामबाहुभिः । दधानां दक्षिणैः पद्ममंकुशं पुष्पसायकम् ॥

॥ यंत्रपूजनम् ॥

पट्टे पर कुंकुमादि से एक चतुरस्र बनाये उस पर चार अंगुल की वीथी(गली) रखते हुये दूसरा चतुरस्र बनाये। वीथी में पश्चिम में द्वार बनाये। चतुरस्र के मध्य में पंचदल बनाये। उसकी कर्णिका में दो वृत्त बनाये मध्यवृत्त में योनि बनाये उसके विभाग करके १३५ त्रिकोण करे (कल्पना करे) अगर बना सके तो विधि आगे दी गई विधि से बनाये। दोनों वृत्त के अंतरलाल में २० त्रिकोण बनाये (कल्पना करे) विधि यथा–

चतुरस्त्रद्वयेन चतुरंगुलान्तरालां समचतुरस्त्रां वीथीं कृत्वा तस्या पश्चिम भागे मध्ये द्वारं विधाय। तस्य चतुरस्त्रस्य मध्ये पंचदलं पद्मं विरञ्च। वृत्तद्वययुक्तायां तत्कर्णिकायां समत्रिरेखां कर्णिकामध्य वृत्त स्पष्ट कोणाग्रकां यथामानां योनिं कृत्वा तस्या एकां रेखां चतुर्विंशतिधा विभज्य तैरंशैस्त्रयोविंशति चिह्नानि कृत्वा तस्यास्तिसृषु रेखास्वपि तथा कृत्वा तेष्वेकांशमानमभितस्त्यक्त्वा तदन्तः प्राग्वत्समत्रिरेखां योनिं विधाय तस्यां योन्यामेकां रेखामेकविंशतिधा विभज्य तेषु विंशतिचिह्नानि प्रतिरेखमिति रेखात्रयेऽपि प्रत्येकं कृत्वा तेषु बाह्याभ्यन्तर चिह्नेषु चिह्ना चिह्न मिति क्रमेण पंचचत्वारिंशद् रेखास्तिर्यग्रूपाः प्रतिपार्श्वं विलिखेदिति एवं कृते बाह्यरेखाग्राण्याभ्यन्तर रेखाग्राणि च त्रिकोणानि पंचत्रिंशदधिक शतसंख्यानि संभवन्ति। तदन्तस्त्र्यस्त्ररेखात्रय स्पृष्टरेखं भ्रमेण वृत्तं निष्पाद्य तदन्तरेपि तद्व्यास पंचमांशमान भ्रमेण वृत्तं विधाय, तदन्तरेऽप्येकांशमाने वृत्तान्तरं कृत्वा पूर्ववृत्तयोर्विष्कम्भ षोडशांश सहितं विष्कंभमानं त्रिगुणीकृत्य तत्र समुदायमानं दशधा विभज्य तेष्वेकैकांशेन चिह्नानि परितस्तद् वृत्तद्वये प्रतिवृत्तं दश दश विधाय। तेषु क्रमेण बाह्याभन्तरं तस्माद्बाह्यमिति गोमूत्रिकाक्रमेण तिर्यग्रूपा विंशति रेखा विलिखेत्। एवं कृते बाह्याभ्यन्तर वृत्तस्पष्टाग्राणि च त्रिकोणान्यभितो विंशति संख्यकानि संभवन्ति।

॥ पूजन प्रयोग॥

भद्रपीठ की अरुणा विमलादि नव पीठ शक्तियों का अर्चन कर देवी से आवरण पूजा की आज्ञा मांगे।

भगमालिनी देवी का ध्यानपूर्वक आवाहन करे-

१. देवी के पृष्ठभाग में वृत्त के अंदर पूर्वपूजन (कामेश्वरि) प्रयोग वत् **प्रकाशानंदादि** गुरुपंक्तित्रयं का पूजन करे।

२. पंचदल में पूर्व, अग्निकोण, ईशान, नैऋति, वायव्य एवं देवी के अग्रभाग में मंत्र के **हृदयादि षडङ्ग देवताओं** की स्थापना, पूजन करे।

३. द्वार के वाम भाग में **ऐं रागशक्ति पा.**। दक्षिणभाग में **ऐं द्वेषशक्ति पा०**।

४. पंचदल कर्णिका के मध्य योनि में १३५ त्रिकोणों में **ऊँ पंचत्रिंशदधिक शत शक्तिः पा०**।

५. तदन्तर्वृत्तद्वयान्तरालस्थ विंशतिकोणेषु - देवी के अग्र भाग से वामावर्तेन **ऐं मदना पादुकां पूजयामि नमः**।

॥ श्री भगमालिनी यन्त्रम् ॥

मोहिनी पा.। लोला पा.। भञ्जिनी पा.। उद्यमा पा.। शुभा पा.। ह्लादिनी पा.। द्राविणी पा.। प्रीति पा.। रति पा.। रक्ता पा.। मनोरमा पा.। सर्वोन्मादा पा.। सर्वसुखा पा.। अभङ्गा पा.। अभितोद्यमा पा.। अनल्पा पा०। व्यक्ति विभवा पा.। विविध विग्रहा पा०। क्षोभविग्रहा पा.।

६. वृतवीथी के ६ भाग करके देवी के आगे से पूजन करे **ऐं इक्षुकोदण्डाय नमः। पाशाय पा.। कह्लाराय पा.। पद्माय पा.। अंकुशाय पा.। पुष्पसायकेभ्यो नमः**। पश्चात् धूप दीप नैवेद्यादि से अर्चन करे।

गायत्री मन्त्र - भगमालिन्यै विद्महे सर्ववशङ्कर्यै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार भगमालिनीनित्याप्रयोगविधिः॥

(श्रीतन्त्रराजे)

काम्यहोममथो वक्ष्ये नानाभीष्टाप्तिदायकम् । त्रिमध्वक्तैः पुण्डरीकैर्होमाद्विप्रान् वशं नयेत् ॥१॥
आरग्वधैस्तु राजानं करवीरैस्तु वैश्यकम् । उत्पलैर्वशयेच्छूद्रं वनिता जपया हुतैः ॥२॥
बिल्वैर्लक्ष्मीर्भवेद्होमे भूम्याढ्यः कमलैर्हुतात् । कैरवैर्वाहनावाप्तिर्दरपुष्पैर्महद्यशः ॥३॥
सौभाग्यं चम्पकैः सिद्ध्यै रक्तसौगन्धिकैर्हुनेत् । तगरैर्वस्त्रसंसिद्ध्यै पुन्नागैर्भूषणाप्तये ॥४॥
मधूकैः कन्यकासिद्ध्यै पलाशैः स्वर्णसिद्धये । किंशुकेरंशुकावाप्त्यै पाटलैः पशुसिद्धये ॥५॥
रक्तोत्पलैः सर्वसिद्ध्यै होमयेत्परमेश्वरि । अथ यन्त्राणि वक्ष्यामि वांछितार्थप्रदानि तु ॥६॥
चन्दनागुरुकर्पूरकस्तूरीकुंकुमैर्लिखेत् । सर्वाणि सर्वतो यन्त्राण्यभीष्टावाप्तिकामुकः ॥७॥
सुवर्णे रजते ताम्रे त्वंशुके भूर्जपत्रके । धारणं मूर्ध्नि बाहौ वा कण्ठे कट्यां प्रकोष्ठके ॥८॥
निधाय क्वापि पूजां वा कुर्याद्यन्त्राण्यशेषतः । षट्कोणं वृत्तयोर्मध्ये कृत्वा तन्मध्यतस्तथा ॥९॥

योनिं विलिख्य तन्मध्ये मायां साध्यसमन्विताम्। विलिख्य कोणत्रितये बहिः षट्केऽपि संलिखेत् ॥१०॥
एकैकं वृत्तयोर्मध्ये शेषार्णानि समालिखेत् । बहिर्मातृकयावेष्ट्य वृत्तान्तर्बिन्दुयुक्तया ॥११॥
एवं यन्त्राणि मन्त्रार्णैर्दशभिर्दशभिर्भवेत् । चरमेऽमृतषष्ट्यैव शेषं सम्पूरयेच्छिवे ॥१२॥

अस्यार्थः – **प्रथमतस्त्रिकोणं विलिख्य तद्बहिः षट्कोणं कृत्वा तद्बहिर्वृत्तचतुष्टयं विलिख्य मध्ये साध्यनामगर्भ ह्रींकारं विलिख्य त्रिषु कोणेषु प्रथमाक्षरमारभ्य मूलमन्त्रस्याक्षरत्रयं विलिख्य, ततः षट्सु कोणेषु षडक्षराणि विलिख्य तद्बहिर्वृत्तचतुष्टयान्तराल त्रयेऽभ्यन्तरान्तराले मूलमन्त्रस्य दशमबीजं विलिख्य, तत एकादशाक्षरमारभ्य तदन्तरालं यथा पूर्ण भवति तथा पञ्चविंशत्युत्तरशतमूलमन्त्रार्णैः संवेष्ट्य, तद्बहिरन्तराले बिन्दुयुक्तमातृकाक्षरैः संवेष्ट्य तद्बहिरन्तराले विसर्गयुक्तमातृकाक्षरैः संवेष्टयेत्। एवं दशभिर्दशभिर्मूलमन्त्रार्णैः कृत्वा त्रयोदश यन्त्राणि विलिख्यावशिष्टमूलमन्त्राक्षरैः पञ्चभिः सहामृतपञ्चकं संयोज्य, दशभिरक्षरैः प्राग्वद्यन्त्रं विलिख्यामृतपञ्चकं षण्ठहीनद्वादशस्वरसंयोगेन षष्टिबीजानि कृत्वा तानि बिन्दुयुक्तानि विसर्गयुक्तानि च विंशत्युत्तरशतवर्णैः प्रथमान्तराले संवेष्ट्य तद्बहिरन्तरालद्वये बिन्दुविसर्गमातृकाभ्यां वेष्टयेदिति चतुर्दश यन्त्राणि विलिखेत्॥**

॥ अमृतपञ्चकस्योद्धारमाह तत्रैव ॥

ज्या कं दावोऽम्बु हृत् स्वेन माययामृतपञ्चकम् । तत्पञ्चकं स्वरैर्भेदादशीतिर्माययया तथा ॥१॥
तथा अशीतिः तैः षण्ठहीनैः षष्टिः स्यान्मायया च तथा भवेत्। षष्ट्या शतं समुद्दिष्टं वर्णेष्वमृतविग्रहम् ॥१॥

तेषां सर्वत्र तन्त्रेस्मिन् विनियोगो विधीयते। ज्या जकारः कं झकारः, दावष्ठकारः, अम्बु वकारः, हृत्सकारः, जझठवस इति। स्वेन बिन्दुना पञ्च। मायया विसर्गेण च योगे पञ्चेत्यर्थः। षष्ठहीनस्वरयुक्तेन षष्टिः। बिन्दुविसर्गाभ्यां १२०। अमृतपञ्चकषोडशस्वरसंयोगेन ८० बिन्दुना विसर्गेण च १६० अक्षराणीत्यर्थः॥

तथा– चतुर्दशानां यन्त्राणां विनियोगं शृणु प्रिये । वश्यमाकर्षणं स्तम्भमारोग्यं विजयं श्रियम् ॥१॥
रक्षां गजाश्वगोमेषमहिषाणामनुक्रमात् । नरनारीनृपाणां च प्रोक्तयोगेन साधयेत् ॥२॥

तथा–अमृतार्णैः समूलार्णैर्लिखिता (? ललिता) रहितैस्तु तैः। नित्याचतुर्दशार्णैश्चाप्येकषष्ट्या शतेन च ॥१॥
षट्पञ्चाशत्समोपेतं चतुः शतमुदीरितिम् । तैर्यन्त्ररचनायोगं फलानि च शृणु प्रिये ॥२॥

अमृतार्णाः षष्ट्युत्तरशतवर्णाः १६० मूलार्णैः पञ्चत्रिंशच्छतवर्णैः १३५ ललितारहितचतुर्दशनित्यानां मन्त्रार्णा एकषष्ट्युत्तरशत वर्णाः १६१ सर्वे षट्पञ्चाशदुत्तरचतुः शतवर्णाः ४५६ भवन्ति।

तथा– त्रिकोणमष्ट पत्राब्जं बहिर्वृत्तद्वयं तथा । विधाय मध्ये मायास्थं कृत्वा नाम त्रिकोणजम् ॥१॥
अन्तरालत्रयस्थं च बहि पत्राष्टगामि च । चतुर्दशार्णमालालिख्य बृत्तमध्ये तु मातृकाम् ॥२॥
विलिख्यार्चाहुतजपसेकसिद्धानि योजयेत् । त्रयस्त्रिंशत्तमं यन्त्रं सशक्त्यमृतपञ्चकैः ॥३॥

अस्यार्थ :– **प्रथमतस्त्रिकोणं विलिख्य तदुपरि वृत्तं कृत्वा, तल्लग्रान्यष्टदलानि विरच्य तद्बहिर्वृत्तद्वयं कुर्यादिति यन्त्रं निर्माय मध्ये साध्यनामगर्भ ह्रींकारं विलिख्य त्रिषु कोणेषु तदन्तरालेषु षडबीजानि विलिख्याष्टदलेष्वष्टबीजानि विलिखेदिति प्रागुक्तवर्णसमुदायात् प्रथमतश्चतुर्दशाक्षराणि विलिख्य बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयित्वा त्रयस्त्रिंशत्तमयन्त्रस्यावशिष्टमूलवर्णाष्टके मायाबीजयुक्तामृतपञ्चकं संयोज्य चतुर्दशाक्षराणि पिधाय प्राग्वत्पूरयेत्॥**

॥ फलानि ३३ यन्त्राणां क्रमेणाह॥

ज्वरे घोरे शीतिकायां तथा चातुर्थिके गदे । स्फोटे मसूरिकायां च नेत्रार्त्यां कुक्षिसम्भवे ॥१॥
यक्षराक्षसगन्धर्वपिशाचोरगपीडने । बालग्रहार्तौ दौर्भाग्ये वन्ध्यात्वे वैरिपीडने ॥२॥
वादे चोन्मादके राजक्रोधे चौरभये तथा । डाकिन्यादिगणैः षड्भिराक्रान्त्यां ब्रह्मरक्षसैः ॥३॥
प्रमेहकामलाछर्दिदोषजेषु त्रिषु क्रमात् । योजयेदुक्तविधिना त्रयस्त्रिंशदितीश्वरि ॥४॥
कामेश्वर्यादिनित्यानां साधारणसमर्चनम् । शृणु देवि प्रवक्ष्यामि सर्वाङ्गाङ्गित्वयोगतः ॥५॥
तासां पञ्चदशानां तु मन्त्रवर्णाः समीरिताः । शतद्वयं षण्णवतिः (२९६) तैश्चक्रं तत्र पूजनम् ॥६॥
प्राक्प्रत्यग्दक्षिणोदक् च रेखाविंशतिमालिखेत् । तेन कोष्ठानि जायन्ते चतुरस्त्राणि पार्वति ॥७॥
शतत्रयं त्वकषष्ट्या तेष्वीशादिप्रदक्षिणम् । प्रवेशगत्या विलिखेद्यावत्संख्यं यथान्तरम् ॥८॥
पञ्चषष्टिस्तेषु दिक्षु प्रागादिक्षु चतुष्टयम् । अवशिष्टं भवेत्तेषु दिक्स्थेष्वेकीकृतेषु च ॥९॥
मायां चतुष्टयान्तस्थमालिखेद्वाञ्छितं क्रमात् । एकोनपञ्चाशत्कोष्ठेष्वेकीभूतेषु तत्र वै ॥१०॥
पद्मं चतुर्दशदलं बहिर्वृत्तद्वयं तथा । लिखित्वा कर्णिकामध्ये योनिं मायोदरां लिखेत् ॥११॥
दलेष्वपि तथा शक्तिं चतुर्दशसु संलिखेत् । भगमालां मध्यशक्त्यामावाह्याभ्यर्चयेद्बहिः ॥१२॥
पश्चिमादि तु वाय्वन्तमन्या आवाह्य पूजयेत् । यथाक्रममिदं चक्रमासां साधारणं भवेत् ॥१३॥
मध्ये मध्ये तु या पूज्या शेषास्तत्तद्वहाश्रिताः । यथाक्रमेण चित्रान्ताः पूजेयेद्रक्तविग्रहाः ॥१४॥
चतुरस्त्रद्वयं बाह्ये कृत्वा द्वाराणि दिक्षु च । द्वाराणां पार्श्वयोः कोणेष्वर्चयेद् द्वादश क्रमात् ॥१५॥
ब्राह्मी माहेश्वरी द्वारे पश्चिमे सव्यदक्षिणे । कौमारी वैष्णवी सौम्ये वाराह्यैन्द्री च पूर्वके ॥१६॥
चामुण्डा समहालक्ष्मीर्याम्ये वाय्वादिकोणगाः । देशकालौ तथाकारशब्दौ प्रोक्तक्रमेण वै ॥१७॥

अथैतद्यन्त्ररचनाप्रकारः

तत्र प्राक्प्रत्यगायता विंशतिरेखा दक्षिणोत्तरायता विंशतिं कोष्ठानि कृत्वा तेषु कोष्ठेष्वीशानगतकोष्ठमारभ्य प्रवेशगत्या प्रादक्षिण्येन पञ्चदशनित्यामन्त्राक्षराणि प्रोक्तानि षण्णवत्युत्तरशतद्वयसंख्यकानि (२९६) विलिख्यावशिष्टपञ्चषष्टिकोष्ठेषु प्रागादिदिक्षु कोष्ठचतुष्टयक्रमेण षोडशकोष्ठानि मार्जयित्वा तेषु साध्यनामगर्भ ह्रींकारं प्रतिदिशं विलिख्य मध्येऽवशिष्टान्येकोन पञ्चाशत्कोष्ठान्येकीकृत्य सकर्णिकं चतुर्दशदलकमल कृत्वा, तद्बहिर्वृत्तद्वयं विधाय कर्णिकामध्ये त्रिकोणं विलिख्य तन्मध्ये ह्रीमिति बीजं विलिख्य दलेष्वपि मायाबीजं विलिख्य बहिश्चतुरस्त्रद्वयं चतुर्द्वारयुक्तं कुर्यादिति यन्त्रं विलिख्य, मध्ये भगमालामावाह्य चतुर्दशदलेषु पश्चिमादिवाय्वन्तं नित्यक्लिन्ना दिविचित्रान्ताश्चतुर्दश नित्या आवाह्य पूजयेत्। अत्र मध्ये या नित्या पूज्यते तत्परतो नित्यामारभ्य चतुर्दश नित्याः पूजयेत्। तद्बहिश्चतुर्द्वारपार्श्वेषु ब्राह्म्यादिशक्तीः सम्पूज्याग्नेयादिकोणेषु देशकालाकारशक्तीः सम्पूजयेत्॥

तथा-पूजयेत्प्रोक्तरूपैस्तु प्रोक्तरूपाश्च ता यजेत् । उपचारैश्चासवैश्च मत्स्यैः मांसैः सुसंस्कृतैः ॥१॥

अपूपैः पायसैर्दुग्धैः सुश्रीतैः सितसंयुतैः । कदलीपनसाद्यैश्च फलैर्मधुभिरेव च ॥२॥
नैवेद्यैः प्रीणयेद् देवीं नृत्यगीतादिभिस्तथा । एकरात्रं त्रिरात्रं च पञ्चरात्रं तु सप्त वा ॥३॥
नवरात्रं तथा पक्षं मासं पूर्णादिकं तु वा । वर्ष वा फाल्गुनान्तं वा स्यात् समस्तार्तिनाशनम् ॥४॥
ग्रहाणां प्रातिकूल्येषु दीर्घरोगेषु वैकृते । देवतानामथोत्पाते त्रिविधे त्वभिचारके ॥५॥
दारिद्र्ये विजयप्राप्त्यां दुर्भिक्षे शत्रुपीडने । कृच्छ्रेष्वन्येषु घोरेषु पूजैषा सर्वकामदा ॥६॥
पीठे वा सुसमे कृत्वा वेदिकामण्डपे तु वा । कृत्वैतत् प्रोक्तरूपं च प्रोक्तद्रव्यैस्तथार्चयेत् ॥७॥
नमेरुचम्पक अशोकपुंनागबकुलाम्बुजैः । मल्लिकामालती - जातीशतपत्रोत्पलादिभिः ॥८॥
सुगन्धिभिस्तथान्यैश्च पूजयेत् पूर्णमानसः । एतद्विद्या भक्त्युपास्तियुतानन्यांश्च पूजयेत् ॥९॥
अथान्यदपि देवेशि चक्रमद्भुतदर्शनम् । योन्यर्णवाख्यं वनितागर्वपर्वतवज्रकम् ॥१०॥
षड्विंशांगुलमानेन कृत्वा योनिं समे तले । तत्र द्व्यैंगुलमानेषु सूत्राण्येकादशार्पयेत् ॥११॥
तेनात्र योन्यो जायन्ते त्रिकोणानि शतात्परम् । चत्वारिंशच्च चत्वारि तेषु मन्त्राक्षराणि तु ॥१२॥
प्रादक्षिण्यप्रवेशेन विलिखेत्तु निरन्तरम् । मध्येऽवशिष्टनवके नववर्गसमन्विते ॥१३॥
नाथान् नव लिखेत् पश्चात् साध्याख्यां कर्मसंयुतात् । सर्वत्र विलिखेद्भूमौ भूय आवर्तनेन तु ॥१४॥
अर्धरात्रे तु तां साध्यां स्मरन्मदनवह्निना । दह्यमानां हृतस्वान्तां मस्तकस्थापिताञ्जलिम् ॥१५॥
विकीर्णकेशीमालोललोचन अरुणारुणाम् । वायुप्रेङ्खुत्पता कास्थपटोपमकलेवराम् ॥१६॥
विवेकविधुरां मत्तां मानलज्जाभयातिगाम् । चिन्तयन्नर्चयेच्चक्रं मध्ये देवीं दिगम्बराम् ॥१७॥
जपादाडिमबन्धूककिंशुकाद्यैः समर्चयेत् । अन्यैः सुगन्धिशेफालिकुसुमाद्यैः सुगन्धिभिः ॥१८॥
त्रिसप्तरात्रादायाति प्रोक्तरूपा मदाकुला । यावच्छरीरपातं सा छायेवानपगामिनी ॥१९॥

॥ भगमालिनी प्रयोग:॥

सारांश - प्रारंभ में श्लोक १ से ८ तक कामना फल दिया गया है।

भगमालिनी का मूल मन्त्र - ऐं भगभुगे भागिनि........मे वशमानय स्त्रीं ह्र ब्लें ह्रीं।

यह मन्त्र एक सौ पैंतीस अक्षर का है।

॥ प्रथम प्रकार यन्त्र रचना॥

यन्त्र रचना के लिये प्रथम त्रिकोण बनाये फिर षट्कोण बनाकर चार वृत्त बनाये। वृतों के मध्य में ३ वीथिकाऐं (गलीयाँ) बनेगी।

त्रिकोण मध्य में **ह्रीं** मन्त्र के साथ साध्य (अथवा देवता) का नाम लिखें। त्रिकोण के तीनों कोणों में **ऐं, भ, ग,** ये तीन अक्षर लिखे। षट्कोणों में **भु, गे, भ, गि, नी, भ** ये छः अक्षर लिखें। पश्चात् वृत्तों की प्रथम वीथिका में दशम अक्षर **गो** लिखे, फिर **दरि भगमाले........ब्लें ह्रीं** ये शेष १२५ वर्ण लिखकर यन्त्र पूरा करें।

दूसरी विथिका में **अं आं......कं खं.......लं क्षं** मातृका वर्ण लिखें। तीसरी वीथिका में **अः आः......कः खः......लः क्षः** इस तरह विसर्ग युत पूरी मातृका लिखें।

यदि वीथिका में पूरा मंत्र नही लिखें तथा प्रथम वीथिका मे केवल १० अक्षर लिखें तो १३ यन्त्र बनेंगे। तथा मन्त्र के ५ वर्ण शेष रहेंगे। इन ५ वर्णों के साथ **ज झ ठ व स** (अमृत पंचक) और लिखें तो १४ वे यन्त्र के लिये १० अक्षर प्राप्त हो जायेंगे।

पहले की तरह यन्त्र बनायें, वृत्त बनायें। अमृत पंचक **(ज झ ठ व स)** के प्रत्येक वर्ण के साथ १२ स्वर **(ऋं, ॠं, लृं, लॄं** से हीन) मातृका संयोग करें तो १२×५ = ६० अक्षर प्राप्त होते हैं। यदि विसर्ग युत स्वर **(अः आः....)** लिखते हैं तो भी ६० अक्षर होते है। बिन्दु, विसर्ग युत पूरा मंत्र **(ज झ ठ व स)** प्रत्येक वर्ण के साथ करने से ६०+६० = १२० अक्षर होते हैं। १६ स्वरो से मन्त्र के प्रत्येक अक्षर के साथ विसर्ग युत होने से १६×५ = ८० तथा बिन्दु युक्त स्वरों के संयोग से १६×५ = ८० अक्षर का मन्त्र बनता है। स्वरों के बिन्दु युक्त एवं विसर्ग युत पंचाक्षर वर्णों के संयोग से ८०+८० = १६० वर्णाक्षर हुये।

१४ वें यन्त्र में वृत्तों की प्रथम विथिका में शेष ५ वर्ण **(य, स्त्रीं, ह्, ब्लूं ह्लीं)** एवं **ज, झ, ठ, व, स** ये १० अक्षर लिखें। दूसरी विथिका में १२० वर्णाक्षर लिखें तथा तीसरी वीथिका में १६० वर्णाक्षर लिखें।

इस तरह यह प्रथम प्रकार के यंत्रो की रचना हुई।

॥ द्वितीय प्रकार यन्त्र रचना॥

अन्य रचना के अनुसार त्रिकोण, वृत्त, अष्टदल के बाद दो वृत्त बनायें। त्रिकोण मध्य मे **ह्लीं** मन्त्र के साथ साध्य (देव या व्यक्ति, अथवा **भगमालिनी**) लिखें। त्रिकोण के अन्दर ३ व बाहर ३ अक्षर मन्त्र के प्रारम्भ के लिखें। पश्चात् अष्टदल में ८ वर्ण (सातवें से १४ वे अक्षर तक) लिखें। पश्चात् वीथिका में मातृका वर्ण लिखें। वृत्त के बाहर मन्त्र के १५ वें अक्षर से शेष अक्षर लिखकर **ज, झ, ठ, व, स** ये ५ वर्ण लिखकर वेटन करे।

भगमालिनी के मन्त्र के वर्णों की संख्या १३५ एवं भगमालिनी के अलावा शेष १४ नित्याओं के वर्णों की संख्या १६१ है। कुल २९६ वर्ण होते हैं। १६० पूर्व वर्णाक्षर मिलाने से ४५६ वर्ण होते हैं।

॥ तृतीय प्रकार यन्त्र रचना॥

पूर्व-पश्चिम तथा उत्तर-दक्षिण में २०-२० रेखायें खींचने से ३६१ कोष्ठक बनेंगे। बाहरी कोष्ठक से अन्दर की ओर ईशान दिशा से प्रारंभ कर सभी नित्याओं के २९६ मन्त्र वर्ण लिखें। शेष ६५ कोष्ठक बचते है। शेष में पूर्वादि दिशाओं के ४-४ कोष्ठक छोड़ने पर शेष ४९ कोष्ठक बचते हैं।

उनके मध्य में बाहर से अन्दर की ओर १४ दल कमल बनायें उसके नीचे दो वृत्त बनायें। उसके मध्य में त्रिकोण बनायें। त्रिकोण में **ह्लीं** के साथ **साध्य का नाम** लिखें।

यन्त्र मध्य में भगमालिनी का पूजन, १४ कमल दल में शेष १४ नित्याओं की पूजा करें (नित्यक्लिन्ना से विचित्रा, कामेश्वरी तक)। यन्त्र के बाहर चार द्वार युक्त भूपुर बनायें। उसमें ब्राह्मी, माहेश्वरी, पश्चिम द्वार के दोनों ओर, कौमारी एवं वैष्णवी उत्तर द्वार के दोनों ओर, वाराही, ऐन्द्री पूर्वद्वार के दोनों ओर, चामुण्डा, महाकाली दक्षिण द्वार के दोनों ओर पूजा करे।

भूपुर के वायुकोण में **वायव्यै नमः**, ईशान में **ईशान्यै नमः** अग्निकोण में **अग्नये नमः**, नैऋत्य में **नैऋत्यै नमः**, से पूजन करें। फलश्रुति शेष श्लोक १ से १९ तक है।

॥ इति भगमालिनी प्रयोगः॥

|| ३. अथ नित्यक्लिन्ना नित्या प्रयोग: ||

मंत्र – ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा।

ऋषिन्यास से विनियोग मंत्र बना लेवे।

ऋषिन्यास – शिरसि ब्रह्मणे ऋषये नमः। मुखे विराज छंदसे नमः। हृदये श्री नित्याक्लिन्नानित्यायै देवतायै नमः। गुह्ये ह्रीं बीजाय नमः। पादयोः स्वाहा शक्तयै नमः। नाभौ न्रे कीलकाय नमः। सर्वाभीष्टसिद्धये विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास – ह्रीं हृदयाय नमः। नित्य शिरसे स्वाहा। क्लिन्ने शिखायै वषट्। मद कवचाय हुं। द्रवे नेत्रत्रयाय वौषट्। स्वाहा अस्त्राय फट्।

वर्णन्यास – हृदये ह्रीं नमः। दक्षनेत्रे निं नमः। वामनेत्रे त्यं नमः। दक्षश्रोत्रे क्लिं नमः। वामे वामश्रोत्रे न्नें नमः। दक्षिणनासायां मं नमः। वामनासे दं नमः। त्वचि द्रं नमः। लिङ्गे वें नमः। गुदे स्वां नमः। पादयो हां नमः।

|| ध्यानम् ||

अरुणामरुणाकल्पामरुणां शुकधारिणीम् । अरुणस्त्रग्विलेपां तां चारु स्मेरमुखाम्बुजान् ॥
नेत्रत्रयोल्लसद्वक्त्रां भाले धर्माम्बुमौक्तिकैः । विराजमानां मुकुटलसदर्धेन्दु शेखराम् ॥
चतुर्भिर्बाहुभिः पाशमंकुशं पान पात्रकम् । अभयं बिभ्रतीं पद्मामध्यासीनां मदालसाम् ॥

|| यंत्रपूजनम् ||

|| श्री नित्यक्लिन्ना यन्त्रम् ||

स्वर्णादिपट्ट पर कुंकुमादि से दो शिवा वाला एक चतुरस्त्र बनाये उसके पूर्व पश्चिम में दो द्वार बनाये। मध्य में त्रिकोण बनाकर ऊपर अष्टदल बनाये। त्रिकोण का मुंह नीचे होवे।

१. मध्य में देवी के षडङ्गो की हृदयादि न्यास मंत्रों से पूजा करे। देवी के पृष्ठभाग में **प्रकाशनंदादि गुरुपंक्ति त्रय** का पूजन करे।

२. त्रिकोण में **ह्रीं श्रीं क्षोभिणी श्री पादुकां पूजयामि तर्पयामि नमः। ह्रीं श्रीं मोहिनी पा.। ह्रीं श्रीं लोला पा.।**

३. चतुरस्त्र में देवी अग्रभाग के द्वार के दक्षिण में – **ॐ ह्रीं श्रीं मदाबिलापा पादुकां पूजयामि नमः।** उत्तरे – **ॐ ह्रीं श्रीं मङ्गला पा.।**

४. अष्टदले – **ॐ ह्रीं श्रीं मन्मथार्ता पादुका पू.तर्पयामि नमः। मनस्विनी पा.। मोहा पा.। आमोदा पा.। मानमयी पा.। माया पा.। मन्दा पा.। मनोवती पा.।** पश्चात् सर्वविधपूजन प्रयोग करे।

गायत्री मन्त्र – नित्यक्लिन्नायै विद्महे नित्यमदद्रवायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार नित्यक्लिन्ना प्रयोगविधिः॥

(श्रीतन्त्रराजे)

विद्यायाः साधनं सम्यक्समीहितफलप्रदम् । शृणु देवी प्रवक्ष्यामि प्रयोगार्हो यतो भवेत् ॥१॥
जितेन्द्रियो हविष्याशी त्रिसन्ध्यार्वारतो भवेत् । प्राग्वल्लक्षं तद्दशांशं कुर्याद्धोमं च तर्पणम् ॥२॥
मधूकपुष्पैर्मध्वक्तै र्बकुलोत्थैरथापि वा । चन्द्रचन्दनकस्तूरी वासितैस्तर्पयैज्जलैः ॥३॥
ततो विद्याप्रयोगार्हो नित्यार्चानिरतस्तथा । सहस्त्रजापी तद्भक्तः कुर्यादुक्तं नचान्यथा ॥४॥
पद्मं रक्तैस्त्रिमध्वक्तैर्हो माल्लक्ष्मीमवाप्नुयात् । तथैव कैरवै रक्तैरङ्गनास्तु वशं नयेत् ॥५॥
समानरूपवत्सायाः शुक्लायाः गोः पयःप्लुतैः । मल्लिकामालतीजाती - शतपत्रैर्हुतैर्भवेत् ॥६॥
कीर्तिविद्याधनारोग्य - सौभाग्य - विजयादिकम् । आरग्वधप्रसूनैस्तु क्षौद्राक्तैर्हवनाद्भवेत् ॥७॥
स्वर्णाप्तिः तम्भनं शत्रोः, नृपादीनां क्रुधोऽपि च । आज्याक्तैः करवीरोत्थैः प्रसूनैररुणर्हुतैः ॥८॥
रक्ताम्बराणि वनिताभूपामात्यवशं तथा । भूषावाहनवाणिज्य - सिद्धयश्चास्य वाञ्छिताः ॥९॥
लवणैः सर्षपैर्गौरैरितरैर्वाथ होमतः । तत्तैलाक्तैर्निशामध्ये त्वानयेद्वाञ्छितां वधूम् ॥१०॥
तैलाक्तैर्जुहुयात् कृष्णादरपुष्पैर्निशान्तरा । मासादरातिस्तीव्रार्तिर्ज्वरेण भवति ध्रुवम् ॥११॥
आरुष्करघृताभ्यक्तैस्तद्बीजैर्निशि होमतः । शत्रोर्देहे व्रणानि स्युर्दुःसाध्यानि चिकित्सकैः ॥१२॥
आरुष्करघृतं भल्लातकतैलम् । तद्बीजैर्भल्लातकबीजैः ॥
तैरेव दलिताङ्गस्तु रिपुर्याति यमालयम् । तथा तत्तैलसंसिक्तै र्बीजैरङ्कोलकैरपि ॥१३॥
मरिचैः सर्षपाज्याक्तैर्निशि हौमात्तुः मासतः । वाञ्छितां वनितां कामज्वरार्तामानयेद् ध्रुवम् ॥१४॥
मरिचैः सर्षपोपेतैः सप्तरात्रं हुतेर्निशि । धैर्यमानकुलैर्नित्यं दुष्प्रापामानयेद्वधूम् ॥१५॥
अन्नज्यैर्जुहुयान्नित्यं शतमष्टोत्तरं तु वा । तेनान्नपूर्णो भवने भोक्ता च भवति प्रिये ॥१६॥
शालीभिराज्ययुक्ताभि र्होमाच्छालीमवाप्नुयात् । मुद्गैर्मुद्गं घृतेराज्यमिष्टैरिष्टं हुतर्भवेत् ॥१७॥
साध्यर्क्षवृक्षसम्भूत पिष्टपादरजः कृताम् । राजीमरिचलोणोत्थां पुत्तलीं जुहुयान्निशि ॥१८॥
प्रपदाभ्यां च जङ्घाभ्यां जानुभ्यामूरुयुग्मतः । नाभेरधस्ताद्धृदयाद्विन्नेना - कण्ठतस्तथा ॥१९॥
शिरसा च सुतीक्ष्णेन छित्त्वा शस्त्रैण वै क्रमात् । एवं द्वादशधा होमान्नरनारीनराधिपाः ॥२०॥
वश्या भवन्ति सप्ताहाज्ज्वरार्ताश्चास्य वाञ्छया । प्रयान्ति निधनं चास्य वाञ्छयानन्ययोगतः ॥२१॥

अत्र साध्यनक्षत्रसम्भूतपिष्ट - साध्यपादरजो धूली राजीमरिचलवणैरेभिः पञ्चद्रव्यैरेकैकपुत्तलिका प्राक्प्रयोगोक्तप्रकारेण कृतप्राणप्रतिष्ठा। प्रपदाभ्यां १ जङ्घाभ्यां २ जानुभ्यां ३ ऊरुयुग्मतः ४ नाभेरधस्तात् ५ हृदयान्नाभिपर्यन्तं ६ कण्ठतो हृत्पर्यन्त ७ शिरः ८, एवमाहुत्यष्टकम् ॥ तथा-

पिष्टेन गुडयुक्तेन मरिचैर्जीरकैर्युतम् । कृत्वा पुत्तलिकां साध्यनामयुक्तामथो हृदि ॥२२॥

सनामहोमसम्पातघृते सम्पाच्य तां पुनः । स्पृशन् निजकराग्रेण सहस्त्रं प्रजपेन्मनुम ॥२३॥
अभ्यर्च्य तद्घृताभ्यक्तं भक्षयेत्तद्धिया जपन् । नरनारीनृपास्तस्य वश्याः स्युर्मरणावधि ॥२४॥

अस्यार्थ :- प्राग्वदगुड़युक्ततण्डुलपिष्टमरिचजीरकैः पुत्तलिकां कृत्वा तस्या हृदि साध्यनाम विलिख्य, क्वचिदग्निं संस्थाप्य साध्यनामविदर्भितमूलमन्त्रेण घृतेनैव सहस्त्रं हुत्वोद्देशत्यागं कृत्वा क्वचिद्भाण्डे कृत्वा तत्सम्पाताज्ये मूलमन्त्रं जपन् तां पुत्तलिकां पक्वान्नवत् सम्पाच्य, पुनर्निजकराग्रेण तां स्पृशन् मूलं साध्यविदर्भितं सहस्त्रं जपित्वा तस्यां देवतामावाह्याभ्यर्च्य ''अमुकं मे वशमानय, अमुकदेवतापादुकां पूजयामि'' इति प्रत्यावरणशक्तिं सम्पूज्य, धूपदीपादिकं सर्वं प्राग्वत्समाप्य प्राक्प्रोक्तसम्पाताज्यसहितां तां मूलं जपन् तद्धिया भक्षयेदुक्तफलं भवति॥ तथा-

तैरेव पिष्टैर्वृत्तं तु कृत्वा तन्मध्यतस्तथा । साध्यनाम स्फुटं कृत्वा प्राग्वत्सम्पाच्य भक्षणात् ॥२५॥
वश्यास्ते वत्सरं भूयुस्तन्नामार्णान्वितस्तथा । कृत्वा विपाच्य खादंस्तु वशयेत् तांस्तदर्धकम् ॥२६॥

अस्यमर्थ :- प्रागुक्तपिष्टैर्वर्तुलाकारां मुद्रां कृत्वा प्राग्वद्भक्षयेद्वत्सरमात्रं वश्या भवेयुः। अथ साध्यनामविदर्भितं मूलं जपन् प्रोक्तविधिं विनापि षण्मासमध्ये वश्या भवेयुः। तदुत्तरं पुनः कुर्यादित्यर्थः॥ तथा-

नारिकेलफलाम्भोभिस्तर्पणाद्वनिता वशाः । कर्पूरवासितैस्तोयैर्मनुष्याः स्युर्वशे स्थिताः ॥२७॥
तर्पणाल्लवणाम्भोधिजलैः सर्वेऽस्य किंकराः । तथा लवणयुक्तेन तोयेन वनिता वशाः ॥२८॥
शुद्धेन वारिणा मासं तदर्धं सप्तरात्रकम् । तर्पयेद्यस्य नाम्नैव स तस्य स्याद्वशेऽनिशम् ॥२९॥
केतकैर्वासितैरिन्दुयुक्तैः केलफलोदकैः । तर्पणाद्वनिता वश्या दद्युः प्राणान्निजं धनम् ॥३०॥
नमेरुवासितैस्तोयैस्तर्पणाद्भूमिपा वशम् । चम्पकैर्वासितजलैस्तर्पणं सर्वरञ्जनम् ॥३१॥
पाटलीशतपत्राभ्यां वासितैस्तस्तर्पणं जलैः । सर्वलोकचमत्कारकारी भवति नित्यशः ॥३२॥
कस्तूरीवासिताम्भोभिस्तर्पणं सर्वसिद्धिकृत् । इन्दुचन्दनसौरभ्यवासिताम्भः प्रतर्पणम् ॥३३॥
वाञ्छितार्थसुसंसिद्धिं मण्डलात् कुरुते ध्रुवम् । सक्तुमिश्रजलैराढ्यो धनधान्यादिभिश्चिरम् ॥३४॥
गुडमिश्रजलै रात्रौ तर्पणं विघ्ननाशनम् । चिञ्चाफलरसोपेतैर्जलैर्द्वेषाय तर्पयेत् ॥३५॥
उष्णोदकैः समरिचैस्तर्पयेद्वैरिमृत्यवे । केवलोष्णोदकैस्तस्य तीव्रज्वरसमुद्भवः ॥३६॥
निम्बपत्ररसोपेतैरम्बुभिस्तर्पणं द्विषाम् । जायतेऽन्योन्यवैरस्यं येन ते नाशमाप्नुयुः ॥३७॥
तथैव सर्षपतिलैस्तर्पणाद्वैरिणो भृशम् । अतीसारादिभिर्दोषैरौदरैः क्लेशमाप्नुयुः ॥३८॥
स्पष्टार्थः-अथ यन्त्राणि देवेशि शृणु वाञ्छाप्रदानि वै । यैः कृतैः सिद्धयो हस्ते भवन्ति भजनादपि ॥३९॥
षट्कोणवृत्तयोर्मध्ये कृत्वा वृत्तं सनामकम् । विद्याद्यवर्णं विलिखेद् द्वितीयादीनि षट् क्रमात् ॥४०॥
षट्सु कोणेषु विलिखेच्छिष्टमर्णचतुष्टयम् । वृत्तयोरन्तरा दिक्षु लिखेत् कोणान्तरालतः ॥४१॥
भूताक्षराणि क्रमशो दश द्वित्रिक्रमेण तु । एवमेकादशविधं मध्येऽन्येषां निवेशनात् ॥४२॥

****

भूताक्षराणि प्रत्येकयोगात् पञ्चशतान्वितम् । पञ्चकं परमेशानि शृणु तानि यथाक्रमम् ॥४३॥
एषु सर्वत्र तद्बाह्ये वृत्तं कृत्वा च मातृकाम् । विलिखेदभितः पश्चाद्विनियोगमथोच्यते ॥४४॥
वश्ये त्रयमथाकर्षे द्वयं शान्त्यां द्वयं तथा । मध्ये नामाक्षरन्यासभेदास्तद्भेदकल्पनम् ॥४५॥
एवं तत्फलभेदस्तु सप्तविंशतिधा भवेत् । शेषाणि शृणु देवेशि क्रमेण विनियोगतः ॥४६॥
स्तम्भनं मोहनं पश्चाद्विद्वेषोच्चाटनं तथा । मारणं व्याधिभिः क्लेशं कुलोत्सादकरं तथा ॥४७॥
गजाश्वोष्ट्रखराणां च रक्षा महिषमेषयोः । गवां नराणां नारीणां विजयः समरे द्विषाम् ॥४८॥
द्वन्द्वयुद्धे तथा वादे व्यवहारेषु सर्वतः । द्यूते च रक्षा नगरग्राममण्डलके तथा ॥४९॥

अस्यार्थ:- प्रथमतो वृत्तं विधाय तद्बहिः षट्कोणं विलिख्य तद्बहिर्वृत्तत्रयं विधाय, मध्ये नित्यक्लिन्ना विद्याक्षरेष्वेकादशसु प्रथमबीजं साध्यनामयुक्तं विलिख्य, षट्सु कोणेषु द्वितीयबीजादिषड्बीजानि विलिख्या वशिष्टार्णचतुष्टय षट्कोणाद्बहिर्वृत्तद्वयान्तराले चतुर्दिक्षु विलिख्य, तद्बहिरन्तराले तत्तत्कार्यानुगुण्यभूतार्णदशकं द्वित्रिक्रमेण चतुर्दिक्षु विलिख्य, तद्बहिः पुनर्वृत्तं कृत्वा तदन्तराले मातृकावर्णैर्वेष्टयेदिति प्रथमयन्त्रम्। द्वितीययन्त्रे मध्ये मूलमन्त्रस्य द्वितीयाक्षरं विलिख्य शेषं प्राग्वल्लिखेदिति द्वितीयं यन्त्रं भवति। एवं तृतीयादिबीजानां तृतीयादीनि यन्त्राणि भवन्ति। एवमेकादश यन्त्राणि जायन्ते। एवमेकादशयन्त्राणां सप्तविंशतिप्रयोगा भवन्ति।

यथा - त्रिविधवश्ये द्वितीयं यन्त्रम्। द्विविधशान्त्यां तृतीयं यन्त्रम्। अन्येषामष्टयन्त्राणां प्रतियन्त्रं स्तम्भनादि प्रयोगत्रयं प्रयोगत्रयं ज्ञेयं, मध्ये साध्याक्षरलेखनभेदेन प्रयोगभेदस्तत्तत्कार्यानुसारि भूतार्णदशकलेखनभेदश्च ज्ञातव्य इत्यर्थः॥

॥ अथ यन्त्रान्तरोद्धारमाह ॥

विद्यायां पुनरुक्तानि हित्वा वर्णानि तान्यपि । एकादश स्युस्तैः प्राग्वत्स्वरयोगान्महेश्वरि ॥५०॥
षट्सप्तत्या शतं प्रोक्तं वर्णानां मन्त्रगामिनाम् । प्रोक्तयन्त्रेषु विलिखेदेकादशविभागतः ॥५१॥
मातृकाविद्ययावेष्ट्य कुर्यात् तन्नामयोजनम् । षोडशानां च यन्त्राणां विनियोगमथोच्यते ॥५२॥

अस्यार्थ:- मूलविद्यायाः पुनरुक्तवर्जितानि अनावृत्तान्यक्षराणि एकादश भवन्ति "हरनतयकलमदवस" इति। एते षोडशस्वरयोगेन षट्सप्तत्युत्तरशतं (१७६) वर्णा भवन्ति। प्राग्वदेषु वर्णेषु एकादशैकादशवर्णानामेकमेकं यन्त्रं विलिखेदेवं षोडश यन्त्राणि जायन्ते॥

॥ तेषां फलान्याह ॥

प्रथमेन तु यन्त्रेण कन्यकाः स्ववशं नयेत् । तेनैव तासामार्तिं च शमयेत् सेकधारणैः ॥५३॥
स्वस्थावेशं च तेनैव कुर्यान्मन्त्रं जपन् धिया । तन्मयीं भावयेत्कन्यां धूपं सर्जरसैर्दहेत् ॥५४॥
आविष्टे तां समभ्यर्च्य प्रोक्तैस्तैरुपचारकैः । पृच्छेत् तान्वांछितानर्थानाचष्टे स्वात्मानस्तदा ॥५५॥
ततोऽभ्यर्च्यात्मना योज्य तां तदात्मा भवेत्स्वयम् । तासामावेशमन्यैश्च शमयेत्तस्य धारणात् ॥५६॥
द्वितीयेन तु यन्त्रेण कर्पटे गैरिकद्रवैः । लिखितेन जयेद्वादे प्रतिवादिनमन्तरा ॥५७॥
स्थापनात्तस्य नियतमतिप्रौढोऽपि तत्क्षणात् । स्तब्धजिह्वो निरुद्योगः शुष्कास्यो लोललोचनः ॥५८॥

विलोकयन् दश दिशस्त्यक्तलज्जः पलायते । पतेद्वा पादयोः क्षिप्रं जितोऽस्मीति त्वयावदन् ॥५९॥
तृतीयेन निशापिष्टतोयेन लिखितेन तु । कर्पटे खर्परे वापि स्थापितेनोष्णभूतले ॥६०॥
चुल्ल्यधो वा दिनैर्द्वित्रैः स्तम्भयेत् सुदृढं रिपोः । रोषं गतिं मतिं जिह्वां समरं सर्वमेव च ॥६१॥
आयान्तमग्रतो रात्रौ मार्गमध्ये खनेदिदम् । बलिं दद्यात्तु तद्योन्यां तन्नक्षत्रोक्तया पुनः ॥६२॥
तेन तत्पृतना भ्रष्टा रुग्णा गतसमुद्यमा । भीता न तत्मुखा जातु घटते यन्त्रवैभवात् ॥६३॥
चतुर्थेनारिनक्षत्रवृक्षोत्थफलकातले । लिखितेन पुरोक्तेन स्थापितेन रिपोः पुरे ॥६४॥
नाशमेति रिपुः कृच्छ्रैर्वैरिरोगादिसम्भवैः । तेषु तेषु प्रयोगेषु कुर्याद्रक्षामथात्मनः ॥६५॥
पञ्चमेनाथ षष्ठेन सप्तमेनाष्टमेन च । नवमेन च कुर्वीत रक्षां राष्ट्रपुरालये ॥६६॥
प्रागादिषु चतुर्दिक्षु वह्न्यादिष्वस्त्रदिक्ष्वपि । मध्ये च स्थापयेद्यन्त्रं ताम्रपट्टेषु कल्पितम् ॥६७॥
क्रमेण नवमं मध्ये स्थापयेदुक्तयोगतः । स्वराष्ट्रे नगरे राजगृहे प्रोक्तक्रमात्खनेत् ॥६८॥
तेन वैरिकृताः कृत्याप्रयोगाः क्रूरविग्रहाः । प्रवेष्टुमत्राशक्तास्ते नाशयन्ति प्रयोजकम् ॥६९॥
दशमं राजते पट्टे विलिख्य कवचं दधत् । रणं वीरः प्रविश्याशु नाशयेद् द्रावयेच्च तत् ॥७०॥
एमादशं निशातोयघृष्टगैरिकलेखनात् । कर्पटे स्थापितं शीघ्रं शमयेद्भूभृतां रणम् ॥७१॥
द्वादशेनेन्दुकाश्मीरलिखितेन धृतेन तु । भूर्जपत्रपुटे सम्यक्सर्वरक्षा भवेन्नृणाम् ॥७२॥
त्रयोदशेन यन्त्रेण तालपत्रकृतेन तु ।ताललिप्तेन कुड्यान्तःस्थापितेनार्चितेन च ॥७३॥
गृहरक्षा भवेद्व्याधिचोरग्रहभुजङ्गमात् । राजतो वैरितो बाधादन्यक्षुद्रादितस्तथा ॥७४॥
चतुर्दशेन यन्त्रेण भूर्जपत्रस्थितेन वै । धृतेन कामिनीनां तु सौभाग्यमतुलं भवेत् ॥७५॥
तथा पञ्चदशेनापि स्वर्णपट्टधृतेन तु । वन्ध्यापि लभते पुत्रं गुणाढ्यं दीर्घजीवितम् ॥७६॥
षोडशेनोक्तरूपेण साभिषेकं धृतेन वै । सपत्नीष्वधिका तेन भर्तुः सात्यन्तवल्लभा ॥७७॥
भूर्जस्थेन धृतेनैव सर्वेषामपि सर्वदा । रक्षा भवति मर्त्यानां राजचौरग्रहादितः ॥७८॥

॥ नित्यक्लिन्ना प्रयोगः॥

सारांश – प्रारभ में श्लोक १ से १७ अलग-अलग कामना हेतु द्रव्य होम विधान दिया गया है। शत्रु के नाम से आठवां चन्द्रमा हो, आपके अनुकूल ग्रह हो तथा उग्र नक्षत्र जेष्ठा, मूल, मघा, आश्लेषा, तीनों पूर्वा, नक्षत्र हो उस दिन पुतली बनाकर शत्रु हेतु प्रयोग करें।

इस कार्य के लिये शत्रु के पैर की मिट्टी, राई, मिर्च, लवण, सरसों इत्यादि से शत्रु की पुतली बनायें। उसके पैर, जंघा, जानु, ऊरू, नाभि, हृदय एव कण्ठ में अंगों की कल्पना कर प्राण प्रतिष्ठा करें। अथवा गुड़, चावल, मिर्च, जीरा, लवण से पुतली बनाकर प्राण प्रतिष्ठा करे। उसके हृदय में साध्य का नाम लिखकर दस हजार जप करें तो वश में होवे।

पुतली के अंगों को काटकर गोली बनाकर भक्षण करें तो साध्य वश में होवे। श्लोक २७ से ३८ तक अलग अलग तर्पण प्रयोग फल दिये गये हैं।

मूल मन्त्र – ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा।

॥ यन्त्र रचना ॥

वृत्त बनायें उसके मध्य में **ह्रीं** तथा साध्य का नाम लिखें। पश्चात् षट्कोण बनायें। उसके एक-एक कोण में **नि, त्य, क्लि, न्ने, म, द** लिखें। षट्कोण पर दो वृत्त बनायें, दोनों वृत्तों के बीच की वीथिका में पूर्वादि दिशाओं में **द्र, वे, स्वा, हा** लिखें।

वृत्त के बाहर पुनः वृत्त बनायें। दोनो के बीच की जगह में पूर्वादिक्रम से **नित्य, क्लिन्ने म, द द्र, वे स्वाहा** इस प्रकार लिखकर पुनः वृत्त बनाकर **अं आं......हं लं क्षं** मातृका वर्णों से वेष्टन करें।

इसी तरह मन्त्र का दूसरा अक्षर **नि** मध्य में लिखकर शेष वर्णों को पूर्व की तरह लिखें तो दूसरा यन्त्र होगा। यदि तीसरा वर्ण **त्य** मध्य में लिखकर मन्त्र के शेष अक्षरों को लिखते हैं तो तीसरा यन्त्र बनेगा। इस तरह ११ वर्णों को प्रत्येक में एक-एक मध्य में लिखकर शेष वर्णों को षट्कोण व वृत्त में लिखने से ११ तरह के यन्त्र बनेंगे।

मूल विद्या का अनावृत्त मन्त्र **ह, र, न, त, य, क, ल, म, द, व, स** एकादश अक्षर का है। प्रत्येक वर्ण के साथ **अं आं..... अं अः** १६ स्वर युक्त मातृका लिखने से १६×११= १७६ वर्ण का मन्त्र बनता है।

यदि पूर्व में जो यन्त्र विधि दी है उसमें प्रत्येक स्वर मातृका के साथ **ह, र, न, त, य, क, ल, म, द, व, स** ये ११ वर्ण को लिखकर वेष्टन करें तो १६ मातृकाओं से १६ यन्त्र प्राप्त होगे जिनका प्रयोग फल श्लोक ५३ से ७८ तक प्राप्त है।

॥ इति नित्यक्लिन्नाप्रयोगः ॥

॥ ४. अथ भेरुण्डा नित्या प्रयोग ॥

मंत्र – १. ओं क्रों भ्रों क्रों झ्रों छ्रों ज्रों स्वाहा।
२. ओं क्रों भ्रों क्रों च्रों छ्रों ज्रों झ्रों स्वाहा।

ऋष्यादिन्यास के अनुसार विनियोग जाने।

ऋष्यादिन्यास – **शिरसि ॐ महाविष्णवे नमः। मुखे गायत्रीछंदसे नमः। हृदये श्रीभेरुण्डा नित्यादेवतायै नमः। गुह्ये भ्रां बीजाय नमः। पादयो स्वाहाशक्तये नमः। नाभौ क्रों कीलकाय नमः। सर्वाभीष्ट सिद्धये विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यास – **क्रों हृदयाय नमः। भ्रों शिरसे स्वाहा। क्रों शिखायै वषट्। झ्रों कवचाय हुं। छ्रों नेत्रत्रयाय वौषट्। ज्रों अस्त्राय फट्।**

॥ ध्यानम् ॥

तप्तकांचन सङ्काशदेहां नेत्रत्रयान्वितम् । चारुस्मिताञ्चितमुखीं दिव्यालङ्कारभूषिताम् ॥
ताटंकहार केयूररत्नस्तवक मंडिताम् । रसानानूपुरोर्म्यादि भूषणैरतिसुंदरीम् ॥
पाशांकुशौ खेटखड्गौ सदावज्रधनु शरान् । करैर्दधानामासीनां पूजायामन्यदास्थिताम् ॥
शक्तीश्च तत्समाकार तेजोहेतिभिरन्विताः । पूजयेत्तद्वदभितः स्मितसौम्यमुखां सदा ॥

वर्णन्यास – **ब्रह्मरन्ध्रे ॐ नमः। आज्ञायां क्रों नमः। मुखे भ्रों नमः। कण्ठे क्रों नमः। हृदि झ्रों नमः। नाभौ छ्रों नमः। त्रों नमः मूलाधारे। स्वां नमः दक्षपादे। वामपादे हां** नमः।

॥ यंत्रपूजनम् ॥

॥ श्री भेरुण्डा यन्त्रम् ॥

स्वर्णादिपट्ट पर कुंकुमादि से त्रिकोण, षट्कोण, अष्टकोण, वृत्त, अष्टदल बनाये उसके बाहर दो रेखा वाला चारद्वार युक्त भूपुर बनाये।

प्रथमावरणम् – मध्य में देवी के चारों ओर ६ दिशाओं में हृदयादि षडङ्गन्यास देवताओं का पूजन करे। तथा **प्रकाशनंदादि गुरुत्रयपंक्ति** का पूजन करे।

द्वितीयावरणम् – भूपुर के चारों द्वारों के दोनों पार्श्वभागों में पूजन करे–उत्तरद्वार के दोनों ओर **ह्रीं श्रीं ब्राह्मी श्री पादुकां पूजयामि। माहेश्वरी पा.** (पा. का अर्थ पादुका पूजन से है)। पश्चिमद्वार के पार्श्वभागों में **कौमारी पा.। वैष्णवी पा.।** पूर्वद्वार के दोनों ओर **वाराही पा., इन्द्राणी पा.।** दक्षिणद्वार के दोनों ओर **ह्रीं श्रीं चामुण्डा पा., ह्रीं श्रीं महालक्ष्मी पा.।**

तृतीयावरणम् – (भूपुरे) वायुकोणे **ह्रीं श्रीं कृतयुगशक्ति पा.।** ईशाने **त्रेतायुगशक्ति पा.।** आग्रेये **द्वापरयुग** शक्ति **पा.।** निर्ऋतिकोणे **कालियुगशक्ति पा.।**

चतुर्थावरणम् – (अष्टदले) **ह्रीं श्रीं विजया पा.। विमला** पा.। **शुभा पा.। विश्वा पा.। विभूति पा.। विनता पा.। विविधा पा.। विमना पा.।**

पंचमावरणम् – (अष्टकोणे) **ह्रीं श्रीं कमला पा.। कामिनी पा.। किराती पा.। कीर्ति पा.। कुर्दिनी पा.। कुलसुंदरी पा.। कल्याणी पा.। कालकोला पा.।**

षष्टमावरणम् – (षट्कोणेषु) वामाग्रकोणे – **डाकिनी पा.।** दक्षिणाग्रकोणे **राकिनी पा.।** पृष्ठकोणे **लाकिनी पा.।** पृष्ठवामाग्रकोणे **काकिनी पा.।** दक्षिणपृष्ठकोणे **शाकिनी पा.।** देव्यग्रकोणे **हाकिनी पा.।**

सप्तमावरणम् – (त्रिकोणे) **इच्छाशक्ति पा.। ज्ञानशक्ति** पा.। **क्रियाशक्ति पा.।**

अष्टमावरणम् – देवी के पृष्ठ से दक्षिण भाग की ओर **ह्रीं श्रीं** शरेभ्यो **नमः पा.। खड्गाय नमः पा.। अंकुशाय नमः पा.। पाशाय नमः पा.।** देवी के पृष्ठभाग से वामभाग ४ स्थानों की कल्पना करे उनमें **गदायै नमः पा.। चर्मणे नमः पा.। धनुषै नमः पा.। वज्राय नमः पा.।**

नवमावरणम् – (भूपुरे)पूर्वादि क्रम से इन्द्रादि दश दिक्पालों का पूजन करे।

दशमावरणम् – में उनके आयुधों का पूजन करे। पश्चात् सर्वोपचार पूजन करे। इस विद्या का प्रयोग शत्रु निग्रह में कार्य करता है शत्रु का उच्चाटन होता हैं।

गायत्री मन्त्र – **भेरुण्डायै विद्महे विषहरायै धीमहि तन्नो नित्या प्रचोदयात्॥**

॥ अथ कादीक्रमानुसार भेरुण्डा नित्या प्रयोग विधिः॥

(श्रीतन्त्रराजे)

स्नातो मौनी पयोभक्षः प्रजपेन्नवलक्षकम् । तद्दशांशं हुनेदग्नौ त्रिमध्वक्तैः कुशेशयैः ॥१॥
तावच्च तर्पयेत्तोयैरिन्दुनन्दनवासितैः । अर्चयेन्नित्यशो देवीं सहस्रं प्रजपेदपि ॥२॥
ततः स्वगुरुणोद्दिष्टप्रयोगान् विधिना चरेत् । अन्यथा निष्फलं भूयात्प्रत्युतैनं निहन्ति च ॥३॥
द्वितीयाद्यैस्त्रिभिर्बीजैः षष्ठेन च समीरितम् । निग्रहाख्यमथान्यैस्तु त्रिभिरन्त्यद्वयेन च ॥४॥
षट्कोणं वृत्तयुग्मं च कृत्वा तन्मध्यतो लिखेत् । द्वितीयार्णं साध्ययुतं कोणेष्वन्यत् त्रयं लिखेत् ॥५॥
अधरेषु समायानि तानि लेख्यानि सर्वदा । वृत्तयोरन्तरा साध्यसमेतैः पवनार्णकैः ॥६॥
सम्वेष्ट्य तानि सञ्जप्य रिपोरष्टमराशिगे । श्मशाने स्थापयेत्तत्र लग्ने विद्वेषणं भवेत् ॥७॥

अस्यार्थः – षट्कोणं विलिख्य तद्बहिर्वृत्तद्वयं विधाय भेरुण्डाया मूलनवार्णस्य द्वितीयाक्षरं साध्यनामगर्भं ''अमुकामुकयोर्विद्वेषणं कुरु कुरु'' इति संयोज्य मध्ये विलिख्य, तृतीयं चतुर्थं षष्ठं बीजत्रयं बिन्दुयुक्तं षट्कोणस्योपरितनकोणत्रये विलिख्य, तान्येव त्रीणि बीजानि षट्कोणस्याधस्तनकोणत्रये विसर्गयुक्तानि विलिख्य तद्बहिर्वृत्तयोरन्तराले वायुवर्णदशकेन साध्यनामगर्भेणावेष्टयेदुक्तफलदं भवति॥ तथा-

निम्बपत्ररसैः पिष्टश्मशानाङ्गारलेखनात् । पृषदाखुत्वचि च तत्सहस्रद्वयजापतः ॥८॥

पृषन्मार्जारः। आखुर्मूषकः।

द्वीपिवक्त्रत्वचि लिखेत्तद्यन्त्रं गोमुखत्वचि । समालिख्यं च संज्ञान्तं पूर्वस्मिन्नुत्तरे रिपोः ॥९॥
उत्तराधरमाधाय शिलाधः सन्ध्ययोर्जपेत् । जपित्वा प्रोक्तसंख्यं च जयेत्तं प्रतिवादिनम् ॥१०॥

रिपोरुत्तरदिशि पूर्वदिशि वा उत्तराधरं उपरिष्टादधस्ताच्छिलाद्वयमित्यर्थः। सन्ध्ययोः प्रातः सायम्। प्रौक्तसंख्यं सहस्रम्।

एतन्मुखावलोकेन प्रतिवादी हतोद्यमः । निरुत्तरः पलायेत जितोऽस्मीति वदेत्तु वा ॥११॥
हरितालेन पिष्टेन निशारसयुतेन तु । विलिखेद्वादविजये यन्त्रमुक्तक्रमेण वै ॥१२॥
रुरुचर्मणि तद्रक्तलिखितं तद्रिपोर्गृहे । प्रोक्तकाले खनेदुक्तक्रमपूजाजपान्वितम् ॥१३॥
उच्चाटयेद्रिपून् मासान्नियतं यन्त्रवैभवात् । नृचर्मणि च तद्रक्तलिखितं तत् श्मशानके ॥१४॥
पूजाजपक्रमोपेतं निखनेदुक्तकालतः । मासेन याति वैरी तु दाहज्वरयुतो यमम् ॥१५॥

तृतीयं मध्यतः कृत्वा त्वितरान् परितो लिखेत्।

तृतीयं प्रोक्तबीजचतुष्टयमध्ये तृतीयं बीजमित्यर्थः। साध्यर्क्षयोनेस्त्वचि तन्मधूच्छिष्टेन पीडितम् ॥१६॥
श्मशानभस्ममिलितं निक्षिप्तं नष्टकूपके । प्रोक्तकालसमोपेतं नाशयेत्सलिले रिपुम् ॥१७॥
तदेव वह्निमूलेन पिष्टेन मनुजासृजा । लिखितं गोत्वचि क्षिप्तं चुल्ल्यामुपरि वह्निना ॥१८॥
ज्वलितेनानिशं मासादग्निनाग्नौ पतेद्रिपुः । तृतीयेन तु मध्येन वेष्टितैरितरैरपि ॥१९॥

तृतीयेन तृतीयबीजेन।

उलूककाकपक्षाभ्यां प्रथमोक्तेन संलिखेत् । गर्दभत्वचि तत्खात्वा कुण्डमध्ये तदूर्ध्वतः ॥२०॥
साध्यवृक्षेन्धने वह्नौ बीजैरुन्मत्तसम्भवैः । कट्वुतैलप्लुतैर्होमान्मत्तोऽरिर्म्रियते ध्रुवम् ॥२१॥
साध्यऽर्क्षवृक्षकीलं तु प्रोक्तयन्त्रसमन्वितम् । खरस्नायुभिराबद्धं खातं वैरिपुरे निशि ॥२२॥
राशो तदष्टमे मासात्तत्पुरं पितृकाननम् । काकोलूकबकश्येनकङ्कतित्तिरिपादयोः ॥२३॥
विलिख्य यन्त्राण्युक्तानि प्रेतचीरे निबध्य तत् । खनेन्मङ्गलवारे तु प्रोक्तकाले चतुष्पथे ॥२४॥
त्रिसप्ताहाद् व्रजेद्वैरी स्यादुन्मत्तो दिशो दश । तान्येव तत्तच्चर्मस्थं तदालयभुवि स्थितम् ॥२५॥
शमयेद्गजमर्त्याश्वगोखरोष्ट्राजसैरिभान् । सप्ताहात् तद्द्वयान्मासान्नियतं यन्त्रवैभवात् ॥२६॥
तच्छान्तिं शृणु देवेशि यन्त्रध्यानाभिषेकतः । तन्मन्त्रवर्णैर्यन्त्रस्थैश्चित्रा मन्त्रार्थवैभवाः ॥२७॥
पद्ममष्टदलं कृत्वा मध्ये त्वाद्यं सनामकम् । लिखित्वाष्टसु पत्रेषु चतुष्कं तद्द्विरालिखेत् ॥२८॥
बहिर्वृत्तान्तरा कुर्यान्मातृकाक्षरवेष्टनम् । प्रागुक्तैरेव तैर्द्रव्यैः सम्पूज्य विनियोगतः ॥२९॥
तत्तत्क्लेशविनाशः स्यात्तथा मन्त्रानुभावतः ।

अत्र निग्रहयन्त्रोक्ताक्षरचतुष्टयं विहायोर्वरिताक्षरपञ्चकमध्ये प्रथमं साध्यनामगर्भं कर्णिकायामर्णचतुष्टयं द्विरावृत्त्याष्टदलेषु लिखेदित्यर्थः॥

विजयं समरे राज्ञां शृणु वैरिविनाशनम् ॥३०॥
मन्त्राक्षराणि प्रत्येकं योजयेत् षोडशस्वरैः । तेन मन्त्राक्षराणि स्युः संख्यया च शतं पुनः ॥३१॥
चत्वारिंशच्च चत्वारि तैर्यन्त्रर चनं शृणु ।

अत्र मूलमन्त्रस्यानावृत्ताक्षराणि करभझछजसवह इति नवाक्षराणि षोडशस्वरयुक्तानि चतुश्चत्वारिंशदुत्तरशतं १४४ भवन्ति॥

तथा- तेन सर्वत्र समरे विजयो भवति ध्रुवम् ॥३२॥
प्राक्प्रत्यक्दक्षिणोदक् च कुर्याद्रेखास्त्रयोदश । तेन तावन्ति कोष्ठानि सम्भवन्ति समन्ततः ॥३३॥
कृत्वाष्टास्त्रं ततो बाह्ये वृत्तयुग्मं ततो लिखेत् । अक्षराणि शिवाद्यं तु निर्ऋत्यन्तमनुक्रमात् ॥३४॥
तत्तन्मन्त्रार्णकोष्ठेषु नवस्वाख्यां समालिखेत् । बहिरष्टषु कोणेषु द्वितीयार्णादि संलिखेत् ॥३५॥

यस्मिन् यस्मिन् कोष्ठेऽनावृत्ताक्षरं पतितं तस्मिंस्तस्मिन् कोष्ठे साध्यनाम लिखेदित्यर्थः। द्वितीयार्णेति मूलमन्त्रबीजानीत्यर्थः॥

अन्तरालेषु विलिखेदाद्यं वृत्तद्वयान्तरा । तान्येव मातृकाख्याभिर्विदर्भितमथो लिखेत् ॥३६॥

बहिरष्टकोणान्तरालेषु आद्यक्षरं प्रणवमेव लिखेत्। तदन्तर्बहिर्वृत्तद्वयान्तराले मूलमन्त्राक्षरविदर्भितमातृका क्षरैर्वेष्टयेदित्यर्थः॥

एतत्पटे समालिख्य ध्वजीकृत्य रणोद्यमे । दर्शयेत् तेन रिपवः पलायन्ते दिशो दश ॥३७॥
प्रणमेयुर्निजां लक्ष्मीं प्राभृतीकृत्य तत्क्षणात् । तदेव वैरिशिविरे निखनेदुदये शनेः ॥३८॥
सद्यस्त्वन्योन्यकलहान्नाशमेति सुनिश्चितम् । तदेव स्वपुरे मध्ये स्थापयेद्धिषणोदये ॥३९॥
पराभिचारकृत्यादिदुरितानि न तत्र वै । संस्पृशन्ति पुरान्तः स्थाद्यन्त्रशक्त्यनुभावतः ॥४०॥

****

तद्यन्त्रं ताम्रपट्टे तु विलिख्याभ्यर्च्य तत्पुनः । स्थापयेत् साध्यभूभर्तुरेकादशसमुद्यमे ॥४१॥
गजवाजिगृहे स्वस्य भाण्डागारे स्वमन्दिरे । अन्तःपुरे नगर्यास्तु दिक्षु मध्ये च तत्खनेत् ॥४२॥
यत्र संस्थापितं यन्त्रं तत्रार्चां नित्यशो नृपः । कारयेत् तेन तत्सर्वं शाश्वतं वृद्धये भवेत् ॥४३॥
बीजानि तानि प्रत्येकमष्टपत्रसरोरुहे । मध्ये दलेषु परितो लिखेदेकैकशः क्रमात् ॥४४॥
बहिर्मातृकयावेष्ट्य सञ्जप्याभ्यर्च्य नित्यशः । स्वजन्मर्क्षादिनवके कुर्याच्छान्तिमनुक्रमात् ॥४५॥
यन्नक्षत्रे भवेदस्य ग्रहतो राजतोऽपि वा । रोगतो वैरितो वापि तस्मिंस्तत्तेन शामयेत् ॥४६॥

अत्र यन्त्रान्तरमाह। बीजानीति। अष्टदलकमलं विलिख्य मध्ये प्रथमबीजं साध्यनामगर्भं विलिख्यासुष्ट दलेषु द्वितीयाद्यष्टबीजानि बहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयेत्। एवं द्वितीयाक्षरं मध्ये चेद् द्वितीयं यन्त्रं भवति एवं नवयन्त्राणि भवन्तीत्यर्थः॥

तथा -

मन्त्रार्णौषधमध्यस्थं यन्त्रं कृत्वा तु तेन तु । रक्षां कुर्वीत सर्वेषां सर्वापत्तारणाय वै ॥४७॥
तत्तद्यन्त्रं तद्दिनेषु स्नानपानाशनादिना । ग्रहजं वैरिजं दुःखं शाम्यत्येव न संशयः ॥४८॥
क्रमेण नवयन्त्राणि नवग्रहमयानि च । तस्मात् तत्तद्ग्रहक्लेशं तत्तद्यन्त्रेण शाममेत् ॥४९॥
सेकाशनविभूत्यादिप्रयोगैरुदितैः क्रमात् । विविधानि विषाण्येभिर्यन्त्रैर्जलनिवेशनैः ॥५०॥
नाशयेत्पानसेकाभ्यां धारणेनार्चनेन च । एभिस्तु नवभिर्यन्त्रैर्यन्त्र साध्यं न कुत्रचित् ॥५१॥
देशे वा नगरे ग्रामे मण्डले खर्वटादिके । प्रथमं मध्यतः खात्वा प्रागादिषु ततोऽष्टसु ॥५२॥
द्वितीयादीनि तु खनेत्तत्र लक्ष्मीरतिस्थिरा । धर्मार्थौ चातिसम्वृद्धौ भवेतामुक्तयोगतः ॥५३॥
द्वितीयं मध्यतः खात्वा त्वितराण्यभितः खनेत् । धार्मिकास्तेन तत्रस्थाः प्रसीदन्ति च देवताः ॥५४॥
सप्तस्वन्येषु च तथा कान्त्यारोग्यशोबलैः । पुत्रज्ञानधनैश्चाढ्याः प्रभवन्ति च नित्यशः ॥५५॥
दष्टेषु घोरैः फणिभिर्नवभिर्नवरन्ध्रगैः । ध्यातैर्मृतोऽपि माहात्म्यान्मन्त्रस्योत्तिष्ठते ध्रुवम् ॥५६॥
अश्विन्यादिषु ऋक्षेषु नवानि नवसु क्रमात् । विलिख्य देवीं तत्रस्थां नवाकारां नवस्वपि ॥५७॥
पूजयेदुपचारैस्तां नित्यशो भक्तिसंयुतः । प्रागुक्तपरिवारादिरहितां पूजयन्नपि ॥५८॥
सिद्धिमेति नरो भक्त्या परया चेत्समन्वितः । स्त्रीबालवृद्धाशक्तानां गतिरेषा च सिद्धये ॥५९॥
भेरुण्डां कर्णयोर्जप्याद्विषार्तस्य तदैव सः । निर्विषो जायतेऽचिन्त्या मन्त्राणां शक्तयः शिवे ॥६०॥
त्रैलोक्यमोहिनी विद्या सर्वतो भवता स्तुता । न कदाचित् तु सा प्रोक्ता तां मे ब्रूहि महेश्वर ॥६१॥
सर्वेषामेव मन्त्राणां विद्यानां च यशस्विनि । व्याप्तरूपं प्रवक्ष्यामि शृणु त्वमिदमद्भुतम् ॥६२॥
येन नारीनरनृपदेवताः सर्वजन्तवः । भजन्त्येनं यथा मां त्वं तत्प्रयोगबलाद्ध्रुवम् ॥६३॥
अकारादिक्षकारान्तैर्मातृकार्णैः सबिन्दुभिः । प्रत्येकं पुटितान् कृत्वा मन्त्रं विद्यामथापि वा ॥६४॥
विद्यया मातृकावर्णान् पुटयेन्मन्त्रतोऽपि वा । प्रोक्ते तद्यन्त्रनवकेकुम्भं संस्थाप्य वै तथा ॥६५॥

जपतर्पणहोमार्चासिद्धया सेक ईरितः । कुचन्दनैर्गैरिकैर्वा दरदैश्चन्दनैस्तथा ॥६६॥
सिन्दूरैस्तण्डुलैर्मुद्‌गैस्तिलैः कृष्णैः सितैरपि । नवानां नवभिः कुर्यादेभिर्यन्त्रप्रकल्पनम् ॥६७॥
चैत्रादिविषुवद्द्वन्द्वे तथैवायनयोर्द्वयोः । दक्षोत्तराख्ययोर्जन्मत्रितये पर्वणि क्रमात् ॥६८॥
राजा वा राजमहिषी सेनापत्यधिपोऽथवा । अन्यो वा भक्तिशीलाढ्यः कारयेदभिषेचनम् ॥६९॥
दक्षिणामभिषेके च दद्याद्भूरि स्वशक्तितः । वित्तशाठ्यं न कुर्वीत यदि कुर्वीत लोभतः ॥७०॥
संदहेत्तं पावकवत् पुत्रलक्ष्मीकलत्रकैः । तस्मात्सर्वत्र तन्त्रेऽस्मिन् वित्तशाठ्यं न चिन्तयेत् ॥७१॥
अभिषेकफलं देवि शृणु वक्ष्ये यथाविधि । सोमसूर्याग्निरूपेण जलेनेप्सितमन्त्रतः ॥७२॥
जपपूजादिना सिद्धवैभवेनाभिषेकतः । दुर्लक्षणसमुत्थानि तथा दुष्कर्मजानि च ॥७३॥
तद्वद्दुर्नीतिजनितान्यन्यानि दुरितानि च । नाशयेत् तत्क्षणादेव सलिलैरिव पावकः ॥७४॥
अपुत्रो वित्तविद्यायुरारोग्यादिसमन्वितः । लभते च बहून् पुत्रान् सुखी च चिरमेघते ॥७५॥
केमद्रुमादियोगेषु जन्मना प्राक्तनाद्यतः । यो भृशं नित्यदारिद्र्यात् क्लिष्टः सोऽपि श्रियैधते ॥७६॥
प्राग्जन्मसञ्चितैः पापैरपथ्यादिनिषेवणैः । अनीत्या वैरिविहितैरभिचारादिभिस्तु वा ॥७७॥
ये रोगाः पीडयन्त्येनं ते विनश्यन्त्यशेषतः । कान्तिलक्ष्मीधनारोग्यविद्याविजयकीर्तिभिः ॥७८॥
सुचिरं जीवति ख्यातः पुत्रपौत्रादिभिर्युतः । नवाभिषेकं नवसु प्रोक्तेषु विधिना चरन् ॥७९॥
अपमृत्युं विजित्यास्मद्भक्तः शुद्धान्तमानसः । जीवन्मुक्तश्चिरं योगी भुवि जीवति मन्मथः ॥८०॥

॥ भेरुण्डा प्रयोग:॥

मूल मन्त्र – ओं क्रों भेः क्रों चों छ्रों ज्रों झ्रों स्वाहा। (इति दशाक्षर)
नवार्ण मन्त्र में **ओं** नहीं है।

इस विद्या का प्रयोग विद्वेषण एवं उच्चाटन में विशेष कार्य करता है।

॥ प्रथम प्रकार ॥

षट्कोण बनायें, इसके मध्य में **भेः (साध्य का नाम) अमुकामुकयो विद्वेषणं कुरु कुरु** लिखें।

षट्कोण के ऊपरी तीन कोणों में **क्रों, चों, ज्रों** अलग-अलग लिखें। नीचे के तीनों कोणों में **छ्रों, झ्रों, स्वाः** अलग-अलग लिखें। षट्कोण के ऊपर दो वृत्त बनायें, उसके मध्य की जगह में **स्वाहा.......साध्य का नाम** एवं दशाक्षर मन्त्र लिखें। अभिचार, विद्वेषण, उच्चाटन हेतु श्लोक ८ से २५ तक अवलोकन करें।

अभिचार की शान्ति के लिये – अष्ट दल बनायें। मध्य में **क्रों** मन्त्र के साथ साध्य का नाम लिखें। पूर्वादि चार पद्मों मे **भेः। क्रों। चों, छ्रो। ज्रों, झ्रों। स्वाहा** लिखें। पुनः शेष आग्नेय, नैऋत्यादि चारो पद्मदलों में यही वर्णाक्षर पुनः लिखें। बाहर दो वृत्त बनायें, उनके मध्य की जगह में **अं आ.......हं लं क्षं** मातृका वर्ण लिखें। पश्चात् शान्ति हेतु जप कर पंचगव्यादि व त्रिमधु से होम कर यन्त्र साधक को धारण करना चाहिये।

मूल मन्त्र के अनुवृत्त अक्षर **''क, र, भ, झ, छ, ज, स, व, ह''** ये नव वर्ण हैं। प्रत्येक अक्षर के साथ स्वर मातृका

****

(अं आ.......अः) लिखने पर १६×९ = १४४ वर्ण बनते हैं।

पूर्वोक्त यन्त्र को इन १४४ वर्णों से वेष्टन कर यन्त्र धारण करें तो युद्ध में विजय प्राप्त होवे।

॥ द्वितीय प्रकार यन्त्र रचना॥

तेरह-तेरह रेखायें पूर्व-पश्चिम व दक्षिण-उत्तर खींचने से १२×१२ = १४४ कोष्ठक बनेगे। उन कोष्ठको में **"क र भ झ छ ज स व ह"** प्रत्येक के बाद १६ मातृकावर्ण लिखें। पहले कोष्ठक में **"क"** (साध्य का नाम सहित) लिखें फिर १६ कोष्ठकों में स्वर मातृका, पुनः १८ वें कोष्ठक में "र" (साध्य का नाम सहित) पश्चात् १६ कोष्ठकों में पुनः स्वर मातृका लिखें। इस प्रकार मन्त्र के नौ वर्णों के साथ नौ बार स्वर मातृका तथा नौ बार साध्य का नाम आयेगा। मन्त्र ईशान से दक्षिणावर्त लिखें।

१४४ काष्ठकों के बाहर चारों ओर अष्टकोण बनाकर उनके बाहर दो वृत्त बनायें। आठों काणों में **"र, भ, झ, छ, ज, स व, ह"** लिखें वृत्तों के बीच की जगह में **"अं आं........हं लं क्षं"** मातृका वर्ण लिखें।

॥ तृतीय प्रकार यन्त्र रचना॥

अष्टदल बनायें अनुवृत्त मन्त्र का प्रथम अक्षर **"क"** मध्य में लिखें, शेष आठ अक्षर अष्टदल में लिखें। बाहर दो वृत्त बनायें, उनके मध्य की जगह में मातृका वर्ण लिखें। इस तरह मन्त्र के एक-एक वर्ण को मध्य में लिखें शेष वर्णों को अष्टदल में लिखें तो नौ तरह के यन्त्र बनेंगे।

प्रयोग विधि श्लोक ४७ से ८० तक जानें।

॥ इति भेरुण्डानित्याप्रयोगविधि॥

॥ ५. अथ वह्निवासिनी नित्या प्रयोगः॥

मंत्र - ॐ ह्रीं वह्निवासिन्यै नमः।

ऋषिन्यास के अनुसार विनियोग जाने।

ऋषिन्यास - शिरसि वसिष्ठ ऋषये नमः। मुखे गायत्रीछंदसे नमः। हृदि वह्निवासिनी नित्यादेवतायै नमः। गुह्ये ॐ ह्रीं बीजाय नमः। पादयो नमः शक्तियोः। नाभौ वह्निवासिन्यै कीलकाय नमः। सर्वाभीष्टसिद्धये विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास - ह्रां हृदयाय नमः। ह्रीं शिरसे स्वाहा। ह्रूं शिखायै वषट्। ह्रैं कवचाय हुं। ह्रौं नेत्रत्रयाय वौषट्। ह्रः अस्त्राय फट्।

वर्णन्यास - दक्षनेत्रे **"ॐ" नमः**। वाम नेत्रे **ह्रीं नमः**। दक्षकर्णे **वं नमः**। वामकर्णे **ह्नि नमः**। दक्षनसि **वां नमः**। वामनसि **सिं नमः**। मुखे-**न्यै नमः**। लिङ्गे **नं नमः**। गुदे **मं नमः**। मूलमंत्र से व्यापक न्यास करे।

॥ ध्यानम् ॥

तप्तकांचनसंकाशां नवयौवन सुंदरीम् । चारुस्मेरमुखाम्भोजां विलसन्नयनत्रयाम् ॥
अष्टाभिर्बाहुभिर्युक्तां माणिक्याभरणोज्ज्वलाम् । पद्मराग किरीटांशु संभेदारुणिताम्बराम् ॥

पीतकौशेय वसनां रक्तमञ्जीरमेखलाम् । रत्नमौक्तिक संभिन्नस्तबका भरणोज्ज्वलाम् । रक्ताब्ज कम्बु पुण्ड्रेक्षुचाप पूर्णेन्दुमण्डलाम् । दधानां बाहुभिर्वामै कह्लारं हेमशृङ्गकम् ॥ पुष्पेषु मातुलिङ्गं च दधानां दक्षिणैः करैः । स्वसमानाभिरभितः शक्तिभिः परिवारिताम् ॥

॥ यंत्रपूजनम् ॥

॥ श्री वह्निवासिनी यन्त्रम् ॥

मध्य में त्रिकोण बनाये उसके बाहर अष्टकोण बनाते हुये नवयोनिचक्र बनाये। उनके ऊपर दो वृत्त बनाकर द्वादशपत्रपद्म बनाये। उसके ऊपर २ वृत्त बनाये पश्चात पूर्व पश्चिम द्वार युक्त भूपूर बनाये।

१. मध्य त्रिकोण में देवी का आवाहन करे।

२. वृत्त के अभ्यन्तर षडङ्गन्यास देवताओं का स्थापन पूर्व, ईशान, नैऋति, वायव्य, देव्यग्रे एवं दिक्षु दिशा में करे। **प्रकाशानंदादि गुरु** पंक्तित्रयं का पूजन करे।

३. अष्टकोणों में पूर्वादिक्रम से – **ह्रीं श्रीं ज्वालिनी पादुकां पूजयामि तर्पयामि नमः। विस्फुलिङ्गिनी पा.। मङ्गला पा.। मनोहरा पा.। कनका पा.। कितवा पा.। विश्वा पा.। विविधा पा.।**

४. द्वादशदले – **ह्रीं श्रीं मेषा पादुका पूजयामि तर्पयामि नमः। वृषा पा.। मिथुना पा.। कर्कटा पा.। सिंहा पा.। कन्या पा.। तुला पा.। कीटा पा.। चापा. पा.। मकरा पा.। कुंभा पा.। मीना पा.।**

५. भूपुरे – पश्चिमद्वार के पार्श्वद्वय से वायव्य, उत्तर, ईशान **पर्यन्तमुद्यस्मरा पा.। सर्वभक्षा पा.। विश्वा पा.। विविधोद्भवा पा.। चित्ररूपा पा.। पूर्व द्वार के दोनों पार्श्व से अग्नि, दक्षिण, निर्ऋति पर्यन्तम् निः सपत्नापादुका. पू. त.। निरातङ्का पा.। पावनी पा.। अचिन्त्यवैभव पा.। रक्ता पा.।**

६. इसके बाद भूपुर में लोकपालों व उनके आयुधों का पूजन करें।

गायत्री मन्त्र – वह्निवासिन्यै विद्महे सिद्धि प्रदायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार वह्निवासिनीनित्याप्रयोगः॥

(श्रीतन्त्रराजे)

विद्यायाः साधनं तद्वत्तन्त्रेऽस्मिन् परमेश्वरि । अन्यतन्त्रानपेक्षित्वादुच्यतेऽत्रैव साधनम् ॥१॥
द्रव्यानुक्तौ होमविधौ घृतमन्नाज्यमेव च । संख्यानुक्तौ सहस्त्रं स्याच्छतं वा तन्त्रचोदितम् ॥२॥
विदध्यादुक्तरूपेण पूर्णत्वं त्वमुनाक्षतम् । काम्यहोमविधिं वक्ष्ये शृणु वाञ्छितदायकम् ॥३॥
शालितण्डुलमादाय प्रस्थं भाण्डे विनिक्षिपेत् । समानवर्णवत्साया रक्ताया गोः पयस्तथा ॥४॥
द्विगुणस्तत्र निक्षिप्य श्रपयेन् संस्कृतेऽनले । घृतेन सिक्तं सिक्थं तु कृत्वा तत्ससितं करे ॥५॥
निधाय विद्यामष्टोर्ध्व शतं जप्त्वा हुनेत्ततः । एवं होमो महालक्ष्मीमावहेत् प्रतिपत्कृतः ॥६॥

सिक्थं पिण्डं, ससितं सितया युतम्॥ तथा–

शुक्रवारेष्वपि तथा वर्षान्नृपसमो भवेत् । पञ्चम्यां तु विशेषेण प्राग्वद्धोमं समाचरेत् ॥७॥

तस्यां तिथौ त्रिमध्वक्तैर्मल्लिकाद्यैः सितैर्हुनेत् । अन्नाज्याभ्यां तु नियतं हुत्वान्नाढ्या भवेन्नरः ॥८॥

यद्यद्धि वाञ्छितं वस्तु तानि सर्वाणि सर्वदा । घृतहोमादवाप्नोति तथैव तिलतण्डुलैः ॥९॥

पञ्चमीषु विशेषेण पूजां कुर्याद् व्रती भवेत् । प्रतिपत्तिथिमारभ्य पञ्चदश्यन्तमम्बिके ॥१०॥

कामेश्वर्यादिचित्रान्ता देव्यस्त्वेकैकविग्रहाः । यतस्तेन स्वस्वतिथौ तास्ताः पूज्या हुतादिभिः ॥११॥

प्रीणयेद् व्रतसङ्कल्पसमेतो भक्तिसंयुतः । तेनायुः श्रीधनारोग्यविद्याकीर्तिसमन्वितः ॥१२॥

जीवेद्वर्षशतं भूमौ स्वकुल्याग्रयश्च तत्त्ववित् । यत्तिथौ यः समाख्याताः स ताः सममवाप्नुयात् ॥१३॥

विद्या विधिवदेवैताः प्रोक्ताः पञ्चदशापि च । सम्प्राप्य जपहोमार्चायोगतर्पणसेकतः ॥१४॥

विद्यया देवतात्मानं सम्प्राप्याखिलमाचरेत् । विद्याप्राप्तिविधिं देव ब्रूहि सम्यङ् ममाधुना ॥१५॥

आसां पञ्चदशानां च येनैताः साधकोन्मुखः । शृणु वक्ष्यामि ते देवि विद्याप्राप्तिविधिं शुभाम् ॥१६॥

येन विद्यादेवताभ्यामैक्यं योगेन सिध्यति । तद्भावमावयोरैक्यरूपमानन्दविग्रहम् ॥१७॥

यदवाप्तुं यजन्तेऽद्याप्यनेके मुनयोऽम्बिके । कुचन्दनैः कुंकुमैर्वा सिन्दूरैर्गैरिकैः शुभैः ॥१८॥

विदध्याद्विपुलं चक्रं व्यक्तरेखं सुशोभनम् । यस्या यच्चक्रमाख्यातं नित्यपूजाविधिक्रमे ॥१९॥

तत्र कुम्भं निधायान्तर्जले सम्पूज्य देवताः । प्रोक्तक्रमसमोपेतं पूर्वेद्युर्गीतनृत्यकैः ॥२०॥

कृत्वोत्सवमथान्येद्युः प्राग्वदभ्यर्च्य तां तथा । तत्तिथौ प्राङ्मुखं शिष्यामुक्तलक्षणसंयुतम् ॥२१॥

तथाविधो गुरः कुम्भजलैस्तमभिषेचयेत् । तज्जलं प्रागुदङ्मध्यदिक्षुगं सर्वसिद्धिदम् ॥२२॥

अन्यासु क्रमतोऽनिष्टान्यवाप्नोति सुनिश्चितम् । वह्निदाहं मृतिं रोगं दारिद्र्यं देशमोचनम् ॥२३॥

क्रमाद्वह्न्यादिवाय्वन्तं फलानि स्युरिमानि वै । ततोऽसौ परिधायाशु शुभ्र शुद्धे च वाससी ॥२४॥

समाचम्य निजैर्वृत्तैः समस्तैर्वा पुरोदितैः । अभ्यर्च्य पादयोर्नाथं पञ्चश्लोकैः स्तुवंस्त्रिशः ॥२५॥

प्रणम्योत्थाय पुरतो बद्धाञ्जलिकरो भवेत् । ततो गुरुस्तमाहूय चक्रमध्ये निवेश्य च ॥२६॥

मनसा भावयन्नैक्यमात्मानं देवतात्मना । प्रोक्तक्रमेण तां देवीं विद्यारूपां महाद्युतिम् ॥२७॥

समावाह्यास्य मूर्धादित्रिषु स्थानेष्वनुक्रमात् । संस्थाप्य प्रोक्तरूपां तां ध्यात्वाभ्यर्च्य वदेन्मनुम् ॥२८॥

जीवकर्णे त्रिशः पूर्णदेवतात्मा समाहितः । ततस्तत्रैव तां विद्यां शतं जप्यात् तदात्मवान् ॥२९॥

पुनस्तदाज्ञयोत्थाय पुष्पैरभ्यर्च्य तं स्तुवन् । प्रणम्य त्रिरुपासीत मूर्ध्नि बद्धाञ्जलिः स्तुवन् ॥३०॥

आहूय क्रममाचारान् प्रोक्त्वा सम्यग्भजेति तम् । आदिशेद्देशिकस्तस्माद्दिनादारभ्य सोऽपि तम् ॥३१॥

नित्यशो जपपूजाद्यैरुपासीत शिवं गुरुम् । एवं पञ्चदशानां च नित्यानां क्रम ईरितः ॥३२॥

विद्याप्राप्तिविधौ देवि सर्वं सम्यक् समीरितम् । तासां नैमित्तिकं काम्यं ललितोक्तविधानतः ॥३३॥

कुर्यात्प्रतिष्ठाद्यं चैवं यत एतास्तु तन्मयः । आसामन्योन्यमङ्गाङ्गिपूजासु परमेश्वरि ॥३४॥
एकाङ्गित्वे स्थितान्यास्तत्परिवारास्तथाविधाः । अन्यदा प्रोक्तरूपास्तास्तत्र तत्रार्चने मताः ॥३५॥
तासां काम्यफलावाप्तिध्यानं तत्पटलोदितम् । एवं सर्वं समाख्यातं साधारणविधानकम् ॥३६॥
विद्या मन्त्रा इति प्रोक्ता यत्तद्भेदं वद प्रभो । शृणु देवि विशेषं तु संदर्भत्वे समेऽपि च ॥३७॥
वर्णानां देवताभेदान् द्विधा स्युस्ते त्वशेषतः । त्वद्दैवत्याः स्मृता विद्या मद्दैवत्यास्तु मन्त्रकाः ॥३८॥
पुनरस्यास्तु यन्त्राणि तत्फलानि शृणु प्रिये । विद्याक्षरेष्वनावृत्तान्यक्षराण्यष्ट तैस्तथा ॥३९॥
स्वराणां सङ्गमादष्टाविंशत्या शतमीरितम् । विधाय वृत्तयोर्मध्ये त्वष्टकोणं ततो द्वयम् ॥४०॥

अत्र अनावृत्ताक्षराणि "**हरवनसमय**" इति आदावकारः, मिलित्वाष्टावक्षराणि षोडशस्वरयुक्तानि चेदष्टाविंशत्युत्तरशतं १२८ वर्णा भवन्तीत्यर्थः।

कृत्वा तेषु न्यसेद्वर्णानष्टस्वष्टौ तु मध्यतः । मायां नामाङ्कितां कृत्वा तां तारेण प्रवेष्टयेत् ॥४१॥
अन्तर्वृत्तान्तराले ताँल्लिखेद्वर्णान् दश क्रमात् । कर्मानुरूपान् पञ्चाशल्लिखेदुक्तक्रमेण वै ॥४२॥
बहिर्वृत्तान्तरा प्राग्वदादिक्षान्ताक्षराणि च । एवं षोडश यन्त्राणि जायन्ते तैर्यथाक्रमम् ॥४३॥

॥ अथैतद्यन्त्ररचनाप्रकारः॥

प्रथमतो मध्ये साध्यनामगर्भं ह्रींकारं विलिख्य तत्प्रणवेन बहिरावेष्ट्य तद्बहिर्वृत्तद्वयं कृत्वा तद्बहिरष्टकोणं चतुरस्त्रद्वयेन विरच्य, तद्बहिर्वृत्तद्वयं विधायाभ्यन्तरवृत्तद्वयान्तराले कर्मानुसारीणि भूताक्षराणि दश द्वित्रिद्वित्रिक्रमेण विलिख्याष्टकोणेषु अष्टाविंशत्युत्तरशत १२८ वर्णेषु प्रथमाष्टबीजानि विलिख्य तद्बहिर्वृत्तद्वयान्तराले मातृकाक्षरैः संवेष्टयेत्। द्वितीययन्त्रस्याष्टकोणेषु प्रागुक्तवर्णेषु प्रथमाष्टकं विहाय द्वितीयाष्टकं लिखेत्। अन्यत्समानम्। एवं षोडश यन्त्राणि भवन्तीयर्थः॥ तथा-

तैर्यन्त्रैः साधयेन्नित्यं मनीषितमशेषतः । प्रथमं खर्परे रक्तवह्निमूलेन संयुतम् ॥४४॥
सिन्दूरं तद्रसे पिष्ट्वा धत्तूररससंयुते । लिखित्वा खदिराङ्गारे तापयेन्निशि जापवान् ॥४५॥
नारी नरो नृपोऽन्यो वा समायाति च तद्बलात् । तदेव तेन ताम्रे वा कांस्ये वा प्राग्वदालिखेत् ॥४६॥
तत्तापनादपि भवेत् पूर्वोक्तं फलमीश्वरी । द्वितीयं खर्परे तेन विलिख्य निशि तापयेत् ॥४७॥
नारी वश्यं समायाति जन्माचारविलङ्घिनी । तृतीयं तेन तत्रैव लिखित्वा निशि तापयेत् ॥४८॥
श्मशानाग्नौ मुक्तकेशः क्षणाद्वैरी ज्वरातुरः । तदेव दम्पतीदग्धवह्न्यङ्गारे तु निर्जने ॥४९॥
रसे पिष्ट्वा लिखित्वाग्नौ संताप्य निखनेत् ततः । श्मशाने वैरिणा प्रोक्तकाले क्रुद्धाशयो जपन् ॥५०॥
मनुं तदैव सम्भ्रान्तः पिशाचार्तो रिपुर्भवेत् । चतुर्थं विलिखेत् कृष्णपटचीरेऽसिताम्बरे ॥५१॥
पूर्ववत् तत्र निखनेद्रात्रावुक्तक्रमेण तु । दाहज्वरेण सप्ताहाद्रिपुर्याति यमालयम् ॥५२॥
पञ्चमेऽप्यथवा षष्ठे द्वयोर्नाम लिखेद् द्वयोः । काकोलूकजपक्षोत्थलेखिन्या खर्परद्वये ॥५३॥
श्मशाने निखनेत् प्राग्वन्नदीतीरद्वये द्वयम् । नद्यां तु वारिपूर्णायां विद्वेषः स्यात् तयोर्मिथः ॥५४॥

सप्तमे नाम संलिख्य सीसपट्टे यथाविधि । शिरः कपाले निक्षिप्य श्मशाने निखनेन्निशि ॥५५॥
रिपोः पुरोक्तकाले च पिशाचैर्गृह्यते रिपुः । अष्टमं खर्परे कृत्वा रिपुद्वारे खनेन्निशि ॥५६॥
सप्ताहात् तद्गृहाद्वैरी प्रयात्युच्चाटितोऽन्यतः । नवमं हेम्नि कृत्वा तदूर्मिकायां रवेर्दिने ॥५७॥
सिद्धयोगे शुभे नग्रे धिषणोदय एव वा । कृत्यापमृत्युरोगादिदुः खेभ्यो मुच्यते नरः ॥५८॥
दशमं राजते पट्टे कृत्वा वेश्मनि कुत्रचित् । निधाय पूजयेद्वेश्मन्यश्मपातादिशान्तये ॥५९॥
तथा भूतग्रहार्तांश्च रक्षेदेतस्य धारणात् । एकादशं लिखेद्भूर्जे पाटीरेन्दुद्रवैस्तु तत् ॥६०॥
उक्तक्रमसमापेतं गुलिकीकृत्य तं पुनः । सितसिक्थमये लिङ्गे संस्थाप्याभ्यर्चयेत् पुनः ॥६१॥

अत्र सिक्थं मधूच्छिष्टम्।

स्थापयेत् क्षौद्रमध्ये तु पूजयेन्नित्यशश्च तत् । सन्ध्यासु सुसितैः पुष्पैः सौरभाढ्यैर्विधानतः ॥६२॥
मासात् तदर्धात् सप्ताहाद्वशे स्युः शत्रवो ध्रुवम् । भवेयुर्व्याधितास्तेनोद्धृतेनारोग्यमाप्नुयुः ॥६३॥
ज्वरार्तास्तु शिशेषेण सुखिताः स्युरयत्नतः । आम्लसौवीरमध्यस्थं विद्वेषयति वैरिणौ ॥६४॥
तत्रैव क्वथनाद्रोगं द्वयोरुत्सादयेदपि । शुण्ठीमरिचपिप्पल्यः सुसूक्ष्मं परिचूर्णिताः ॥६५॥
लकुचस्य रसोपेतास्तन्मध्ये तद्विनिक्षिपेत् । तापयेत् त्रिषु सन्ध्यासु यत्रारातिस्तु तन्मुखम् ॥६६॥
प्रोक्तकाले ज्वरैरार्तस्तापतृष्णासमन्वितः । द्वादशं कर्पटे रात्रिरसेनालिख्य तत्पुनः ॥६७॥
इष्टकायुगमध्यस्थं कृत्वा तच्छ्लेषयेद् दृढम् । स्थापयेच्चण्डिकागेहे शास्तुरायतनेऽपि वा ॥६८॥
स्वगेहभित्तिमध्ये वा शयनस्थानतोऽपि वा । स्तम्भयेद्वैरिणो रोषमुद्योगं बन्धचिन्तनम् ॥६९॥
व्यवहारं रणं चान्यदस्याभिमतमात्मनः । त्रयोदशेन भूर्जस्थेनाशु धारणतोऽङ्गना ॥७०॥
वन्ध्यापि लभते पुत्रं विचित्रा यन्त्रशक्तयः । चतुर्दशगतं नाम कृत्वा भूर्जे च तत्तथा ॥७१॥
सिक्थमध्यगतं कृत्वा तं निशीथेऽभितापयेत् । सप्ताहाद्वशमायान्ति स्त्रियो वा पुरुषा नृपाः ॥७२॥
गजा हया मृगास्त्वन्ये ये जीवा भूतलाश्रयाः । परेण नाम्ना युक्तेन फलकालिखितेन वै ॥७३॥
सुखप्रसूतिः स्यात् स्त्रीणां तत्पूजा प्रेक्षणादिना । षोडशे नाम संलिख्य धारयेत् प्राणिनां तथा ॥७४॥
रक्षा भवति सर्वत्र ग्रहरोगभयादिषु । तदेव स्वर्णपट्टस्थं विधाय विधिना युतम् ॥७५॥
ऊर्मिकाङ्गदभूषादौ मूर्ध्नि वा बिभृयात् ततः । आधिव्याधिविनिर्मुक्तो निःसपत्नो जितेन्द्रियः ॥७६॥
भोक्ता कर्त्ता च पुण्यानां जीवेद्वर्षशतं भुवि । इति वह्निवासिनीनित्याप्रयोगविधिः ॥

॥ वह्निवासिनी प्रयोग:॥

यहां प्रयोग में नित्या पूजन (कामेश्वरी आदि) प्रतिपदा से प्रारंभ करें तो इस विद्या का प्रयोग पञ्चमी तिथी को लिखा है। श्लोक ५३ में पंचमी अथवा षष्ठी दोनों लिखा है। यदि प्रतिपदा को ललिता पूजन तथा द्वितीया से कामेश्वरि इत्यादि पूजन करते हैं तो इस विद्या का पूजन षष्ठी को होगा।

***

इस विद्या के प्रयोग से रोग, दरिद्रता का नाश होता है, आयु वृद्धि होवे, विद्या प्राप्त होवे। शत्रुनाश व शत्रु को विविध पीड़ा भी इस मन्त्र से पहुंचाई जा सकती है।

मूल मन्त्र – ह्रीं वह्निवासिन्यै नमः॥

इस मन्त्र के अनुत्तर वर्ण "**ह र व न स म य**"। इनके आदि में "**व**" कार लगाने से अष्टाक्षर मन्त्र "**व ह र व न स म य**" हो जाता है। प्रत्येक वर्ण के साथ षोड्श मातृका स्वर संयोग करने से १६×८ = १२८ वर्ण का मन्त्र बनता है। इसमें अनुतर वर्ण संख्या नहीं जोड़ी है।

॥ प्रथम प्रकार यन्त्र रचना॥

सर्व प्रथम "**ह्रीं**" लिखकर साध्य का नाम लिखें। उसके आगे पीछे "**ॐ**" लिखें यदि किसी साध्य का नाम नहीं लिखना है तो केवल भगवती का ध्यान करें।

उसके बाहर दो वृत्त बनायें, पश्चात् अष्टकोण व चतुरस्र बनायें। वृत्तों के बीच की वीथिका में पूर्वादि चारों दिशाओं में "**ॐ ह्रीं, वह्निवा, सिन्यै, नमः ॐ**" लिखें। अनुत्तर अष्टवर्ण के प्रत्येक वर्ण के साथ १६ स्वर मातृका (**अं आ.......अः**) लिखें। इस तरह ८ कोणों में १२८ वर्ण लिखें। इसमें अनुत्तर वर्ण संख्या नहीं जोडी है। अष्टकाणों तथा चतुरस्र के बाहर दो वृत्त बनायें उनके बीच की जगह में मातृका (अं आ.......**हं लं क्षं**) लिखें।

॥ द्वितीय प्रकार यन्त्र रचना॥

यदि प्रथम कोष्ठक में दूसरा वर्ण "**ह**" के साथ स्वर मातृका लिखें, शेष को अन्य काणों में लिखें तो दूसरा यन्त्र बनता है। इस तरह आठ वर्ण में एक एक को प्रथम कोण में लिखते हैं, शेष वर्णों को अन्य कोणों में लिखते हैं तो आठ यन्त्र बनते हैं।

॥ तृतीय प्रकार यन्त्र रचना॥

यदि एक स्वर मातृका के साथ आठों वर्ण "**व ह र व न स म य**" प्रत्येक कोणों में लिखते हैं तो १६ स्वरों से १६ तरह के यन्त्र बनते हैं। प्रयोग विधि श्लोक ४४ से ७६ तक जानें।

॥ इति वह्निवासिनी नित्याप्रयोगविधि॥

॥ ६. अथ महावज्रेश्वरी नित्या प्रयोगः॥

मंत्र – ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं।

ऋषिन्यास के अनुसार विनियोग जाने।

ऋषिन्यास – शिरसि ब्रह्मणे ऋषये नमः। मुखे गायत्री छंद से नमः। हृदि वज्रेश्वरी नित्या देवतायै नमः। गुह्ये ह्रीं बीजाय नमः। पादयोः ह्रीं शक्तिये नमः। नाभौ ऐं कीलकाय नमः। सर्वाभीष्ट सिद्धये विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास – ह्रीं क्लिन्ने हृदयाय नमः। ऐं शिरसे स्वाहा। क्रों शिखायै वषट्। नित्य कवचाय हुं। मद नेत्रत्रयाय वौषट्। द्रवे ह्रीं अस्त्राय फट्।

वर्णन्यास – **ह्रीं क्लीं ह्रीं नमः दक्षनेत्रे । ह्रीं न्रे ह्रीं नमः वामनेत्रे। ह्रीं ऐं ह्रीं नमः दक्षकर्णे। ह्रीं क्रों ह्रीं नमः वामकर्णे। ह्रीं निं ह्रीं नमः दक्षनसि। ह्रीं त्य ह्रीं नमः वामनसि। ह्रीं मं ह्रीं नमः मुखे। ह्रीं दं ह्रीं नमः वक्षसि। ह्रीं द्रं ह्रीं नाभौ। ह्रीं वें ह्रीं नमः लिङ्गे।**

मूलमंत्र से व्यापक न्यास करे।

॥ ध्यानम् ॥

रक्तां रक्ताम्बरां रक्तगंधमाला विभूषणाम् । चतुर्भुजां त्रिनयना माणिक्यमुकुटोज्ज्वलाम् ॥ पाशांकुशाविक्षुचापं दाडिमी सायकं तथा । दधानां बाहुभिर्नेत्रैर्दयामद सुशीतलैः ॥ पश्यन्तीं साधकं त्र्यस्त्रषटकोणाब्जमहीपुरे । चक्रमध्ये सुखासीनां स्मेरवक्त्र सरोरुहाम् ॥

॥ यंत्रपूजनम्॥

त्रिकोण, षट्कोण, द्वादशदलपद्म पश्चात् षोडशदल पद्म बनाये उसके बाहर चारद्वारयुक्त भूपूर बनाये।

पीठ पूजन – **ॐ मण्डूकादि पृथिवी पर्यन्त पीठ देवताभ्यो नमः। तत्रैव शोषसमुद्राय नमः। कनकपोताय नमः। रत्नसिंहासनाय नमः।** यंत्र मध्य देवी का आवाहन करे।

प्रथमावरणम् – त्रिकोण में इच्छा, ज्ञान, क्रिया शक्ति का पूजन करे।

द्वितीयावरणम् – (षट्कोणे) षडङ्गन्यास से देवताओं का पूजन करे। देवी के पृष्ठ पूर्वोक्त पूजा के समान प्रकाशानंदादि गुरु पंक्तित्रय (दिव्यौघ, सिद्धौघ, मानवौघ गुरु) का पूजन करे।

पुनः षट्कोण में **डाकिनि, शाकिनी, लाकिनी राकिनी, काकिनी, हाकिनी** इत्यादि का पूजन करे।

तृतीयावरणम् – (द्वादशदले) **ह्रीं हृल्लेखा पादुकां पूजयामि तर्पयामि नमः। ह्रीं क्लेदिनी पा.। ह्रीं क्लिन्ना पा.। ह्रीं क्षोभिणी पा.। ह्रीं मदना पा.। ह्रीं मदनातुरा पा.। ह्रीं निरञ्जना पा.। ह्रीं रागवती पा.। ह्रीं मदनवती पा.। ह्रीं मेखला पा.। ह्रीं द्राविणी पा.। ह्रीं वेगवती पा.।**

॥ श्री महावज्रेश्वरी यन्त्रम् ॥

चतुर्थावरणम् – (षोडशदले) **ह्रीं कमला पा.। कामिनी पा.। कल्या पा.। कला पा.। कलिता पा.। कौतुकी पा.। किराता पा.। काला पा.। कदना पा.। कौशिकी पा.। कम्बुवाहिनी पा.। कतरा पा.। कपटा पा.। कीर्ति पा.। कुमारी पा.। कुंकुमा पा.।**

पंचमावरणम् – (भूपुरे) पश्चिम, उत्तर, पूर्व, दक्षिण द्वार के दोनों पार्श्वों में **भञ्जिनी पा.। वेगिनी पा.। भोगा पा.। चपला पा.। पेशला पा.। सती पा.। रति पा.। श्रद्धा पा.।** वायव्य, ईशान, अग्नि एवं निर्ऋति कोणेषु **भोगलोला पा.। मदना पा.। उन्मत्ता पा.। मनस्विनी पा.।**

षष्टमावरणम् – (भूपुरे) इन्द्रादिलोकपालों एवं उनके वज्रादि आयुधों का पूजन करे।

गायत्री मन्त्र – **महावज्रेश्वर्यै विद्महे वज्रनित्यायै धीमहि तन्नो नित्या प्रचोदयात्॥**

॥ अथ कादीक्रमानुसार महावज्रेश्वरीनित्याप्रयोगविधि:।॥

(श्रीतन्त्रराजे)

वसन्तकाले ग्रीष्मे वा पूर्णामारभ्य साधयेत् । हविष्याशी पयोभक्षः फलमूलाशनोऽथवा ॥१॥
स्नातः सुगन्धिसलिलैररुणांशुकवाञ्छुचिः । चन्द्रचन्दनकाश्मीरचर्चालोहितविग्रहः ॥२॥
अञ्जनाक्ताक्षियुगलस्ताम्बूलारुणवक्त्रवान् । मुखार्पितेन्दुशकलो हृष्टचेता जितेन्द्रियः ॥३॥
मौनी त्रिकालपूजासु कृतसंकल्पसाधनः । नक्ताशी हुतशिष्टेन जपेद्विद्यां समीरिताम् ॥४॥
नित्यशो भोजयेद्विप्रान् भक्तान् भजनकौतुकान् । अघादिहीनान् मधुरं पायसं भोज्यभक्तिमान् ॥५॥
प्रणम्याभ्यर्च्य विसृजेन्नित्यं सप्तदिनेषु तु । गुरुं जीवनमासाद्य प्रणम्यासकृदात्मवान् ॥६॥
धनधान्याम्बराद्यैस्तं संतोष्य तदनुज्ञया । कृतारम्भो नित्यशश्च पूजयेत्तं च भक्तितः ॥७॥
अन्ते च वित्तैः स्तोत्रैश्च तं संतोष्य कृती भवेत् । वित्तशाठ्यं च दम्भं च मोहं चासत्यमेव च ॥८॥
न कदाचित् प्रकुर्वीत विशेषाद्गुरुसन्निधौ । एवं लक्षत्रयं जप्त्वा तद्दशांशं हुनेद् घृतैः ॥९॥
आरग्वधप्रसूनैर्वा प्रसूनैर्बकुलोद्भवैः । मधूकजैश्चम्पकैर्वा त्रिमध्वक्तैश्च नित्यशः ॥१०॥
चन्द्रचन्दनकस्तूरीकाश्मीरसुरभीकृतैः । तर्पयेत् सलिलैस्तावद् दिनशो भक्तिमान् दृढः ॥११॥
एवं संसिद्धमन्त्रस्तु कुर्यात् काम्यानि साधकः । गुरुभक्तो नित्यकृत्यकृत संकल्पसंयुतः ॥१२॥
सहस्रजापी स्थिरधीर्मन्त्रवीर्यविदात्मवान् । यः सोऽपि काम्यान् कुर्वीत प्रयोगान् नान्यथा शिवे ॥१३॥
यद्यज्ञानेन मोहने चापलेनापि वा चरेत् । अनर्थक्लेशराजादिपीडाः प्राप्नोति निश्चितम् ॥१४॥
अरुणैः पङ्कजैर्होमं कुर्यात् त्रिमधुराप्लुतैः । मण्डलाल्लभते लक्ष्मीं महतीं श्लाघ्यविग्रहाम् ॥१५॥
कह्लारैः क्षौद्रसंसिक्तैः पौर्णाद्यं तद्दिनावधि । जुहुयान्नित्यशो भक्त्या सहस्रं विकचैः शुभैः ॥१६॥
तद्दिनेषु तु पूर्वोक्तान् भोजयेदुक्तरूपतः । तावच्च जप्याद्धोमान्ते यावत्संख्यं हुतं कृतम् ॥१७॥
चम्पकैः क्षौद्रसंसिक्तैः सहस्रहवनाद्ध्रुवम् । लभते स्वर्णनिष्काणां शतं मासेन पूर्ववत् ॥१८॥
पाटलैर्घृत संसिक्तैस्त्रिसहस्रं हुतैस्तथा । दर्शादिमासाल्लभते चित्राणि वसनानि च ॥१९॥
कर्पूरचन्दनादीनि सुगन्धीनि च मासतः । वस्तूनि लभते हृद्यैरन्यैर्भोगोपयोगिभिः ॥२०॥
शालीभिः क्षीरसिक्ताभिः सप्तमीषु शतं हनेत् । तेन शालिसमृद्धिः स्यान्मासैः षड्भिरसंशयम् ॥२१॥
तिलैर्हुतैस्तद्दिवसे वर्षादारोग्यमाप्नुयात् । स्वजन्मसु त्रिषु तथा दूर्वाभिर्जुहुयात् तथा ॥२२॥
निरातङ्को महाभोगः शतं वर्षाणि जीवति । गुडूचीतिलदूर्वाभिस्त्रिषु जन्मसु वा हुनेत् ॥२३॥
तेनायुः श्रीयशोभाग्यपुण्यनिध्यादिवान् भवेत् । घृतपायसदुग्धैस्तु हुतैस्तेषु त्रिषु क्रमात् ॥२४॥
आयुरारोग्यविभवैर्नृपमान्यो भवेत्तथा । सप्तम्यां कदलीहोमात्सौभाग्यं लभतेऽब्दतः ॥२५॥
दूर्वात्रिकैस्तु प्रादेशमात्रैस्त्रिस्वादुसंयुतैः । जुहुयाद्दिनशो घोरे सन्निपाते ज्वरे गदे ॥२६॥

महारोगेषु दूर्वाभिस्तिलैश्छिन्नोद्भवैस्तथा । त्रिभिर्वा नित्यशो होमं कुर्यात्त्रिस्वादुसंयुतैः ॥२७॥
षण्मासादब्दतो वापि रोगान्मुक्तः सुखी भवेत् । तद्दिनेषु जपेद्विद्यां नित्यशः सलिलं स्पृशन् ॥२८॥
सहस्रवारं तत्तोयैः स्नानपानं समाचरेत् । पाकाद्यमपि तैरेव कुर्याद्रोगविमुक्तये ॥२९॥
साध्यर्णवृक्षं संचूर्ण्य त्र्यूषणं सर्षपं तिलम् । पिष्टं च साध्यपादोत्थरजसा च समन्वितम् ॥३०॥
कृत्वा पुत्तलिकां तैस्तु हृदये नामसंयुताम् । प्राग्वच्छित्त्वायसैस्तीक्ष्णैर्निशि पुत्तलिकां हुनेत् ॥३१॥
एवं दिनैः सप्तभिर्वा त्रिभिर्वैकदिनेन वा । साध्यो वश्यो भवेच्छीघ्रमपि दूरस्थितो दृढः ॥३२॥
तथाविधां पुत्तलिकां कुण्डमध्ये खनेद्भुवि । उपर्यग्निं निधायात्र विद्यया दिनशो हुनेत् ॥३३॥
त्रिसहस्रं त्रियामायां सर्षपैस्तद्रसाप्लुतैः । शतयोजनदूराप्यानयेद्वनितां बलात् ॥३४॥

त्रियामायां निशीथे। तद्रसाप्लुतैः सर्षपतैलाक्तैः ॥

तां तु पुत्तलिकां मध्ये मधूच्छिष्टसमन्विताम् । कृतप्राणप्रतिष्ठां च श्मशाने निखनेन्निशि ॥३५॥
साध्ययोनिं च तत्रैव च्छित्वा दत्त्वा बलिं ततः । कृताभिषेकस्तां विद्यां प्रजपेच्च शतत्रयम् ॥३६॥
अरातेरष्टमे राशौ मासान्नानाविधैरगि । रोगैर्भूतादिसंक्लेशैर्नाशमेति सुनिश्चितम् ॥३७॥
यद्यन्तरा समुद्धृत्य सलिले तां खनेन्निशि । क्लेशैस्तैः स विनिर्मुक्तः सुखी जीवति भूतले ॥३८॥
साध्यवृक्षेण कृत्वा तां सर्षपाज्ये निवेशिताम् । तोयमध्ये निधायैतत् क्राथयेदुक्तवासरैः ॥३९॥
वैरी तीव्रज्वरेणार्तः कृती प्राग्वत्सुखी भवेत् । तामेव चण्डिकागेहे तथा बलियुतां खनेत् ॥४०॥
साध्यो नरश्च नारी चेच्छास्तुरायतने खनेत् । तद्विधानेन सहितं शत्रुरुन्मादवान् भवेत् ॥४१॥
महावज्रं च वज्रं च यन्त्राण्येतान्यनुक्रमात् । प्रयोगानपि वक्ष्यामि समाहितधिया शृणु ॥४२॥
प्राक्प्रत्यग्दक्षिणोदक् च विंशत्सूत्राणि पातयेत् । तेन कोष्ठानि जायन्ते त्वेकषष्ट्या शतत्रयम् ॥४३॥
तेषु कोणचतुष्केऽपि मार्जयेत्पञ्चकेन च । चत्वारिंशत्तत्र शेषं वज्राकारं यथा भवेत् ॥४४॥
दिक्षु चत्वारि चत्वारि मार्जयित्वा त्रिकोणगम् । कुर्याच्छेषाणि कोष्ठानि पञ्चषष्ट्या शतं भवेत् ॥४५॥
तेषु पूर्वादि परितो लिखेद्विद्याक्षराणि तु । प्राग्वत्स्वरविभिन्नानि प्रागुक्तविधिना तथा ॥४६॥
चत्वारि चत्वारिंशच्च शतं तेषां तु मध्यतः । एकविंशति कोष्ठानि शिष्टानि पुनरम्बिके ॥४७॥
तेषु पर्यायनित्याणुवर्णषट्कसमन्वितम् । घटिकायुगवर्णौ च लिखेत्प्रागुक्तयोगतः ॥४८॥
शिष्टेषु विद्यावर्णांश्च लिखेद्द्वादश शेषयोः । साध्याख्यामालिखेदुक्तक्रमेण पुटयोर्द्वयोः ॥४९॥
चतुर्दिक्षु लिखेत्कोणेष्वभितो भौतिकार्णकान् । द्वित्रिक्रमेण प्राक्प्रत्यक्कोणयोस्तु त्रयं त्रयम् ॥५०॥
एतत्प्रोक्तेषु संलिख्य सम्पूज्य विधिना युतम् । स्पृशञ्जपेन्मनुं पश्चात् त्रिसहस्रं ततस्तु तत् ॥५१॥
विनियुञ्ज्यादथोक्तेषु कार्येषु क्रमतः शिवे । भूताक्षराणि च पुनर्लिखेत् कार्यानुरूपतः ॥५२॥
महावज्रमिति ख्यातं सर्वत्रैवापराजितम् । विजयस्तम्भविद्वेषवश्योच्चाटनकर्मसु ॥५३॥

रक्षां पुष्टिं च शान्तिं च तथैव रिपुनिग्रहे । देशराष्ट्रपुरग्रामनिवेशोदर्विशेषतः ॥५४॥
घोरेषूत्पातजातेषु भूमौ संलिख्य गैरिकैः । मध्ये देवीं समावाह्य पूजयेन्नित्यशः शिवाम् ॥५५॥
सन्ध्यासु तिसृषु प्रोक्तक्रमान्नीराजनं तथा । कुर्यात्त्रिरात्रं द्विगुणं त्रिगुणं काम्यरूपतः ॥५६॥
राज्ञां वैरिनिरोधेन पुरीमात्रावशेषिते । विभवे मण्डपे तस्य प्रोक्तवज्रं लिखेन्महत् ॥५७॥
दरदेनार्चयेत् तस्य मध्ये देवीं शुचिस्मिताम् । नृत्यगीतादिभिः सार्धं सन्ध्यासु च विशेषतः ॥५८॥
एवं प्राग्वद्दिनैरुक्तैर्विजयी नृपतिर्भवेत् । वैरिनाशेन वा तस्य भङ्गाद्व्यासनतोऽपि वा ॥५९॥
ततस्तन्मार्जयित्वा तु भाले कृत्वा पुरीं बलैः । परीयाद्देशिकं त्वग्रे गजे जीवेच्चिरं सुखी ॥६०॥
निःसपत्नो निरातङ्कः षडङ्गख्यातवैभवः । एवमेतस्य वज्रस्य वैभवं को नु वर्णयेत् ॥६१॥

॥ अथैतद्यन्त्ररचनाप्रकार:॥

तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्च विंशतिं विंशतिं रेखाः कृत्वा समान्तरा. लानि एकषष्ट्युत्तरत्रिशतकोष्ठानि विलिख्य, कोणचतुष्टये प्रतिकोणं पञ्चचत्वारिंशत्पञ्चचत्वारिंशदिति अशीत्युत्तरशतं कोष्ठानि गुरूक्तयुक्त्या मार्जयित्वा, तेषु स्थलेषु चत्वारि कोणानि विधाय सिद्धेषु पञ्चषष्ट्युत्तरशतकोष्ठेषु १६५ मूलविद्याक्षराण्यनावृत्तानि षोडशस्वरयुक्तानि चतुश्चत्वारिंशदुत्तरशताक्षराणि १४४ पूर्वादिप्रादक्षिण्येन प्रवेशगत्या विलिख्यावशिष्टैकविंशतिकोष्ठेषु तद्दिननित्याया वर्णत्रयं पर्यायनित्याया वर्णत्रयं षट्कोणेषु विलिख्य, घटिकाक्षरसहितं युगाक्षरमेकस्मिन् कोष्ठे विलिख्यावशिष्टचतुर्दशकोष्ठेषु प्रतिकोष्ठमेकमेकमिति मूलमन्त्राक्षराणि विलिख्यावशिष्टकोष्ठद्वये साध्याख्यां कर्म च विलिख्य दिक्चतुष्टयस्थकोणचतुष्टये तत्तत्कर्मानुसारिभूतवर्णान् द्वित्रिद्वित्रिक्रमेण विलिखेदेतद्यन्त्रमुक्तफलदं भवति॥ तथा-

अथान्यवज्रनिर्माणविधानं च शृणु प्रिये । येन हस्तगतेन स्युः सिद्धयोऽपि स्वहस्तगाः ॥६२॥
प्राक्प्रत्यग्दक्षिणोदक् च दशसूत्रनिपातनात् । तेनैकाशोतिकोष्ठानि जायन्ते तच्च पूर्ववत् ॥६३॥
मार्जयेद्दशकोणेषु शिष्टेषु विलिखेत्तथा । त्रिकोणानि चतुर्दिक्षु तेषु तान्येव पूर्ववत् ॥६४॥
विलिखेदवशिष्टेषु मन्त्रार्णांस्तद्द्विशस्तथा । एकस्मिन्मध्ये शक्तिजठरे साध्यमालिखेत् ॥६५॥
एतच्च पूर्वोक्तेषु विनियुञ्ज्यान्निजेच्छया । न भेदस्त्वनयोरस्ति प्रयोगेषु तु सर्वतः ॥६६॥
एतद्वज्रस्य मध्यस्थे नाम कृत्वा महीभुजः । दंशके हृदये शीर्षे संस्थाप्य समरे कृते ॥६७॥
निहत्य वाहिनीं शत्रोश्चतुरङ्गां महीभुजः । अक्षताशेषसर्वाङ्गो यशोलक्ष्मीधरान्वितः ॥६८॥
निर्वत्य सुचिरं जीवेद्भूमौ भोगी निजेच्छया । एतत्ताम्रतले कृत्वा स्थापयेदभिवृद्धये ॥६९॥

॥ अथैतद्रचनाप्रकारः॥

तत्र प्राक्प्रत्यगायता दक्षिणोत्तरायताश्च दश दश रेखाः कृत्वा समान्तरालानि एका शीतिकोष्ठानि विधाय, चतुर्दिक्षु दश दश कोष्ठानि मार्जयित्वा एकचत्वारिंशत्कोष्ठात्मकं वज्राकारं निष्पाद्य, दिक्षु चत्वारि चत्वारि कोष्ठानि मार्जयित्वा त्रिकोणानि विधाय, तेषु कर्मानुसारिप्राग्वद्भूतार्णान् विलिख्य मध्यकोष्ठे मायाबीजं साध्यनामगर्भं विलिख्यावशिष्टकोणेषु मूलमन्त्रस्य द्वादशाक्षराणि द्विशो विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति॥

तथा-

विधाय वृत्तयोर्मध्ये षट्कोणं तस्य मध्यतः । बाह्ये च कृत्वा विद्याया बीजमाद्यमथान्तिकम् ॥७०॥

षट्सु कोणेषु तु पुनरग्रपश्चिमयोर्लिखेत् । एकैकं पार्श्वकोणेषु द्वे द्वे वृत्तान्तरा पुनः ॥७१॥

मातृकां विलिखेदादिक्षान्तां बिन्दुसमन्विताम् । मध्यबीजस्य मध्यस्थं लिखेत्तन्निजवांछितम् ॥७२॥

भर्तुर्दर्शनभीतानां कुमारीणामिदं भुजे । कण्ठे वा धारयेत्सद्यो वल्लभा तस्य जायते ॥७३॥

॥ अथैतद्यन्त्ररचनाप्रकारः॥

प्रथमतः षट्कोणं विधाय तद्बहिर्वृत्तद्वयं कृत्वा मध्ये साध्यनामगर्भं ह्रींकारं विलिख्य षट्सु कोणेषु कोणाग्रेषु कोणान्तरालेषु च मायाबीजान्येव विलिख्य वृत्तद्वयान्तराले मायाबीजद्वयसहिता मकारादिक्षकारान्तां मातृकां विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति॥ तथा-

स्वरप्रसारितैर्मन्त्रवर्णैः पद्मानि कारयेत् । वृत्ताष्टपत्रयुक्तानि षोडशानि मनोहरम् ॥७४॥

कर्णिकासु च पत्रेषु लिखेदेकैकमक्षरम् । कर्णिकार्णस्य मध्यस्थं कुर्यान्नाम निजेप्सितम् ॥७५॥

घटिकाक्षरसंयुक्तं विनियुञ्ज्यात्तु नित्यशः । अहोरात्रं षोडशधा कृत्वा तां तेषु योजयेत् ॥७६॥

समस्तं वांछितं तत्र तन्मध्यं विलिखेत्तदा । धारयेदभिषिञ्चेच्च जपेदिष्टार्थसिद्धये ॥७७॥

॥ अथैतद्यन्त्ररचनाप्रकारः॥

प्रथमतो वृत्तं कृत्वा तदग्राग्न्यष्टदलानि विधाय प्राक्प्रोक्तषोडशस्वरसंयुक्तमूलविद्या नावृत्ताक्षरेषु चतुश्चत्वारिंशदुत्तरशतवर्णेषु १४४ प्रथमाक्षरं साध्यनामगर्भं कर्णिकायां विलिख्य तत्रैव घटिकाक्षरं संयोज्याष्टदलेषु द्वितीयाद्यष्टौ वर्णान् विलिखेत्। एवं नवनववर्णानामेकमेकं यन्त्रं भवति। एवं षोडश यन्त्राणि भवन्तीत्यर्थः॥

तथा-

प्राक्प्रत्यग्दक्षिणोदक् च पञ्चसूत्राणि पातयेत् । कोष्ठानि षोडशात्र स्युस्तेषु पद्मानि कारयेत् ॥७८॥

प्रगुक्तेषु विधायैवमर्चयेद्यामतः क्रमात् । देवीं तु स्थापयेद्भूमौ सर्वसम्पदवाप्तये ॥७९॥

स्पष्टोऽयमर्थः ॥

॥ महावज्रेश्वरी प्रयोगः॥

मूल मन्त्र – ॐ ह्रीं क्रों सः नित्यक्लिन्ने मदद्रवे स्वाहा।

यहां टीका में महावज्रेश्वरी के अनावृत्त अक्षर नहीं लिखे हैं, केवल यही लिखा है कि अनावृत्त अक्षर नौ हैं।

अनावृत्त नौ अक्षर भेरुण्डा के प्रयोग हैं यदि हम उन्हीं को मानें तो प्रयोग किया जा सकता है अन्यथा टीका के अनुसार अनावृत्त अक्षर नहीं देने से प्रयोग अधूरा है।

भेरुण्डा के अनावृत्त नौ अक्षर **''क, र, भ, झ, छ, ज, स, व, ह''** है।

प्रयोग प्रारम्भ में हवन, तर्पण हेतु फल श्लोक दस से उनतीस तक दिया गया है। पश्चात् पुतली प्रयोग श्लोक ३० से ४१ तक बताया गया है।

॥ प्रथम प्रकार यन्त्र रचना ॥

पूर्व-पश्चिम, उत्तर-दक्षिण में २०-२० रेखायें खींचने पर तीन सौ इकसठ कोष्ठक बनेंगे। चारों कोणों में ४५-४५ (कुल १८० कोष्ठक) गुरु के अनुसार मार्जन करें। बाकी कोणों में १६५ कोष्ठक चुनें। १६ स्वर मातृकाओं को एक-एक मन्त्र के साथ लिखने से १६×९ = १४४ कोष्ठक पूर्ण हुये। शेष २१ कोष्ठकों में सभी नित्याओं का पूजन करें। २१ कोष्ठकों में से ६ कोष्ठक ऊपर के तीन कोणों में ३-३ अक्षर अनावृत्त वर्ण बिन्दु युक्त तथा नीचे के तीन कोणों में अनावृत्त वर्ण के ३-३ अक्षर विसर्ग युक्त लिखें १४ कोष्ठक में वज्रेश्वरी मन्त्र के १४ वर्ण लिखें। एक कोष्ठक में २ बार नहीं लिखें।

अब ३६१ - (१८०+१६५) = १७ कोष्ठक बचते हैं। उनमें मूल मन्त्र के २+३+२+३+२+३ इस क्रम में अक्षर लिखें। दो कोष्ठक में साध्य का नाम लिखें।

॥ द्वितीय प्रकार यन्त्र रचना ॥

पूर्व-पश्चिम, उत्तर-दक्षिण में १०-१० रेखायें खींचने पर ९ × ९ = ८१ कोष्ठक बनेंगे। १०-१० कोष्ठक चारों दिशाओं में मार्जन छोड़ने से शेष ४१ कोष्ठक रहते हैं उन्हें वज्राकार बनायें। वज्राकार दल में कमल की पत्ति का नुकीला मुँह नीचे तथा चौड़ा मुँह ऊपर होता है। चारों दिशाओं में चार-चार त्रिकोण बनायें। मध्य के कोष्ठक में ''ह्रीं'' युक्त साध्य का नाम लिखें। पश्चात् बाकी कोणों में मन्त्र के १२ अक्षर लिखें एवं ५० अक्षर मातृकाओं के लिखें। ५० मातृका + १२ मन्त्राक्षर + १६ दिशा कोष्ठक + ३ त्रिकोण (मध्य कोष्ठक) = ८१ कोष्ठक का यन्त्र बनायें।

॥ तृतीय प्रकार यन्त्र रचना ॥

षट्कोण बनायें, उनके मध्य में ''ह्रीं'' के साथ साध्य का नाम लिखें। षट्कोण के प्रत्येक कोणों में व उसके बाहर ''ह्रीं'' बीज लिखें। षट्कोण के बाहर दो वृत्त बनायें उनके बीच की जगह में ''**ह्रीं ह्रीं मं यं रं लं वं षं शं सं हं लं क्षं**'' मातृका वर्ण लिखें।

॥ इति महावज्रेश्वरीनित्याप्रयोगविधिः ॥

॥ ७. अथ शिवादूती (शिवदूती) नित्या प्रयोगः ॥

मंत्र - १. ह्रीं शिवादूत्यै नमः।

२. ॠं ह्रीं शिवादूत्यै नमः।

विनियोग - ॐ अस्य मंत्रस्य रुद्र ऋषिः, गायत्री छंद, श्रीशिवादूतीनित्या देवता, ह्रीं बीजं, नमः शक्ति, शिवादूती कीलकं, ममाभीष्टये विनियोगः।

ऋषिन्यास - विधि पूर्व मंत्रों की तरह।

षडङ्गन्यास - ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से हृदयादि न्यास करे।

वर्णन्यास - ह्रीं शिं ह्रीं नमः श्रोत्रयोः। सर्वाङ्गे ह्रीं वां ह्रीं नमः। चक्षुषोः ह्रीं दूं ह्रीं नमः। जिह्वायां ह्रीं त्यैं ह्रीं। घ्राणयोः ह्रीं नं ह्रीं नमः। मनसि ह्रीं मं ह्रीं नमः। इसके बाद मूलमंत्र से व्यापक न्यास करे।

॥ ध्यानम् ॥

निदाघ(प)काल मध्याह्न दिवाकरसमप्रभाम् । नवरत्न किरीटां च त्रीक्षणामरुणाम्बराम् ॥
नानाभरणसभिन्न देहकांति विराजिताम् । शुचिस्मितामष्टभुजां स्तूयमानां महर्षिभिः ॥
पाशं खेटं गदा रत्न चषकं वामबाहुभिः । दक्षिणैरंकुशं खड्गं कुठारं कमलं तथा ॥
दधानां साधका ऽभीष्टदानोद्यम समन्विताम् । ध्यात्वैवं पूजयेद् देवीं दूतीं दुर्नीतिनाशिनीम् ॥

॥ यंत्रपूजनम् ॥

त्रिकोण बनाये उसके अंदर दो वृत्त बनाये फिर त्रिकोण के ऊपर षड्दलपद्मबनाये उसके बाहर षट्कोण, अष्टकोण बनाये उसके बाद अष्टदल बनाकर भूपुर भी बनाये जिसके पूर्व पश्चिम में दो द्वार बनाये।

॥ श्री शिवदूती यन्त्रम् ॥

प्रथमावरणम् – त्रिकोण में अग्नि, ईशान, निर्ऋति एवं वायव्य तथा देव्यग्र और दिक्षु दिशा मंत्र के हृदयादि षडङ्ग देवताओं का पूजन करे। त्रिकोण के बाहर वृत्त में **दिव्यौघ, सिद्धौघ एवं मानवौघ** गुरवों का पूजन करे।

द्वितीयावरणम् – (भूपुरे) देवी के अग्रभाग से प्रदक्षिणा क्रम से दशों दिशाओं में **ॐ विह्वला पा.। आकर्षिणी पा.। लोला पा.। नित्या पा.। मदना पा.। मालिनी पा.। विनोदा पा.। कौतुका पा.। पुण्या पा.। पुराणा पा.।**

तृतीयावरणम् – (अष्टदले) **वागीशी पा.। वरदा पा.। विश्वा पा.। विनदा पा.। विघ्नकारिणी पा.। वीरा पा.। विघ्नहरा पा.। विद्या पा.।**

चतुर्थावरणम् – (अष्टकोणेषु) **सुमुखी पा.। सुन्दरी पा.। शारा पा.। सुमना पा.। सरस्वती पा.। समय पा.। सर्वगा पा.। सिद्धा पा.।**

पंचमावरणम् – (षट्कोणेषु) **देव्यग्रकोणमारभ्य हाकिनी पा.। शाकिनी पा.। काकिनी पा.। लाकिनी पा.। राकिनी पा.। डाकिनी पा.।**

षष्टमावरणम् – (षट्पत्रेषु) **शिवा पा.। वाणी पा.। दूरसिद्धा पा.। त्यैविग्रहवती पा.। नादा पा.। मनोन्मनी पा.।**

सप्तमावरणम् – (त्रिकोणेषु) **देव्यग्रादिप्रादक्षिण्येन इच्छाशक्ति पा.। ज्ञानशक्ति पा.। क्रियाशक्ति पा.।**

अष्टमावरणम् – (त्रिकोण के अंदर वृत्त में) देवि के दक्षिणभाग में **कमलाय नमः। कुठाराय नमः। खड्गाय नमः। अंकुशाय नमः। देवि के वामभाग में रत्नचषकाय नमः। गदायै नमः। खेटाय नमः। पाशाय नमः।**

भूपुर में लोकपाल पूजा का उल्लेख नहीं किया गया हैं- परन्तु निषेध भी नहीं लिखा हैं।

गायत्री मन्त्र – शिवदूत्यै विद्महे शिवंकयै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार शिवदूतीनित्या प्रयोग विधि:॥

(श्रीतन्त्रराजे)

साधनं प्रोक्तमार्गेण कुर्याल्लक्षमतन्द्रितः । काम्यहोमविधिं देवि शृणु सङ्कल्पसिद्धिदम् ॥१॥
येनासौ वाञ्छितं क्षिप्रमवाप्नोति सुनिश्चितम् । वशयेद्वनिता होमाद् गुग्गुलैर्मधुमिश्रितैः ॥२॥
नारिकेलफलोपेतैर्गुडैर्लक्ष्मीमवाप्नुमात् । तथाज्यसिक्तैः कह्लारैः क्षीराक्तैररुणोत्पलैः ॥३॥
त्रिमध्वक्तैश्चम्पकैश्च प्रसूनैर्बकुलोद्भवैः । मधूकजैः प्रसूनैश्च हुतैः कन्यामवाप्नुयात् ॥४॥
पुंनागजैर्हुतैर्वस्त्राण्याज्यैरिष्टमवाप्नुयात् । माहिष्यैर्महिषीराज्यैरजान् गव्यैश्च गास्तथा ॥५॥
अवाप्नोति हुतैराज्यैरन्नेनान्नं च साधकः । शालिपिष्टमयीं कृत्वा पुत्तलीं सितसंयुताम् ॥६॥
हृद्देशन्यस्तनामार्णां पचेत् तैलाज्ययोर्निशि । तामनश्नन् दिवा रात्रौ विद्याजप्तां तु भक्षयेत् ॥७॥
सप्तरात्रप्रयोगेण नरो नरी नृपोऽथवा । दासवद्वशमायाति वित्तप्राणादिमर्पयेत् ॥८॥
हयारिपुष्पैररुणैः सितैर्वा जुहुयात् तथा । त्रिसप्तरात्रान्महतीमवाप्नोति श्रियं नरः ॥९॥
छागमांसैस्त्रिमध्वक्तैर्होमात् स्वर्णमवाप्नुयात् । क्षीराक्तः शस्यसम्पूर्णां भुवमाप्नोति मण्डलात् ॥१०॥
पद्माक्षैर्हवनाल्लक्ष्मीमवाप्नोति त्रिभिर्दिनैः । अथ यन्त्राणि वक्ष्यामि नानाभीष्टप्रदानि ते ॥११॥
शृणु तेषु विधानानि समाहितमनाः शिवे । दूतीनित्याक्षरेषु स्युरनावृत्तानि वै दश ॥१२॥

अत्रानावृत्ताक्षराणि ''हरअशवदतयनम' इति।

तैः षोडशस्वरयुतैः षष्ट्या शतमुदीरितम् । चतुरस्त्रद्वयं कृत्वा तदन्तर्वृत्तयुग्मकम् ॥१३॥
तदन्तरष्टकोणं च तदन्तर्वृत्तयुग्मकम् । कृत्वा तत्र लिखेन्मध्ये विद्याद्यं नामसंयुतम् ॥१४॥

विद्याद्यं ह्रींकारम्।

वृत्तयोरन्तरा शेषं बहिः कोणेषु चाष्टसु । लिखेद् द्वेद्वेऽक्षरे तेषु बाह्यवृत्तद्वयान्तरा ॥१५॥
कर्मानुरूपान् भूतार्णान् दश भूपुरमध्यतः । मातृकां विलिखेद् दिक्षु द्वादश द्वादश क्रमात् ॥१६॥
अन्त्यं च त्रिषु कोणेषु शेषाणां च विलेखने । स्वैरैर्बिन्दुं समायोज्य योजयेद् व्यञ्जने परम् ॥१७॥
एवं यन्त्राणि जायन्ते दश सिद्ध्यास्पदानि वै ।

अत्र प्रथमतो वृत्तद्वयं कृत्वा तद्बहिरष्टकोणं तद्बहिर्वृत्तद्वयं तद्बहिश्चतुरस्त्रद्वयं कृत्वा मध्ये साध्यनामगर्भं मायाबीजं विलिख्य, तद्बहिर्वृत्तद्वयान्तराले प्रथमबीजरहितैर्मूल विद्याक्षरैर्वेष्टयित्वा तद्बहिरष्टकोणेषु षोडशस्वरसंयुक्ताना वृत्ताक्षरेषु षष्ट्युत्तरशतसंख्याकेषु १६० प्रथमतः षोडशाक्षराणि प्रतिकोणं द्विद्विक्रमेण विलिख्य, तद्बहिर्वृत्तद्वयान्तरे कर्मानुसारिभूताक्षरदशकं प्राग्वद्विलिख्य, तद्बहिश्चतुरस्त्रद्वयान्तराले दिक्षु द्वादश द्वादश क्रमेण अकारादिसकारान्त मातृकावर्णान् विलिख्याग्नेयादिकोणेषु त्रिषु हलक्षान् विलिख्येशानकोणे हंलंक्षं इति विलिखेत्। एवं दश यन्त्राणि भवन्तीत्यर्थः ॥ तथा- ....।

प्रथमं गैरिकैः कृ त्वा तत्रावाह्य शिवां यजेत् ॥१८॥

****

सप्तम्यां त्रिषु सन्ध्यासु सितापूपसमन्वितम् । कृत्वा निवेद्य पयसा प्रातर्मध्यन्दिने तथा ॥१९॥
दधिभक्तं तु सायं तु क्षीरं मोचाफलं तथा । एवं मण्डलमर्धं वा कुर्यात् पूजां समाहित: ॥२०॥
वाञ्छितं प्राप्नुयाद् देव्या: प्रसादेनाल्पयत्नत: । द्वितीयं दरदै: कृत्वा तत्रावाह्याथ तद्दिने ॥२१॥
सुपक्वछागमांसेन क्षौद्रमन्नं निवेदयेत् । तावद्व्रजेन्महीपालं वशे कर्तुमयत्नत: ॥२२॥
तथैव वनितां हृद्यां वशयेद्यावदायुषम् । तृतीयमपि सिन्दूरैर्विधायावाह्य तत्र ताम् ॥२३॥
तावद्दिनैस्तथावाह्य वशयेद्विविधान् रिपून् । चतुर्थं कुंकुमै: कृत्वा तत्र मध्येऽर्चयेत् तथा ॥२४॥
सप्ताहादापद: सर्वा: प्रयान्त्यस्या: प्रसादत: । पञ्चमं चन्दनै: कृत्वा तन्मध्ये पूजयेच्छिवाम् ॥२५॥
केवलं पायसं मोचां सितां घृतसमन्विताम् । निवेदयंस्त्रिसन्ध्यासु मासाद्रोगानशेषत: ॥२६॥
जित्वा सुखं चिरं जीवेच्छेषमायुर्निरामय: । अभिषिञ्चेच्च यन्त्रे वै कुम्भं संस्थाप्य तैर्जलै: ॥२७॥
कृत्वा तस्मै दक्षिणां च दद्याद्भूरि स्वशक्तित: । प्राणप्रदात्रे तस्मै तु दद्यात् सर्वस्वमेव वा ॥२८॥
येनासौ तोषमायाति तावद्वित्तं समर्पयेत् । षष्ठं कर्पूरसंयुक्तं पाटीरैरालिखेत् तत: ॥२९॥
मसृणे वा शिलापट्टे पीठे वा सौधभूतले । अन्नाज्यपायसापूपव्यञ्जनानि निवेदयेत् ॥३०॥
पूजयेच्च त्रिसन्ध्यासु जपन् विद्यां तदा वशी । त्रिसप्तरात्रमात्रेण ज्वराद्भीमाभिचारजात् ॥३१॥
मुच्यन्ते प्राणिनोऽचिन्त्या: शक्तयो मन्त्रयन्त्रयो: । सप्तमं ताम्रपट्टे तु कृत्वावाह्याभिपूज्य च ॥३२॥
स्थापयेन्मन्दिरे तस्मिंल्लक्ष्मीरास्तेऽतिसुस्थिरा । अष्टमं राजते कृत्वा विभृयात् सर्वसम्पदे ॥३३॥
नवमं हेमगं कृत्वा भूषादौ धारयेच्छिवे । दशमे सर्वकार्याणि साधयन्नर्चयेच्छिवाम् ॥३४॥
यद्यद्धि वाञ्छितं कार्यं तत्तन्मध्यगतं तथा । कृत्वा तां पूजयेत् तत्र तत्कार्यं हृदये स्मरन् ॥३५॥
तद्दिनैस्तदवाप्नोति नात्र कार्या विचारणा । दशैव तानि यन्त्राणि भूर्जे कृत्वाभिपूज्य च ॥३६॥
सिक्थनिर्भितपात्रं तु क्षौद्रमध्ये निवेशयेत् । त्रिसन्ध्यमर्चयेद्रक्तगन्धपुष्पै: समाहित: ॥३७॥
साध्यस्याभिमुखो विद्यां जपेन्नित्यमनुस्मरन् । पाशेन कण्ठमाबध्य पातितं निजपादयो: ॥३८॥
न्यस्ताञ्जलिकरं शीर्षे दासोऽहमिति वादिनम् । त्रिसप्तरात्राद्वश्या: स्युर्नरनारीनृपादय: ॥३९॥
तदेव कोष्णं कृत्वा च सन्ध्यासु त्रिषु नित्यश: । कामार्ता वनिता: कामज्वरग्रस्ताशया: शनै: ॥४०॥
कुलं लज्जां विवेकं च परित्यज्यास्य किङ्करा: । भवेयुरिति यन्त्राणां प्रयोगास्ते समीरिता: ॥४१॥
प्राणप्रतिष्ठाविद्यां ते वक्ष्येऽहं शृणु पार्वति । वातो नभौ धरायुक्तं स्पर्शो व्याप्तेन संयुत: ॥४२॥
जवी दाहमरुद्युक्तो व्योमापि मरुता युतम् । अग्निर्हंसश्च पूर्वार्णौ पश्चादादित्रयं तथा ॥४३॥
ज्यावह्नियुक्तान्तोऽम्बु स्यात् षष्ठसप्तमकौ पुन: । हृच्छिख्यग्निरथो माया वातादित्रितयं पुन: ॥४४॥
हृद्दाहाम्बुचरै: स्वेन गोत्रादाहाग्निभि: परम् । व्याप्तं मरुत्समोपेतं व्योमाग्निगमनन्तरम् ॥४५॥
पुनराद्यत्रयं चाम्बु मरुद्द्यु नभसा युतम् । शून्यं मायान्वितं पश्चाच्चतुर्थं पञ्चमं तत: ॥४६॥

अग्निर्हसो मरुद्युक्तो व्याप्तं च मरुता युतम् । स्वं स्याद्रयधरायुक्तं हृदम्बु मरुदन्वितम् ॥४७॥
हंसश्च मरुता युक्तश्चत्वारिंशल्लिपिर्मनुः ।
''अमुष्य प्राणा इह प्राणा अमुष्य जीव इह स्थित अमुष्य सर्वेन्द्रियाणि अमुष्य वाड्मनःप्राणा इहायान्तु स्वाहा'' इति। .. ..।

यादिसप्ताक्षरैः कुर्यात् षडङ्गानि द्वियोगतः ॥४८॥
त्वादिषु च तान्येव न्यस्येच्छक्तिपुटस्थितम् । ध्यायेद् देवीं प्राणशक्तिमरुणामरुणाम्बराम् ॥४९॥
अरुणाकल्पमुकुटा मरुणाधरपल्लवाम् । अरुणायतनेत्राब्जयुगां चारुस्मिताननाम् ॥५०॥
प्रसूनपिण्डं पाशं च दधानां पाणियुग्मतः । स्वसमानाभिरभितो वेष्टितां दशशक्तिभिः ॥५१॥
अनन्तशक्तियुक्ताभिः पूजयेत् पद्ममध्यतः । प्राणापानसमानाश्च व्यानोदाना च शक्तयः ॥५२॥
नागा कूर्मा सकरा देवदत्ता धनञ्जया । चतुरस्त्रद्वयं कृत्वा तदन्तर्वृत्तयुग्मकम् ॥५३॥
तदन्तर्दशपत्राब्जं तदन्तस्तद्द्वयं तथा । कृत्वा मध्ये समावाह्य कृत्वार्घ्यं पूजयेत् ततः ॥५४॥
लक्षं जपेत् पयोभक्षस्तद्दशांशं हुनेत् तथा । तिलैः शुद्धैः सर्षपैश्च सितैर्मधुरसंयुतैः ॥५५॥
तर्पयेत् सौरभाद्येन जलेनेत्थं सुसाधयेत् । तन्त्रेऽस्मिन् यास्तु पुत्तल्यो यन्त्राण्युक्तानि सर्वतः ॥५६॥
अनया विद्यया तत्र साध्यप्राणान्नियोजयेत् । यन्त्रमस्याः शृणु प्राज्ञे सद्यः प्रत्ययकारकम् ॥५७॥
येन पुत्तलिका जीवस्पन्दयुक्ता मनोर्बलात् । प्राक्प्रत्यग्दक्षिणोदक् च सूत्राण्यष्टौ निपातयेत् ॥५८॥
कोष्ठान्येकोनपञ्चाशज्जायन्ते तेषु विन्यसेत् । प्रागुत्तरं समालिख्य परितोऽपि प्रवेशतः ॥५९॥
मध्येषु शिष्टनवसु लिखेदङ्गोदितात् क्रमात् । ततः शिष्टद्वये साध्यनामालिख्याथ साधकः ॥६०॥
सञ्जप्य विद्यां हस्तेन सजीवन स्पृशन् शतम् । तेन पुत्तलिकाः कुर्यात् सिद्धये नान्यथा भवेत् ॥६१॥
साध्यजीवाद्यानयनं शृणु वक्ष्यामि तेऽद्भुतम् । मन्त्रवीर्यस्मृति कुर्वन् तथा तद्देहगर्भतः ॥६२॥
ज्ञानकर्मेन्द्रियाण्यर्थान्मनो जीवं तनुं तथा । तस्मात् साध्यशरीरान्तात पुत्तल्या नामभिस्तथा ॥६३॥
रक्तरज्ज्वा शक्तिमय्या तानानीयार्पयेद्धिया । विद्यायास्त्र्यक्षरान्तेषु साध्यनाम नियोजयेत् ॥६४॥
एवं नियोजितां विद्यां सहस्त्रं प्रजपेत् स्पृशन् । जीवहस्तेन तच्चित्तो निशामध्येषु साधकः ॥६५॥
एवं संस्थापितप्राणा पुत्तली स्पन्दते तदा । साध्यस्य जन्मनक्षत्राण्याकर्णय वदामि ते ॥६६॥
तज्जन्मलग्नसञ्ज्ञातनवांशर्क्षप्रमाणकम् । अन्यानि च नवर्क्षाणि नवग्रहसमन्वयात् ॥६७॥
तेषु तेषु प्रयोगांस्तु वक्ष्याम्यपरहोमके । रिपोर्नखं च केशं च चरणोत्थं रजस्तथा ॥६८॥
अन्यानि चाङ्गरोमाणि पुत्तल्यां योजयेन्मृतौ । वश्यादिषु च सर्वत्र पुत्तल्यां प्रोक्तया तया ॥६९॥
एवं सर्वं समाख्यातं प्राणाकर्षणकर्मणि । अनया विद्यया कृत्वा प्राणाकर्षणमुक्तया ॥७०॥
ततो निर्दिष्टपुत्तल्यां तत्र तन्त्रोक्तमाचरेत् । सर्वत्र मारणे प्रोक्ते साध्यर्क्षग्रहसंस्थितिम् ॥७१॥

उक्तानां तत्र ऋक्षाणां तथैवाष्टकवर्गकम् । दशास्थितिं च संवीक्ष्य कुर्यान्मारणमात्मवान् ॥७२॥
अनवेक्ष्य कृतं कर्म स्वात्मानं हन्ति तत्क्षणात् । ब्राह्मणं धार्मिकं भूपं वनितामास्तिकं नरम् ॥७३॥
वदान्यं सदयं नित्यमभिचारे न योजयेत् । योजयेद्यदि वैरेण प्रत्यगेनं निहन्ति तत् ॥७४॥
अभिचारस्य विषयानाकर्णय वदामि ते । पापिष्ठान्नास्तिकान् घोरान् देवब्राह्मणनिन्दकान् ॥७५॥
प्रजानां घातकान् सर्वक्लेशकर्मसु संस्थितान् । क्षेत्रवृत्तिधनस्त्रीणामाहर्तारं कुलान्तकम् ॥७६॥
निन्दकं समयानां च पिशुनं राजघातकम् । विषाग्निक्षुरशस्त्राद्यैर्हिंसकं प्राणिनां सदा ॥७७॥
नियोजयेन्मारणेषु कर्मस्वेतैर्न पातकी । कृत्वा तु मारणं कर्म तदन्ते स्वधनार्धतः ॥७८॥
पादतो वा गुरुं विप्रानाराध्य स्वेन नित्यया । अभिषिच्य ततो विद्यां जपेल्लक्षं हविष्यभुक् ॥७९॥
जन्मत्रयेऽप्यब्दमात्रमभिषेकं समाचरेत् । सदूर्वाहोममब्दात्तु तत्पापैरेष मुच्यते ॥८०॥
एतत्ते कथितं सर्वं दूतीनित्याविधानकम् ।

॥ शिवदूती प्रयोगः॥

मूल मन्त्र – ह्रीं शिवदूत्यै नमः।

मन्त्र के अनावृत्त वर्ण – ह र अ श व द त य न म॥ (दश वर्ण)

श्लोक १ से १० तक अलग-अलग द्रव्य प्रयोग से कामना फल दिया गया है।

॥ यन्त्र रचना॥

दो वृत्त बनायें। मध्य में "**ह्रीं**" सहित साधक का नाम लिखें। दोनों वृत्तों के बीच की विथिका में प्रथमाक्षर को छोड़कर बाकी के नौ वर्ण लिखें। वृत्त द्वय के बाहर अष्टकोण बनायें। प्रत्येक कोण में प्रत्येक स्वर मातृका अक्षर दो आवृत्ति में अनावृत्त वर्ण लिखें तो आठ कोणों में १६ × १० = १६० अनावृत्त वर्ण हो जायेंगे। प्रथम कोण में यथा **अं हर अ श व दत य नम, आं ह र अ श व दत य नम**। इस प्रकार ८ कोणों में स्वर मातृका सहित दो आवृत्तियों में लिखें।

अन्य विशेष क्रम में "**हं अं आं......अं अः, हं आं......अं अः**" प्रत्येक कोण में लिखें। यह एक यन्त्र हुआ।

दूसरे यन्त्र के लिये दूसरा अनावृत्त वर्ण "**र**" स्वर मातृका के साथ लिखें तो इस तरह १० अक्षरों से १० यन्त्र प्राप्त होंगे।

अष्ट कोणों के बाहर दो वृत्त बनायें। उनके मध्य की विथिका में "**ह र......म**" दशाक्षर लिखें। वृत्त के बाहर दो चतुरस्र बनायें। उनकी पृर्वादि दिशाओं में "**अं आं......ऐं, ओं......क......ज, झ......नं, पं......सं**" लिखें।

सप्तमी को त्रिकाल पूजन करें। दही, भात, क्षीर आदि अर्पण करें। शिवा का पूजन करें। कुंभ स्थापित करें, उसके जल में शिवा का पूजन करें। शिष्य का अभिषेक करें, अभीष्ट पूर्ण होवे।

श्लोक १८ से ३७ तक १० तरह के यन्त्रों के पूजन का फल मिलता है।

पुतली बनाकर उसकी प्राण प्रतिष्ठा करें। दशकमल दल बनायें। मध्य में "**ह्रीं**" लिखें। देवी का आवाहन करें। ध्यान श्लोक ५०-५१ अनुसार करें।

दशदल में - प्राण, आपान, समान, व्यान, उदान, नाग, कूर्म, सकृकरा, देवदत्ता, धनञ्जया इन दश प्राणवायु का पूजन करें। दशदल पर दो वृत्त बनायें पश्चात् दो चतुरस्त्र बनायें। एक लक्ष जप करें, अग्र क्रम श्लोक ५५ से आगे वर्णित के अनुसार जानें।

॥ इति शिवदूतीनित्याप्रयोगविधिः ॥

॥ ८. अथ त्वरिता नित्या प्रयोगः ॥

मंत्र - ॐ ह्रीं हुं खे च छे क्षः स्त्री हूं क्षे ह्री फट्। (अग्नि पुराण में अन्य विशेष विधान दिया है)

ऋषिन्यासः - शिरसि सोरये (सौरि ऋषि) **ऋषये नमः। मुखे विराट् छंदसे नमः। हृदि त्वरिता नित्यादेवतायै नमः। गुह्ये ॐ बीजाय नमः। पादयोः हुं शक्तये नमः। नाभौ क्षे कीलकाय नमः। ममाभीष्ट सिद्धये विनियोगः नमः सर्वाङ्गे।**

षडङ्गन्यासः - कुर्यादङ्गानि युग्मार्णैः षट्क्रमेण कराङ्गयोः। मंत्र १२ अक्षर का है अतः २-२ अक्षर से षडङ्गन्यास होता है, परन्तु विमर्श में मंत्र न्यास इस प्रकार से प्राप्त है। **ॐ खे च हृदयाय नमः। च छे शिरसे स्वाहा। छे क्षः शिखायै वषट्। क्षः स्त्री कवचाय हुं। स्त्री हूं नेत्रत्रयाय वौषट्। हूं क्षे अस्त्राय फट्।** (स्त्री पर अनुस्वार नहीं है)

वर्णन्यासः- शिरसि "ह्रीं" ॐ ह्रीं नमः। ललाटे ह्रीं हुं ह्रीं नमः। कंठे ह्रीं खे ह्रीं नमः। हृदि ह्रीं च ह्रीं नमः। नाभौ ह्रीं छे ह्रीं नमः। मूलाधारे ह्रीं क्षः ह्रीं नमः। ऊरुद्वये ह्रीं स्त्रीं ह्रीं नमः। जानुद्वये ह्रीं हूं ह्रीं नमः। जंघाद्वये ह्रीं क्षे ह्रीं नमः। पादयोः ह्रीं फट् ह्रीं नमः।

॥ ध्यानम् ॥

**श्यामवर्णां शुभाकरां नवयौवन शोभिनीम् । द्विद्विक्रमादष्टनागैः कल्पिताभरणोज्ज्वलाम् ॥
ताटङ्कमङ्गदं तद्वद्रशना नूपुरान्वितैः । विप्रक्षत्रिय विट् शूद्र जातिभिर्भीम विग्रहैः ।
पल्लवां शुक संवीतां शिखिपुच्छकृतिः शुभैः । वलयैर्भूषितभुजां माणिक्य मुकुटोज्ज्वलाम् ॥
बर्हिबर्हकृतापीडां तच्छत्रां तत्पताकिनीम् । गुञ्जागुणलसद्वक्षः कुच कुंकुममण्डनाम् ॥
त्रिनेत्रां चारुवदनां मन्दस्मित मुखाम्बुजाम् । पाशांकुश वराभीति लसद्भुज चतुष्टयाम् ॥
ध्यात्वैवं तोतुलां देवीं पूजयेच्छक्तिभिर्वृताम् ॥**

॥ यन्त्रपूजनम् ॥

दो रेखावाला भूपुर बनाये उसके चार द्वार बनाये। उसके अंदर दो वृत्त बनाये उनके अंदर अष्टदल बनाये। भुवनेश्वरी की जयादि पीठ शक्तियों का अर्चन करे। मध्य में ध्यानपूर्वक देवी का आवाहन करे।

प्रथमावरणम् - मध्य में देवी के **षडङ्गों की हृदयादि** न्यास मंत्रों से पूजा करे। वहीं **दिव्यौघ, मानवौघ, सिद्धौघ** गुरवों का पूजन करे।

द्वितीयावरणम् - अष्टदल के बाहर के वृत्त वीथी में देवी के अग्रभाग में **ॐ फट्कारी पादुकां पूज.**। वाह्यवीथी

॥ श्री त्वरिता यन्त्रम्॥

में देवी के आगे **किंकर पा.।**

तृतीयावरणम् – (द्वारपार्श्वयोः) **जया पा.। विजया पा.।**

चतुर्थावरणम् – (अष्टदले) **हुंकारी पा.। खेचरी पा.। चण्डा पा.। छेदिनी पा.। क्षेपिणी पा.। स्त्रीकारा पा.। हूङ्कारी पा.। क्षेमकरी पा.।**

पंचमावरणम् – (भूपुरे) इन्द्रादि लोकपालों एवं उनके आयुधों का पूजन करे। पश्चात् देवी का सर्वविधपूजन कर "**कुरुकुल्ला देवी**" को बलि प्रदान करे।

गायत्री मन्त्र – त्वरितायै विद्महे महानित्यायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार त्वरिता नित्यायाः प्रयोग विधिः ॥

(श्रीतन्त्रराजे)

ततःसाधितविद्यस्तु प्रयोगानाचरेन्नरः । बैल्वैर्दशांशं जहुयात् पत्राद्यैः साधने जपे ॥१॥
एवं संसिद्धिमन्त्रस्तु मन्त्रितैश्चुलुकोदकै । फणिदष्टमृतानां तु मुखे संताडय जीवयेत् ॥२॥
तत्कर्णयोर्जपेद्विद्यां यष्ट्या वा जपसिद्धये । संताड्यशीर्षे सहसा मृतमुत्थापयेदिति ॥३॥
काम्यहोमविधि देवि शृणु वक्ष्ये यथाविधि । कृत्वा योनिं कुण्डमध्ये तत्राग्नौ विधिवद्धुनेत् ॥४॥
तिलसर्षपगोधूमशालिधान्ययवैर्हुनेत् । त्रिमध्वक्तैरेकशो वा समेतैर्वा समृद्धये ॥५॥
वकुलैश्चम्पकैरब्जैः कह्लारैररुणोत्पलैः । कैरवैर्मल्लिकाकुन्दमधूकैरिन्दिरासये ॥६॥
अशोकैः पाटलैर्बिल्वैर्जातीविचकिलैः सितैः । नवैर्नीलोत्पलैरश्वरिपुजैः कर्णिकारजैः ॥७॥
होमाल्लक्ष्मीं च सौभाग्यमायुर्वित्तं यशो निधिम् । यद्यद्धि वाञ्छितं सर्वमवाप्नोति सुनिश्चितम् ॥८॥
दुर्वागुडूचीमश्वत्थं वटमारग्वधं तथा । सितार्कप्लक्षकं हुत्वा रोगान्मुक्तो नरोऽचिरात् ॥९॥
इक्षुजम्बूनालिकेरमोचागुडसितैर्हुतैः । अचलां लभते लक्ष्मीं भोक्ता च भवति ध्रुवम् ॥१०॥
एतैरुदीतितैराज्यमधुक्षीर परिप्लुतैः । एकैकैर्वनिता वश्या यावज्जीवं धनादिभिः ॥११॥
तैस्तैराज्यप्लुतैर्भूपा वश्या स्युर्हवनात्प्रिये । क्षीराक्तैस्तैर्हुतैर्मर्त्या वशे तिष्ठन्त्यशेषतः ॥१२॥
सर्षपाज्यैर्हुनेन्मृत्युकाष्ठाग्नौ वैरिमृत्यवे । तदक्तैर्वैरियोन्युत्थ मांसैरपि च तत्कृते ॥१३॥
अक्षेन्धनाग्नौ योन्युत्थक्षतजोत्पादितं चरुम् । आरुष्कर घृतोपेतं फणिशीर्षस्रुचा हुनेत् ॥१४॥
कृष्णांशुकशिरोवेष्टः खड्गपाणिश्च रोषवान् । निशामध्ये हुनेत्सद्यो निहन्तुं वैरिणं हठात् ॥१५॥
मृत्युकाष्ठानले तस्य फलैः पत्रैश्च होमतः । सप्तरात्रादरातेस्तु गजाश्वा रोगमाप्नयुः ॥१६॥
चतुरंगुलजैर्होमाच्चतुरङ्गबलं रिपोः । सप्ताहाद्रोगदुःखार्त भवत्येव न संशयः ॥१७॥

एवमस्यास्तु विद्याया वैभवं को नु वर्णयेत् । तथापि तद्दिशा किञ्चिदुच्यते तच्छृणु प्रिये ॥१८॥
अथ यन्त्राणि वक्ष्यामि समस्ताभीष्टसिद्धये । तानि सर्वाणि देवेशि कुरु चित्ते क्रमेण वै ॥१९॥
प्राक्प्रत्यग्दक्षिणोदक् च सूत्राणि द्वादशार्पयेत् । तदग्राण्यभितः कुर्यात्त्रिशिखान्यस्य मध्यगे ॥२०॥
कोष्ठे तारस्य मध्यस्थं नाम कृत्वा शिवादिषु । प्रादाक्षिण्यप्रवेशेन द्वादशावृत्ति मायया ॥२१॥
विद्यामालिख्य सञ्जप्य विभृयात् सर्वसिद्धये । श्रियै कीर्त्यै च वश्याय सौभाग्यायाखिलाप्तये ॥२२॥
विषग्रहगदोन्मादशान्त्यै युद्धे जयाप्तये । नरनारी नृपादीनां वश्याय विभृयाच्च तत् ॥२३॥

अस्यार्थः:- प्राग्प्रत्यगायता दक्षिणोत्तरायताश्च द्वादश रेखा विलिख्यैक विंशत्युत्तर शतकोष्ठानि कृत्वा, रेखाग्रेषु सर्वेषु त्रिशूलानि विलिख्य तन्मध्यकोष्ठे ससाध्य प्रणवं विलिख्येशान कोष्ठमारभ्य प्रादिक्षण्येन प्रवेशगत्या त्वरिताविद्यां प्रणवद्वितीय हृल्लेखाविधुरां द्वादशावृत्ति विलिखेत्। एतद्यन्त्रमुक्तफलदं भवति।

तथा-

प्राक्प्रत्यग्दक्षिणोदक् च नव सूत्राणि पातयेत् । जायन्ते चतुः षष्टिकोष्ठानि परमेश्वरि ॥२४॥
तेषुशर्वनिर्ऋत्यादि लिखेल्लक्ष्मीमनुं क्रमात् । बहिस्तूर्णाक्षरैरन्ते वषड्युक्तैस्तु वेष्टयेत् ॥२५॥
अनुग्रहं महाचक्रं विद्यां शृणुं महेश्वरि । सर्वतोभद्र विन्यासानुष्टुभं सर्वसिद्धिदम् ॥२६॥
दाहवह्नियुतं चाद्यं वियद्धन्मरुताः ततः । नभश्च मरुतोपेतेतं व्याप्तं तेन समन्वितम् ॥२७॥
एतान्येव विलोमानि प्रथमं चरणं भवेत् । द्वितीयादि द्वितीयं स्याद्भुवा शून्यं द्वितीयकम् ॥२८॥
तृतीयं च चतुर्थं स्याज्जा तु साभ्रचरा ततः । प्रतिलोमं तथैतेषां द्वितीयं चरणं भवेत् ॥२९॥
तृतीय तुर्यौ परत इला वह्न्या ततस्त्विला । मरुद्युता प्राग्वदेतत्प्रतिलोमं तृतीयकम् ॥३०॥
चतुर्थं द्वादश विंश तदाद्यं ते विलोमगाः । एतच्चतुर्थं चरणं श्रीविद्यायां महेश्वरि ॥३१॥
सर्वतोभद्ररूपैषा विद्या सर्वार्थसाधिका । यत्र स्थितासौ चक्रस्था न तत्राशुभसंकथा ॥३२॥
श्रीसामायायामासाश्री सानोवाज्ञेज्ञेयानोसा । मायालीलालालीयामा याज्ञेलालीलीलाज्ञेया ॥

इति अथैतद्यन्त्र रचना प्रकार :- तत्र प्राग्प्रत्यगायता दक्षिणोत्तरायताश्च नव रेखाः कृत्वा चतुः षष्ठिकोष्ठयुतं चतुरस्त्रं श्रीचक्रं परिकल्प, तत्र सर्वोपरिगतपंक्तेः प्रथमकोष्ठमारभ्य स्ववामादि दक्षिणान्तक्रमेण पंक्तिचतुष्टयगतेषु द्वांत्रिशत्कोष्ठेषु प्रोक्तसर्वतोभद्राख्य लक्ष्मी मंत्रस्य द्वात्रिंशदक्षराणि विलिख्य, पुनरधोगतपंक्ति चतुष्टयेपि सर्वाधः पंक्तैः प्रथमकोष्ठं स्वदक्षिणस्थमारभ्य वामान्तमुपर्युपरि पंक्तिचतुष्टये तस्यैव मन्त्रस्य द्वात्रिंशदक्षराणि विलिख्य तद्बहिः प्रागादिषु चतसृषु दिक्षु ईशादीशान्तं चतुरावृत्ति तद्बाह्यरेखास्पृष्ठां त्वरिता विद्यामन्तर्गत वषट्कारमालिख्य तद्बहिर्वमित्यमृत बीजेन वेष्टयेत्। एतद्यन्त्रमुक्तफलदं भवति। तथा-

दशसूत्रनिपातेन कृत्वैकाशीतिकं पदम् । तन्मध्यकोष्ठे दावस्थं कृत्वा नामास्य वीथिषु ॥३३॥
लिखेद्वर्णचतुष्कं तु शृणु भद्रे यथाविधि । ज्याधरास्वैर्मायया हृत्तत्तोम्बु स्पर्शगा इला ॥३४॥
ततः श्रियो लिखेद्विद्या शिवरक्षोदिगाद्दिकाम् । प्राग्वत्तूर्णामृतार्णस्तैर्वेष्टयेत् फड्वियोजितैः ॥३५॥

ततोम्बु स्वयुतं तेन मालाकलितरूपिणा । वृत्तद्वयेन निष्पाद्य कुम्भं पद्माधरोत्तरम् ॥३६॥

कृत्वा स्वर्णादिषूक्तेषु सम्पूज्याभ्यर्च्य तत्पुनः । स्थापयेज्जपसंसिद्धं तेषु पूर्वोदितेषु वै ॥३७॥

तत्र लक्ष्मीरतिस्फीता नीरोगाश्च प्रजास्तथा । गजाश्वपशवस्त्वन्ये प्राणिनः सुखिनोऽनिशम् ॥३८॥

भूतप्रेतपिशाचादि पीडासु बिभृयादिदम् । अलक्ष्मीशान्तये वश्यसिद्धये सर्वसम्पद ॥३९॥

॥ अथैतद्यन्त्रप्रकार ॥

तत्र प्राक्प्रत्यग्दक्षिणोदक्च समान्तरालानि दश दश सूत्राण्यास्फाल्येकाशीति पदानि विधाय , तत्र मध्यकोष्ठे सबिन्दुकठकारोदरे साध्यनामालिख्य तत्कोष्ठपार्श्वस्थ पूर्वापरायत पंक्तिद्वयेन दक्षिणोत्तरायत पंक्तिद्वयेन च सम्भूय चतुसृषु पंक्तिषु चतुश्चतुष्कोष्ठात्मिकासु स्वाग्रादि प्रादक्षिण्य क्रमेण ''जूं सः वषट्'' इति च चतुष्टयवर्जमालिख्य, सर्वबाह्येभितः ईशादीशान्तं तूर्णामृताक्षराणि चतुरावृत्त्या प्राग्वत्समालिख्य सर्वमध्यकोष्ठे मध्यकोष्ठमवष्टभ्य चतुष्कोणस्य तृर्णाक्षरमानेन भ्रमेण वृत्त निष्पाद्य तद्वाह्येंगुलमानेन तथा वृत्तान्तरं कृत्वा उपरिभागे च मध्यतश्चतुरंगुलान्तरालं वृत्तद्वयं मार्जयित्वा तदग्रचतुष्टयमानमवक्रं समान्तरालमुपरि चतुरंगुलकुम्भमुखाकारं यथा भवति तथा समुन्नमय्य कुम्भमुखे तिर्यग्रेखाद्वयं प्रसार्य, तत्कुम्भवीथीमध्य मन्योन्यस्पृष्टवकारमालया शृंखलारूपयान्तर्मुखया समापूर्य सर्वत्रोपरि विन्दुं समालिख्य, कुम्भाधस्तात्वं तत्कर्णिकास्थकुम्भं यथा भवति तथा समालिख्य प्रोक्तक्रमेण मनीषितेषु विनियोगात् प्रोक्तफलानि भवति। इत्यनुग्रहयंत्राणि। अथ निग्रह यंत्राणि तत्रैव-

निग्रहं शृणु देवेशि शत्रवो यस्य शङ्किताः । स्वल्पनैव तु कालेन भवन्त्येव परासवः ॥४०॥

प्राग्वदेकाशीतिपदं कृत्वा तन्मध्यकोष्ठके । दाहगर्भे नाम कृत्वा तथा दिग्वीथिषु क्रमात् ॥४१॥

लिखेद्वीजचतुष्कं तु वह्निमारुतविग्रहम् । यैः सद्यो वैरिणः रैवरं विमुञ्चन्ति कलेवरम् ॥४२॥

रसो दाहक्ष्मास्वयुतो ग्रासो दाहक्ष्मया स्वगः । प्रभा दाहक्ष्मास्वयुता हंसो दाहादि संयुतः ॥४३॥

ईशरक्षोदिगारम्भात् पंक्तिशो विलिखेत्ततः । काल्या यमस्य क्रमतो विद्यामन्त्रं च संक्रमम् ॥४४॥

सर्वतोभद्ररूपं तु काल्यनुष्टभमीश्वरि । शृणु वक्ष्यामि परतो यमानुष्टुभमीदृशम् ॥४५॥

प्राणो मरुत्समोपेत इला वह्नया समन्विता । नभो मरुद्युतं दाहश्चतुर्णां प्रतिलोमतः ॥४६॥

प्रथमं चरणं तस्य द्वितीयं शून्यमेव च । नभो भुवा ग्रास एत एतत्प्रतिलोमाद् द्वितीयकम् ॥४७॥

तृतीयमेकादशं ततो गोत्रा चरान्विता । रयस्तेषां विलोमं च तृतीयं चरणं मतम् ॥४८॥

चतुर्थं द्वादशं विंशं रयोऽम्ब्वाधो विलोमकम् । चतुर्थं चरणं प्रोक्तं विद्यैषा सर्वनाशिनी ॥४९॥

व्याप्तं कालीतृतीयं च मरुताम्बुसमन्विताम् । नाद एषां विलोमं च प्रथमं चरणं यमे ॥५०॥

एतद्द्वितीय तुर्यो च नभसा भूश्च नादकम् । एतेषां प्रतिलोमं च द्वितीयं चरणं मनोः ॥५१॥

अम्बुयुक्तो मरुच्चास्मिन्नेकादशमेव च । रसः क्ष्मया वह्निदाहौ प्रतिलोमं तृतीयकम् ॥५२॥

नादो नादो दाहवह्नी रयोऽम्ब्वा तदनन्तरम् । प्रतिलोमं तु तेषां स्याच्चतुर्थं चरणं शिवे ॥५३॥

एवं मनुद्वयं कोष्ठेष्वालिख्य बहिरप्यथ । वेष्टयेद् व्याप्तादाहाभ्यामुक्तक्रमसमन्वितम् ॥५४॥

मर्कटीदण्डिगरलैनालिप्तं स्थापितेरकम् । जपन् विनिक्षिपेदक्षविवरे चत्वरेऽथवा ॥५५॥
वल्मीके मातृभवने शास्तुरायतनेऽथवा । श्मशाने प्रोक्तसमये प्रोक्तक्रमसमन्वितम् ॥५६॥
कालीमाररमालीका लीनमोक्षक्षमोनली । मामोदेततदेमोमा रक्षतत्वत्वतक्षर ॥ इति काल्युष्टुभम्।

यमावाटटवामाय माटमोटटमोटमा । वामोभूरीरीभूमोवा टटरीत्वत्वरीटट इति यमानुष्टुभम्॥ भ्रूं क्ष्रूं छ्रूं ह्रूं इति निग्रहबीज चतुष्टयम्॥

॥ अथैतन्निग्रह यंत्ररचनाप्रकार॥

तत्र प्राग्वदेकाशीतिपदोपेतं चक्रं विरच्य यन्मध्यकोष्ठे सबिन्दुकरेफोदरे साध्यनामलिख्य प्राग्वत् तत्पार्श्वपंक्तिषु चतुष्कोष्ठेषु प्रागुक्तक्रमेण भ्रूं क्ष्रूं छ्रूं ह्रूं इत्यक्षर चतुष्टयमभ्यन्तरान्निर्गमन गत्याभिमः समालिख्य आभिचार्यः पुरुषश्चेदन्त काल्यनुष्टुभं बहिर्यममन्त्रं वनिता चेदन्तर्यममन्त्रं बहिः कालीविद्यां च समालिखेत्। लेखने तु- ईशानादिकं निर्ऋत्यादिकं कालीविद्याम् अन्यदा तथा यममन्त्रं विलिख्य अन्यतरं बहिरीशानादि निर्ऋत्यन्तं निर्ऋत्यादीशान्तं च निरन्तरं द्विरालिख्य तद्बहिर्निरन्तरं बिन्दुयुक्तं यकारं रेफं चेशादीशान्तं यथाक्रममन्तर्बहिर्विभागेन समालिख्य मनीषितेषु विनियुञ्ज्यात्। एषन्निक्षिपेदाभिचार्य पुरुषश्चेत् काल्यादिशक्तेरायतने स्त्री चेत् शास्तुरायतन एवाग्रभागेधस्तान्निखनेदिति सम्प्रादयः। प्रपञ्चसारे-

तन्त्रराजे-

यत्र देशादिके यन्त्रं तत्रालक्ष्मीर्गदैः समम् । मारी सुदुस्तरासाध्या सर्वैर्देवासुरैरपि ॥५७॥
प्राग्वच्च नवभिः सूत्रैरष्टाष्टकपदं शिवे । कृत्वा तेष्वीशरक्षोदिगारम्भातत् कालिकामनुम् ॥५८॥
विलिख्य यममन्त्रेण प्रोक्तबीजद्वयेन च । वेष्टयित्वा बहिश्चक्रं स्थपयेत्तदधोमुखम् ॥५९॥
एतच्च पूर्वचक्रोक्त फलकृत् परमेश्वरि । अनुक्तेष्वपि नामानि योजयेत् कोष्ठमध्यतः ॥६०॥
लवणोषणमेहाम्बुगृह धूमाग्निसंयतुम् । श्मशानाङ्गारनिम्बोत्थनिर्यासो विषमीरितम् ॥६१॥

ऊषणमूषर इति मनोरमाकारैर्व्याख्यातम्। मेहाम्बु प्रस्त्रवः। अग्निश्चित्रकम्॥ यन्त्र रचनाक्रमो यथा- तत्र प्राग्वत् नवभिर्नवभिः सूत्रैश्चतुः षष्ठिकोष्ठानि कृत्वा तेष्वीशानादीकं निर्ऋत्यादिकं चाभिचार्यः पुरुषश्चेदन्तः कालीविद्यां बहिर्यममन्त्रं च, स्त्री चेदन्तर्यममन्त्रं बहिः कालीविद्यां च प्राग्वत् समालिख्य प्राग्वत् सबिन्दुयकाररेफाभ्यां संवेष्ट्य प्रोक्तक्रमेण प्रोक्तस्थानेषु स्थापनात् प्रोक्तफलसिद्धिर्भवतीति॥ तथा-

विद्याद्यवर्णजठरे साध्यमालिख्य तद्बहिः । अष्टच्छदेषु फड्वर्ज्यमालिखेदष्टवर्णकम् ॥६२॥
कर्णिकास्थं ततोब्जं च वेष्टयेन्मायया ततः । बहिः कुम्भं विदध्याश्च प्रोक्ताक्षर विधानतः ॥६३॥
एवमन्यैश्च नवभिर्विद्यावर्णैयथाक्रमम् । विदध्यान्नव यन्त्राणि दशानां च फलं शृणु ॥६४॥

॥ यंत्ररचना क्रमो यथा॥

तत्राष्टदलकमलं सकर्णिकं विलिख्य तद्बहिर्वृत्तद्वयं विधाय कर्णिकायां विद्यावर्णं साध्यनामगर्भं विलिख्य, तद्बहिर्मायाबीजेन संवेष्ट्याष्टदलेषु फडवर्ज्यं द्वितीयाद्यष्टौ बीजानि विलिख्य तद्बहिर्मायया वेष्टयेत्। एवं द्वितीयबीजं कर्णिकायां विलिख्य द्वितीयं यन्त्रं भवति। एवं तृतीयबीजादिकं ज्ञेयम्। एवं दश यन्त्राणि भवन्ति। फलान्याह-

सर्वरक्षां जयं वश्यं नरनारीनृपादिनाम् । स्तम्भं लक्ष्मीयशो हेमवासांसि च समाप्नुयात् ॥६५॥

अनावृत्तान्यक्षराणि मन्त्रेष्वेकादशाथ तैः । स्वरभिन्नैर्भवेत् संख्या षट्सप्तत्या शतं स्मृतम् ॥६६॥

अहरखचछक्षसत फट् इति।

तैर्यन्त्रकरणं तेषां फलानि यथाक्रमम् । शृणु वक्ष्यामि देवेशि साधकाभीष्टसिद्धये ॥६७॥

वृत्तयोर्मध्यगं कृत्वा पद्मं षोडशपत्रकम् । तन्मध्ये कर्णिकामध्ये शक्तिं साध्यसमन्विताम् ॥६८॥

परेषु षोडशार्णानि वेष्टायेत्तच्च मायया । वृत्तयोरन्तरा बाह्ये कुम्भं प्रोक्तं समालिखेत् ॥६९॥

एवमेकादशोक्तानि यन्त्राणि प्रथितानि वै ।

अथ सकर्णिकं षोडशदलपद्मं विलिख्य बहिर्वृत्तद्वयं, कर्णिकायां साध्यनामगर्भं ह्रींकारं विलिख्य तन्मायया संवेष्ट्य षोडशदलेषु षोडशबीजानि विलिख्य, वृत्तद्वयान्तराले मायाबीजैः संवेष्ट्य प्राक्प्रोक्त प्रकारेण तद्बहिः कुम्भं विलिखेत्। एवमेकादश यन्त्राणि भवन्ति। तथा-

विनियोगानथैतेषां क्रमेण शृणु पार्वति ॥७०॥

प्रथमं गजरक्षाकृद् द्वितीयं हेमरक्षकम् । तृतीयं नृपरक्षायां चतुर्थं द्वन्द्वरक्षकम् ॥७१॥

पञ्चमं कुरुते राजवेश्मरक्षां तु सर्वतः । षष्ठं सचिवरक्षाकत् सप्तमं पुररक्षकम् ॥७२॥

अष्टमे गृहरक्षा स्यात् सर्वेषामपि सर्वदा । फणिचोरग्रहादिभ्यो भयेभ्यः शत्रुतस्तथा ॥७३॥

नवमं सर्वरोगार्तौ सर्वेषामपि सर्वदा । उत्तारकं स्याद् देवेशि प्राक्प्रोक्तविधिना युतम् ॥७४॥

दशमं भूर्जगं कृत्वा प्राग्वत् सिक्थोत्थलिङ्गकम् । स्थापयेच्छीतले तोये घटादौ सविधेथ तम् ॥७५॥

पूजयेत् तानि च यजेत् स्पर्शंजीवकरेण तम् । घोराभिचार कृत्यादिजातो दाहज्वरः क्षणात् ॥७६॥

विमुच्य तं प्रयोक्तारं नाशयेत् तत्क्षणात् प्रिये । एवमेतानि यंत्राणि नामतः सर्वकार्यकृत् ॥७७॥

सर्वासामपि नित्यानां प्रातरेव समृद्धये । पूजादौ च बलिं दद्यात् षोडशार्णेन पार्वति ॥७८॥

॥ त्वरिता नित्या प्रयोगः॥

सारांश - योनि कुण्ड बनाकर तिल, सरसों, गोधूम (यव) शालि धान्य (चावल) आदि व नाना पुष्पों से होम करें लक्ष्मी प्राप्ति हेतु प्रयोग श्लोक ८ तक दिया है। पश्चात् श्लोक १८ तक नाना प्रयोग फल दिये हैं। श्लोक उन्नीस से २३ तक कामना यन्त्र लिखा है।

१. पूर्व-पश्चिम व उत्तर-दक्षिण १२-१२ रेखायें खीचने से ११×११ = १२१ कोष्ठक बनेंगे। मध्य कोष्ठक में "ॐ" सहित साध्य का नाम लिखें। उसके चारों ओर १२ बार "ह्रीं" मन्त्र लिखें।

२. त्वरिता मूल मन्त्र - "ॐ ह्रीं हुं खे चं छे क्षः स्त्रीं हूं क्षे ह्रीं फट्"

अनुत्तवर्ण ३२ अक्षर का मन्त्र है। इसके ८-८ अक्षर के चार चरण हैं। प्रत्येक चरण ४-४ अक्षरों के लोम-विलोम से बना है।

श्रीसामाया यामासाश्री, सानोवाज्ञे ज्ञेवानोसा ।
मायालीला लालीयामा, याज्ञेलाली लीलाज्ञेया ॥

नौ-नौ रेखायें पूर्व-पश्चिम व उत्तर-दक्षिण खींचने से ८×८ = ६४ कोष्ठक बनेंगे।

ईशान कोष्ठक से (अपने वाम भाग से) अग्निकोण तक प्रथम चरण के ८ अक्षर लिखें। उसके बाद दूसरा, तीसरा, चौथा चरण ४ पङ्क्तियों में लिखें। शेष ३२ कोष्ठक में नीचे के नैऋत्य कोण से (अपने दाहिने भाग से वाम भाग की ओर) वायव्य की ओर एक चरण के ८ अक्षर लिखें। इसके ऊपर की पङ्क्ति के ८ कोष्ठक में दूसरा चरण लिखें। उसके ऊपर तीसरा चरण, पश्चात् नीचे से चौथी पङ्क्ति में दक्षिण भाग से वाम भाग की ओर चौथा चरण लिखें।

यन्त्र के बाहर चारों ओर ३२ अक्षर वाला मन्त्र लिखें। उसके बाहर त्वरिता मन्त्र वषट्कार सहित लिखें। उसके बाहर चारों ओर अमृत बीज "**वं**" लिखें अथवा "**जूं सः वषट्**" लिखें।

३. अनुग्रह यन्त्र - दशदश रेखा पूर्व-पश्चिम व उत्तर-दक्षिण में खींचकर ८१ कोष्ठक यन्त्र बनायें। मध्य में "**कं खं........टं ठं**" **ह्रीं** युक्त लिखें। प्रत्येक कोण में ४-४ कोष्ठक लेने से १६-१६ कोष्ठक बनेंगे तथा मध्य में चारों दिशाओं में ४-४ कोष्ठक की एक गली रह जायेगी। प्रत्येक कोष्ठक में "ॐ जूं सः **वषट्**" चौसठ खानों में लिखें। मध्य कोष्ठक में वृत्त बनायें उसके बाहर दो वृत्त और बनायें। मध्य कोष्ठक में ४ अंगुल का कुंभाकार बनायें उसके आगे दो आडी-तिरछी रेखायें खींचे। कुंभ स्थापित कर देवि का पूजन करें। फलश्रुति श्लोक 38-39।

४. शत्रु ताडन यंत्र- (निग्रह काली मंत्र)-

प्रत्येक चरण में ४-४ अक्षर लोम-विलोम।

कालीमार रमालीका लीनमोक्ष क्षमोनली ।
मामोदेत तदेमोमा, रक्षतत्व त्वतक्षर ॥

यम मंत्र -

यमावाट टवामाय, माटमोट टमोटमा ।
वामोभूरी रीभूमोवा, टटरीत्व त्वरीटट ॥

ये अनुत्तरवर्ण मंत्र है। पूर्व की तरह ८१ कोष्ठक बनाये। मध्य कोष्ठक में "**क्रं**" सहित साध्यनाम लिखे। १६-१६ कोष्ठक चारों कोणों में गिनने के बाद मध्य के पार्श्व में ४-४ कोष्ठक की वीथिका बनेगी। उसमें "**भ्रूं, क्षूं, छ्रूं ह्रूं**" लिखे।

ऊपर के कोणों में काली मंत्र के १६-१६ अक्षर लिखें नीचे के १६-१६ कोष्ठकों के कोणों में यम मंत्र के १६-१६ वर्ण लिखें।

इस यंत्र के बाहर काली मंत्र लिखे। उसके बाहर यम यंत्र लिखे। विशेष विधि श्लोक ४६ से ५६ तक यम यंत्र प्रधान करने हेतु मध्य कोष्ठक में "**ग्रं**" मंत्र के साथ साध्य नाम लिखें।

५. अग्नि चक्रम् - ६४ कोष्ठक का यंत्र बनाये। पूर्व की भांति ६४ खानों में ३२-३२ अक्षर के काली व यम मंत्र लिखें। पुनः यंत्र के बाहर काली मंत्र उसके चारों ओर यम मंत्र लिखे। विधि ५७ से ६१ तक।

६. अनुत्तरवर्ण मंत्राक्षर - अ ह र ख च छ क्ष स त फट् यंत्र में लिखने के क्रम में **फट्** को त्याज्य करने पर नववर्ण तथा "**फ, ट्**" को अलग-अलग लिखने पर ११ वर्ण बनते है।

प्रयोग विधि- अष्टदल कमल बनायें। उसके बाहर दो वृत्त बनायें। मध्य में "**ह्रीं**" सहित साध्य नाम लिखे। मंत्र

का प्रथम वर्ण भी मध्य में लिखे तथा दूसरे से नवम् वर्ण तक अक्षर अष्टदल की कर्णिका में लिखें। "**फट्**" को त्याग करे। उनके बाहर वृत्त की वीथिका में "**ह्रीं**" बीज चारों ओर ८ बार लिखे। इसे तरह मध्य में दूसरा वर्ण शेष तीसरे से बाकी वर्ण अष्टदल में लिखें।

इस तरह **फट्** सहित १० यंत्र अलग-अलग वर्णो के क्रम से बनेगें। यदि "**फ, ट्**" को अलग-अलग लिखने ११ यंत्र बनेगें। यदि प्रत्येक यंत्र के बाहर चारो ओर "**अं आं.......अं** अः" १६ स्वर लिखे तो ११ × १६= १७६

फल श्रुति श्लोक ६५-६६

७. १६ दल का कमल बनाये। मध्य में "**ह्रीं**" सहित साध्य का नाम लिखें। १६ कमल दल में १६ स्वर लिखें। कमल के बाहर दो वृत्त बनाये उनकी वीथिका में "**ह्रीं**" मंत्र १६ बार लिखें। मंत्र का प्रथम वर्ण मध्य में शेष वर्ण बाहर लिखें। इस तरह पूर्व की तरह १-१ वर्ण से ११ यंत्र बनेगें। प्रयोग विधि श्लोक ७० से ७८ तक।

॥ इति त्वरितानित्या प्रयोगविधिः ॥

॥ ९. अथ कुलसुंदरी नित्या प्रयोगः॥

मंत्र - **ऐं क्लीं सौः।**

विनियोग - **अस्य मंत्रस्य दक्षिणामूर्ति ऋषिः पंक्ति छंदः** कुलसुंदरीनित्यादेवता **ऐं बीजं, सौः शक्तिः क्लीं कीलकं पुरुषार्थ चतुष्टय सिद्धये विनियोगः।**

ऋषिन्यास - शिरसि दक्षिणामूर्ति ऋषये नमः। **मुखे पंक्तिछन्दसे नमः। हृदये कुलसुंदरी नित्यादेवतायै नमः। गुह्ये ऐं बीजाय नमः।** पादयोः सौः शक्तये नमः। **नाभौ क्लीं कीलकाय नमः। विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यास - **आं हृदयाय नमः। ईं शिरसे स्वाहा। ऊं शिखायै वषट्। ऐं कवचाय हुं। औं नेत्रत्रयाय वौषट्। अः अस्त्राय फट्।**

षड्वक्त्र न्यास - शिरसि ऐं आं उर्ध्व वक्त्राय नमः। मुखे ऐं ई पूर्ववक्त्राय नमः। दक्षकर्णे ऐं ऊं दक्षिणवक्त्राय नमः। वामकर्णे ऐं ऐं उत्तरवक्त्राय नमः। चूडाधः ऐं औं पश्चिमवक्त्राय नमः। चिबुके ऐं अः अपरवक्त्राय नमः।

आवरण पूजा प्रारंभ करे तब **षड्वक्त्रन्यास क्लां, क्लीं, क्लूं, क्लें, क्लौं, क्लः** लगाकर पूर्वविधि से **वक्त्र न्यास** करे। जपान्त या आवरण पूजा बाद **सां, सीं, सूं, सें, सौं,** सः से युक्त कर उपरोक्त **षड्वक्त्र** न्यास करे।

वर्णन्यास - **आधारे ऐं नमः। ब्रह्मरंध्रे क्लीं। हृदये सौः।** दक्षनेत्रे ऐं। **वामनेत्रे क्लीं। ललाटनेत्रे सौः। दक्ष श्रोत्रे ऐं। वामश्रोत्रे क्लीं। चिबुके सौः। दक्षनसि ऐं। वामनसि** क्लीं। **तालुनि सौः। दक्षांसे ऐं। वामांशे क्लीं। नाभौ-सौः। दक्षदोर्मूले-ऐं। मध्ये क्लीं। अग्रे सौः। वामदोर्मूले-ऐं। मध्ये क्लीं। अग्रे सौः। दक्षोरुमूले ऐं। मध्ये क्लीं। अग्रे सौः। वामोरुमूले ऐं। मध्ये क्लीं। अग्रे सौः।** मूलमंत्र से व्यापक न्यास करे।

ध्यान - त्रिपुर सुन्दरी के समान है। लाल वस्त्र, लाल वर्ण, षण्मुखा एवं १२ हाथ वाली शक्तियों से घिरि हुई व सभी प्रतिवक्त्र त्रिनयना हैं।

लोहितां लोहिताकार शक्तिवृन्द निषेविताम्। लोहितां शुक भूषास्त्रगलेपना षणमुखाम्बुजाम् ॥१॥
प्रतिवक्त्रं त्रिनेत्रां तथा चारुस्मितान्विताम्। अनर्घ्यरत्नघटित माणिक्मुकुटोज्ज्वलाम् ॥२॥

ताटङ्क हार केयूररशना नूपुरोज्ज्वलाम् । रत्नस्तबक संभिन्न लसद् वक्षःस्थलां शुभाम् ॥३॥
कारुण्यानंद परमां अरुणाम्बुज विष्टराम् । भुजैर्द्वादशभिर्युक्तां सर्वेशीं सर्वाङ्ग्मयीम् ॥४॥
प्रवालाक्षस्त्रजं पद्मं कुण्डिकां रत्ननिर्मिताम् । रत्नपूर्णं तु चषकं लुङ्गीं व्याख्यान मुद्रिकाम् ॥५॥
दधानां दक्षिणैर्वामैः पुस्तकं चारुणोत्पलम् । हेमां च लेखनीं रत्नमालां कम्बु वरं भुजैः ॥६॥

॥ यंत्रपूजनम् ॥

अष्टदल बनाये उसके मध्य में कर्णिका में नवयोनिचक्र बनाये। अष्टदल के बाहर दो वृत्त बनाये। उसके बाद दो रेखा वाला भूपुर बनाये उसके पूर्व एवं पश्चिम में द्वार होवे।

॥ श्री कुलसुन्दरी यन्त्रम् ॥

सर्वप्रथम १२ पीठ शक्तियों का पूजन करे- **वामायै नमः। ज्येष्ठायै नमः। रोद्र्यै नमः। अंबिकायै नमः। इच्छायै नमः। ज्ञानायै नमः। क्रियायै नमः। कुलिकायै नमः। चित्रायै नमः। विषघ्न्यै नमः। दूतर्य्यै नमः। आनंदायै नमः। हसौं सदाशिवमहाप्रेतपद्मासनाय नमः।** पश्चात् कुलसुन्दरी का ध्यानपूर्वक आवाहन करे।

प्रथमावरणम् - मध्य योनित्रिकोण के मूल में षड्वक्त्र की **क्लां क्लीं क्लूं क्लें क्लौं क्लः** युक्त से पूजा करे हृदया दि न्यास शक्तियों का पूजन करे। **दिव्यौघ, सिद्धौघ, मानवौघ** गुरुपंक्ति का पूजन करे।

द्वितीयावरणम् - (त्रिकोणे) त्रिकोण के अग्रिम कोण में **भाषा पा.।** पृष्ठे दक्षिणकोणे **आनन्दा पा.।** वामकोणे **कौतुका पा.।**

तृतीयावरणम् - (अष्टयोनिषु) **ह्रीं श्रीं सरस्वती पादुकां पूजयामि तर्पयामि नमः। वाणी पा.। संस्कृता पा.। प्राकृता पा.। परा पा.। बहुरूपा पा.। चित्ररूपा पा.। रम्या पा.।**

चतुर्थावरणम् - (अष्टदले)- ब्राह्मी आदि अष्टमातृकाओं का पूजन करे।

पंचमावरणम् - (भूपुरे)- इन्द्रादि दश दिक्पालों व उनके आयुधों का पूजन करे।

गायत्री मन्त्र - वागीश्वर्यै (कुलसुन्दर्यै) विद्महे कामेश्वर्यै धीमहि **तन्नो नित्या प्रचोदयात्॥**

॥ अथ कादीक्रमानुसार कुलसुन्दरी नित्या प्रयोग विधि ॥

(श्रीतन्त्रराजे)

एवं नित्यार्चनं कुर्यान्नित्यहोमं घृतेन वै । प्रातः सलिलपानं **च कुर्याद्विद्यात्मसिद्धये ॥१॥**
चन्दनोशीरकर्पूर कस्तूरीरोचनान्वितैः । काश्मीरकालागुरुभि **मृगस्वेदमयैरपि ॥२॥**
आलिप्तगात्रो हृष्टान्तः करणो मौनमन्वितः । चित्रभूषाम्बरस्त्रग्वी जपेद्विद्यां निशामुखे ॥३॥
पूजयेच्च शिवामेतैर्गन्धैः सर्वार्थसिद्धये । सर्वाभिरपि नित्याभिः **प्रातर्मातृकया समम् ॥४॥**

त्रिजप्ताभिः पिबत्तोयं तथा वाक्सिद्धये शिवे । अन्यैरपि च मन्त्रेस्तैर्विद्याभिस्तत् प्रसिद्ध्यति ॥५॥
प्राग्वल्लक्षत्रयं जप्त्वा तद्दशांशं च तर्पयेत् । सुगन्धिसलिलैर्होमं तावत् त्रिमधुराप्लुतैः ॥६॥
पलाशपुष्पैर्विकचैरदुष्टैरविखण्डितैः । सिद्धविद्यः पुनः कुर्यात् काम्यकर्माणि साधकः ॥७॥
देव्या वर्णविभेदेन फलभेदाः समीरिताः । विद्यास्वरूप भेदांस्तु शृणु वक्ष्ये यथाविधि ॥८॥
त्रयीमयत्वं विद्यायास्तथा व्यञ्जनसङ्गमात् । वाच्यवाचकरूपस्य प्रपञ्चस्यामितात्मनः ॥९॥
कारणत्वं परात्मत्वमयेत्वं च वै क्रमात् । कथयामि शृणु प्राज्ञे विचित्रास्तव वैभवाः ॥१०॥
अकारादिः सामवेदा ऋग्वेदस्तु तदादिकः । यजुर्वेद इकारदिस्तेषां संयोगतः शुचि ॥११॥
तन्निष्पत्तिं शृणु प्राज्ञे प्रोक्तं पूर्वापरक्रमात् । त्रिलेखद्योजयेत् पूर्वं शब्दशास्त्रानुसारतः ॥१२॥
गुणसन्ध्या ऋग्यजुषा ततस्तेनापरं तथा । वृद्धिसन्ध्या समायुञ्ज्यादित्युत्पन्नं शुचेर्वपुः ॥१३॥
तेन त्रयीमयी विद्या कार्यकारणयोगतः । आद्यक्षर प्रसूतानि सर्वाण्यन्यानि येन वै ॥१४॥
मध्यमार्णगत प्राणा व्यञ्जनादेस्तु मातृका । प्राग्वत् कारण कार्यत्वयोगाद्वाचकरूपता ॥१५॥
तदर्णकरसायोगाद्भूतादित्वेन वाच्यता । इति वाचकवाच्यत्वरूपा विश्वात्मतोदिता ॥१६॥
परारूपं तृतीयेनत्रिंशिकोक्तं त्रिकात्ककम् । एवमेषा विश्वमयी विद्यारूपमिदं शृणु ॥ १७॥
शुचिराद्या वाक्स्वरूपा द्वितीया वह्निरीरिता । बिन्दुसर्गात्मनोरैक्यरूपा सा त्वावयोर्वपुः ॥१८॥
तेन बीजेन विश्वात्मरूपा सा सम्यगीरिता । वनं तृतीयमाख्यातं मायया स्वेन वा युतम् ॥१९॥
एषा त्रैपुरकन्दा स्यात् सङ्केतेन निगद्यते । ज्ञातृज्ञानज्ञेय दोषगुणतेजस्त्रयात्मिका ॥२०॥

ऐ ई औ इति संकेतविद्या। त्रैपुरकन्दं त्रिपुरामन्त्राणां मूलमित्यर्थः। वनं तृतीय औकारः। मायया विसर्गेण स्वेन बिन्दुना वेति विकल्पः तथा-

अयास्तु मध्यमे बीजे रसाप्राणनियोजनात् । वाच्यवाचकरूपात्मा प्रपञ्चस्य हि कारणम् ॥२१॥
तृतीये हृत्समायोगात् त्रिकविश्वात्मतोदिता । हंसहृद्योगतस्तेषु जङ्गमस्थावरात्मता ॥२२॥
ऐं क्लीं औः, ऐं क्लीं सौः, ह्सै ह्सक्लीं ह्सौः । एतासु विद्यासु कादिपञ्चत्रिंशदव्यञ्जनानाम्।
तथा-एकद्व्यादिसमायोगाद् व्यञ्जनानां तथा त्रिषु। ज्ञातुं न शक्यते संख्या विद्यानां परमेश्वरि ॥२३॥

त्रिषु त्रिबीजेषु।

एवं सानन्तविभवा तां निःशेषं वदेत् कथम् । तथापि भक्तसंत्राणहेतोः कांचन वच्मि ते ॥२४॥
आयुर्लक्ष्मीकीर्तिभोग सौन्दर्यारोग्यदायिकाः । ऐहिकामुष्मिकज्ञानमय्यः संकल्पसिद्धिदाः ॥२५॥
विद्यायाः कुलसुन्दर्या हंसयोगात् त्रिषु क्रमात् । विजयाख्या महाविद्या विश्वसंत्राण तत्परा ॥२६॥

अत्र **हैं ह्क्लीं ह्सौः** इति विजया।

हृत्समायोगातस्तेषु बीजाख्या विश्वचिन्मयी । द्वयोर्नियोजनात्तेषु जायते सावयोर्वपुः ॥२७॥

केवलसकारयोगाद्बीजाख्या । द्वयोर्हकारसकारयोर्योगाद्विश्वचिन्मयी ॥
हृदादिस्त्वन्मयी विद्या हंसादिर्मन्मयो मनुः । तेषु दाहसमायोगाद्विश्वाख्य विश्वविग्रहा ॥२८॥

अत्र मन्त्र इति विद्येति भेदद्वयम्। दाहो रेफः।

प्रत्येकं शक्तिपुटिता विद्या विश्वमोहिनी ।

मायाबीजपुटिता प्रत्येकम्।

स्वंचराम्बुरसोपेतमायाभ्यां पुटिता तु सा ॥२९॥

त्रिपुरामृतसंज्ञा सा सर्वाप्यायनविग्रहा। ह्रीं ब्लें ह्रीं इति।

.....। मायाद्या मोहिनी प्रोक्ता तन्मध्या क्षोभिणी मता ॥३०॥
तदन्ता क्लेदिनी ख्याता वातादिः स्यान्महोदया । त्रयोदशीति कथिता त्रिपुरानिधयः स्मृताः ॥३१॥
आसां क्रमविपर्यासजाता विद्याष्टसप्ततिः । तासां विधानं ते प्रोक्तमशेषं लक्षसागरे ॥३२॥
सम्पत्करीति काप्यस्ति विद्या याचिन्त्यवैभवा । तां वक्ष्ये शृणु देवेशि साधकाभीष्टसिद्धये ॥३३॥
प्राणो रसा मरुद्वह्निस्वयोगादाद्यमीरितम् । वातेन च चरस्वाभ्यां द्वितीयमपि पार्वति ॥३४॥
हंस हृद्वनमायाभिस्तृतीयं परमेश्वरि । एवं त्रिवर्णा सा विद्या विधानं चाथ कथ्यते ॥३५॥

ककआई, अऐं ह्सौः।

तृतीयबीजेनाङ्गानि दीर्घस्वरयुजा क्रमात् । कुर्यात्कराङ्गयोः प्राग्वदित्थं ध्यायेच्च तां पराम् ॥३६॥
दाडिमीकेसरप्रख्यदेह वासोविभूषणाम् । चतुर्भुजां त्रिनयनां प्रसन्नस्मेरवक्त्रकाम् ॥३७॥
रत्नाभिषेकसंभिन्नाष्ट पत्राब्जमध्यगे । त्रिकोणे स्वस्तिकासीनां करुणानन्दमन्दिराम् ॥३८॥
प्रवालाक्षस्त्रजं रत्नचषकं रत्नपूरितम् । पुस्तकं च वरं हस्तैर्दधानां सर्वमङ्गलाम् ॥३९॥
अकारादिसकारान्त षोडशत्रयकल्पिते । कुलासने हळक्षार्णमध्ये तद्विद्ययान्विते ॥४०॥
समावाह्यार्घ्य संकल्पपूर्वं तामर्चयेत् क्रमात् । मध्ये त्रिकोणकोणेषु रतिं प्रीतिं मनोभवाम् ॥४१॥
अग्रादिसव्यगास्तद्वदष्टपत्रेषु मातरः । चतुरस्त्रे लोकपालान् प्राग्वच्छक्तीः समर्चयेत् ॥४२॥
विधानमष्टसप्तत्या इति सम्यक्समीरितम् । बलिद्वयं च होमं च प्राग्वदन्यस्त्समुन्नयेत् ॥४३॥
चतुर्गुणचतुर्थांशस्व समाननियोजितः । ब्राह्मीरसवचादुग्धैः शृतं सपिस्त्रिभिर्दिनैः ॥४४॥
सयंत्रं मातृकाविद्याजप्तं त्वयुतमादरात् । दिनेशो विलिखेत्प्रातरब्दान्मूको भवेत्कविः ॥४५॥
शिवोम्बिका कुमारश्च विधिर्विष्णुस्तथा रमा । कुबेरो रविचन्द्रारज्ञगुरुसितसौरयः ॥४६॥
वारेशास्तेषु वारेषु तांस्तद्दिनजविद्यया । नामसप्ताक्षरीयुक्त्या पूजयेत्तर्पयेद्धुनेत् ॥४७॥
वर्णौषधिसमुत्थेन भस्मना मन्त्रितेन तु । मातृकान्याससहितं स्पृशेद्रक्षाकृतेन तु ॥४८॥
विशेषतो महीपानामार्तानां च विधिं चरेत् । तेन ते सुखिनो भूयुः सान्वया यावदायुषम् ॥४९॥

****

क्रूरेषु व्याधिषु प्राप्तेष्वभ्यर्च्यैवं तु मण्डले । नवकोष्ठे नव प्रोक्तान् राहुकेतु समन्वितान् ॥५०॥
मध्येन्द्रयमपाशीन्दुवह्निरक्षोनिले शिवे । कोष्ठे तांस्तैर्जपेत्सद्यो मुक्तरोगः सुखी भवेत् ॥५१॥
ग्रहार्तिषु रिपुक्लेशे दुर्भिक्षे त्रिविधे तथा । उत्पन्ने समरोद्योगे कुर्यादुक्तार्चनादिकम् ॥५२॥
सम्पूज्य तद्विदां सम्यग्दद्याद्गां स्वर्णमम्बरम् । तेन सर्वापदुन्मुक्तः सुखी जीवति भूतले ॥५३॥
ब्रूहि मे मातृकान्यासं तद्यन्त्रं परमेश्वर । कथयामि द्वयं तेऽद्य वक्ष्ये तत्पटलेऽखिलम् ॥५४॥
ह्रस्वदीर्घस्वरद्वन्द्वपुटितैः षण्ठवर्जितै । कुर्यादङ्गानि षड्वर्गैः पञ्च पञ्चदशाक्षरैः ॥५५॥
स्वरेषु मध्यतः प्रोक्ताश्चत्वारः षण्ठवर्जिताः । कराङ्गयोर्विधायेत्थमादिक्षान्ताक्षराणि वै ॥५६॥
भाले वक्त्रावृतौ नेत्रश्रोत्रनासाकपोलतः । ओष्ठदन्तशिरोजिह्वास्वकेशो विन्यसेत्स्वरान् ॥५७॥
करयोः पादयोर्मूलमध्यसन्धिष्वथाग्रतः । विन्यसेव चतुर्वर्ग पञ्चमं पार्श्वपृष्ठतः ॥५८॥
नाभौ हृदि च विन्यस्य व्यापकान् दशधातुषु । त्वगसृङ्मेदोऽस्थिमज्जा शुक्रान्तगामिषु ॥५९॥
प्राणशक्त्यात्मसु तथा न्यसेदेवं समाहितः । हृदयस्पर्शिनां तेषा स्मरन् धातुषु विन्यसेत् ॥६०॥
अथ वाहुद्वये स्कन्धयुगे च त्रिककक्षयोः । हृदयाधस्तथा पादजठरे वदने न्यसेत् ॥६१॥
वृत्तद्वयावृतं चाष्टपत्रमब्जं महीपुरम् । विधाय विलिखेन्मध्ये हंसहृद्धनशक्तिकम् ॥६२॥
कूटं स्वरान् केसरेषु वर्गान्पत्रेषु चालिखेत् । पञ्चपञ्चाक्षरोपेतान् दावाम्बु दिग्विदिक्षु च ॥६३॥
स्वरेष्वपुनरुक्तानि पञ्चान्यानि तु पञ्च वै । सव्यञ्जना व्यञ्जनत्वभेदतोभूद् द्विरन्वयः ॥६४॥
सवातागिन धरास्वेन शक्तिस्तत्पञ्चकं भवेत् । अन्यान्येकादश शिवे सन्धिमात्रादिसम्भवाः ॥६५॥
एतद्यन्त्रस्य मध्यस्थं नाम कृत्वा प्रयोजयेत् । प्रातर्मूर्ध्नि स्मरेदिन्दुबिम्बस्थं सर्वसम्पदे ॥६६॥
अभिषेकाद्धारणाच्च पूजनाल्लोहकल्पिते । स्थापनाद्गृहदेशादौ यन्त्रं सर्वार्थसिद्धिदम् ॥६७॥
एतद्यन्त्रस्य मध्यस्था देवताः सकला अपि । सन्निधिं फलदानं च साधकानां वितन्वते ॥६८॥
विद्यां तां नरो मूर्खो जडो मूकोतिपातकी । नित्यशो जपपूजाद्यैः काले मत्समतां व्रजेत् ॥६९॥
जिह्वायामक्षराण्येतान्यसकृद्भावयन् धिया । प्रविष्टो विद्वद्गोष्ठोषु पूज्यते वाग्मिभिर्जनैः ॥७०॥
मूर्ध्नोन्दुबिम्बमध्यस्थं सुधावर्षविधायिनम् । विभावयन्नियति मनुं जपेदेकाग्रमानसः ॥७१॥
मण्डलात्कवितासिद्धि सर्वभाषामयी भवेत् । वादादिषु तु सर्वत्र देवतात्मा जयी भवेत् ॥७२॥
यन्त्राणि नित्याविद्यायाः समान्येकात्मयोगतः । तेनात्मनोक्तानि शिवे सर्वसिद्धिकराणि वै ॥७३॥
षोडशस्वपि विद्यासु यन्त्रादन्यत्समीरितम् । प्रयोगजातमन्योन्यं विदध्यादैक्ययोगतः ॥७४॥
वृत्तयुग्मं षडस्त्रं च कृत्वा मध्याद्यमध्यतः । नामालिख्य बहिः षट्सु तत्त्रयं स्वेन मायया ॥७५॥
विलिख्य मातृकां वृत्ते कृत्वा तद्धारणान्मुखे । जिह्वायां भावनात्सर्वगोष्ठीष्वग्रं विगाहते ॥७६॥

॥ कुलसुन्दरी प्रयोग:॥

सारांश- साधक दिव्य सुंगधित वस्त्राभूषण धारण कर, सुप्रसन्न होकर अर्चा करें।

श्लोक ८ से ३५ तक कामेश्वरी के मंत्र भेद दिये गये है।

१. **संकेत विद्या - ऐ ई औ।**

२. **ऐं क्लीं औ:, ऐं क्लीं सौ: ह्सैं ह्स्क्लीं ह्सौ:।**

इस विद्या के ३-३ अक्षर का एक-एक कूट है। प्रत्येक कूट के साथ ''**ऐं क्लीं औ: कं, ऐं क्लीं सौ: कं, ह्सैं ह्स्क्लीं ह्सौ: कं**'' इस तरह से ३५ व्यंजन **कं खं** ....हं लं क्षं के संयोग से ३५ मंत्र बनते है।

३. **विजया महाविद्या - ऐं क्लीं औ:, ऐं क्लीं सौ: हैं ह्क्लीं ह्सौ:।**

४. **विश्व चिन्मयी - ऐं क्लीं औ:, ऐं क्लीं सौ: ह्सैं ह्सौ:।**

प्रत्येक कूट को **ह्रीं** से पुटित करने पर **विश्वमोहिनी** मन्त्र होता है।

५. **उन्मयी विद्या - ह्रीं हंस: हंसौ: (तृतीय कूट)**

६. **अमृत विद्या - ह्रीं ब्लें ह्रीं (तृतीय कूट)**

७. इसी तरह पंचवाणेशी मंत्र **(द्रां द्रीं क्लीं ब्लूं स:)**, तथा मोहिनी क्षोभिणी, क्लेदिनी के प्रत्येक वर्ण को **ह्रीं** से पुटित करने पर अलग कई कूट बनेगें। जैसे ''**ह्रीं द्रां ह्रीं**''। इनको विजया मंत्र में तीसरे कूट की जगह प्रयुक्त करने से कई तरह के सुन्दरी मंत्र बनेगें।

८. **सम्पत्करी विद्या - कलआई, अ ऐं ह्सौ:।**

श्लोक ३७-३९ भगवती का ध्यान दिया गया है

॥ यंत्र रचना ॥

त्रिकोण, अष्टदल, षोड्शदल बनाकर बाहर भूपुर बनायें। त्रिकोण मध्य में ''**हं लं क्षं**'' वर्ण लिखें। अष्टदल में **ब्राह्मी, वैष्णवी, कौमारी, नारसिंही, वैष्णवी, माहेश्वरी,** वाराही, **चामुण्डा** व **महालक्ष्मी** का पूजन करें।

षोड्शदल में ४८ मातृका वर्ण ''**अं आं.......... शं षं सं**'' तक लिखें प्रत्येक दल में ३-३ वर्ण लिखें।

बाहर चतुरस्त्र में इन्द्रादि लोकपालो का पूजन करें। इस यंत्र को धारण करने से मूक व्यक्ति भी कवि हो जाता हैं।

९. **सप्ताक्षरी विद्या - कलआई, अ ऐं ह्सौ:।**

सप्तवार की देवियां - रवि - शिवा। सोम - अम्बिका। मंगल - कौमारी। बुध - ब्रह्माणी। गुरु - वैष्णवी। शुक्र - लक्ष्मी। शनि - कूबेरी।

प्रत्येक वार के दिन उस दिन की देवी का पूजन तर्पण करें। रोग शांति हेतु ९ कोष्ठक यंत्र बनाये उनमें राहु, केतु सहित नवग्रह पूजन करें। मध्य में सूर्य पूजन करें. पश्चात् पूर्वादि क्रम से इन्द्र, अग्नि, यम, राक्षस, वरुण, वायु, सोम व शिव का पूजन करे।

हृदयादिन्यास:- अं आं, इं ईं, उं ऊं, एं ऐं, ओं औं, अं अ:, से न्यास करें।

भाले, वक्त्रे, नेत्रे, श्रोत्रे, न्यास मातृकान्यासवत् करें (श्लोक ५७-६१)। शेष अन्य प्रयोग श्लोक (६५-७६) के अनुसार करे।

॥ इति कुलसुन्दरीनित्या प्रयोग विधिः॥

॥ १०. अथ नित्यासुंदरी (भैरवी) नित्या प्रयोगः॥

मंत्र – हसकलरडैं हसकलरडीं हसकलरडौः।

ऋषिन्यास – शिरसि दक्षिणामूर्ति ऋषये नमः। मुखे पंक्ति छंदसे नमः। हृदि नित्यादेवतायै नमः। गुह्ये ऐं बीजाय नमः। पादयोः ॐ शक्तये नमः। नाभौ ईं कीलकाय नमः। ममाभीष्टसिद्धये विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास – ह्सां हृदयाय नमः। ह्सीं शिरसे स्वाहा। ह्सूं शिखायै वषट्। ह्सैं कवचाय हुं। ह्सौं नेत्रत्रयाय वौषट्। ह्सः अस्त्राय फट्।

वर्णन्यास – **भ्रूमध्ये हं नमः। कंठे सं नमः। हृदि कं नमः। नाभौ लं नमः। गुह्ये रं नमः। मूलाधारे डं नमः।** मूल मंत्र से व्यापक न्यास करे।

॥ ध्यानम् ॥

उद्यद्भास्करबिम्बाभां माणिक्य मुकुटोज्ज्वलाम् । पद्मरागकृता कल्पामरुणांशुक धारिणीम् ॥
चारुस्मित लसद्वक्त्रषट् सरोजविराजिताम् । प्रतिवक्त्रं निनयनां भुजैर्द्वादशभिर्यताम् ॥
पाशाक्षगुण पुण्ड्रेक्षुचाप खेटत्रिशूलकान् । वरं वामैर्दधानां चाप्यंकुश पुस्तकं तथा ॥
पुष्पेषु मण्डलाग्रं च कपालमभयं तथा । दधानां दक्षिणैर्हस्तेर्ध्यायेद् देवीमनन्यधीः ॥

॥ यंत्रपूजनम्॥

षट्कोण बनाये उसके अंदर वृत्त बनाये। षट्कोण के बाहर षोडशदल, ३६ दल पद्म, ३२ दल पद्म पश्चात् अष्टादशदल पद्म उनके बाहर दो रेखा वाला चारद्वार युक्त भूपुर बनाये। अरुणादि नवपीठशक्तियों (या भुवनेश्वरी पीठशक्तियों) का अर्चन कर ध्यान पूर्वक देवता का आवाहन करे।

प्रथमावरणम् – (देवी समीपे षट्कोणे) **ह्सां हृदयाय नमः हृदय शक्ति पा.। ह्सीं शिरसे स्वाहा शिरशक्ति पा.। ह्सूं शिखायै वषट्। ह्सैं कवचाय हुं कवचः पा.। ह्सौं नेत्रत्रयाय वौषट् नेत्रशक्ति पा.। ह्सः अस्त्राय फट् अस्त्र शक्ति पा.।** वृत्त में दिव्यौघ, सिद्धौघ, मानवौघ गुरु पंक्ति का पूजन करे।

द्वितीयावरणम् – (षट्कोणे) **निर्ऋति कोणे डाकिनी पा.। वायव्ये राकिनी पा.। पूर्वकोणे लाकिनी पा.। आग्नेये काकिनी पा.। ईशाने शाकिनी पा.। पश्चिम कोणे हाकिनी पा.।**

तृतीयावरणम् – (षोडशदले)-**अ शक्ति पा.। आं शक्ति पा.। ....अं शक्ति पा.। अः शक्ति पा.। इस तरह १६ स्वर शक्तियों का पूजन करे।**

चतुर्थावरणम् – (३६ या ३५ दलेषु) **कं खं ....लं क्षं** इत्यादि वर्ण शक्तियों का पूजन करे। यथा क शक्ति पा.।

पंचमावरणम् – (३२ दल पद्मे) **अ** से **त** पर्यन्त ३२ वर्ण शक्तियों का पूजन करे।

षष्टामावरणम् – (अष्टादशदलेषु) **थ** से **ह** पर्यन्त एवं **क्ष** वर्ण शक्तियों का पूजन करे। इस पूजन प्रयोग में वर्ण शक्तियों के पूजन का उत्तम मध्यम कनिष्ठ तीन तरह के पक्ष है।

॥ श्री नित्या यन्त्रम् ॥

अन्य पक्ष –

(१) षट्कोण के बाहर षोडशदल में १६ स्वर शक्तियों का पूजन करे

(२) षोडशदल के ऊपर द्वादशदल पद्म बनाये उनमें अनाहत चक्र की **क** से **ठ** पर्यन्त **१२ शक्तियों का पूजन** करे।

(३) द्वादशदल के ऊपर दशदल बनाये उनमें **मणिपूर चक्र** की **ड** से **फ** पर्यन्त **१० शक्तियों का** पूजन करे।

(४) दशदल के बाहर षड्दल बनाये– उसमें **ब** से **ल** पर्यन्त **स्वाधिष्ठान चक्र की शक्तियों का पूजन** करे।

(५) षड्दल के बाहर चतुर्दल में **मूलधार चक्र** की **व.स.ष.ह** शक्तियों का पूजन करे।

(६) चतुर्दल के बाहर द्विदल बनाये उनमें **आज्ञा चक्र** की **लं क्षं वर्ण शक्तियों** का पूजन करे।

(७) उसके बाद भूपुर की पूजा पद्धति सभी पक्षों में समान हैं।

सप्तमावरणम् – (भूपुरे)-इन्द्रादि दशदिक्पालों का एवं उनके आयुधों का पूजन करे। आठ दिशाओं में उनकी अष्टशक्तियों की पूजा करे। पश्चात् वायव्य से निर्ऋति पर्यन्त चारों कोणों में – **अनंतशक्ति पा.। ब्रह्मशक्ति पा.। नियति शक्ति पा.। कालशक्ति पा.।**

अष्टमावरणम् – षट्कोण के ऊपर १२ स्थानों की कल्पना कर पूजन करे। **अभय शक्ति पा.। कपाल शक्ति पा.। खड्ग शक्ति पा.। इषु शक्ति पा.। पुस्तक शक्ति पा.। अंकुशशक्ति पा.। पाश शक्ति पा.। अक्षगुणशक्ति पा.। इक्षुशक्ति पा.। खेटकशक्ति पा.। त्रिशूल शक्ति पा.। वरशक्ति पा.।** पश्चात् धूप दीप नैवेद्यादि से पूजा अर्चन करे।

गायत्री मन्त्र – नित्याभैरव्यै विद्महे नित्यानित्यायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार नित्या नित्याप्रयोग विधिः॥

(श्रीतंत्रराजे)

विदध्यात्साधनं प्राग्वद्वर्णलक्षं पयोव्रतः । त्रिस्वादुसिक्तैररुणैरम्बुजैर्हवनं तथा ॥१॥
जपतर्पणं होमार्चासेकसिद्धमनुर्नरः । कुर्यादुक्तान् प्रयोगांश्च नचेत् तद्धातु देवताः ॥२॥
प्राणांस्तस्य ग्रसन्त्येव कुपितास्तत्क्षणं शिवे । अनया विद्यया लोके यन्न साध्यं न तत्क्वचित् ॥३॥

विद्याक्षराणि सप्त स्युस्तैः प्राग्वत्स्वरसंयुतैः । शतं द्वादश संयुक्तं तैर्यन्त्राणि वदामि ते ॥४॥
वृत्तद्वयान्तः षट्कोणं तदन्तर्वृत्तयुग्मकम् । विधाय मध्ये मायास्थमेकक्षरमाख्यया ॥५॥
बहिः षडालिखेत् षट्सु वृत्तयोर्भूतमातृकाम् । कृत्वान्तर्बहिरेवं स्युः क्रमाद्यन्त्राणि षोडश ॥६॥

इति अस्यार्थ :- अस्या अनावृत्ताक्षराणि सप्त हसकलरडअ इति। ते षोडशस्वरयुक्ता द्वादशोत्तर शतं वर्णा ११२ भवन्ति। प्रथमोत्तर वृत्तद्वयं कृत्वा तद्वहिः षट्कोणं तद्वहिर्वृत्तद्वयं विधाय मध्ये साध्यनामगर्भमाया बीजे एकमक्षरं विलिख्यं, तद्वहिर्वृत्तद्वयान्तराले कर्मानुसारीणि तत्तद्भूताक्षराणि प्राग्वद्विलिख्य, तद्वहिः षट्सुकोणेषु षडक्षराणि विलिख्य तद्वहिर्वृत्तद्वयान्तराले मातृकाक्षरैर्वेष्टयेत्। एवं षोडश यन्त्राणि भवन्ति। फलान्याह -

प्रथमेन घृतेन स्यादौदरव्याधिसंहति । द्वितीयेन शिरोरोगाः नश्यन्ति परमेश्वरि ॥७॥
तृतीयेनाक्षिरुक्शान्तिः श्रोत्रजानां परेण तु । पञ्चमेन भुजारोगाः प्रयान्त्यूर्ध्वेन पादजाः ॥८॥
सप्तमेनान्तराधिस्था धृतेन निधनाश्रयाः । धृतेनाष्टमयन्त्रेण ज्ञानेन्द्रियगता गदाः ॥९॥
परेण कर्मेन्द्रियगा दशमेनानिलोद्भवाः । एकादशेन पित्तोत्था द्वादशेन कफोद्भवा ॥१०
त्रयोदशेन दोषाणां सन्निपातसमुद्भवाः । प्रयान्ति विलयं सद्यो यन्त्राणां शक्तिवैभवात् ॥११॥
चतुर्दशेन यन्त्रेण भूतप्रेतपिशाचकाः । प्रयान्ति भीताः क्षणतः सर्वेऽन्येपि ग्रहाः शिवे ॥१२॥
तत्पेरण महोरोगाः धृतेनाष्टौ न बाधकाः । षोडशेन धृतेन स्यादायुरारोग्यमीश्वरि ॥१३॥
यन्त्राणि षोडशैतानि धारयेच्चाधिशान्तये । सर्वेषां प्राणिनां सम्यगनुक्तेषु गदेष्वपि ॥१४॥
सर्वत्र यन्त्रधरणं साभिषेकं सदक्षिणम् । सवन्दनं सविश्वासं फलत्येवान्यथान्यथा ॥१५॥
कुर्विहीना तु सा विद्या पञ्चकूटाभिधा शिवे । वाक्सिद्धिमन्यत्सकलं कुरुते त्वभिदान्ययोः ॥१६॥
तद्विद्या कूटभेदाः स्युर्विंशत्या शतसप्तकम् । तैर्वज्रयन्त्रनिर्माणं फलानि च शृणु प्रिये ॥१७॥
प्राक्प्रत्यग्दक्षिणोद्क च सूत्राण्यष्टादश क्षिपेत् । तैस्तु कोष्ठानि जायन्ते नवाशीतिशतद्वयम् ॥१८॥
प्राग्वत्तत्कोणकोष्ठानि षट्त्रिंशन्मार्जयेत्क्रमात् । मध्ये वज्रं यथा भूयात्तथा कुर्यात्समन्ततः ॥१९॥
सपञ्चत्वारिंशच्च शतकोष्ठैस्तु वज्रकम् । त्र्यस्त्राणि चत्वार्यग्राणि चतुष्कोष्ठैस्तु पूर्ववत् ॥२०॥
विधाय मस्य मध्याधः कोष्ठमारभ्य संलिखेत् । प्रादक्षिण्य प्रवेशेन कूटांस्तस्याद्यखण्डजान् ॥२१॥
मध्येऽवशिष्टनवके वामदक्षत्रयद्वये । प्रतिलोमानुलोमात्म विद्याद्वयमथालिखेत् ॥२२॥
शिष्टेषु त्रिषु कोणेषु साधकाख्या तदूर्ध्वगे । कर्ममध्येऽधरे साध्यमालिखेदपि सर्वतः ॥२३॥
चतुस्त्रिकोणमध्यस्थं द्विरेखाभिर्नवीकृतम् । मध्यवद्विलिखेत् तेषु वज्रयन्त्रमितीरितम् ॥२४॥
एवमन्यै पञ्चभिश्च खण्डै पञ्च प्रकल्पयेत् । इति षड्वज्रयन्त्राणि प्रोक्तानि क्रमत शिवे ॥२५॥

॥ अथैतद्यन्त्ररचना प्रकार॥

तत्रप्राक्प्रत्यगायता दक्षिणोत्तरायताश्चाष्टादशाष्टादश रेखा विलिख्य, समान्तरालानि नवाशीत्युत्तरशतद्वय

(२८९) कोष्ठानि कृत्वा, चतुर्दिक्षु षट्त्रिंशत् षट्त्रिंशत्कोष्ठानि गुरूक्तयुक्तया मार्जयित्वा पञ्चत्वारिंशदुत्तरशत (१४५) कोष्ठात्मकं वज्राकारं निष्पाद्य, चतुर्दिक्षु कोष्ठचतुष्टयं कोष्ठ चतुष्टयं मार्जयित्वा त्रिकोणानि विधायावशिष्टेष्वेकोनत्रिंशदुत्तरशत (१२९) कोष्ठेषु मध्याधः कोष्ठमारभ्यद्यकूटखण्डान् विंशत्युत्तरशत (१२०) भेदान् विख्यि, मध्ये वशिष्टनवकोष्ठेषु वामपार्श्वस्त्रिषु कोष्ठेषु प्रतिलोमविद्यां त्रिधा विलिख्य दक्षपार्श्वस्थकोष्ठत्रयं तथैवानुलोमविद्यां विलिख्य, मध्यस्थ कोष्ठत्रये ऊर्ध्वकोष्ठे साधकनाम तदधः कोष्ठे कर्म तदधः कोष्ठे साध्यनाम् चतुर्दिक्षु चतुस्त्रिकोणेषु द्विद्विरेखायोगेन नव नव त्रिकोणानि विलिख्य तेषु तेषु मध्यनवकोष्ठवद्विलिखेत्। एवं षट्कूटखण्डजै षड्वज्रयन्त्राणि भवन्तीत्यर्थं॥ तथा-

लोहत्रयकृते पट्टे शिलायां वा चतुर्षु वा । पट्टे वा फलकायां वा षट्कं षट्सु प्रकल्पयेत् ॥२६॥

फलकापट्टयोः पूजां कुर्यान्नित्यश एव तु । इतराणि तु संस्थाप्य यजेत्तत्रैव तां शिवाम् ॥२७॥

तत्स्थापन प्रदेशे तु विदध्यान्मण्डपं शुभम् । नवहस्तायामततं पताकातोरणान्वितम् ॥२८॥

फलपुष्पवितानाद्यैरुपेतं परिकल्पयेत् । उत्सेधायामविस्तारहस्तां वेदीं च मध्यतः ॥२९॥

एकं चेत्षट्कमथ चेत्कुर्याद्विद्यादिकं तथा । ईशप्राग्वह्निरक्षोम्बुवाय्वादीनां यथाक्रमम् ॥३०॥

प्रथमं राक्षसे त्वन्यान्यन्येषूक्त क्रमेण वै । निवेश्य गन्धपुष्पाद्यैर्नृत्यगीतादिभिस्तथा ॥३१॥

समाराध्यैवमेवं तु त्रिदिनं प्रोक्तशक्तिभिः । हुत्वा जपित्वा जीवोच्चे भानूच्चे वा स्थिरोदये ॥३२॥

स्ववामगे भूम्युदये संस्थाप्य परमेश्वरि । देव्यात्मा तच्छिलाभिस्तु दृढमाबध्य तत्र वै ॥३३॥

देवीं षड्भिर्वृत्तां ताभिर्डाकिन्यादिभिरम्बिके । मूर्तिसप्तकमुत्पाद्य प्रतिष्ठाप्य समर्चयेत् ॥३४॥

नित्यशस्तत्परो विद्याभजनं वापि कारयेत् । यत्र तत्र गदालक्ष्मीरिपुग्रहपिशाचकाः ॥३५॥

दुर्भिक्षक्षुद्रकर्मोत्थपीडाः कृत्याः परेरिताः । न कदाचित्सम्भवन्ति विद्यायन्त्रानुभावतः ॥३६॥

मङ्गलान्येव जायन्ते सर्वेषां सर्वतः सदा । धार्मिकाश्चैव राजानः पूर्णसप्ताङ्गसंयुता ॥३७॥

फलकापट्टयोः क्लृप्तपूजातो निजमन्दिरे। वाञ्छितं समवाप्नोति मण्डलान्मासतोपि वा ॥३८॥

आसां देहस्थितिं वक्ष्ये शृणु सर्वार्थदायिनीम् । सुषुम्नामध्यसंस्थेषु षडाधाराम्बुजेषु ताः ॥३९॥

तिष्ठन्ति प्राणिनां देव्यः सिद्ध्यन्ति ज्ञानपूजिताः । बहिश्च मण्डले पूजां निग्रहानुग्रहात्मिकाम् ४०॥

विशुद्धाख्ये कण्ठदेशे षोडशस्वरपत्रके । धूम्रवर्णाम्बुजे देवीं डाकिनीं तत्समाकृतिम् ॥४१॥

शक्तिभिः स्वररूपाभिरावृतां तत्र पूजयेत् । तथा सर्वज्ञतासिद्धिर्भवत्येव न संशयः ॥४२॥

अनाहताख्ये हृद्देशे सिन्दूरारुणपङ्कजे । राकिणीं द्वादशदले कादिठान्ताक्षरात्मभिः ॥४३॥

शक्तिभिः पूजयेन्नित्यं कीर्त्यायुः श्रीधनाप्तये । मणिपूरकसंज्ञे च नाभिस्थे दशपत्रके ॥४४॥

इन्द्रनीलनिभे डादिदशवर्णात्मशक्तिके । लाकिनीं पूजयेद्देवीं विजय श्रीसमृद्धये ॥४५॥

ध्वजमूले समस्तापत्तारणायेष्ट सिद्धये । वादिषड्वर्णशक्तिभिरावृतां काकिनीं यजेत् ॥४६॥

स्वाधिष्ठानाह्वये पद्मे बालार्कत्विषि षड्दले । आधाराख्ये चतुष्पत्रे सुवर्णाभे सरोरुहे ॥४७॥

वादिसान्तार्ण शक्तीभिरावृतां शाकिनीं यजेत् । पायुध्वजान्तरा त्र्यस्त्रमध्ये तेजः समन्वितााम् ॥४८॥

आज्ञाख्येब्जे भ्रुवोर्मध्ये द्विदले शुद्धविग्रहे । सेवितां हक्षशक्तिभ्यां हाकिनीं पूजयेत्तथा ॥४९॥

त्रिकालज्ञानतः सर्वचित्ताकर्षणकारिणी । विश्वसृष्टिस्थिति ध्वंसशक्तिदामप्ययत्नतः ॥५०॥

उक्तक्रमविपर्यासो निग्रहोऽन्तर्बहिस्तथा । पूजनं सर्वदुःखार्तिशमनं सम्पदास्पदम् ॥५१॥

भूमौ विधाय षट्कोणसप्तकं प्रोक्तदिक्क्रमात् । मध्ये च तत्र तां नित्यानित्यां गंधादिभिर्यजेत् ॥५२॥

अभितस्तु षडस्त्रेषु तत्षट्कं तत्क्रमाद्यजेत् । बाह्येष्वपि च ताः प्राग्वत्प्रोक्तवर्णाः समर्चयेत् ॥५३॥

तासां षण्णामपि तथा षट्सु कोणेषु शक्तयः । षट्त्रिंशत् ताः समा देव्याः सर्वा रूपायुधादिभिः ॥५४॥

प्राग्वत्स्वरेण पञ्च स्युरपूर्वाः कादिमान्तिकाः । परेषु यवलक्षार्ण रहितैस्तैस्तथार्चयेत् ॥५५॥

तेषामपि च चक्राणां शक्तिनां च विलोमतः । पूजा निग्रहसंज्ञा स्यात्सा शत्रूणां विपत्तये ॥५६॥

षट्चक्रेषु च षट्कुम्भान्निधायारि महीरुहाम् । क्वाथतोयाभि सम्पूर्णान् कृष्णाम्बर समन्वितात् ॥५७॥

अर्धरात्रे यजेत्तास्तु तद्योनिबलिदानतः । क्षिप्रं त्वगादिभिस्ते स्युः पूर्णाः शत्रो कलेवराः ॥५८॥

निवेद्यं योनिरक्तेन सम्पन्नं चरुणा रिपोः । होमं च कुर्यात्तेनैव फणिशीर्षस्त्रुचा रुषा ॥५९॥

ध्यायेद्देवीश्च कुपिता दष्टौष्ठा बाहुभिर्निजै । प्रहरन्तीः पिशाचैभ्यां विकिरन्तीश्च तत्तनुम् ॥६०॥

जपागुलुच्छविकसत्कण्ठा भीमार्तनिःस्वना । ध्यात्वैवं निग्रहं कुर्याद्रिपूणां मारणाय वै ॥६१॥

चक्रं च निग्रहे प्रोक्तं वज्ररूपं भयङ्करम् । कांस्ये सीसेऽपि वा कृत्वा स्थापयेद्वैरिभूमिषु ॥६२॥

प्राक्प्रत्यग्दक्षिणोदक् च दशसूत्रनिपातनात् । एकाशीतिपदानि स्युस्तेषु कोणचतुष्टये ॥६३॥

प्रत्येकं दशकोष्ठानि मार्जयेच्छिष्टवज्रकैः । चतुर्दिक्षु त्रिकोणानि चतुष्कोष्ठैः प्रकल्पयेत् ॥६४॥

तेषु मध्यस्थ कोष्ठे च साध्यं कर्म समालिखेत् । शिष्टेषु मध्याधः कोष्ठमारभ्य प्रतिलोमजान् ॥६५॥

विद्यसकूटांस्तु षट्त्रिंशदालिखेद प्रदक्षिणम् । साध्ययोन्यसृजा पिष्टंतद्वृक्षक्षोद लेपितम् ॥६६॥

स्थापयेत्प्रोक्तसमये रिपुक्षेत्रगृहादिके । श्मशाने चण्डिकागेहे कुलोत्सादरं भवेत् ॥६७॥

इति निग्रहमाख्यातं समस्तरिपुमर्दनम् । अनुग्रहं शृणु प्राज्ञे पूजाचक्रविधानतः ॥६८॥

देवीस्ताः प्रोक्तरूपास्तु ध्यात्वा चक्रेषु पूजयेत् । नैवेद्यमासां सम्प्रोक्तं यदासां प्रीतिदायकम् ॥६९॥

पायसान्नं गुडान्नं च मुद्गभिन्नान्नकं तथा । हरिद्रान्नं तिलान्नं च शुद्धान्नं षट्कमेव च ॥७०॥

चक्रेषु सप्तसु तथा तद्वर्णाश्चारुविग्रहाः । युवतीसप्तकं स्थाप्य प्राग्वदभ्यर्च्य ताः क्रमात् ॥७१॥

भूषणाम्बर गन्धासृग्भोजनाद्यैस्तु तोषयेत् । तुष्टासु तासु तुष्टाः स्युः शक्तयस्ताः समास्तदा ॥७२॥

प्रागुक्तवज्र साध्याख्यां तथालिख्यानुलोमजान् । कूटानुक्त समारम्भान् प्रादिक्षण्येन संलिखेत् ॥७३॥

प्रोक्तेषु प्रोक्तरूपेण स्थापयेत्प्रोक्तभूमिषु । प्रोक्तान्येव फलानि स्युर्योगाऽयं लघुविग्रहः ॥७४॥

आदिक्षान्ताक्षरैः प्राग्वद्रूपिणी शक्ति संयुतैः । बीजद्वयाद्यैः सप्ताक्षर्यन्तैः पञ्चदशाक्षरैः ॥७५॥

पञ्चाशच्छक्तयः पूज्याः पञ्चाशत्क्षेत्रपालकैः । सप्ताक्षर्या च संयुक्ता मन्त्राः पञ्चदशाक्षराः ॥७६॥
चतुः षष्टिपदे मध्य चतुष्के दिनविद्यया । दिनेषु घटिका योगात् पञ्चाशन् मिथुनान्यपि ॥७७॥
तेषां बीजद्वयं वर्णरूपक्षेत्रेश संयुताः । मनीषितं समालेख्य तेषु तन्मिथुनानि वै ॥७८॥
घटिका क्रमयोगेन हृन्मायामध्यगेर्चयेत् । एवं मण्डलमासार्धात् प्राप्नोत्येवाभिवाञ्छितम् ॥७९॥
नित्यशस्तां समावाह्य तस्मिंश्चक्रे समर्चनात् । समस्तवाछिंतप्राप्तिः सदा भवति सर्वतः ॥८०॥

॥ नित्या प्रयोगः॥

सारांश - अनावृत्त मंत्र वर्णाक्षर - **ह स क ल र ड अ** इस मंत्र से २ प्रकार के यंत्र बनेगें। प्रथम विधि में ७ यंत्र दूसरी विधि में १६ यंत्र बनाये।

॥ यंत्र रचना॥

१. दो वृत्त बनायें, उनके बाहर षट्कोण बनायें पश्चात् पुनः दो वृत्त बनायें। मध्य में अनावृत्त वर्ण मन्त्र का प्रथम अक्षर शेष वर्ण षट्कोण में लिखे। उनके बाहर वृत्त में **अं आं ....अं अः** १६ स्वर लिखे।

   अन्य यंत्र हेतु मध्य में दूसरा वर्ण शेष षट्कोण में इस तरण ७ अनावृत वर्णो से ७ यंत्र बनेगें। १६ स्वरों के योग से १६×७ = ११२ स्वर वर्ण होगें।

२. पूर्व विधि से यंत्र बनाये। मध्य में साध्य नाम प्रथम वर्ण के साथ लिखे। शेष वर्ण षट्कोण में लिखे। इस तरह १६ यंत्र बनाये। एक यंत्र में **अं आं.......अं अः** इत्यादि का एक- एक स्वर एक-एक यंत्र के वृत्तों में लिखे तो १६ स्वरों के द्वारा १६ यंत्र अलग-अलग होगें। फलश्रुति श्लोक ७ से १५।

३. १८-१८ रेखा पूर्व-पश्चिम व दक्षिण-उत्तर खींचने से १७×१७ =२८९ कोष्ठक बनेगें। चारो दिशाओं में ३६-३६ कोष्ठक छाडने से शेष १४५ रहेगें। उनमें फिर प्रत्येक दिशा में ४-४ कोष्ठकछोडने से १२९ कोष्ठक रहेगें। मध्य में ९ कोष्ठक त्रिकोणाकार चुनें। वामपार्श के ३ खण्डो में अनावृत्त मंत्र लिखे। दक्षिण पार्श्व में विलोम **''अ ड र ल क स ह''** मंत्र लिखे। ऊपर के ३ कोष्ठक में साधक का नाम लिखे। नीचे के ३ कोष्ठक में साध्य का नाम लिखे। इसी तरह चारों कोणों में ४-४ कोष्ठक में मंत्र लिखकर यंत्र बनायें।

इस देवी का यंत्र, पाषाण शिला, लकड़ी के पट्टे या त्रिलोह में बनायें (श्लोक २६-३८)। इसके बाद ४५-५० मूलाधारादि चक्रों में देवी के स्वरूप का वर्णन है पश्चात् प्रयोग विधि व फलश्रुति है।

॥ इति नित्यानित्या प्रयोग विधिः ॥

॥ ११. अथ नीलपताका नित्या प्रयोगः॥

राजस्थान में इस सिद्ध विद्या के उपासक चिड़ावा (जिला झुनझुनु) में पं. गणेशदत्त जी शास्त्री हुये थे जिनके आशीर्वाद से बिड़ला परिवार की अच्छी उन्नति हुई। वे षट्शास्त्रों के परम विद्वान थे। ज्योतिष एवं कर्मकाण्ड के भी ज्ञाता थे। एक बार उनका कोई अनुष्ठान सफल नहीं हुआ तो उन्होने बाद में वैराग्य ग्रहण कर लिया। आप नीलवस्त्र पहनते थे और मिट्टी की एक ही हांडी रखते थे।

मंत्र – १. ह्रीं नीलपताके स्वाहा।

२. ह्रीं फ्रें स्त्रूं ओं आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फ्रें ह्रीं।

विनियोग – अस्य मंत्रस्य संमोहन ऋषिः गायत्री छंदः, नीलपताका नित्या देवता, ह्रीं बीजं, ह्रीं शक्तिः क्लीं कीलकं ममाभीष्ट सिद्धये विनियोगः। पूर्ववत् विधि से ऋषि न्यास करे।

षडङ्गन्यास – ह्रीं फ्रें हृदयाय नमः। स्रूं ओं आं क्लीं शिरसे स्वाहा। ऐं ब्लूं नित्यमद शिखायै वषट्। द्र कवचाय हुं। वे नेत्रत्रयाय वौषट्। हुं अस्त्रायफट्।

वर्णन्यास – दक्षकर्णे ह्रीं नमः। वामकर्णे फ्रें नमः। दक्षनेत्रे स्त्रूं नमः। वामे ओं नमः। दक्षनसि आं नमः। वामनसि क्लीं नमः। मुखे ऐं नमः। कण्ठे ब्लूं नमः। हृदि निं नमः। नाभौ त्यं नमः। **मूलाधारे मं नमः। दक्षोरुमूले-दं नमः। दक्ष जानुनि द्रं नमः। गुल्फसंधौ वें नमः। वामोरुमूले हुं नमः। जानुनि फ्रें नमः। गुल्फसंधौ ह्रीं नमः।** मूलमंत्र से व्यापक न्यास करे।

॥ ध्यानम् ॥

इन्द्रनीलनिभां भास्वन्मणिमौलि विराजिताम्। पञ्चवक्त्रां त्रिनयनामरुणांशुक धारिणीम् ॥
दशहस्तां लसन्मुक्ताप्रायाभरण भूषिताम्। रत्नस्तवकसंभिन्नदेहां चारुस्मिताननाम् ॥
पाशं पताकां चर्मापि शार्ङ्गं चापं वरं करैः। दधानां वाम पार्श्वस्थैः सर्वाभरणभूषितैः ॥
अंकुशं च ततः शक्तिं खड्गं वाणं तथाभयम्। दधानां दक्षिणेर्हस्तैरासीनां पद्मविष्टरे ॥
स्वाकारवर्णवेषास्य पाण्यायुध विभूषणैः। शक्तिवृन्दैर्वृतां ध्यायेद् देवीं नित्यार्चन क्रमे ॥

॥ यंत्र पूजनम् ॥

दो रेखावाला चार द्वार युक्त भूपुर बनाये। उसके अंदर दो वृत्त बनाये उसके अंदर अष्टदल के भीतर षट्कोण बनाये। षट्कोण के मूल में त्रिकोण बनाये। सर्वप्रथम **भुवनेश्वरी की नवपीठ शक्तियों** का पूजन पूर्ववत् करे। नीलपताका का आवाहन करे।

प्रथमावरणम् – त्रिकोण के मध्य में षट् दिशाओं की कल्पना कर षडङ्गन्यास मंत्रों से, **हृदयशक्ति, शिरशक्ति, शिखाशक्ति, कवचशक्ति, नेत्रशक्ति एवं अस्त्र शक्ति** का पूजन करे। तदन्तर दिव्यौघ, सिद्धौघ, मानवौघ गुरुपंक्ति का पूजन करे। इसके बाद की आवरण पूजा में प्रत्येक नामावलि के पहले **ह्रीं श्रीं** प्रयुक्त करें।

॥ श्री नीलपताका यन्त्रम् ॥

द्वितीयावरणम् – त्रिकोण षट्कोण के अभ्यन्तर देवी के दक्षिण एवं वाम भाग में ५-५ अस्त्रों की पूजा करे। **अभयाय नमः। वाणाय नमः। खड्गाय नमः। शक्तये नमः। अंकुशाय नमः। पाशाय नमः। पताकायै नमः। चर्मणे नमः। शार्ङ्गचापाय नमः। वराय नमः।**

तृतीयावरणम् – (त्रिकोणे) अग्रकोण से क्रमशः **ह्रीं श्रीं**

इच्छाशक्तये पा.। ज्ञानशक्ति पा.। क्रियाशक्ति पा.।

चतुर्थावरणम् – (षट्कोणे) देवी के अग्र से प्रदक्षिणा क्रम से **हाकिनी पा.। शाकिनी पा.। काकिनी पा.। लाकिनी पा.। राकिनी पा.। डाकिनी पा.।**

पंचमावरणम् – (अष्टदले) **ब्राह्मी, वैष्णवी, कौमारी, वाराही, नारसिंही, इन्द्राणी, चामुण्डा, महालक्ष्मी** का पूजन करे।

षष्टमावरणम् – (अष्टदलाग्रे) **ह्रीं श्रीं सुमुखी पा.। सुन्दरी पा.। सारा पा.। सुमना. पा.। सरस्वती पा.। समया पा.। सर्वगा पा.। सिद्धा पा.।**

सप्तमावरणम् – (भूपुरे) देवी के अग्र से दश दिशाओं में क्रमश पूजन करे **विह्वला पा.। आकर्षिणी पा.। लोला पा.। नित्या पा.। मदना पा.। मालिनी पा.। विनोदा पा.। कौतुका पा.। पुण्या पा.। पुराणा पा.।**

अष्टमावरणम् – (भूपुरे) अग्निकोण से ईशान पर्यन्त इन्द्रादि दिक्पालों व उनकी अष्टशक्तियों का अर्चन करे। पश्चात् चारो कोणों में आग्नेये **अनंत शक्ति पा.।** निर्ऋति **ब्रह्मशक्तये** पा.। वायवे **नियतिशक्ति पा.।** ईशाने **कालशक्ति पा.।** पश्चात् लोकपालों के वज्रादि आयुधों का पूजन करे। देवी का सर्वोपचार पूजन कर बलिप्रदान करे।

गायत्री मन्त्र – नीलपताकायै विद्महे महानित्यायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार नीलपताका नित्या प्रयोग विधि ॥

(श्रीतन्त्रराजे)

सर्वत्र नित्यहोमं तु कुर्यादन्नाज्यतोऽपि वा । तिलतण्डुलकैर्वापि प्रोक्तं द्रव्यानुदीरणे ॥१॥
विद्याक्षराणां सर्वेषां स्वरव्यञ्जन बिन्दुकान् । पृथक्कृत्वाथ गणितैस्त्रिपञ्चाशद्भवन्ति हि ॥२॥
तेन तल्लक्षसंख्यं तु जपेद्विद्यां प्रयत्नतः । तद्दशांश हुनेदग्नौ सर्वत्राक्षरलक्षके ॥३॥
प्राङ्मुखो नित्यपूजासु साधनेषु च साधकः । नित्यानामपि सर्वासां वासनायामुदीरितम् ॥४॥
ततः सिद्धमनुर्मन्त्री कुर्यात्सिद्धिषु कौतुकम् । तद्विधानं शृणु प्राज्ञे वक्ष्ये विद्याविभेदतः ॥५॥
दशानामपि सिद्धीनां विद्यास्तासां भिदागताम् । संख्यांचताश्चसम्प्रोक्ताः क्रमेणासां फलानि च ॥६॥
विद्यादिकूटे त्वाद्ये तु योजयेद्दशसु क्रमात् । ताभ्यामेव विलोमाभ्यां पुटयेदुपरीरितान् ॥७॥
मन्त्रवर्णान् दशानां च तत्तत्संख्याश्च ताः शृणु । परस्तात्तत्प्रभेदानां मन्त्रान् वक्ष्ये यथाविधि ॥८॥
चतुर्विधः स्याद्विजयो द्वन्द्वे सचतुरङ्गके । कूटयुद्धे दुर्गजे च तेषां मन्त्राश्चतुर्विधाः ॥९॥
कामरूपत्वमुदितं स्वेच्छयाभीष्टविग्रहम् । विधातुमात्मनः शक्तिं स एको मन्त्र ईरितः ॥१०॥
पादुकायुगलं विद्यावैभवाप्तं तु पादयोः । कृत्वा स्मरेद् वाञ्छितं तु देशं तत्र तदा स्थितिः ॥११॥
तन्मन्त्रः स्यादेकविधस्तथैवाञ्जनमीरितम् । येनाक्ताक्षो निधिं पश्येद् देवाद्यांश्चान्तरिक्षगान् ॥१२॥
खड्गश्च तादृशः प्रोक्तः करस्थेनाहिताः क्षणात् । पलायिता वा पदायोः प्रणमेयुर्वशंगताः ॥१३॥
वेतालाः स्युरसंख्याता सिद्ध्यन्ते चैक विद्यया । निधाय साधकं स्कन्धे चरेयुर्वाञ्छयास्य ते ॥१४॥

विकृताङ्गमुखाः केचित्केचित्तिर्यङ्मुखाङ्गका । कचिद्भीषणनादाङ्गा वेताला बहुविग्रहाः ॥१५॥
सर्वेपि वशगा वाक्यादस्य शत्रून् ग्रसन्ति च । किङ्कराः प्रोक्तकरणाद्भवेयुर्यावदायुषम् ॥१६॥
पिशाचास्तादृशाः प्रोक्ताः कार्श्यवैरूप्यविग्रहाः । क्रुद्धाः क्षुद्रशयाः प्रोक्तकारिणः स्युरसंख्यकाः ॥१७॥
तेषामेका भेवद्विद्या तथा ते किङ्करा सदा । तैरेव प्रहरेच्छत्रुमज्ञातमनिशं रणे ॥१८॥
षट्त्रिंशद्रूपसंयुक्ता यक्षिण्यो वांछितप्रदाः । सुरूपा द्विभुजाश्चित्रवसनाभरणान्विताः ॥१९॥
ससहाया यौवनाढ्याः स्त्रगालेपनसौरभैः । समेत्य सर्वाभीष्टानि दद्युस्ताः साधकाय वै ॥२०॥
तासां विद्यास्तु षटत्रिंशद्वक्ष्ये ताश्च शृणु प्रिये । याभिः सिद्धाभिरनिशं साधकाः सर्वसम्मतः ॥२१॥
चेटकाश्च चतुःषष्टिस्तेषां मन्त्राश्च तत्समाः । तेपि नानाविधाकाराः सिद्धास्ते दद्युरीप्सितम् ॥२२॥
मायासंख्याश्चित्ररूपाश्चित्राण्यस्येच्छयानिशम् । वसून्युपहरेयुस्ता विद्यैका तत्प्रसाधने ॥२३॥
विद्याया नवमार्णदिवर्णैः षड्भिरुदीरितैः । दशविद्याः प्रजायन्ते शृणु वक्ष्ये च ताः क्रमात् ॥२४॥
नित्येति विजयं देहीत्युक्त्वा सम्पुटयेत्ततः । विद्या सा विजय प्राप्त्यां चतुर्धैकादशाक्षराः ॥२५॥

अत्र नित्यविजयं देहि मदद्रवे इत्येकादशक्षरो मूलभूतश्चतुर्धा। तथा- (१) नित्यद्वन्द्वयुद्धे विजयं देहि मदद्रवे (२) नित्य चतुरङ्गयुद्धे विजयं देहि मदद्रवे (३) नित्यकूटयुद्धे विजयं देहि मदद्रवे (४) नित्यदुर्गयुद्धे विजयं देहि मदद्रवे। इति। तथा-

मदेति कामरूपं मे देहीति पुटयेत्तथा । त्रयोदशाक्षरी विद्या कामरूपप्रदेरिता ॥२६॥

मदकामरूपं मे देहि द्रवे नित्य। इति।

नित्यदे पादुकां देहीत्युक्त्वा कुर्याच्च सम्पुटम् । द्वादशार्णा भवेद्विद्या सिद्धा दद्याच्च पादुके ॥२७॥

नित्यदे पादुकां देहि मदद्रवे। इति

तथा नित्यमदेत्युक्त्वा देह्यञ्जनमितीरयेत् । पुटयेत्तद द्वयेनाथ द्वादशार्णा समीरिता ॥२८॥

द्रवे नित्यमद देह्यञ्जनं द्रवे। इति

द्रव्यनित्ये देहि खड्गमित्युक्त्वा पुटयेत्तथा । द्वादशार्णा भवेत्सिद्धा खड्गं दद्यात्सुशोभनम् ॥२९॥

द्रवनित्ये देहि खड्गं द्रवनित्ये। इति।

नित्यद्रवेति वेतालान् देहीति पुटयेत्तथा । त्रयोदशाक्षरी विद्या सिद्धा तान् तर्शयेस्तथा ॥३०॥

नित्यद्रवे वेतालान्देहि नित्यद्रवे। इति।

पिशाचान्मे प्रयच्छेति पूर्वं नित्यमदद्रवे । पुटयेत्पूर्ववद् द्वाभ्यां विद्या सप्तदशाक्षी ॥३१॥

नित्यमदद्रवे पिशाचान्मे प्रयच्छ नित्यद्रवे। इति।

षटत्रिंशदुक्ता यक्षिण्यः सर्वा वाञ्छितसिद्धिदाः । तासां नामानि विद्याश्च शृणु वक्ष्ये यथाविधि ॥३२॥
विचित्रा विभ्रमा हंसी भीषणी जनरञ्जिका । विशाला मदना तुष्टा कालकण्ठी महाभया ॥३३॥
माहेन्द्री शङ्खिनी चान्द्री मङ्गला वटवासिनी । मेखला सकला लक्ष्मार्मालिनी विश्वनायिका ॥३४॥

सुलोचना सुशोभा च कामदा सविलासिनी । कामेश्वरि नन्दिनी च स्वर्णरेखा मनोहरा ॥३५॥
प्रमोदा रागिणी सिद्धा पद्मिनी सरतिप्रिया । कल्याणदा कलादक्षा ततश्च सुरसुन्दरी ॥३६॥
इति षट्त्रिंशदाख्याता यक्षिण्योऽभीष्टदायिकाः । तासां विद्याः क्रमेण स्युस्तद्बीजद्वय सम्पुटैः ॥३७॥
नित्यद्रवमदेत्येतैः षड्वर्णैश्चोक्तनामभिः । विद्याः षट्त्रिंशदाख्यातास्ताः सिद्धाः दद्युरीप्सितम् ॥३८॥
तासां विद्यार्णसंख्यास्तु शृणु वक्ष्ये यथाक्रमम् । पञ्चमी पञ्चदशमी विंशतिश्च तथान्तिमा ॥३९॥
चतुस्त्रः पञ्चदशकास्तृतीया साष्टमी तथा । त्रयोदशी साष्टदशा द्वाविंशा द्वादशाक्षरा ॥४०॥
सैकत्रिंशश्च तद्वत्स्युश्चतुर्दश समन्विताः । नवमी दशमी चैकविंशा तद्वदनन्तरम् ॥४१॥
चतुर्विंशा पञ्चविंशा सप्तविंशा तदूर्ध्वगा । त्रयस्त्रिशादिकास्तिस्रस्त्रयोदशयुताः पराः ॥४२॥
चेटकानां चतुःषष्टिं तन्मन्त्रांश्च वदामि ते । शृणु सिद्धास्तु ते नित्यं साधयेयुः समीहितम् ॥४३॥
विभ्रमो वाहको वीरो विकर्षः कोरकः कविः । सिंहनादो महानादः सुग्रीवो मर्कटः शठः ॥४४॥
बिडालाक्षो बिडालास्यः कुमारः खेचरो भवः । मयूरो मङ्गलो भीमो द्वीपिवक्रः खराननः ॥४५॥
मातङ्गश्च निशाचारी विषग्राही वृकोदरः । सैरिभास्यो गजमुखः पशुवक्त्रो मृगाननः ॥४६॥
क्षोभको मणिभद्रश्च क्रीडकः सिंहवक्त्रकः । श्येनास्यः कङ्कवदनः काकास्यो हयवक्त्रकः ॥४७॥
महोदरः स्थूलशिरा विकृतास्यो वराननः । चपलः कुक्कुटास्यश्च मायावी मदनालसः ॥४८॥
मनोहरो दीर्घजङ्घ स्थूलदन्तो दशाननः । सुमुखः पिण्डितः क्रुद्धो वराहास्यः सटामुखः ॥४९॥
कपटः कौतुकी काल किङ्कर कितव खलः । भक्षको भयदः सिद्धः सर्वगश्चेति कीर्तिताः ॥५०॥
बीजद्वयपुटान्तस्थैर्मदनित्यद्रवे - युतै । नामभिस्तैर्द्वितीयान्तैर्देहीति पदसंयुतैः ॥५१॥
एवं मन्त्राश्चतुःषष्टिः क्रमादुक्ता महेश्वरि । तेषां संख्यामपि तथा शृणु वक्ष्ये यथाविधि ॥५२॥
चतुर्दशाक्षरास्तेषु नव मन्त्रा समीरिताः । तथा पञ्चादशार्णास्तु षड्विंशतिरितीरिताः ॥५३॥
षोडशार्णास्तु मनवः पञ्चविंशतिरिताः । तथा सप्तदशार्णाश्च चत्वारो व्याकुलाः क्रमात् ॥५४॥

(१) ह्रीं श्रीं नित्यद्रवे मदविचित्रे श्रीं ह्रीं १३ (२) ह्रीं श्रीं नित्यद्रवे मदविभ्रमे श्रीं ह्रीं १३ (३) ह्रीं श्रीं नित्यद्रवे मदहंसि श्रीं ह्रीं १२ (४) ह्रीं श्रीं नित्यद्रवे मदभीषणी श्रीं ह्रीं १३ (५) ह्रीं श्रीं नित्यद्रवे मदजनरञ्जिके श्रीं ह्रीं १५ (६) ह्रीं श्रीं नित्यद्रवे मदविशाले श्रीं ह्रीं १३ (७) ह्रीं श्रीं नित्यद्रवे मदमदने श्रीं ह्रीं १३ (८) ह्रीं श्रीं नित्यद्रवे मदतुष्टे श्रीं ह्रीं १२ (९) श्रीं ह्रीं नित्यद्रवे मदकालकण्ठि श्रीं ह्रीं १४ (१०) श्रीं ह्रीं नित्यद्रवे मदमहाभये श्रीं ह्रीं १४ (११) ह्रीं श्रीं नित्यद्रवे मदमाहेन्द्रि श्रीं ह्रीं १३ (१२) ह्रीं श्रीं नित्यद्रवे मदशङ्खिनि श्रीं ह्रीं १३ (१३) ह्रीं श्रीं नित्यद्रवे मदचान्द्रि श्रीं ह्रीं १२ (१४) ह्रीं श्रीं नित्यद्रवे मदमङ्गले श्रीं ह्रीं १३ (१५) ह्रीं श्रीं नित्यद्रवे मदवटवासिनी ह्रीं श्रीं १५ (१६) ह्रीं श्रीं नित्यद्रवे मदमेखले श्रीं ह्रीं १३ (१७) ह्रीं श्रीं नित्यद्रवे मदसकले श्रीं ह्रीं १३ (१८) ह्रीं श्रीं नित्यद्रवे मदलक्ष्मि श्रीं ह्रीं १२ (१९) ह्रीं श्रीं नित्यद्रवे मदमालिनि श्रीं ह्रीं १३ (२०) ह्रीं श्रीं नित्यद्रवे मदविश्वनायिके श्रीं ह्रीं १५ (२१) ह्रीं श्रीं नित्यद्रवे मदसुलोचने श्रीं ह्रीं १५

****

(२२) ह्रीं श्रीं नित्यद्रवे मद(सु) शोभे श्रीं ह्रीं १३ (२३) ह्रीं श्रीं नित्यद्रवे मदकामदे श्रीं ह्रीं १३ (२४) ह्रीं श्रीं नित्यद्रवे मदसविलासिनी श्रीं ह्रीं १५ (२५) ह्रीं श्रीं नित्यद्रवे मदकामेश्वरि श्रीं ह्रीं १४ (२६) ह्रीं श्रीं नित्यद्रवे मदनन्दिनि श्रीं ह्रीं १३ (२७) ह्रीं श्रीं नित्यद्रवे मदस्वर्णरेखे श्रीं ह्रीं १४ (२८) ह्रीं श्रीं नित्यद्रवे मदमनोहरे श्रीं ह्रीं १४ (२९) ह्रीं श्रीं नित्यद्रवे मदप्रमोदे श्रीं ह्रीं १३ (३०) ह्रीं श्रीं नित्यद्रवे मदरागिणी श्रीं ह्रीं १३ (३१) ह्रीं श्रीं नित्यद्रवे मदसिद्धे श्रीं ह्रीं १२ (३२) ह्रीं श्रीं नित्यद्रवे मदपद्मिनि श्रीं ह्रीं १३ (३३) ह्रीं श्रीं नित्यद्रवे मद(स) रतिप्रिये श्रीं ह्रीं १५ (३४) ह्रीं श्रीं नित्यद्रवे मदकल्याणदे श्रीं ह्रीं १५ (३५) ह्रीं श्रीं नित्यद्रवे मदकलादक्षे श्रीं ह्रीं १४ (३६) ह्रीं श्रीं नित्यद्रवे मदसुरसुन्दरि श्रीं ह्रीं १५। इति षट्त्रिंशद्यक्षिणी मन्त्राः॥

अथ चतुष्षष्टिश्चेटका यथा - (१) ह्रीं श्रीं मदनित्यद्रवे विभ्रमं देहि श्रीं ह्रीं १५ (२) ह्रीं श्रीं मदनित्यद्रवे वाहकं देहि श्रीं ह्रीं १५ (३) ह्रीं श्रीं मदनित्यद्रवे वीरं देहि श्रीं ह्रीं १४ (४) ह्रीं श्रीं मदनित्यद्रवे विकर्षं देहि श्रीं ह्रीं १५ (५) ह्रीं श्रीं मदनित्यद्रवे कोरकं देहि श्रीं ह्रीं १५॥ एवं कविं सिंहनादं महानादं सुग्रीवं मर्कटं शठं बिडालाक्षं बिडालास्यं कुमारं खेचरं भवं मयूरं मङ्गलं भीमं द्वीपिवक्त्रं खराननं मातङ्गं निशाचारिणं विषाग्राहिणं वृकोदरं सैरिभारयं गजमुखं पशुवक्त्रं मृगाननं क्षोभकं मणिभद्रं क्रीडकं सिंहवक्त्रकं श्येनास्यं कङ्कवदनं काकास्यं हयवक्त्रकं महोदरं स्थूलशिरसं विकृतास्यं वराननं चपलं कुक्कुटास्यं मायाविनं मदनालसं मनोहरं दीर्घजङ्घं स्थूलदन्तं दशाननं सुमुखं पिण्डितं वराहास्यं सटामुखं कपटं कौतुकिनं कालं किङ्करं कितवं खलं भक्षकं भयदं सिद्धं सर्वगं (६४) इति चतुःषष्टिश्चेटकाः॥ तथा-

विद्याक्षरेष्वनावृत्तान्यक्षराणि चतुर्दश । सस्वरैस्तैर्भवेत्संख्या चतुर्विंशच्छतद्वयम् ॥५५॥

अत्र हरफसकअलवनतयमदव इति।

तैर्यन्त्राणि च सप्त स्युस्तेषु प्रोक्तक्रमाद्यजेत् । देवताः सप्तवारेषु भास्करादिषु भक्तितः ॥५६॥

वाराख्यां सप्तमी युक्तामिष्टं देहीति चालिखेत् । यन्त्रस्य मध्ये मायास्थं तत्र सिद्धीश्च पूजयेत् ॥५७॥

वृत्तयोर्नवयोर्निं च कृत्वा बाह्येष्टकोणकम् । बहिः कलाब्जभूसद्मयुगं कुर्याद्यथाविधि ॥५८॥

विलिख्य तेषु क्रमतो वर्णान् द्वात्रिंशदालिखेत् । दलेषु कोणेषु तथा वृत्तमध्ये द्वये पुनः ॥५९॥

मातृकामकथाद्यां वै विलिखेदान्तरक्रमात् । तस्य कोणान्तरालेषु हळक्षार्णान् समालिखेत् ॥६०॥

अग्रात्प्रदक्षिणं त्वेवं सप्त यन्त्राणि तैर्भवेत् । सिद्धीनां चेटकानां च यक्षिणीनां तथैकशः ॥६१॥

चेटकानां विशेषोऽयं मध्येऽष्टच्छदमम्बुजम् । तेषामुक्तक्रमेणैव साधनानि फलानि वै ॥६२॥

प्रयोगाञ्छृणु देवशि यैः सिद्धो मत्समो भुवि । पूज्यते सर्वलोकैश्च सर्वतः सर्वदापि वा ॥६३॥

सिन्धुतीरवने चैता यक्षिणीः साधयेत्त्रिशः । एकैकस्मिन् वर्णलक्षं जपेदुक्तविधानतः ॥६४॥

अरण्यवटमूले च पर्वताग्रे गुहासु च । उद्यानमध्ये कान्तारे मातृपादपमूलतः ॥६५॥

तद्दशांश तर्पणं च होमं कुर्यात्प्रसूनकैः । कदम्बबन्धूक जपाहयमारैश्च लौहितैः ॥६६॥

ततः प्रीताः समागत्य प्रत्यक्षा वांछितप्रदाः । सुवर्णानि च वासांसि भूषणानि फलानि च ॥६७॥

आस्वाद्यानि च लेह्यानि भोज्यानि विविधानि च । आलेपनानि माल्यानि दद्युराजीवितावधि ॥६८॥

आयाताः सर्वदा मह्यं प्रत्यक्षा देहि वांछितम् । इत्युक्त्वा नित्यशस्तास्तु पूजयेच्च जपेत्तथा ॥६९॥

अष्टोत्तर सहस्रं तु तां तां विद्यामनन्यधीः । एवं तां सर्वयक्षिण्यः फलं दद्युर्यथेप्सितम् ॥७०॥
चेटकानां तु सर्वेषां तेषु तेषु क्रमेण वै । एकस्मिन् पञ्च पञ्च स्यु सिद्धाः सिन्धुतटे नव ॥७१॥
तेषां च वर्णलक्षं तु जपमुक्तविधानतः । मौनं दिनेषु सततं कुर्यात्सिद्ध्यै न चालयेत् ॥७२॥
मध्यरात्रौ सदा होमं तर्पणं च समीरितम् । जपेद्दिवानिशं प्रोक्तं सर्वषामपि साधने ॥७३॥
चेटकास्ते समागत्य मध्यरात्रेऽतिभीषणाः । क्षोभयेयुरमुं क्षोभं न चेदेत्याथ तत्पुरः ॥७४॥
प्रत्यक्षाः किं त्वेष्टं तत्करोमीति वदेन्निशि । प्रत्येकं ते तथेत्युक्त्वा न मां मुञ्चत इत्यपि ॥७५॥
नित्यशस्तान् जपार्चाभिरुपासीताचरेत्ततः । स्मृते तमेत्य संदिष्टं साधयेयुः समीहितम् ॥७६॥
शत्रूणां समरे भङ्गं प्रहारमहिते जने । कुर्वन्ति प्रार्थितार्थानां प्रदानं ते दिवानिशम् ॥७७॥
आनेययुश्च वनिता वांछितास्तत्क्षणाद्ध्रुवम् । निश्चलीकुर्वते मत्तं दन्तिनं वा हयं नरम् ॥७८॥
नित्याषोडशके सिद्धे देवर्षिपितृराक्षसैः । पिशाचैरुरगैः सिद्धः किन्नरैरप्सरोगणैः ॥७९॥
मरुद्भिर्वसुभिः सप्तऋषिभिर्यक्षदानवैः । रुद्रैरेकादशविधैः साध्यैश्च नवभिर्ग्रहैः ॥८०॥
द्वादशार्कैर्लोकपालैस्तथान्यैरपि दैवतैः । राजभिर्वनिताभिश्च नैरैरन्यैर्मृगैस्तथा ॥८१॥
पूज्यते सर्वदा सिद्धः समीहित सुखास्पदः। हृष्टाशयो वदान्यश्च दयावान् सुमुखः क्षमी ॥८२॥
पूर्णाशयः सदानन्दो निरपेक्षः कलान्वितः । धनी भोक्तापरद्वेषी प्रेमभूरावयोर्भवेत् ॥८३॥

॥ नीलपताका प्रयोग:॥

नीलपताका के प्रयोग से युद्ध में सर्वत्र विजय मिलती है भूत, वेताल, पिशाच उसको दासवत् होकर अपने कंधे पर उठाकर घूमते है। यक्षिणी व चेटक भी दासवत् होकर उसकी आज्ञा का पालन करते है।

१. **एकादशाक्षरी मंत्र** – नित्य विजयं देहि मदद्रवे।
२. नित्यद्वन्द्व युद्धे विजयं देहि मदद्रवे।
३. नित्य चतुरङ्गयुद्धे विजयं देहि मदद्रवे।
४. नित्य कूटयुद्धे विजयं देहि मदद्रवे।
५. नित्य दुर्गयुद्धे विजयं देहि मदद्रवे।
६. द्रवनित्ये देहि खड्गं द्रवनित्ये।
   इन मंत्रों का जप कर विजय पताका व अस्त्र धारण करे तो विजय होवे।
७. **काममद प्राप्ति** – मदकामरूपं मे देहि द्रवे नित्य।
८. **पादुका मंत्र** – नित्य दे पादुकां देहि मदद्रवे।
९. **नित्यमद मंत्र**– द्रवे नित्यमद देह्यञ्जनं द्रवे।
१०. **बेताल वशीकरण मंत्र** – नित्यद्रवे वेतालान्देहि नित्यद्रवे।

११. पिशाच वशीकरण मंत्र – नित्यमदद्रवे पिशाचान् मे प्रयच्छ नित्यद्रवे।

इसके बाद टीका में ३६ यक्षिणी वशीकरण मंत्र दिये गये हैं। ६४ चेटक मंत्र प्रयोग भी टीका में बताये गये है।

मंत्र सिद्धि हेतु रविवार व सप्तमी तिथी विशेष फलप्रदा है। दोनों का योग मिले तो उत्तम फल मिले।

अनावृत्त मंत्र वर्ण – ह र फ स क अ ल व न त य म द व।

॥ यंत्र रचना॥

वृत्त बनाकर बाहर नवयोनि कोण (त्रिकोण) उसके बाहर वृत्त खींचकर अष्टकोण बनाये। उसके बाहर १६ कमलदल व भूपुर बनाये।

यंत्र मध्य में "**ह्रीं**" लिखकर जिस सिद्धि को आप करना चाहते है उसका नाम लिखे। षोडश दल में १६ स्वर मातृका लिखे। अष्टकोण में **कं खं..........दं धं** दो-दो वर्ण लिखें। नं .... **सं** तक वृत्त मध्य में लिखें। अन्य कोणों में "**हं लं क्षं**" लिखे।

यंत्र के चारों ओर "**ह र .... दव**" अनावृत्त वर्ण लिखें। देवी का पूजन आवाहन करें, पश्चात् जिस सिद्धि को जो आप कर रहे है उसका जप करे। शेष विधि श्लोक ६१ से ८३ तक।

॥ नीलपताका मंत्र॥

मंत्र :– ॐ नमः कामेश्वरि कामाङ्कुशे कामप्रदायिके भगवति नीलपताके **भगान्तिके महेश्वरि क्लूं नमोऽस्तु ते परमगुह्ये हूं हूं हूं मदने मदन देहे त्रैलोक्यमावेशय हूं फट्** स्वाहा।

॥ ध्यानम् ॥

इन्द्रनील शिलाखण्ड समानतनुरोचिषम् ।
प्रफुल्ल पुण्डरीकाभवदनां स्मितशालिनीम् ॥
कबरीबन्धशोभाढ्यां पीवरोरोजसंयुताम् ।
रम्याभिः सर्वतो नीलपताकाभिरलंकृताम् ।
वराभयकरद्वन्द्वं धारयन्तीं शुचिस्मिताम् ॥

यह देवि युद्ध में विजय प्रदान करती है शत्रु सेना का संमोहन व स्तंभन करती है।

॥ इति नीलपताका नित्या प्रयोग विधिः॥

॥ १२. अथ विजया नित्या प्रयोगः॥

मंत्र – भ म र य उ औं। (त्रिपुरार्णवे)

विनियोग – ऋषिन्यास के अनुसार जाने।

ऋषिन्यास – शिरसि अहि ऋषये नमः। मुखे गायत्रीछंद से नमः। हृदि विजयानित्यादेवतायै नमः। विनियोगाय नमः सर्वाङ्गे।

षडङ्गन्यास – भां हृदयाय नमः। मीं शिरसे स्वाहा। रूं शिखायै वषट्। यैं कवचाय हुं। उं नेत्रत्रयाय वौषट्। औं अस्त्राय फट्।

वर्णन्यास – श्रोत्रयोः भं नमः। सर्वाङ्गे मं नमः। नेत्रयोः रं नमः। जिह्वायां यं नमः। नासायां उं नमः। चित्ते नमः।

॥ ध्यानम् ॥

पञ्चवक्त्रां दशभुजां प्रतिवक्त्रं त्रिलोचनाम् । भास्वन्मुकुट विन्यस्त चन्द्ररेखा विराजिताम् ॥
सर्वाभरणसंयुक्तां पीताम्बर समुज्ज्वलाम् । उद्यद्भास्वद्बिम्बतुल देहकांति शुचिस्मिताम् ॥
शङ्खं पाशं खेट चापौ कह्लारं वामबाहुभिः । चक्रं तथांकुशं खड्ग सायकं मातुलुङ्गकम् ॥
दधानां दक्षिणहस्तैः प्रयोगे भीमदर्शनाम् । उपासनेऽतिसौम्यां च सिंहोपरि कृतासनम् ॥
व्याघ्रारूढाभिरभितः शक्तिभिः परिवारिताम् ॥ (समरे पूजनेऽन्येषु प्रयोगेषु सुखासनाम्) ॥

॥ यंत्र पूजनम् ॥

त्रिकोण, अष्टदल, षोडशदल, अष्टकोण बनाकर उनके बाहर दो रेखा वाला भूपुर चारद्वारयुक्त बनावें। भुवनेश्वरी की जयादि नवपीठशक्तियों का पूजन कर प्रधान देवता का आवाहन करे।

॥ श्री विजया यन्त्रम् ॥

प्रथमावरणम् – त्रिकोण मध्य में षट्दिशाओं की कल्पना करे (यदि षट्कोण बनाये तो भी कोई अहित नहीं हैं)। उनमें **भां हृदयाय नमः हृदय शक्ति पा.। मीं शिरसे स्वाहा शिरशक्ति पा.। रूं शिखायै वषट् शिखाशक्ति पा.। यै कवचाय हुं कवच शक्ति पा.। उं नेत्रत्रयाय वौषट् नेत्रशक्ति पा.। औं अस्त्राय फट् अस्त्र शक्ति पा.।** वहीं पर मध्य में दिव्यौघ, सिद्धौघ, मानवौघ गुरुपंक्ति का अर्चन करे।

द्वितीयावरणम् – (भूपुरे) भूपुर की पूर्वादि अष्ट दिशाओं में इन्द्रादि दिक्पालों एवं उनकी अष्टशक्तियों का पूजन करे। पुनः **वायुकोणे – अनंत शक्ति पा.। ईशाने – ब्रह्मशक्ति पा.। आग्नेये – नियति शक्ति पा.। निर्ऋति कोणे – कालशक्ति पा.।**

तृतीयावरणम् – (अष्टकोणेषु) **ह्रीं श्रीं जया पा.। विजया पा.। दुर्गा पा.। भद्रा पा.। भद्रकरी पा.। क्षेमा पा.। क्षेमङ्करी पा.। नित्या पा.।**

चतुर्थावरणम् – (षोडशदलेषु) **ह्रीं श्रीं विदारिका पा.। विश्वमयी पा.। विश्वा पा.। विश्वभञ्जिका पा.। वीरा पा.। विक्षोभिणी पा.। विद्या पा.। विनोदा पा.। अञ्जित विग्रहा पा.। पीतकोशा पा.। विषग्रीवा पा.। विपुला पा.। विजयप्रदा पा.। विभवा पा.। विविधा पा.। विप्रा पा.।**

पंचमावरणम् – (अष्टदलेषु) **ह्रीं श्रीं मनोहरा पा.। मङ्गला पा.। मदोत्सिक्ता पा.। मनस्विनी पा.। मानिनी पा.। मधुरा पा.। माया पा.। मोहिनी पा.।**

षष्टमावरणम् – (अष्टदलकमल कर्णिकायां) **ह्रीं श्रीं मातुलुङ्गाय नमः। सायकेभ्यो नमः। खड्गाय नमः। अंकुशाय नमः। चक्राय नमः। शङ्खाय नमः। पाशाय नमः। खेटाय नमः। चापाय नमः। कह्लाराय नमः।**

पश्चात् सर्वोपचार से देवी का पूजन करे।

गायत्री मन्त्र – विजयादेव्यै विद्महे महानित्यायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार विजयानित्या प्रयोग विधिः॥

(श्रीतन्त्रराजे)

पूर्वोक्त क्रमतो विद्यां वर्णलक्षं जपेत्सुधीः। होमं रक्ताम्बुजैः कृत्वा सिद्धमन्त्रो दयान्वितः ॥१॥
प्रयोगनाचरेन्मन्त्री होमयन्त्रविधानतः। जपेन तर्पणेनापि पूजनेन यथा विधि ॥२॥
कमलै कैरवैः रक्तैः सितैः सौगन्धिकोत्पलैः। सुगंधिशेफालिकाया त्रिमध्ववक्तैर्यथाविधि ॥३॥
होमात्सप्तसु वारेषु कुर्यात्प्रोक्तैस्तु सप्तभिः। प्रोक्तवारेशयोश्चापि तन्मण्डलात् एव वै ॥४॥
विजयं समवाप्नोति समरे द्वन्द्वयुद्धके। मल्लयुद्धे शस्त्रयुद्धे वादे द्यूतद्वयेऽपि च ॥५॥
व्यवहारेषु सर्वत्र जयमाप्नोति निश्चितम्। चतुरङ्गुलजैः पुष्पैर्होमात् संस्तम्भयेद्रिपून् ॥६॥
तथैव कर्णिकारोत्थैः पुंनागोत्थैर्नमेरुजैः। चम्पकैः केतकै राजवृक्षजैर्माधवोद्भवैः ॥७॥
प्राग्वद्वारेषु जुहुयात्क्रमात्पुष्पैस्तु सप्तभिः। प्रोक्तेषु स्तंभनं शत्रोर्भङ्गो वा भवति ध्रुवम् ॥८॥
शत्रोर्नक्षत्रवृक्षाग्नौ तत्समिद्भिरस्तु होमतः। सर्षपाज्याप्लुताभिस्तैः प्रणमन्त्येव पादयोः ॥९॥
मृत्युकाष्ठानले मृत्युपत्रपुष्पफलैरपि। समिद्भिर्जुहुयात् सम्यग्वारेशार्चन पूर्वकम् ॥१०॥
अरातेश्चतुरङ्गं तु बलं रोगार्दितं भवेत्। तेनास्य विजयो भूयान्निधनेनापि वा पुनः ॥११॥
अर्कवारेर्कजैरिध्मैः समिद्धेग्नौ तदुद्भवैः। पत्रैः पुष्पैः फलैः काण्डैर्मूलैश्चापि हुनेत्क्रमात् ॥१२॥
सवर्णारुणवत्साया घृतासिक्तैस्तु मण्डलात्। अरातिदिङ्मुखो भूत्वा कुण्डे त्र्यक्षे विधानतः ॥१३॥
पलायते वा रोगार्तः प्रणमेद्वा भयान्वितः। वैरी बलसमग्रोपि शौर्यमानान्वितोपि च ॥१४
पलाशेध्मानले तस्य पुञ्चांगैस्तद्घृताप्लुतैः। होमेन सोमवारेषु भवेत्प्राग्वन्न संशय ॥१५॥
खादिरेध्मानले तस्य पञ्चांगैस्तद्घृताप्लुतैः। वारे भौमस्य हवनात्तदाप्नोति सुनिश्चितम् ॥१६॥
अपामार्गेध्मजे वह्नौ तत्समिद्भिर्हुनेत्तथा। बुधवारेषु शुभ्रायाः सवत्साया घृतान्वितम् ॥१७॥
पूर्वोक्तफल संसिद्धिर्भवत्येव च तद्दिनैः। तत्तद्वारेषु भजनात्पूर्वमेव हुतक्रिया ॥१८॥
सर्वत्र प्रोक्तमेवार्चा जपयन्त्रादि कर्मसु। तत्तन्नित्यार्चनं तत्तद्वारेशद्वयपूजनम् ॥१९॥
विधाय पश्चात्कर्माणि तानि कुर्यात्समाहितः। शीघ्रं तत्फलसंसिद्ध्यै भवत्येवान्यथान्यथा ॥२०॥
पिप्पलाग्नौ गुरोर्वारे तदुत्थैस्तद्घृतप्लुतैः। हुनेत्तथा तत्फलाप्तिस्तद्दिनैः स्यादसंशयम् ॥२१॥
उदुम्बराग्नौ भृगुजे वारे होमं तदुद्भवैः। तत्सिक्थैर्विदधीतेत्थं तद्दिनैस्तत्र सिध्यति ॥२२॥

शमीवह्नौ तदुस्थैस्तु जुहुयात्कृष्णगोघृतैः । तद्दिनात्तात्फलानि स्युरिति वारेषु सप्तसु ॥२३॥
विजयो विहितः सम्यग्हवनात्तिथिऋक्षयोः । विजयं शृणु देवेशि कथयामि क्रमेण तै ॥२४॥
प्रतिपत्तिथिमारभ्य पञ्चम्यन्तक्रमेण वै । शालीचणक मुद्गैश्च यवमाषंश्च होमतः ॥२५॥
महिषाज्यप्लुतैस्ताभिस्तिथिभिः समवाप्नुयात् । षष्ठ्यादि च दशम्यन्तमजा भव घृतैस्तदा ॥२६॥
प्रागुक्तैर्निस्तुषैर्होमात्प्रागुक्तं फलमाप्नुयात् । तदूर्ध्वं पञ्चदशयन्ते समस्तैश्च तिलद्वये ॥२७॥
सिताक्तैः पायसैः सिक्तैराविकैस्तु घृतैस्तथा । हवनात्फलमाप्नोति यदादौ फलमीरितम् ॥२८॥
एवं नक्षत्र वृक्षोत्थवह्नौ तैस्तैर्मधुप्लुतै । हवनादपि तत्प्राप्तिर्भवत्येव न संशयः ॥२९॥
विद्यायां प्राग्वदर्णानि पञ्च युञ्ज्यात्स्वरैस्तथा । अशीत्यर्णवती विद्या तैर्यन्याणि शृणु प्रिये ॥३०॥
प्राक्प्रत्यग्दक्षिणोदक् च दश सूत्राणि पातयेत् । एकाशीतिपदानि स्युस्तेषु तानि लिखेत्क्रमात् ॥३१॥
मध्यकोष्ठेभिधां कृत्वा प्रागुक्तविधिना युतम् । शूलीकृत्य च रेखाग्राण्यवाह्याभिपूज्य ताम् ॥३२॥
उपासीत पुरो विद्यां जपं नित्यं समर्चयेत् । विद्याक्रमं तत्र यन्त्रे यजेत्तत्फलमाप्नुयात् ॥३३॥

अथ यन्त्रलेखनक्रमः सुगमः । तथा-

प्राक्प्रत्यग्दक्षिणोदक् च चतुः निपातनात् । सूत्र नवानि सम्भवन्त्यत्र कोष्ठानि परमेश्वरि ॥३४॥
तेषु प्रत्येकमब्जानि साष्टपत्राणि संलिखेत् । तेषु मध्यस्थ पद्मस्य कर्णिकायां समालिखेत् ॥३५॥
नामगर्भां तु तां विद्यां तद्बहिश्चाष्टपत्रके । तेष्वादितोऽष्टौ संलिख्य बिन्दुना तद्बहिस्तथा ॥३६॥
कर्णिकायां तु नामैकं बहिरष्टौ तथाष्टसु । एवमष्टसु संलिख्य वेष्टयेन्मातृकाक्षरैः ॥३७॥
विलोमैरनुलोमैश्च मायाबिन्दुसमन्वितैः । चतुरस्त्रत्रये बाह्ये ळक्षावग्रे समालिखेत् ॥३८॥
एवं कृत्वा हस्तयुग्ममाने कुम्भं विधाय तम्। विद्याक्षरौषधिक्वाथजलैरापूर्य पूर्ववत् ॥३९॥
अभ्यर्च्य विद्यामयुतं जपित्वा तैर्विधानतः । अभिषिञ्चेत्ततः क्लेशैर्विमुक्तो जायते सुखी ॥४०॥
विजयं सर्वतो भूयात्प्रोक्तेष्वपि च सप्तसु । नवग्रहार्तौ रिपुभिः सर्वतः क्लेशसम्भवे ॥४१॥
समरस्योद्यमे कीर्तिसमृद्ध्योरप्यवाप्तये । पुत्राप्त्यै वाञ्छितप्राप्त्यै त्रिषु जन्मसु कारयेत् ॥४२॥
एतद्यन्त्रं गैरिकेण पीठे संलिख्य तत्र ताम् । देवीमावाह्य सम्पूज्य जपेद्विद्यां तथायुतम् ॥४३॥
एवं त्रिःसप्तभिः सप्तरात्राद्विश्वं वशं नयेत् । राजानं वनितां मर्त्यानन्यांश्च प्राणिनोऽखिलान् ॥४४॥
हरिद्राढ्यपदे कृत्वा कलशे वा शरावयो । निधाय भित्तिमध्ये वा शयनस्थानके निजे ॥४५॥
अभ्यर्च्य विद्यया जापं कुर्यात्सन्ध्यासु नित्यशः । सहस्त्रं प्रोक्तकलनात्स्तम्भयेदखिलं दृढम् ॥४६॥
शत्रोरुद्योगरोषाभ्यामनिष्टकरणं तथा । व्यहारे रणोद्योगे वादे वाचं रुषं मतिम् ॥४७॥
एतत्प्रागुक्तसुरभिद्रव्यैरालिख्य तत्र ताम् । सन्ध्यासु पूजयेन्नित्यं सहस्त्रं प्रजेपत्तथा ॥४८॥
प्रोक्तकाल प्रयोगेण श्रियं प्राप्नोति पुष्कलाम् ।.....

****

इति अथैतद्यन्त्र रचनाप्रकार - **तत्र प्राक्प्रत्यग्दक्षिणोदक् च चतुश्चतुः सूत्रनिपातनात्समान्तरालिनि नव कोष्ठानि कृत्वा, तेषु नवसु कोष्ठेषु अष्टदलपद्मानि संकर्णिकानि नव कृत्वा, मध्याष्टदलकर्णिकायां साध्यनामयुक्तां विजयाविद्यां विलिख्य, बहिरष्टसु दलेषु प्रागुक्ताशीत्यक्षरेषु प्रथमतोष्टाक्षराणि विलिख्य, पूर्वदिग्गताष्टदले कर्णिकायां नवामक्षरं साध्यनामगर्भं विलिख्याष्टदलेष्वष्टाक्षराणि विलिख्य, तथैवाग्नेयदिक्स्थाष्टदलेषु विलिख्य, बहिश्चतुरस्त्रत्रयं कृत्वाभ्यन्तराले विसर्गयुक्तां विलोममातृकां विलिख्य तद्बहिळक्षाभ्यां वेष्टयेत्। एतद्यन्त्रमुक्त फलदं भवति॥ तथा-**

.....। अथान्यद्वज्ररूपं तु यंत्रं वक्ष्येति वैभवम् ॥४९॥

प्राग्वद् द्विसप्तरूपाणां पातेनोत्पादयेत्तथा । कोष्ठानि नवषष्ट्या च युतं शतमतिस्फुटम् ॥५०॥
तच्चतुष्कोणकोष्ठानि मार्जयेत्सैकविंशतिम् । मध्ये वज्रं भवेत्पञ्चाशीतिकोष्ठैर्यथाविधि ॥५१॥
तच्चतुर्दिक्षु विलिखेत्त्रिकोणान्येक कोणतः । सर्वमध्यस्थकोष्ठे चतुर्दिक्षु न्यसेत्तथा ॥५२॥
विद्यां नामोदरां कृत्वा प्राग्वद्वर्णास्तु संलिखेत् । एतदग्रचतुष्कस्य स्पर्शान् त्रिचतुरस्त्रकम् ॥५३॥
विधाय तत्र विलिखेत्मातृकां प्राग्विधानतः । एतेन वज्रयन्त्रेण विजया विजयप्रदा ॥५४॥
एतत्प्रोक्तेषु संलिख्य स्थापयेत्प्रोक्तरूपतः । विजयं समवाप्नोति प्रोक्तेष्वपि च सप्तसु ॥५५॥
विलिख्याश्वत्थ फलकातले यंत्रं कुचन्दनैः । जपाराधनसंसिद्धं स्थापयेच्छून्यवेश्मसु ॥५६॥
देशे वा तत्र दिनशो वर्धते श्रीरचञ्चला । पिशाचा राक्षसाः कृत्या वेताला स्युर्न तत्र वै ॥५७॥
पलाशफलकायां तु विलिख्यैतद्यथाविधि । स्थापयेद्यत्र कुत्रापि तत्क्षेत्रं ब्राह्मणास्पदम् ॥५८॥
पूर्वोक्त स्थापनाद् राजधानी भवति सुस्थिरा । वटे विलिख्य खननात्पत्तनं भवति ध्रुवम् ॥५९॥
उदुम्बरे विधायेत्थं स्थापनादचिरेण वै । अहितानाश्रयं स्थानं भवत्येव न संशयं ॥६०॥
वज्रस्य दिक्त्रिकोणान्तरालात्कुर्यात्त्रिशूलकम् । दाहव्याप्ते स्वसंयुक्ते लिखेत्तच्छृङ्गमध्ययोः ॥६१॥
तत्र संस्थाप्य गदितं विद्याजप्तविभूतिना । भालस्थेनाभिजप्तेन तमाविश्य गदो भवेत् ॥६२॥
स्वावेशकारणं कर्मस्वापयानक्रमं तथा । ग्रहभूतपिशाचाद्या अस्यविश्यापयान्ति वै ॥६३॥
तदैव दासवत्तस्य वशे भवति तद्बलात् । यन्त्रमेतद्विलिख्याश्मन्यभर्च्य स्थापयेत्क्वचित् ॥६४॥
राज्ञो गेहे तस्य राज्ञः क्षमा मुञ्चति नान्वयम् । स्थाने गजानां वाहानां नव कृत्वा नवस्वपि ॥६५॥
स्थानेषु स्थापितान्येतान्यर्चयेद्दिनशस्तथा । दिक्षु मध्ये च तत्रैव रोगाः कृत्या पेरेरिताः ॥६६॥
वीक्षितुं भुवनं नैव शक्ताः स्युस्तत्प्रभावतः । चन्द्रचन्दनकाश्मीरैरालिख्यभिनवे पटे ॥६७॥
अभ्यर्च्य विद्याजप्तं तं पटमास्तीर्य शाययेत् । दाहज्वरार्तमचिरान्मुच्यते तज्ज्वरेण सः ॥६८॥
अन्येष्वपि गदेष्वेव कारयेत्तद्विमुक्तये । समरेषु महोपानां यन्त्रमेतदुदीरितम् ॥६९॥
निः साने पटहेऽन्युषु वाद्येषु च समालिखेत् । दरदनाथ तन्मध्य तामावाह्य समर्चयेत् ॥७०॥
विजयां विजयावाप्त्यै युगपत्ताडयन् व्रजेत् । प्रत्यर्थिसेना तच्छब्दाकर्णनेन पलायते ॥७१॥

दिशो दश भयोद्विग्ना नाभियामि कदाचन । सजीवद्यूतकालेषु यन्त्रमेतद्विनिर्मितम् ॥७२॥
गुलिकीकृत्य तत्कण्ठे बद्ध्वा पश्चात् तु योजयेत् । एतद्दर्शनमात्रेण पलायन्ते दिशो दश ॥७३॥
निर्जीवेषु च तद्यन्त्रं जयमाप्नोति सर्वतः । नासाध्यं विद्यते तेन वज्रयन्त्रेण पार्वति ॥७४॥
ध्यायेद्वक्त्रे रिपोर्यन्त्रं विद्यां वा लोहिताकृतिम् । तदैव दासवत् तस्यो वशो भवति तद्बलात् ॥७५॥
इति ते विजयानित्यावैभवास्तु समीरिताः । एतद्वज्र (स्य? स्तु) सुगमत्वान्न विस्तारितः ॥

॥ विजयानित्या प्रयोगः॥

सारांश – यह विद्या विघ्न व शत्रु नाशकर विजय प्रदान करती है। श्लोक १ से १९ तक प्रयोग फल लिखा गया है। दो तरह की यंत्र रचना दी गई है। मंत्र ७९ अक्षर का बताया गया है परन्तु मंत्र नहीं दिया गया है।

(१) १०-१० रेखायें पूर्व-पश्चिम व उत्तर-दक्षिण खींचकर ८१ कोष्ठक यंत्र बनायें। प्रत्येक रेखा को यंत्र से आगे बढ़ाकर त्रिशूल की आकृति बना देवे। मध्य में विजया का आवाहन, पूजन करे।

(२) नवकोष्ठक यंत्र बनायें। प्रत्येक कोष्ठक में अष्टदल बनाये। मध्य कोष्ठक में "**ह्रीं**" युक्त विजया देवी का नाम लिखें। "**ह्रीं विजयायै नमः**" लिखें। पूर्व कोष्ठक में ८ स्वर मातृका, अग्निकोष्ठक में आठ स्वर मातृका, अन्य कोष्ठकों में क वर्ग, च वर्ग, ट वर्ग, त वर्ग, प वर्ग, य वर्ग, लिखें।

यंत्र के बाहर तीन चतुरस्र बनायें। एक अन्तराल में विसर्ग युक्त **वः लः रः यः** विलोम मातृका लिखे। उसके बाहर **हः लः क्षः** को लोम-विलोम लिखे। प्रयोग फल श्लोक ४१-४८ तक।

अन्य प्रयोग श्लोक ५० में दिये है। प्रयोग विधि स्पष्ट नहीं है।

॥ इति विजयानित्या प्रयोग विधिः ॥

॥ १३. अथ सर्वमङ्गला (चतुर्दशीतिथी कला) नित्या प्रयोगः॥

मंत्र – १. "**स्वौं**"।

२. **ॐ स्वौं सर्वमङ्गलायै नमः**। (मन्त्रमहोदधौ)

ऋषिन्यास के अनुसार विनियोग जाने।

ऋषिन्यासः – **शिरसि चन्द्राय ऋषये नमः। मुखे गायत्री छंद से नमः। हृदि सर्वमङ्गला नित्या देवतायै नमः। विनियोगाय नमः सर्वाङ्गे।**

षडङ्गन्यासः – स्वां हृदयाय नमः। स्वीं शिरसे स्वाहा। स्वूं शिखायै वषट्। स्वैं कवचाय हुं। स्वौं नेत्रत्रयाय वौषट्। स्वः अस्त्राय फट्।

वर्णन्यासः – श्रोत्रयोः स्वां नमः। सर्वाङ्गे स्वीं नमः। नेत्रयोः **स्वूं नमः। जिह्वायां स्वैं नमः। नासायां स्वौं नमः। मनसि स्वः नमः।** पश्चात् व्यापक न्यास करे।

॥ ध्यानम् ॥

सुवर्णवर्णां रुचिरां मुक्तामाणिक्य भूषणाम् । माणिक्यमुकुटां नेत्रद्वय प्रेङ्खद् दयापराम् ॥
द्विभुजां स्वासनां पद्मे त्वष्टषोडशतदद्वयैः । पत्रैरुपेते सचतुर्द्वारभूसद्मयुग्मके ॥
मातुलुङ्गफलं दक्षे दधानां करपङ्कजे । वामेन निजभक्तानां प्रयच्छन्तीं धनादिकम् ॥

॥ यंत्र पूजनम् ॥

षट्कोण, अष्टदल, षोडशदल, द्वात्रिंशद्दल बनाये उनके ऊपर चार द्वार युक्त २ रेखावाला भूपुर बनाये। भुवनेश्वरी की नवपीठ शक्तियों का अर्चन करे। आवरण देवताओं की नामावली के पहले **''ह्रीं श्रीं''** तथा अंत में **पादुकां पूजयामि तर्पयामि** कहें। यंत्र मध्य में ध्यानपूर्वक देवी का आवाहन करे।

॥ श्री सर्वमङ्गला यन्त्रम् ॥

प्रथमावरणम् – (षट्कोणे) आग्नेये- **स्वां हृदयाय नमः हृदयशक्ति पादुका पूजयामि तर्पयामि नमः।** इतिसर्वत्र॥ **स्वीं शिरसे स्वाहा। स्वूं शिखायै वषट्। स्वैं कवचाय हुं। स्वौं नेत्रत्रयाय वौषट्। स्वः अस्त्राय फट्॥**

देवी पृष्ठ में दिव्यौघ, सिद्धौघ, मानवौघ गुरु पंक्ति का पूजन करे। देवी के दक्षिण एवं वाम भाग में- **बीजपूराय नमः। खड्गाय नमः।**

द्वितीयावरणम् – (अष्टदले) **ह्रीं श्रीं भद्रा पा.। भवानी पा.। भव्या पा.। विशालाक्षी पा.। शुचिस्मिता पा.। कुंकुमा पा.। कमला पा.। कल्पा पा.।**

तृतीयावरणम् – (षोडशदलेषु) **ह्रीं श्रीं कला पा.। पूरणी पा.। नित्या पा.। अमृता पा.। जीविता पा.। दया पा.। अशोका पा.। अमला पा.। पूर्णा पा.। पुण्या पा.।** भाग्या पा.। उद्यता पा.। **विवेका पा.। विभवा पा.। विश्वा पा.। विनिता पा.।**

चतुर्थावरणम् – (द्वात्रिंशद्दलेषु) **ह्रीं श्रीं कामिनी** पादुका पू.। **खेचरी पा.। आर्या पा.। पुराणा पा.। परमेश्वरी पा.। गौरी पा.। शिवा पा.। अमेया पा.। विमला पा.।** विजया पा.। **परा पा.। पवित्रा पा.। पद्मिनी पा.। विद्या पा.। विश्वेश्वरी पा.। शिववल्लभा पा.। अशेषरूपा पा.।** आनंदा पा.। **अम्बुजाक्षी पा.। अनिन्दिता पा.। वरदा पा.। वाक्प्रदा पा.। वाणी पा.। विविधा पा.। वेदविग्रहा पा.।** वन्द्या पा.। **वागीश्वरी पा.। सत्या पा.। संयता पा.। सरस्वती पा.। निर्मला पा.। नादरूपा पा.।**

पंचमावरणम् – (भूपुरे) देवि के अग्रभाग से दक्षिणावर्त चारों द्वारों में **ब्राह्मी आदि अष्टशक्तियों** में दो दो का प्रतिद्वार पूजन करे।

षष्ठमावरणम् – (भूपुरे) पूर्वादि क्रम से ईशान तक **दिक्पालों** एवं उनकी **इन्द्राणी** आदि **अष्टशक्तियों** का पूजन करे।

सप्तमावरणम् – (भूपुरे) वायव्यकोणे- **अनन्त शक्ति पा.।** ईशाने **ब्रह्मशक्ति पा.।** आग्नेये **नियतिशक्ति पा.। निर्ऋति कालशक्ति पा.।** सर्वमंगला का सर्वविध पूजन करे।

गायत्री मन्त्र - सर्वमङ्गलायै विद्महे चन्द्रात्मिकायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादीक्रमानुसार सर्वमङ्गलाप्रयोग विधिः ॥

(श्रीतन्त्रराजे)

जपं तु नित्यशः कुर्यादग्रे तस्याः सहस्रकम् । प्राग्वत् तां साधयेद्विधां द्वात्रिंशल्लक्षमानतः ॥१॥
होमं दशांशतः कुर्यादन्नाज्याभ्यां घृतेन वा । एवं संसिद्धविद्यस्तु कुर्यात् प्रोक्तानशेषतः ॥२॥
प्रयोगानन्यथा तस्य नैष्कल्यमयशो मृतिम् । विदध्यात् तेन तां प्रोक्तक्रमेणाराध्य भक्तितः ॥३॥
संसाध्य पश्चात् कुर्वीत मङ्गलान्मङ्गलोदितान् । प्रयोगार्था वर्णशक्तीर्वक्ष्ये देवि शृणु प्रिये ॥४॥
सोमसूर्याग्निरूपाश्च ताश्चाष्टत्रिंशदेव ताः । अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ॥५॥
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा । पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः ॥६॥
एताः षोडश चन्द्रस्य कलाः कलाः कल्पद्रुमोपमाः । तपिनी तापिनी धूमा मरीचिर्ज्वालिनी रुचिः ॥७॥
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा । एतास्तु शक्तयः प्रोक्ताः क्रमाद् द्वादश भानुजाः ॥८॥
भकारादिडकारान्त वर्णोच्चारो विलोमतः । धातार्यमा च मित्रश्च वरुणो सौभगस्तथा ॥९॥
विवस्वानिन्द्रपूषार्काः पर्जन्यः समनन्तरः । त्वष्टा विष्णुरिति प्रोक्ता द्वादशार्काः क्रमेण वै ॥१०॥
कादिठान्तार्ण तनवः सर्वगाः सर्वसिद्धिदा । धूम्रार्चिरूष्मा ज्वलिनि ज्वालिनी विस्फुलिङ्गनी ॥११॥
सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि । यादिक्षान्ताक्षरमयाः शक्तयो दश कीर्तिताः ॥१२॥
तेषां दशानां नामानि वासनोक्तानि ते शिवे । कादिक्षान्ताक्षराणां तु द्वात्रिंशन्मिथुनानि वै ॥१३॥
प्रोक्तक्रमेण सम्पूज्य विनियुञ्ज्यात् तु सर्वतः । स्वराणां तु स्वतन्त्रत्वात् स्वतन्त्राः शक्तयस्तथा ॥१४॥
तासां नाथास्तत्सदृशनामरूपाः समीरिताः । मिथुनान्येवमुक्तानि त्रिंशदष्टक्रमेण वै ॥१५॥
तानि सम्पूज्य तत्तेजस्त्रयात्मनि जले शिवे । प्रोक्तानि देवतारूपाण्या वाह्याभ्यर्च्य तैर्जलैः ॥१६॥
अभिषेकात्तु तत्तेजस्त्रयं देव्यात्मता भवेत् ।

अत्र स्वरान्विना द्वाविंशतिमिथुनानि सूर्यस्याग्नेश्च कलाद्वाविंशतित्वात्स्वैर्मिलित्वा अष्टात्रिंशन्मिथुनानीत्यर्थः। तथा-

वाताद्यैर्ग्रासमायान्तैः षट्सप्ततियुतैः शतैः ॥१७॥
पञ्चभिर्योजयेन्नित्यां विद्यां तां सर्वमङ्गलाम् । ततस्तस्या वनस्थाने स्वरान् षोडश योजयेत् ॥१८॥
ततः सहस्रैर्नवभिर्द्विशतेन च षोडश । रूपाणि नित्याविद्याया जायन्ते परमेश्वरि ॥१९॥
तैर्यन्त्राणि प्रयोगांश्च फलानि च वदामि ते ।

अस्यार्थ :- वाताद्यैरकाराद्यैर्ग्रासमायान्तैर्ग्रासो क्षकारः माया विसर्गस्तत्सहितक्षकारान्तैः षट्सप्तत्युत्तर पञ्चशत ५७६ वर्णैः पूर्णमण्डलरूपैरित्यर्थ॥ ततः सर्वमङ्गलविद्याया वनस्थाने औकारस्थाने षोडशस्वरान् योजयेत्। तद्बीजमेव षोडशस्वरयुक्तं कुर्यादित्यर्थः। एवं षोडशस्वरयुक्त सर्वमङ्गलाबीजेन प्रागुक्त पूर्ण मण्डलवर्णान्

योजयेत् । यथा स्वंअं स्वंआं स्वंइं स्वंईं इत्यादि स्वंक्षः इत्यन्तं ५७६ । एवं स्वां अं स्वां आं स्वां इं स्वां ईं इत्यादि स्वां क्षः इत्यन्तं ५७६ । स्विं अं स्विं आं स्विं इं स्विं ईं इत्यादि स्विंक्षः इत्यान्तं५७६ । एवं नवसहस्राणि षोडशोत्तर द्विशतवर्णा ९२१६ जायन्ते इत्यर्थः तथा ।

वृत्तद्वयं विधायस्य बहिः षट्कोणमालिखेत् ॥२०॥

तद्बहिश्चाष्टपत्राब्जं तद्बहिस्तत्त्रयं तथा । कृत्वा तेषु न्यसेद्विद्याकूटान्युक्तक्रमेण वै ॥२१॥

तेष्वाद्यं मध्यतः साध्यसमेतं विलिखेद्बहिः । षट्सु कोणेषु चत्वारि प्रत्येकं विलिखेत्ततः ॥२२॥

अष्टच्छदेषु प्रत्येकं पञ्च पञ्च समालिखेत् । बहिर्वृत्तान्तरयुगे मातृकां माययान्विताम् ॥२३॥

विलोमामनुलोमां च स्वेन सम्यक्समालिखेत् । अन्तः षडन्तरालेषु पर्यायदिनसम्भवे ॥२४॥

नित्ये लिखेदग्रतस्तु प्रादक्षिण्येन सर्वतः । एवं यन्त्राणि जायन्ते तैः कूटैरुक्तभेदतः ॥२५॥

शतं च चत्वारिंशच्च चत्वारि च ततः क्रमात् । एवमन्यानि कूटानि प्रोक्तानि विलिखेत्क्रमात् ॥२६॥

मध्ये नामसमेतानि तदन्यान्यभितो लिखेत् । त्रयोदशमितैर्लक्षः सप्तविंशति संख्यकैः ॥२७॥

सहस्रश्च शतेनापि चतुर्भिस्तानि संख्यया । यन्त्राणि तेन जायन्ते तैश्चासौ सर्वमङ्गला ॥२८॥

एवमासां तु नित्यानां यन्त्राणि स्युः पृथक्पृथक् । तस्मादाभिरसाध्यानि न कदाचिच्च कुत्रचित् ॥२९॥

विद्यन्ते तेषु यत्किचिद्वक्ष्ये कोऽशेषतो वदेत् । नाथात्मकानि येन स्युस्तेन तानि नवक्रमैः ॥३०॥

भित्त्वा षोडशधा देवि विदध्याद्विनियोकम् । विशालमध्य विन्यासं विधाय नवकोष्ठकम् ॥३१॥

प्रागादिमध्यपर्यन्तं प्रादिक्षण्य क्रमाल्लिखेत् । नवानि नवसु प्राज्ञे तेषु ऋृक्षाणि चालिखेत् ॥३२॥

सप्तम्या साध्य संयुक्तं नाथान् देवीश्च तत्क्रमात् । यद्धदि वांछितं कर्म तत्तत् तेषु विलिख्य वै ॥३३॥

पीठे वा भूतले वापि पूजयेत्प्रोक्तवासरे । ततः प्राप्ते वांछितार्थे स्वात्मन्युद्वास्य देवताः ॥३४॥

चक्रं प्रक्षाल्य तत्तोयं केदारादिषु निक्षिपेत् । एवमन्यानि यन्त्राणि प्रोक्तानि क्रमतः शिवे ॥३५॥

विनियुञ्जयादभीष्टेषु कार्येषु क्रमतः शिवे । परसंख्यासमेतानि तेषु तेष्वप्ययं विधिः ॥३६॥

सर्वतः सौम्यकर्माणि सिध्यन्त्येवानया ध्रुवम् । वश्येषु ज्ञानसम्प्राप्तौ सर्वप्रत्यूह शान्तये ॥३७॥

लक्ष्मीप्राप्तौ तथारोग्यसिद्धौ रोगार्तिशान्तिषु । विजयाय समस्तापत्तारणायभिवृद्धये ॥३८॥

पुत्राप्त्यै सर्वरक्षायै पूजयेत् तेषु तत्क्रमात् । गजाश्वगोखरोष्ट्रज महिषीणां विवृद्धये ॥३९॥

तेषां रोगादिपीडासु तच्छान्त्यै च यथाक्रमात् । निर्माय नवयन्त्राणि तत्र तत्रार्चयेच्छिवाम् ॥४०॥

तेषु तेषूक्तकार्येषु तत्तत्सम्प्राप्तिहेतवे । नव प्राकारयुक्तानि षोडश प्रथमादिषु ॥४१॥

तिथिषु प्रोक्तरूपाणि तत्र तां सर्वमङ्गलाम् । पूजयेद्वाञ्छितावाप्त्यै प्रथमे सर्वदा यजेत् ॥४२॥

एवमेषा महासिद्धिकरी पूजाजपादिना । लघुमन्त्रक्रियामासां पूजां सर्वार्थसिद्धिदाम् ॥४३॥

पूर्णामनतिविस्तारां मङ्गलां ब्रूहि मे शिव। देवर्षिसिद्ध गंधर्वयक्षदेवाङ्गनाश्रयाम् ॥४४॥

****

पूजां वक्ष्यामि देवेशि गुह्यां शृणु मनोहराम् । विद्यया कुलसुन्दर्या कराङ्गन्यासपूर्वकम् ॥४५॥
अर्घ्यं तया विधायाथ पीठे चक्रं विधाय तत् । चन्दनागुरुकर्पूररोचनादरदादिषु ॥४६॥
एकेन तत्र ताः सम्यगुक्तरूपमथार्चयेत् । रत्नादिषूक्तेष्वालिख्य प्रतिष्ठाप्यात्र पूजयेत् ॥४७॥
वृत्तस्यायामविस्तारद्वये त्वेकतुरीयतः । वृत्ते विधाय चिह्नानि तेषु सूत्राणि पातयेत् ॥४८॥
त्रयमन्तरतो मुक्त्वा तेन द्वादशकोणकम् । तेषां मर्मसु मध्ये च विदध्याद्वृत्तयुग्मकम् ॥४९॥
मध्यवृत्तस्य मध्ये तु योनिं कुर्यात्समास्त्रकम् । प्राग्वत्तिस्रोऽर्चयन्नित्यास्तत्कोणेषु प्रदक्षिणम् ॥५०॥
अन्या अन्येषु कोणेषु पूजयेद् द्वादश क्रमात् । अग्रात्प्रदिक्षणं पश्चाद्बलिं दध्याद्यथाविधि ॥५१॥
सप्ताक्षर्या केवलाया केवलां ललितां जपेत् । नित्यानां ललिताद्यानां षौडशानां च नामभिः ॥५२॥
नित्यासप्ताक्षरीभिः स्युर्विद्याः पूजासु सर्वदा । ताभिः षोडशविद्याभिर्नित्यास्ताः षोडशार्चयेत् ॥५३॥
तद्विद्याक्षर संख्यास्तु शृणु वक्ष्ये यथाक्रमम् । प्रथमायाश्च सप्तम्या विद्या स्यात्षोडशाक्षरी ॥५४॥
द्वितीयायाश्चतुर्थ्यास्तु चतुर्दशभिरक्षरैः । तृतीयायाश्च षष्ठ्याश्च दशम्या दशपञ्चकम् ॥५५॥
द्वादश्याः सचतुर्दश्याः पञ्चदश्याः क्रमेण वै । पञ्चम्याश्च नवम्याश्च त्रयोदश्यास्त्रयोदश ॥५६॥
एकादश्यास्तु साष्टम्याः षोडश्या द्वादशोदिताः । अस्मिन्नेवार्चयेच्चक्रे चतुर्विंशतिभिस्तथा ॥५७॥
सविंशतिशता विद्या जपेत्ताश्च सिद्धये । अन्या विंशत्ससप्तशतं तैर्यन्त्रेष्वेव पूजनम् ॥५८॥
आसां पूजाजपाद्येषु यन्त्रेषु च समीरितम् । एतल्लघुप्रकारं तु यन्त्रं सर्वार्थदायकम् ॥५९॥
तेन तत्रोक्तमखिलं साध्येद्वज्ररूपिणा ।.....

अत्र वृत्तद्वयं विधाय इत्यादिश्लोकषट्कस्यायमर्थः- प्रथमतो वृत्तद्वयं विधाय तद्बहिः षट्कोणं कृत्वा तद्बहिरष्टदलपद्मं विरच्य तद्बहिर्वृत्तद्वयं कृत्वा मध्ये साध्यगर्भमाद्यकूटं विलिख्य षट्कोणे प्रतिकोणं चत्वारि चत्वारि कूटानि विलिख्याष्टपत्रेषु प्रतिपत्रं पञ्च पञ्च कूटानि विलिख्य बहिर्वृत्तान्तरालद्वयस्याभ्यन्तराले विसर्गसहितां प्रतिलोममातृकां विलिख्य बाह्यान्तराले विन्दुयुक्तामनुलोममातृकां विलिख्यान्तः षट्कोणान्तरालेषु पर्यायनित्या तद्दिननित्ययोः षडक्षराणि स्वाग्रात् प्रादक्षिण्येन विलिखेदिति। एवं मध्यकूटं तथैव स्थापयित्वा द्वितीययन्त्रेग्रिम कूटानि विलिखेदेवं तृतीये तदग्रिमकूटानि विलिखेत् । एवमेकस्यैकस्य कूटस्य चतुश्चत्वारिंशदुत्तरशतं (१४४) यन्त्राणि जायन्ते। एवं क्रमेण सर्वाणि यन्त्राणि त्रयोदशलक्षाणि सप्तविंशतिसहस्त्राणि चतुरुत्तरशतसंख्यानि (१३२७१०४) भवन्ति। एवमन्यासां नित्यानां यन्त्राणि भवन्तीत्यर्थः। यन्त्राणां विनियोगानाह- नाथात्मकानि इति।

अस्यायमर्थः- षिशालायामं नवकाष्ठात्कं चक्रं विलिख्यैकैकस्मिन् कोष्ठे सूत्रत्रयानिपातनात् षोडश कोष्ठानि विलिख्यैकैकस्मिन् कोष्ठे एकमेकं यन्त्रं विलिखेत् । एवं चतुश्चत्वारिंशदुत्तरशतं (१४४) यन्त्राणि भवन्ति। नवकोष्ठेषु त्रिरावृत्या सप्तविंशतिनक्षत्राणि विलिख्य नवसु नवनाथान् । विलिख्य सप्तम्यन्तं साध्यनाम ''वांछितं कर्म देहि'' इति विलिख्य प्रोक्तक्रमेण पूजादिकं कुर्यात् प्रोक्तफलानि भवन्तीत्यर्थः। एवमन्येषां यन्त्राणामपि प्रोक्त एव क्रमो ज्ञेयः। लघुमन्त्रक्रिया मित्यादिश्लोकैर्लघुपूजोक्ता। तत्र चतुर्दशारं विलिख्य मध्ये त्र्यस्त्रं विधाय

****

तन्मध्ये ललितात्र्यस्त्रे तिस्रः चतुर्दशस्वरेषु चतुर्दशानि याः पूज्या इत्यर्थः । तत्तद्विद्याया उच्चारणशक्तौ नाममन्त्रैः पूजा कार्येत्याह प्रथमायाश्च इत्यादिश्लोकैः । ते मन्त्रास्तु तत्तसंख्या ज्ञात्वाह्याः । अस्मिन्नेवार्चयेचक्रे इत्यादिश्लोकेन चतुश्चत्वारिंशदुत्तरशतकूटानि प्रागुक्तान्यप्यस्मिन्नेव चक्रे जपेदित्यर्थः । अन्यानि नित्याप्रकारणे प्रोक्तानि विंशत्युत्तरसप्तशत (७२०) कूटानि तत्रोक्तयन्त्रेष्व पूजयेदित्यर्थः । तथा-

..... तद्वज्रं द्विविधं प्रोक्तं कोष्ठकोणात्मभेदतः ॥६०॥

कोणात्मवज्रनिर्माणप्रयोगाः परतः शिव । तयोस्तु कोष्ठरूपं तु वज्रं वक्ष्ये यथाविधि ॥६१॥

यत्साधकेप्सितावाप्त्यै सुराङ्घ्रिपसमो भवेत् । प्राक्प्रत्यग्दक्षिणोदक्च चतुर्विंशतिसूत्रतः ॥६२॥

नवविंशतिभिः पञ्चशतं कोष्ठानि तेषु वै । कोणेषु मार्जयेत्षडभिः षष्टिकोष्ठानि पूर्ववत् ॥६३॥

शिष्टेषु वज्रकोष्ठानि पञ्चषष्ट्या शतद्वयम् । तेषु प्राग्वत्त्रिकोणानि चतुर्दिक्षु चतुष्टयैः ॥६४॥

कोष्ठैर्विधायाधो मध्ये बाह्यारम्भात्प्रदिक्षणम् । प्रवेशगत्या विलिखेच्चित्रादिललितान्तकम् ॥६५॥

मध्येऽवशिष्टेष्वन्यार्ण चतुर्विंशतिमालिखेत् । ललितार्णचतुर्भेदजनितां नामशक्तियुक् ॥६६॥

ललितां साध्यगर्भां तु विलिखेन्मध्यकोणतः । एवं यन्त्रं समालिख्य शिलालोहत्रयादिषु ॥६७॥

संस्थाप्य कुत्रचित्स्थाने पूजयेद्वाञ्छिताप्तये । यस्मिन् देशे वज्रयन्त्रं स्थापितं योजनाविधि ॥६८॥

मङ्गलान्येव जायन्ते नामङ्गलकथा क्वचित् । पूजाचक्रे च तासां तु नामानि प्रतिकोणम् ॥६९॥

विलिख्य मध्ये ललितां साध्यगर्भां समालिखेत् । बहिर्वृत्ते मातृकां च तच्चक्रं स्थापयेद् भूवि ॥७०॥

तेनापि पूर्ववत्प्रोक्तं देशे न स्यादभव्यकम् । तस्मिन् सर्वत्र संलिख्य तां विद्या सर्वमङ्गलाम् ॥७१॥

मध्ये साध्याक्षरोपेतां स्थापयेत्तत्फलाप्तये । प्रागुक्ते वज्रयन्त्रे वा द्वादशारेऽपि वा शिवे ॥७२॥

संस्थाप्य कुम्भं तद्वर्णभूरुहक्वाथपूरितम् । विद्यया विधिवज्जप्तैरभिषिञ्चेज्जलैः शुभे ॥७३॥

जन्मर्क्षेषु विशेषेण समस्ताभयशान्तये । पूर्णसंपत्समृद्ध्यै च ग्रहरोगादिशान्तये ॥७४॥

तथान्यमपि देवेशि प्रयोगं सर्वपावनम् । दारिद्र्यवनदावाग्नि पापाब्धिवडवानलम् ॥७५॥

संकोचध्वान्तमार्त्तण्डं सन्तोषाब्धिविधूदयम् । प्रागुक्ताक्षरसंभिन्नां विद्यां नित्यां समाहितः ॥७५॥

मौनी जपेत्सप्रसूनैश्च पूजयेत्सौरभान्वितै । तपयेत्सलिलैः सिन्धुगामिनी सम्भवैः शिवे ॥७६॥

सौरभाढ्यैस्तिलैः शुभ्रैस्तण्डुलैर्विधिवद् हुनेत् । संस्थाप्य कुम्भ प्रोक्ताम्बुपूर्ण सम्पूज्य भक्तितः ॥७७॥

प्रोक्ताम्बु अक्षरौषधिक्वाथम् ।

समस्तं तत्क्रमादेकवारं तैरभिषकेतः । घोराभिचारकृत्यादि दुःखेभ्यो मुच्यते क्षणात् ॥७९॥

भूतप्रेतपिशाचापस्मार राक्षस यक्षकाः । कुमार गुह्यका वीरा डाकिन्यश्चातिदारुणाः ॥८०॥

विमुच्य तत्क्षणाद्व्रोक्ताः प्रयान्त्येवान्यतः क्षणात् । समुद्रगासरित्तोये ताः समावर्तयेस्थितः ॥८१॥

कण्ठमात्रे मण्डलात्तु प्राग्जन्माधैर्विमुच्यते । तथैव घृतहोमेन तर्पणाचाब्धिवारिभिः ॥८२॥

एवं सकलकल्याणा सम्प्रोक्ता सर्वमङ्गला । नामानुरूपं भजतां कृपया फलदानतः ॥८३॥

क्षिप्रप्रसादतो नित्यं हर्षोत्पादनतोपि च ।

|| सर्वमंगला प्रयोग:||

सर्वमंगला पूजन में चन्द्र, सूर्य, अग्नि की मूर्ति व उनकी कलाओं का पूजन अवश्य करें।

चन्द्रकला – अमृता, मानदा, पूषा, तुष्टी, पुष्टी, रति, धृति शशिनी, चन्द्रिका, कांति, ज्योत्सना, श्री, प्रीति, अंगदा, पूर्णा, पूर्णामृता, १६ कलायें हैं। प्रत्येक स्वर मातृका इनकी शक्ति है।

सूर्यकला – तपिनी, तापिनी, धूम्रा, मरीचि, ज्वालिनी, रुचि, सुषुम्ना, भोगदा, विश्वा, बोधिनी, धारिणी, क्षमा ये १२ कलाये हैं।

द्वाद्वश सूर्य– धाता, अर्यमा, मित्र, वरुण, सौभग, विवस्वान, इन्द्र, पूंषा, अर्क, पर्जन्य, त्वष्टा, विष्णु १२ नाम सूर्य के है।

मातृका शक्तियां – भं बं फं पं नं धं दं थं तं णं ढं डं ये १२ सूर्य कलाओं की मातृका शक्तियां है। **कं खं गं ङं चं जं झं ञं टं ठं** ये १२ अर्क की मातृका शक्तियाँ है।

अग्निकला – घूम्रार्चि, उष्मा, ज्वलिनि, ज्वालिनी, विस्फुलिङ्गिनी, सुश्री, सुरूपा, कपिला, हव्यवाहा, कव्यवाहा।

मातृका शक्तियाँ – यं रं लं वं शं षं सं हं लं क्षं ।

सर्वमंगला बीज मंत्र – स्वों। ॐ स्वों

मंत्र – स्वों सर्वमगलायै नमः।

|| मंत्र प्रयोग ||

स्वों अं आं ....अं अ: ॐ। स्वां अं आं .... अं अ: कं । स्वां अं आं ....अं अ: खं। इस तरह क्ष तक जप करें। ३६×१६= ५७६ वर्णों का उच्चारण मंत्र के अलावा होगा।

ॐ की जगह "**ह्रीं**" तथा मातृकाओं में अनुस्वार की जगह विसर्ग **कः खः** प्रयुक्त करके भी जप कर सकते हैं।

यदि बीज मंत्र को १६ स्वर युक्त करके "**ह्रीं**" सहित **क** से क्ष =१६ वर्ण से जप करे तो ५७६ वर्णों का उच्चारण भेद होगा। जैसा कि टीका में बताया गया है। यथा – **स्वं अं स्वं** आं .... **स्वं क्षं। स्वां अं स्वां आं .... स्वां क्षं। स्विं अं स्विं आं.......... स्विं क्षं।** इस तरह नाना जप विधि है।

|| यंत्र रचना ||

दो वृत्त बनायें, उनके बाहर षट्कोण बनाये, पश्चात् अष्टदल पुनः दो वृत्त बनायें। मध्य में साध्य नाम लिखे। प्रयोग में कूटाक्षरों का वर्णन नहीं होने से प्रयोग पूर्ण नहीं दिया जा सका है। पुन: यदि प्रधान कूट "**स्वां**" को ही माने तो प्रत्येक षट्कोण में ४-४ बार लिखे। अष्टदल में ५-५ वर्ण लिखे। अष्टदल बाहर वृत्तों के अंतराल में विसर्ग सहित मातृका लिखे। यथा – **अः आः इः .... क्षः।** षट्कोण में उस दिन तिथी की नित्या के षडङ्गो का पूजन करें।

मंत्र विद्या के १३२७१०४ भेद बताये है। श्लोक ६१-६८ अन्य यंत्र विधान दिया है। पश्चात् प्रयोग फल व विधि का वर्णन है।

|| इति सर्वमङ्गलानित्या प्रयोग विधिः ||

॥ १४. अथ ज्वालामालिनी (पंचदशीतिथी कला) नित्या प्रयोगः॥

मंत्र - ॐ नमो भगवति ज्वालामालिनी देव देवि सर्वभूतसंहार कारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रीं ह्रूं र र र र र र र र ज्वालामालिनी हुं फट् स्वाहा। (त्रिपुरार्णवे)

विनियोग - अस्य मंत्रस्य कश्यप ऋषिः, गायत्री छंदः ज्वालामालिनी नित्यादेवता, रं बीजं, फट् शक्तिः हुं कीलकं ममाभीष्टये विनियोगः।

पूर्वमंत्रों की विधि अनुसार ऋषि न्यास करे।

षडङ्गन्यास - ॐ हृदयाय नमः। नमः शिरसे स्वाहा। भगवति शिखायै वषट्। ज्वालामालिनि कवचाय हुं। देवदेवि नेत्रत्रयाय वौषट्। सर्वभूत संहारकारिके अस्त्राय फट्। मूलमंत्र से व्यापक न्यास करे।

॥ ध्यानम् ॥

ज्वलज्ज्वलनसङ्काशां माणिक्यमुकुटोज्ज्वलाम् । षड्वक्त्रां द्वादशभुजां सर्वाभरणभूषिताम् ॥
पाशांकुशौ खेटखड्गौ चापवाणौ गदाधरो । शूलवह्नी वराभीती दधानां करपङ्कजैः ॥
स्वसमानाभिरभितः शक्तिभिः परिवारिता । चारुस्मित लसद्वक्त्रसरोजां त्रीक्षणान्विताम् ॥

॥ यंत्र पूजनम् ॥

त्रिकोण, षट्कोण, अष्टकोण पश्चात् अष्टदल बनाये उनके बाहर चारद्वार युक्त भूपुर बनाये। भुवनेश्वरी की नवपीठ शक्तियों का पूजन तक ध्यान पूर्वक देवी का आवाहन करे। आवरण देवताओं की नामावली के पहले **''ह्रीं श्रीं''** तथा बाद में **पादुकां पूजयामि तर्पयामि** सर्वत्र कहें।

॥ श्री ज्वालामालिनी यन्त्रम् ॥

प्रथमावरणम् - (त्रिकोण षट्कोण कर्णिकायां)- पूर्वविधि से षडङ्गन्यास मंत्रों से हृदयादि अंग देवताओं का पूजन करे। त्रिकोण समीप में **दिव्यौघ, सिद्धौघ, मानवौघ गुरु** पंक्ति का पूजन करे।

द्वितीयावरणम् - (त्रिकोण षट्कोणयोरन्तराले) **ह्रीं श्रीं अभीत्यै नमः। वह्नये नमः। शङ्खाय नमः। वाणेभ्यो नमः। खड्गाय नमः। अंकुशाय नमः। पाशाय नमः। खेटाय नमः। चापाय नमः। गदायै नमः। शूलाय नमः। वराय नमः।**

तृतीयावरणम् - (त्रिकोणे) **ह्रीं श्रीं इच्छाशक्ति पा.। ज्ञानशक्ति पा.। क्रियाशक्ति पा.।**

चतुर्थावरणम् - (षट्कोणेषु) वामाग्रकोणे **ह्रीं श्रीं डाकिनी पा.।** दक्षिणाग्रकोणे **राकिनी पा.।** पृष्ठकोणे **लाकिनी पा.।** पृष्ठवामकोणे **काकिनी पा.।** पृष्ठदक्षे **शाकिनी पा.।** अग्रकोणे **हाकिनी पा.।**

पंचमावरणम् - (अष्टकोणेषु) **ह्रीं श्रीं घस्मरा पा.। विश्वकवला पा.। लोलाक्षी पा.। लोजाजिह्विका पा.। सर्वभक्षा पा.। सहस्त्राक्षी पा.। निः सङ्गा पा.। संहृतिप्रिया पा.।**

सप्तमावरणम् – (अष्टदलेषु) ह्रीं श्रीं अचिन्त्या पा.। अप्रमेया पा.। पूर्णरूपा पा.। दुरासदा पा.। सर्वा पा.। संसिद्धिरूपा पा.। पावना पा.। एकरूपिणी पा.।

अष्टमावरणम् – (भूपुरे) देवी के अग्रद्वार से क्रमश चारों द्वारों में दो दो करके **ब्राह्मी आदि अष्टमातृकाओं** का पूजन करे।

नवमावरणम् – (भूपुरे) वायव्यकोण से निर्ऋति पर्यन्त अनंतशक्ति पा.। ब्रह्मशक्ति पा.। नियति शक्ति पा.। कालशक्ति पा.। पूर्वादि अष्टदिशाओं में इन्द्रादि दिक्पालों एवं इन्द्राणी आदि **अष्टशक्तियों** का पूजन करे। पश्चात् देवी का सर्वोपचार पूजन कर बलि प्रदान करे। ॥

गायत्री मन्त्र – **ज्वालामालिन्यै विद्महे महाज्वालायै धीमहि तन्नो नित्या प्रचोदयात्॥**

॥ अथ कादीक्रमानुसार ज्वालामालिनी नित्या प्रयोग विधिः॥

(श्रीतन्त्रराजे)

अष्टलक्षं हविष्याशी जपेद्विद्यां जितेन्द्रियः । तद्दशांशं तर्पणं च होमं कुर्याच्च गोघृतैः ॥१॥
एवं संसिद्धमन्त्रस्तु कुर्याद्यन्त्राण्यनुक्रमात् । पूजाचक्रे बहिर्भूतचतुरस्रे त्वखण्डिते ॥२॥
विधाय तत्र विलिखेदक्षराणि यथाविधि । सर्वमध्ये तारगर्भ शक्तिमाख्यासमन्विताम् ॥३॥
त्रयं च त्रिषु कोणेषु षट्सु षट्कमथाष्टसु । अष्टकं बहिरप्येवं बाह्ये दिक्षु नव क्रमात् ॥४॥
एवं मूलाक्षरैः कृत्वा यन्त्रं तेनैव साधयेत् । समस्तं वाञ्छितं पूजाधारणस्थापनैः शिवे ॥५॥

अथैतद्यन्त्ररचनाप्रकारः– **तत्र मध्ये त्रिकोणं तद्बहिः षट्कोणं तद्बहिरष्टास्त्रं तद्बहिरष्टदलकमलं तद्बहिर्द्वाररहितं चतुरस्रमिति चक्रं निर्माय, मध्ये साध्याख्यागर्भं मायाबीजं प्रणवोदरं विलिख्य त्रिषु कोणेषु त्रीण्यक्षराणि षट्सु कोणेषु षडक्षराणि चाष्टकोणेष्वष्टाक्षराणि अष्टदलेष्वष्टाक्षराणि चतुरस्रे प्रागादिक्ष्वष्टावक्षराणि मूलमन्त्रस्य लिखेत्।**

एतद्यन्त्रमुक्त फलं भवति। यथा–

अकारादिक्षकारादिन्त वर्णेषु स्वरयोगिषु । चतुष्टयं प्रोक्त यन्त्रं वर्णैस्तत्स्थानतो लिखेत् ॥६॥
शिष्टमेकं लिखेत्मध्ये साध्याक्षर समन्वितम् । एवं यन्त्राणि जायन्ते दश तेषामनुक्रमात् ॥७॥
विनियोगात्फलानि प्रवक्ष्यामि शृणु प्रिये । यैरिष्टमखिलं प्राप्नोत्ययत्नात्साधको ध्रुवम् ॥८॥
द्वितीयादीनि यन्त्राणि मातृकार्णयुतानि वै । क्रमान्नवग्रहाणां स्युस्तत्तद् द्वारेषु तद्दिशि ॥९॥
तेषु देव्यर्चनात्प्रीतास्त्वनिष्टं ते न कुर्वतिते । राहुकेतु स्थितौ यत्र तद्राश्यधिपवारके ॥१०॥
षडस्राष्टान्तरालेषु ग्रहनाम द्वितीयया । विभक्त्या भाजने सम्यक् प्रीणयामीति संलिखेत् ॥११॥
आद्ये तु यन्त्रे संलिख्य प्रोक्तक्रममर्थार्चयेत् । सर्वेष्वपि च वारेषु सर्वेषां प्रीतिसिद्धये ॥१२॥
अनिष्टशान्त्यै नियतमर्चयेत्तान् ग्रहान् प्रिये । एवं मन्त्रेषु दशसु पूजिता नित्यया सह ॥१३॥
प्रीताः क्रूरा अपि क्रूरास्था अपि सर्वदा । सौम्याः सौम्यगतानां तु फलान्येव वितन्वते ॥१४॥
दशस्वपि च यन्त्रेषु दरदैर्गैरिकैस्तु वा । लिखितेष्वर्चितेष्वेवं कुमारं कन्यकां तु वा ॥१५॥

सुशुभावयवां मुग्धां स्नाता धौताम्बरां शुभाम् । तथाविधं कुमारं वा संस्थाप्याभ्यर्च्य विद्यया ॥१६॥
स्पृष्टशीर्षो जपेद्विद्यां शतवारं तथार्चयेत् । प्रसूनैररुणैः शुभ्रैः सौरभाढ्यैरथापि वा ॥१७॥
दद्याद् गुग्गुलधूपं च यावत्कार्यावसानकम् । ततो देव्या समाविष्टे तस्मिन् सम्पूज्य भक्तितः ॥१८॥
ततस्तामुपचारैस्तैः प्रागुक्तैर्विद्यया वशी । प्रजपेत् तां ततः पृच्छेदभीष्टं कथयेच्च सा ॥१९॥
भूतं भवद्भविष्यं च यदन्यन्मनसि स्थितम् । जन्मान्तराण्यतीतानि सर्वं सम्पूजिता वदेत् ॥२०॥
ततस्तां प्राग्वदभ्यर्च्य स्वात्मन्युद्वास्य तां जपेत् । सहस्रवारं स्थिरधीः पूर्णात्मा विचरेत्सुखी ॥२१॥
तथा षट्कोणकोणेषु मध्ये चालिख्य दाहकम् । तत्र संस्थाप्य गदिनमभ्यर्च्योदीरित क्रमात् ॥२२॥
आवेश्य रोगिणं रोगं पृच्छेत् तत्कारणं शमम् । प्रोक्त्वा तत्सकलं तस्य निर्दशादपयाति च ॥२३॥
प्रथमं स्त्रीकपालस्य मध्यस्थं तापयेन्निशि । जपन् विद्यां स्मरन् साध्यां सद्य आकृष्यतेऽथ ॥२४॥
भीतिलज्जाभिमानादि रहिता वेपिताङ्गका । निरस्तेतरसद्भावा मन्मथार्ताभियाति सा ॥२५॥
तद्यन्त्रं पुंस्कपालस्थं स्थापयेत्प्रजपेत्तथा । राजानो राजपुत्रा वा तथान्ये वापि केचन ॥२६॥
विवेकविधुरा मूढास्त्यक्त जातिकुलक्रमाः । वशगाः दासवद्भूमौ तिष्ठन्त्यामरणाद् ध्रुवम् ॥२७॥
सर्वासामपि नित्यानामुपदेशेषु तं गुरुः । तत्र चक्रस्य मध्यस्थं चेष्टविद्याजपान्वितम् ॥२८॥
वह्निज्वालापरीताङ्गं भावयन्निन्द्रियाण्यपि । मनः षष्ठानि वाकर्षन्मनसा प्राग्वदात्मनि ॥२९॥
एवं कृते क्षणादेवं विसंज्ञो निपतेद्भुवि । ततस्तमुत्थाप्य मुखे प्रक्षिप्ताम्बु वदेत्ततः ॥३०॥
एष वेधस्त्रिधा प्रोक्तः सद्यः प्रत्ययकारकः । शाक्तशाम्भव वेधाभ्यां द्वयोरात्मैक्ययामलात् ॥३१॥
शिष्यस्य मूलाधारादिस्थानेषु ब्रह्मरन्ध्रके । स्मर दाहार्णकान् सप्तेत्युक्त्वा प्राग्वदुदीक्षणात् ॥३२॥
विदध्याच्छाक्तवेधं तु देशिकः सिद्धविद्यया । शाम्भवं तु शृणु प्राज्ञे वेधमद्भुतविग्रहम् ॥३३॥
तूष्णीं संस्थापितं शिष्यं तत्तचक्रे तदात्मना । स्वयं प्रविश्य तद्देहमेकोभूत्वा पुनः स्वके ॥३४॥
समागत्यात्मरूपेण तदात्मानं विभाव्य वै । कृतन्यासजपार्चस्तु तत्तनुं वह्निना दहेत् ॥३५॥
स्यादेष शाम्भवो वेधः प्रोक्तः प्रागेव यामलः । इति वेधत्रयं प्रोक्तं भावनासिद्धि सूचकम् ॥३६॥
यामले तु विशेषोऽयं विद्धः पश्चाद्गुरोः श्रुतम् । ज्ञानमन्यच्च सकलं संक्रमेत् तेन तत्समः ॥३७॥
रक्तचन्दन पंकेन लिखित्वा प्रथमं शिवे । लोहैर्विरचिते पट्टे फलकायां शिलातले ॥३८॥
भूमौ व सुसमे शुद्धे लोष्टाङ्गार विवर्जिते । देवीमावाह्य तत्रैव पूजयेच्छक्तिभिर्वृताम् ॥३९॥
दिनं दिनत्रयं सप्तवासरं पक्षमेव वा । मासं मण्डलमित्येवं क्रमादिष्टमवाप्नुयात् ॥४०॥
वश्यमाकर्षणं स्तम्भं निग्रहं लाभमीप्सितम् । अन्यच्च सकलं त्विष्टमवाप्नोत्यर्चनादद्भुतम् ॥४१॥
तदा प्रोक्तगदान्सर्वान् जयेदन्यांस्तथाखिलान् । साधयेत्प्रथमेनैव यन्त्रेणायत्नतः शिवे ॥४२॥
द्वितीयं दरदैः कृत्वा प्रोक्तेषूच्चगते रवौ । पूजयेत्प्रोक्तकालेन फलान्युक्तान्यवाप्नुयात् ॥४३॥

विलिख्य राजते पट्टे जपित्वा दिनशः स्पृशन् । सहस्रवारं तां नित्यां विद्यां तद्वासिताम्बुभिः ॥४४॥
स्नानं पानं पाकजातं कुर्यादुक्तदिनं ततः । प्रमेहैस्त्रिविधैर्घोरैर्मूत्र कृच्छ्रैः सुदारुणैः ॥४५॥
अश्मरीमूत्रघातादिरोगैर्मुक्तः सुखी भवेत् । जीवेच्च सुचिरं भूमौ निरोगः स्वस्थमानसः ॥४६॥
तृतीयं गैरिकैः कृत्वा वैरिनक्षत्रवृक्षजे । तले भूमौ ततः खात्वाः तत्राग्निं ज्वालेयत्सदा ॥४७॥
प्रोक्तैस्तैर्वासरैर्वैरी दाहज्वर गदादिभिः । तच्च नोद्धृत्य सलिले प्रक्षिपेच्चेद्विनश्यति ॥४८॥
चतुर्थं रोचनापंकैरालिख्योक्त प्रपूजनात् । प्राप्नोति विजयं प्रोक्तष्वखिलेषु सुनिश्चितम् ॥४९॥
वादे च द्विविधे द्यूते ग्रहेष्वन्येषु सर्वतः । सर्वदा जयिनः सर्वे भवन्त्येतस्य वैभवात् ॥५०॥
पञ्चमं कुंकुमैः कृत्वा तत्र तत्पूजनाद्दिनैः । वशे भवन्ति मनुजा दन्तिनो वाजिनः स्त्रियः ॥५१॥
षष्ठं हरिद्रयालिख्य कर्पटे नामसंयुतम् । मन्दोच्चे स्थापयेत् क्वापि सुबद्धं त्विष्ठकापुटे ॥५२॥
शत्रोर्जिह्वां गतिं दोषं दिव्यं राज्ञां समुद्यमम् । वादेच्छां सकलं चान्यदनिष्टं स्तम्भयेद्ध्रुवम् ॥५३॥
सप्तमं चन्दनैरिन्दुमिलितैरालिखेत्तथा । तत्रार्चयेत् नित्यशस्तां सन्ध्यासु भुवने निजे ॥५४॥
तद्दिनैरिन्दिरा तस्य सर्वलोकातिशायिनी । भवत्येव महेशानि विचित्रा यन्त्रशक्तयः ॥५५॥
अष्टमं त्वगुरुक्षौदैरालिखेत्फलकापुटे । पीठे वा तत्र तां देवीं गुरावुच्चगते दिने ॥५६॥
तदुच्चकाले सुरभिप्रसुनैस्त्वेवमर्चयेत् । वासांसि च विचित्राणि भूषणान्यप्यवाप्नुयात् ॥५७॥
मृगस्वेदैस्तु नवममालिख्याभ्यर्च्य तत्र ताम् । तदालिप्तो व्रजेद्यत्र कुत्रापि जनसंसदि ॥५८॥
सर्वे तं गुरुवद् बुद्ध्वा वशे स्युर्वनिता यदि । तदिष्टसाधिका यावज्जीवमस्यानुभावतः ॥५९॥
विलिखेद्दशमं प्रोक्तद्रव्यैः सर्वेस्तथैकशः । सद्यस्तैरीरितं सर्वं कार्यमेतत्सुसाधयेत् ॥६०॥
प्रोक्तेषु दशसु प्रोक्तद्रव्यैरालिख्य तेषु च । संस्थाप्य कुम्भं विधिना जापत्वोग्रग्रहे तदा ॥६१॥
अभिसिञ्चेत् तद्ग्रहस्य दोषस्थानगतं फलम् । न भवेच्छुभमेव स्यादेवं यन्त्रेष्वशेषतः ॥६२॥
तथा तदुच्चे तत्पूजां होममन्नाज्यपायसैः । निवेद्य प्रणम्यार्घ्ययुतं दद्याच्छिवात्मवान् ॥६३॥
तत्तद्ग्रहार्तिषु क्षिप्रं ते ग्रहास्तत्प्रभावतः । एकादशस्थफलदा नित्यशो यजनादपि ॥६४॥
सुवर्णे रजते वा तद्यन्त्रेष्वन्यतमं शिवे । विलिख्याभ्यर्च्य तद्विद्याविदे दद्यात्सुपूजितम् ॥६५॥
षोडशद्वादश नवषट्त्रिनिष्कप्रकल्पितम् । नित्यार्चकस्य नित्यानामेकां पूजयितुं वा ॥६६॥
दद्याद् गन्धादिनार्च्यैतं प्रणम्य ग्रहविग्रहम् । पश्चिमामुखासीनं तस्मै प्रोक्तविधानतः ॥६७॥
विद्याजप्ताम्बुपानेन वर्धते कुक्षिगोऽनलः । भुक्ते च जठरस्पर्श जपादपि सुनिश्चितम् ॥६८॥
मेषादिराशगे भानौ मासेषु द्वादशस्वपि । प्रोक्तेषु दशयन्त्रेषु प्रत्येकं त्रित्रिवासरम् ॥६९॥
पूजयेदेवमब्देन धनधान्यगृहादिभिः । समृद्धो जीवति चिरमरोगः (चिरं + अरोग) सुमना भव ॥७०॥
यद्राशौ यो ग्रहस्तिष्ठत्येको द्वौ बहवोथवा । तद्दिनेषु तदुच्चेषु कालेषु च तदर्चनात् ॥७१॥

तत्तद्ग्रहाः सुसम्प्रीताः पालयन्त्यनिशं च तम् । तथा तर्पणहोमाभ्यां जपदानादिनापि वा ॥७२॥
नवस्वपि च यन्त्रेषु नवग्रहमयत्रतः । तत्तत्क्षोभं विलिख्यान्तः पूजयेद्वैरिमर्दने ॥७३॥
रिपूनामयुतान्युक्तान्यालिख्य रविचन्द्रयोः । उपरागे समे भूमौ दिनशो जयमाप्नुयुः ॥७४॥
विद्याक्षरौषधीनां तु प्रत्येकं कर्षमर्पितम् । भाण्डे नवे पञ्चगव्ये खारिमाने पञ्चेच्च तत् ॥७५॥
विद्यया संस्कृते वह्नौ ततस्तदुदरोस्थिते । घृतेन विद्यया हुत्वा तद्भस्मादाय तत्र वै ॥७६॥
यन्त्राणि दश निष्पाद्य तत्र देवीं यजेत्तथा । ततस्तद्भस्म संगृह्य निदध्याद्दिनशोऽर्चयेत् ॥७७॥
तद्भस्म सर्वरक्षाकृत्सर्वारिभिरपि साधयेत् । गदचोरग्रहारिष्टक्लेशा न स्युश्च तद्गृहे ॥७९॥
वह्न्यक्षरेषु दशसु व्यञ्जनैः सप्तभिः पृथक् । स्वरत्रयं क्रमाद्युञ्ज्यात् तेन तान्येकविंशति ॥८०॥
त्रिकोणद्वयमालिख्य बाह्याभ्यन्तरयोगतः । तदन्तर्वृत्तमध्यस्थं षडस्त्रं च विधाय तु ॥८१॥
नामाद्यं विलिखेन्मध्ये षटकोणेषु च षट् क्रमात् । विलिखेदग्रमारभ्य प्रादक्षिण्येन पार्वति ॥८२॥
त्रिकोणान्तरतो लिख्य चतुर्दश तथा क्रमात् । शिष्टे साध्याक्षरं त्वग्रे लिखेत् पञ्चदशस्वपि ॥८३॥
क्रमेण मध्ये त्वन्येषां निवेशादेकविंशति । भवन्ति यन्त्राणि तथा तैः कुक्ष्यग्निः प्रवर्धते ॥८४॥
त्रिकोणकारके पट्टे ताम्रे तानि विलिख्य वै । स्पृशन् विद्यां जपेल्लक्षं तद्वर्णकृतसम्पुटाम् ॥८५॥
तत्तोयभाण्डे दिनशो निक्षिपेज्जपपूजितम् । तत्तोयैः पाकपानाभिषेकतो भवति ध्रुवम् ॥८६॥
प्रदीप्तिर्जप्ठराग्नेस्तु प्रागजन्माघक्षयेण वै । जायते परमेशानि नित्यानां वैभवादिति ॥८७॥

अथैतद्यन्त्ररचना प्रकारः- **प्रथमतः षटकोणं विरच्य तद्बहिर्वृत्तं तद्बहिरन्तर्बहिर्विभागेन त्रिकोणद्वयं विधाय वह्नेर्दशाक्षरेषु सप्तव्यञ्जनानि स्वरत्रययोगेनैकविंशतिर्भवन्ति। तेष्वाद्यं साध्यनामगर्भं मध्ये विलिख्य द्वितीयादि षडक्षराणि षट्सु कोणेषु विलिख्यावशिष्ट चतुर्दशाक्षराणि त्रिकोणद्वयान्तरालेग्रात् प्रादिक्षण्यक्रमेणावेष्ट्य शिष्टे वह्न्यक्षरे साध्यनामगर्भं कृत्वाग्रेषु विलिखेत्। एवं मध्याक्षर भेदेनैकविंशतिर्भवन्ति, प्रोक्तफलेषुं योज्यानि प्रोक्तफलानि भवन्ति।**

॥ ज्वालामालिनी प्रयोग:॥

मूल मंत्र - (१) ॐ नमो भगवति ज्वालामालिनी देवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल हुं हुं र र हुं फट् स्वाहा।

(२) ॐ नमो भगवती ज्वालामालिनी गृध्रगणपरिवृते हूं फट् स्वाहा। (२४ अक्षर)

अष्ट लक्ष जप के पश्चात् हवनादि कर्म करें।

रोग नाश व शत्रु नाश हेतु विद्या का प्रयोग किया जाता है।

॥ यंत्र रचना॥

त्रिकोण, षट्कोण, अष्टकोण के बाद अष्टदल बनायें उनके बाहर द्वार रहित चतुरस्त्र बनाये। मध्य में **ॐ ह्रीं** सहितसाध्य नाम लिखे। त्रिकोण व षट्कोण में तीन व छह अक्षरों का वर्णन है परन्तु मंत्राक्षर या बीजाक्षर किसी का

भी उल्लेख नहीं है।

अतः या तो "**ह्रीं**" बीज का प्रयोग करें। अथवा वह्नि बीज "रं" का प्रयोग करें।

त्रिकोण के तीनों कोणों में "**ह्रीं**" बीज लिखें। षट्कोण में "रं" छः बार लिखें। अथवा **रां, रीं, रूं, रैं, रौं, रः** लिखें।

यदि "**ऐं क्लीं सौः**" का प्रयोग करते हैं तो त्रिकोण में "**ऐं, क्लीं सौः**" लिखें तथा षट्कोण में "**ऐं क्लीं सौः, सौः क्लीं ऐं**" लिखें।

षट्कोण के बाहर अष्टकोण में २४ अक्षर मन्त्र के ८ वर्ण लिखें। अष्टकोण के बाहर अष्टकमल दल में पुनः ८ वर्ण आगे के लिखें। चतुरस्र के बाहर आठों दिशाओं में पूर्वादि क्रम से शेष ८ वर्ण मूल मन्त्र के लिखें।

अन्य प्रयोग में इस यन्त्र को "**अं आं......हं लं क्षं**" तक वर्णों से वेष्टित करें। यदि प्रत्येक यन्त्र में मातृका के एक एक स्वर मातृका "**अं, आं, इं, ...**" अलग अलग लिखें तो सोलह यन्त्र बनेंगे। यदि विसर्ग युक्त "**अः आः ....**" क्रम से अलग अलग संयोग करें तो अन्य सोलह यन्त्र बनेंगे। यदि मातृका का स्वर विलोमक्रम से लिखें तो पुनः सोलह यन्त्र होंगे। इस तरह ४८ यन्त्र बनेंगे।

श्लोक छः से इकत्तीस तक प्रयोग विधि है। ३१-३५ शिष्य हित के लिये प्रयोग हैं। इसके बाद में शिला, पट्टिका या त्रिलोहपट्टिका में लिखने के प्रयोग वर्णित हैं। श्लोक ६१-६२ अभिषेक शान्ति तथा ६३-८७ शान्ति कर्म है।

अन्य प्रयोग में भी मन्त्र नहीं दिया गया है। लिखा गया है कि दशाक्षर मन्त्र के बाद सप्तव्यञ्जन पश्चात् तीन स्वर लगाने से २१ अक्षर मन्त्र बन जाता है, जबकि इनका योग २० हुआ।

अतः मन्त्र दशाक्षर या एकदशाक्षर होगा। सप्तव्यञ्जन व तीन स्वर का उल्लेख नहीं है।

मन्त्र – १. **ॐ ज्वालामालिन्यै नमः**। (नवाक्षर)

२. **भगवति ज्वालामालिन्यै नमः**। (एकादशाक्षर)

३. **ह्रीं ज्वालामालिन्यै र र स्वाहा**। (दशाक्षर)

॥ इति ज्वालामालिनी नित्या प्रयोग विधिः ॥

॥ १५. अथ चित्रा (षोड़शीकला) नित्या प्रयोगः॥

षोडशनित्यासु या चित्रा षोडशी शिवे ।
प्रोक्ता तत्कल्पमधुना शृणु सर्वार्थ सिद्धिदम् ॥

इस कला को विचित्रा भी कहा जाता है। षोड़शी की नित्या कलाये चन्द्रकला के अनुसार एवं तिथिक्रम से है। वृद्धि क्षय को चन्द्रमा की कला ही माना है अलग से किसी नित्या का प्रयोग नहीं दिया गया है। अमावस्या की कला "**अमाकला**" को षोडशीकला भी कहा है।

मंत्र – च कौं। (त्रिपुरार्णवे)

विनियोग – अस्य मंत्रस्य ब्रह्माऋषिः गायत्री छंदः, विचित्रा देवता सर्वाभीष्टये विनियोगः। पूर्वविधिवत् ऋषि न्यास करे।

षडङ्गन्यास – **चां हृदयाय नमः। चीं** शिरसे **स्वाहा। चूं** शिखायै **वषट्। चैं कवचाय हुं। चों नेत्रत्रयाय वौषट्। चः अस्त्राय फट्।**

वर्णन्यास – बहिर्मातृका न्यास स्थानों में ''**च कौं**'' आगे लगाकर मातृका वर्ण सहित न्यास करे। **यथा- च कौं अं नमः शिरसि....चकौं क्षं नमः।**

॥ ध्यानम् ॥

उद्यदादित्यबिम्बाभां स्वर्णरत्न विभूषणाम् । नवरत्नकिरीटां च चित्रपट्टांशुकोज्ज्वलाम् ॥
चतुर्भुजां त्रिनयनां शुचिस्मित लसन्मुखीम् । सर्वानन्दमयीं नित्यां समस्तेप्सितदायिनीम् ॥
चतुर्भिश्च भुजैः पाशमंकुशं वरदाभये । दधानां मङ्गलापद्मकर्णिका नवयोनिगाम् ॥

॥ यंत्र पूजनम् ॥

कुंकुम गंधादि से पट्ट पर त्रिकोण, अष्टकोण, अष्टदल के बाद द्वात्रिंशद्दल बनाकर चार द्वार युक्त दो रेखा वाला भूपुर बनायें। **भुवनेश्वरी की नवपीठ शक्तियों** का अर्चन कर ध्यान पूर्वक देवी का आवाहन करे।

॥ श्री चित्रा यन्त्रम् ॥

प्रथमावरणम् – (त्रिकोण मध्ये) देवी के चारों ओर षड्दिक्षु में षडङ्गन्यास मंत्रों से हृदयादि शक्तियों का पूजन करें। त्रिकोण अष्टकोण के अंतराल में **दिव्यौघ सिद्धौघ, मानवौघ गुरु पंक्ति** का पूजन करे।

द्वितीयावरणम् – (त्रिकोणाष्टकोणयोरन्तरालेष्वेव) देवी के दक्षिण भाग में – **ह्लीं श्रीं अभयाय नमः, अंकुशाय नमः।** वामभाग में **पाशाय नमः, वराय नमः।**

तृतीयावरणम् – (त्रिकोणे) **ह्लीं श्रीं इच्छाशक्ति पा.। ज्ञानशक्ति पा.। क्रिया शक्ति पा.।**

चतुर्थावरणम् – (अष्टयोनिषु) **ह्लीं श्रीं अं....अः ब्राह्मी पा.। ह्लीं श्रीं कं....ङं माहेश्वरी पा.। चं....ञं कौमारी पा.। टं...णं वैष्णवी पा.। तं...नं वाराही पा.। पं....मं इन्द्राणी पा.।** यं....वं चामुण्डा पा.। **शं....क्षं महालक्ष्मी पा.।**

पंचमावरणम् – (अष्टदलेषु) **ह्लीं श्रीं** भद्रा पा.। भवानी पा.। भव्या पा.। **विशालाक्षी पा.। शुचिस्मिता पा.। कुंकुमा पा.। कमला पा.। कल्पा पा.।**

षष्ठमावरणम् – (द्वात्रिंशद् दलेषु) **ह्लीं श्रीं कामिनी पा.। खेचरी पा.। आर्या पा.। पुराणा पा.। परमेश्वरी पा.। गौरी पा.। शिवा पा.। अभेया पा.। विमला पा.। विजया पा.। परा पा.। पवित्रा पा.। पद्मिनी पा.। विद्या पा.। विश्वेश्वरी पा.। शिववल्लभा पा.। अशेषरूपा पा.। आनंदा पा.। अम्बुजाक्षी पा.। अनिन्दिता पा.। वरदा पा.। वाक्प्रदा पा.। वाणी पा.। विविधा पा.।** वेदविग्रहा पा.। वन्द्या पा.। **वागीश्वरी पा.। सत्या पा.। संयता पा.। सरस्वती पा.। निर्मला पा.। नादरूपा पा.।**

सप्तमावरणम् – (भूपुरे) पूर्वादिक्रम से इन्द्रादि अष्टदिक्पालों व इन्द्राणी आदि शक्तियों का अर्चन करे। **वायुकोणे**

अनंतशक्ति पा. । ईशाने – **ब्रह्मशक्ति पा.** । **आग्नेये नियति शक्ति** पा. । **निर्ऋति कालशक्ति पा.** । पश्चात् सर्वविध देवी का अर्चन करे।

गायत्री मन्त्र – विचित्रायै विद्महे महानित्यायै धीमहि तन्नो नित्या प्रचोदयात्॥

॥ अथ कादिक्रमोक्त विचित्रा (चित्रा) नित्या प्रयोग विधिः॥

(श्रीतन्त्रराजे)

काम्यहोम विधि वक्ष्ये सर्वार्थदायकम् । येनातिमन्दभाग्योपि श्रीमान् भोक्ता सुखी भवेत् ॥१॥
मधुरत्रय संसिक्तैररुणैरम्बुजैः श्रियम् । प्राप्नोति मण्डलाद्धोमात् सितैस्तैश्च महद्यशः ॥२॥
क्षौद्राक्तैरुत्पलैः रक्तैर्हवनात् प्रोक्तकालतः । सुवर्ण समवाप्नोति निधिं वा वसुधां तु वा ॥३॥
क्षीराक्तैः कैरवैर्होमात् प्रोक्तकालमवाप्नुयात् । धान्यानि विविधान्याशु सुभगस्तु भवेन्नरः ॥४॥
आज्यक्तैरुरत्परलैर्होमाद्वांछितं समवाप्नुयात् । तदक्तैरपि कह्लारैर्हवनाद्राजवल्लभः ॥५॥
पलाशपुष्पैस्त्रिस्वादुयुक्तैस्तत्काल होमतः । चतुर्विधं तु पाण्डित्यं भवत्येव न संशयः ॥६॥
लाजैस्त्रिमधुरोपेतैस्तत्काल हवनेन वा । कन्यकां लभतेऽयत्नात् समस्तगुण संयुताम् ॥७॥
नारिकेलफलक्षोदं ससितं सगुडं तु वा । क्षौद्राक्तं जुहुयात् तद्वदयत्नाद् धनदोपमः ॥८॥
तथैवान्नाज्य होमेन सतण्डुलतिलैरपि । प्रसूनैररुणैस्तद्वत् तथा बन्धूकसम्भवैः ॥९॥
सितैः प्रसूनैर्वाक्सिद्धिं हवनात् समवाप्नुयात् । सितरक्तैस्तु मिलितैरायुरारोग्यमाप्नुयात् ॥१०॥
दुर्वात्रिकैस्त्रिमध्वक्तैर्हवनात् जयेद्गदान् । तथा गुडूच्या होमेन पायसेन तिलेन च ॥११॥
श्रीखण्डपङ्क कर्पूरमिलितैः शतपत्रकैः । हवनाच्छ्रियमाप्नोति या तदन्वयगामिनी ॥ १२॥
कुंकुमं हिमतोयेन पिष्ट्वा कर्पूरसंयुतम् । तत्पङ्कमर्दितैर्होमात् कह्लारैर्विकचैः शुभैः ॥१३॥
राजकल्पः श्रिया भूयाज्जीवेद्वर्षशतं भुवि । निः सपत्नो निरातङ्को निर्द्वन्दो निर्मलाशयः ॥१४॥
इक्षुकाण्डस्य शकलैर्हवनाद् वस्त्रमाप्नुयात् । तथैव करवीरोत्थैः प्रसूनैररुणैः सितैः ॥१५॥
क्षौद्राक्तैः पाटलीपुष्पैर्हवनाद् वशयेद्वधूः । तथैव चम्पकैर्होमाद्रूपाजीवां वशं नयेत् ॥१६॥
सरूपवत्सासितगोक्षीराक्तसितहोमतः । लभतेऽनुपमां लक्ष्मीमपि पापिष्टचेतनः ॥१७॥
सौवीराक्तैस्तु कार्पासबीजैस्तत्कालहोमतः । अर्धेन्दुकुण्डे नियतं विद्विष्टां रिपवोम्बिके ॥१८॥
अरिष्ट पत्रैस्तद्वीजैस्तत्तैलाक्तैस्तथा हुतैः । मृत्युर्बीजै र्निम्बतैलसिक्तैर्होमात्तु दन्तिनः ॥१९॥
रोगार्तास्तुरगास्तद्वत् तत्पञ्चाङ्गैर्हुतैर्ध्रुवम् । अक्षबीजैस्तु तैलाक्तर्होमः सर्वविनाशनः ॥२०॥
करञ्जबीजैस्तत्सिक्तैर्होमाद्वैरी पिशाचवान् । तथैवाक्षतरूद्भूत पञ्चाङ्ग हवनादपि ॥२१॥
निम्बतैलाप्लुतैरक्षद्रुमबीजैस्तु होमतः । तद्दिनैः स्यादपस्मारी वैरी भवति निश्चितम् ॥२२॥
अरातेर्जन्म नक्षत्र वृक्षेन्धनगतेऽनले । तद्योनिपिशितैस्तैश्च हवनं मृत्युकृद्रिपोः ॥२३॥

****

यक्षाक्षबीजै सर्षपतैलाक्तैर्हवनात्तथा । जायन्ते वैरिणः कुष्ठरोगा देहविलोपकाः ॥२४॥
मरिचैः सर्षपैर्होमात् तैलाक्तैर्मध्यरात्रके । दाहज्वरेण ग्रस्तः स्यादरातिस्तद्दिनै ध्रुवम् ॥२५॥
एवं निग्रहहोमेषु स्वरक्षायै तथान्वहम् । स्निग्धैः सम्प्राप्तमन्त्रैस्तु जपहोमादि कारयेत् ॥२६॥
मृत्युञ्जयेन वा तद्वत् प्रयोगस्ताभिरेव च । विद्याभिरन्यथासिद्ध मन्त्रमाशु विनाशयेत् ॥२७॥
प्रागुक्तानां तु कुर्वीत निग्रहं स्वस्य रोषतः । वित्ताशया वा न कदाप्याचरेद्भूतिकामुकः ॥२८॥
नित्यक्लिन्नाविधौ प्रोक्तैस्तर्पणैस्तानि साधयेत् । अनया विद्यया कर्माण्यशेषाणि महेश्वरि ॥२९॥
अथ यन्त्राणि वक्ष्यामि नानाभीष्टप्रदानि वै । यैः सर्वे सर्वदा सर्व समीहितमवाप्नुयुः ॥३०॥
स्वरयुक्तलिपिव्रातगर्भां विद्यां समालिखेत् । सर्वत्रोक्तेषु विधिवत् स्थानेषु परमेश्वरि ॥३१॥
त्रिकोणं वृत्तयुग्मं च षट्कोणं तद्द्वयं तथा । तद्बहिः षड्दलं पद्मं तत्त्रयं च समालिखेत् ॥३२॥
आद्यकूटं लिखेत्साध्यगर्भं मध्ये विधानतः । त्रिकोणेषु च षट्कोणे षट्पत्रेषु समालिखेत् ॥३३॥
कूटान्यन्यानि चोक्तानि तत्र पञ्चदशान्यपि । अन्तर्वृत्तान्तरद्वन्दे भूताणांश्च क्रियोचितान् ॥३४॥
ससाध्यकर्मवर्णेश्च बहिर्वृत्तान्तरद्वये । मातृकां विलिखेन्मायाबिन्दुयुक्तां क्रमोत्क्रमात् ॥३५॥
एवं षड्विंशतिविधं यन्त्रं कुर्याद्विचक्षणः । परस्तात्तु शतेनापि षष्ठ्या कूटैर्लिखेत् पविम् ॥३६॥

अथैतद्यन्त्र रचना प्रकारः- मध्ये त्रिकोणं तद्बहिर्वृत्तद्वयं तद्बहिः षट्कोणं तद्बहिः पुनर्वृत्तद्वयं तद्बहिः षड्दलं पद्मं तद्बहिर्वृत्तत्रयमिति यन्त्रं विलिख्य, तन्मध्ये षोडशस्वर युक्त मूल विद्यायाः प्रथमं कूटं साध्यगर्भं विलिख्य त्रिकोणेषु कूटत्रयं षट्कोणेषु षट्कूटानि षड्दलेषु षट्कूटानीति षोडश कूटानि विलिख्याभ्यान्तर वृत्तान्तराले साध्यनाम युक्तं तत्तत्कर्मानुसारितत्तद्भूताक्षराणि द्वित्रिक्रमेण षट्कोणाद्बहिर्वृत्तान्तराले तान्येव भूताक्षराणि तथैव कर्मयुक्तानि विलिख्य बहिर्वृत्तान्तरालद्वयेभ्यन्तरान्तराले विसर्गयुक्त मातृकामनुलोमां विलिख्य तद्बहिरन्तराले बिन्दुयुक्तां विलोम मातृकां विलिखेत्। एवं द्वितीययन्त्रे मध्ये साध्यगर्भं द्वितीय कूटं विलिख्य प्रागुक्तक्रमेणान्यानि पञ्चदशकूटानि विलिखेत्। एवं तृतीय कूटादीनि तृतीयादिषु यन्त्रेषु विलिखेदिति षोडशयन्त्राणि निष्पाद्य प्रागुक्तामृत बीजपञ्चकं षोडशस्वर संयुक्तं कृत्वा तान्यशीति बीजानि बिन्दुयुक्तानि विसर्गयुक्तानि च षष्ट्युत्तरशत बीजानि कुर्यात्। ततस्तेषु प्रथमं मूलविद्याया सहितं मध्ये विलिख्य पञ्चदशबीजानि त्रिकोणादिषु विलिखेत्। एवं षोडश षोडशीबीजैर्दशयन्त्राणि विलिखेत्। एवं प्रागुक्तैः षोडशयन्त्रैः सह षड्विंशतिर्यन्त्राणि भवन्तीत्यर्थः॥

अथ सप्तविंशतितमं वज्ररूपं यन्त्रमाह-

प्राक्प्रत्यक्दक्षिणोदक च सूत्राण्यष्टादश क्षिपेत् । तैस्तु कोष्ठानि जायन्ते नवाशीति शतद्वयम् ॥३७॥
तत्र कोणेषु कोष्ठानि द्वात्रिंशन्मार्जयेत्तदा । ततो वज्र भवेन्मध्ये त्वेकषष्ट्या शतात्मकम् ॥३८॥
अस्य दिक्षु त्रिकोणानि विदध्यादेककोष्ठतः । मध्ये कोष्ठे लिखेद्विद्यां साध्याख्याकर्म संयुताम् ॥३९॥
त्रिकोणेषु तु तत्कूटान्यालिखेत् साध्यवन्ति च । प्राग्वदारभ्य विलिखेत् प्रादिक्षण्य प्रवेशतः ॥४०॥

एतद्वज्रं महायन्त्रं समस्तापन्निवारणम् ॥

अथैतद्यन्त्ररचनाप्रकारः- प्राक्प्रत्यग्दक्षिणोदक चाष्टादशाष्टादशसूत्रपातनेन नवाशीत्युत्तर शतकोष्ठानि विरच्य,

चतुर्दिक्षु द्वात्रिंशद् द्वत्रिंशत् कोष्ठानि मार्जयित्वा एकषष्ट्युत्तरशत (१६१) कोष्ठात्कं वज्ररूपं विधाय चतुर्दिक्षु एकेकं कोणं मार्जयित्वा त्रिकोणानि विधाय, मध्ये साध्यनामगर्भा मूलविद्यां विलिख्य चतुर्दिक्षु चतुस्त्रिकोणेषु प्रोगुक्तामृत बीजानामादितश्चतुर्बीजानि साध्यनामयुक्तानि विलिख्य, पञ्चमबीजमारभ्य बाह्यतः प्रवेशागत्या प्रादिक्षण्येन सर्वाणि कोष्ठानि पूरयेदिति। यथा-

समस्ताभीष्टदं सर्वविजयश्रीप्रदं शुभम् । सप्तविंशतिरुक्तानि यन्त्राण्येवं महेश्वरि ॥४१॥

सप्तविंशति नक्षत्र मयान्येतानि येन वै । तेन तान्येव सप्तभ्या विभक्त्या साध्यमालिखेत् ॥४२॥

तानि तत्तद्दिनेष्वेवं विलिखेत् स्थापयेदपि । फलानि तेषां क्रमशो वदाम्युक्त क्रमेण वै ॥४३॥

विनियोगक्रमं चैव सुस्फुटं परमेश्वरि । प्रथमेनार्चितेन स्याद्रोगा नश्यन्त्यशेषतः ॥४४॥

स्ववेश्मनि विधायैतत्पीठे भूमितलेऽपि वा । प्रोक्तद्रव्याणि सम्पिष्य तत्पंकेनाव सुस्फुटम् ॥४५॥

त्रिरात्रं सप्तरात्रं वा सप्तविंशतिरात्रकम् । सम्पूज्य तत्र कुम्भं तु विद्यौषधिजलान्विताम् ॥४६॥

निधायाभ्यर्च्य गदिनमभिषिञ्चेत् ततः सुखीः । एवमन्यानि यन्त्राणि प्रोक्तेषु विनियोजयेत् ॥४७॥

तेषां त्रिलेखनद्रव्याण्याकर्णय वदामि ते । कुचन्दनं चन्दनं च सिन्दूरं सेन्दुरोचनम् ॥४८॥

काश्मीरमगुरुं कुष्ठमेलाकंक्कोल जातिभिः । स्वर्क्षवृक्षैर्द्वादशभिर्हिमाम्बु परिपेषितैः ॥४९॥

जलैर्नक्षत्रवृक्षोत्थै रसैर्वा सूक्ष्मपेषित्तैः । द्वितीय विजय प्राप्त्यै विदध्यात् प्रोक्तरूपतः ॥५०॥

वादे विवादे समरे द्यूतेषु च जयी भवेत् । तृतीयाद्येषु नवसु ग्रहान् नव समर्चयेत् ॥५१॥

देव्यात्मरूपान् तेनास्य तैर्बाधा न भवेद्ध्रुवम् । स्तम्भयेद् द्वादशेनाशु प्रोक्तक्रम विधानतः ॥५२॥

संग्रामगमनं वर्षामुद्योगं वाचमाग्रहम् । त्रयोदशद्यैर्वज्रान्तैर्यन्त्रैस्तिथिमयैरपि ॥५३॥

तत्तत्तिथिषु तैः प्राग्वद्वांछितान् प्राप्नुयाद् ध्रुवम् । तेषु तेषु यन्त्रेषु तत्तत्तिथिदिनाधिपान् ॥५४॥

वारेशानपि सम्पूज्य तत्तफलमावाप्नुयात् । कार्योद्योगेषु रोगेषु वांछितेष्वितरेष्वपि ॥५५॥

वारर्क्षतिथिसम्प्रोक्त यन्त्रे तां तैश्च दैवतैः । आवृत्तामर्जयेदग्निरक्षोवाय्वीशदिग्गतैः ॥५६॥

रोगशान्ति समुद्योग फलाभीष्टान्यवाप्नुयात् । वाराणामधिपाः प्रोक्तास्तिथि नक्षत्र देवताः ॥५७॥

शृक्षवृक्षांस्तथा योनीर्वदामि परमेश्वरि । वह्निदस्त्रवुमा विघ्नो भुजङ्गः षणमुखो रविः ॥५८॥

मातरश्च तथा दुर्गा दिशो धनदकेशवौ । यमो हरः शशी चेति तिथीशाः परिकीर्तिताः॥५९॥

नक्षत्रदेवताश्चापि शृणु वक्ष्ये यथाविधि । अश्विनौ च यमो वह्निर्धाता चन्द्र शिवोदितिः ॥६०॥

गुरुः सर्पाश्च पितरस्त्वर्यमा भग एव च । दिनकृच्च तथा त्वष्टा मरुदिन्द्राग्निभित्रकाः ॥६१॥

इन्द्रो निर्ऋतितोयाख्यौ विश्वेदेवा हरिस्तथा । वसवो वरुणः पश्चादज एकपदस्तथा ॥६२॥

अहिर्बुध्न्यस्तथा पूषा प्रोक्ता नक्षत्रदेवताः । कास्करश्चामलकोदुम्बुरो जम्बुकस्तथा ॥६३॥

खदिरः कृष्णवंशौ च पिप्पलो नागरोहिणौ । पलाशप्लक्षकाम्बष्ठबिल्वार्जुनविकङ्कताः ॥६४॥

बकुलः सरलः सर्जो वंजुलः पनसस्तथा । अर्कः शमी कदम्बश्च चूतो नितम्बस्तथान्तिमः ॥६५॥

मधूकेश्चेति सम्प्रोक्ता वृक्षा भानां क्रमादमी । अश्वगजमजं सर्पसर्पिणीश्चबिडालिका: ॥६६॥
अजामार्जार मूषाश्च मूषिका वृषमाहिषौ । व्याघ्रश्च महिषो व्याघ्री मृगी मृगशुनी कपिः ॥६७॥
गोखङ्गो वानरी सिंही तुरगी सिंहगोगजाः । यदा रोगादि दुःखार्तिर्भवेत् तत्पूर्वगैर्दिनैः ॥६८॥
मुहूतैः संख्ययाहोभिः शान्तिः स्याद्द्विगुणेन वा । आधारे पञ्च यन्त्राणि स्वाधिष्ठाने चतुष्टयम् ॥६९॥
प्रोक्तेषु भावयेत्तानि तावन्ति मणिपूरके । अनाहते ततः पञ्चयन्त्राणि परिभावयेत् ॥७०॥
विशुद्धाख्ये च चत्वारि पञ्चाज्ञायामिति क्रमात् । तत्तत्तिथिदिनेष्वेवं भावयेत् षोडशीं शिवाम् ॥७१॥
तत्तच्चक्रगताः सर्वा भावयेत् सर्वसम्पदे । आधारादिषु चक्राणि भावयेदुक्तयोगतः ॥७२॥
नतु सर्वत्र सर्वाणि भावयेन्न कदाचन । भावनायामशक्तानां तत्तद्यन्त्राद्बहिस्तथा ॥७३॥
प्रोक्तान्याधार पद्मानि कृत्वा तत्रार्चयेच्छिवाम् । एवं दिनेषु वारेषु नक्षत्रेषु त्रिषु क्रमात् ॥७४॥
सम्पूज्य देवीमिष्टानि प्राप्नुयात् प्रोक्तवासरैः । बलिं च दद्यात् तेष्वेव वासरेषु यथाविधि ॥७५॥
पञ्चाशन्मिथुनानां च प्रोक्तचक्रेऽर्धरात्रके । मध्याह्ने सन्ध्ययोश्चापि चक्रस्थानामपीश्वरि ॥७६॥
मिथुनोक्तक्रमे शक्तिमन्त्रवच्चक्रगामिनाम् । कूटानां मन्त्ररूपाणि प्रोक्ता स्फुटमीश्वरि ॥७७॥
तैस्तेषां तेषु कालेषु बलिं दद्यात् तथेरितैः । देव्यास्त्वनुग्रह प्रोक्तनिवेद्यैः सिक्थकं महत् ॥७८॥
विधाय तस्य मध्ये तु कृत्वा दीपं घृतप्लुतम् । विधाय तत्तन्मन्त्रैस्तु विदध्यात् तान्यनुक्रमात् ॥७९॥
प्रत्येकं देवतानां वा मिथुनानां तथापि वा । इत्थं कार्यस्य गुरुतालाघवापेक्षया दिनैः ॥८०॥
साधयेत्सप्तभिः पक्षान्मासान्मण्डलतोपि वा । दद्यादयूप पनसमोचागुड घृतान्वितम् ॥८१॥
कुल्माषाः पायसान्नं च व्यञ्जनं छागमांसयुक् । मिथुनानां बलिं दद्यात् प्रतिमासं गुहेऽर्चयेत् ॥८२॥
प्रत्यब्दं वा गृहे मन्त्री जीवेदाढ्यो महोदयः । एवं कालात्ममिथुनबलिदानेन पूजनात् ॥८३।
स्मरणात् कीर्तनात्सर्ववाञ्छितानामाप्नुयुर्नराः । मिथुनानां बलिद्रव्याण्याकर्णय महेश्वरि ॥८४॥
यैस्तुष्टिं प्रापितान्याशु प्रयच्छन्त्यभिवाञ्छितम् । दशानां पायसं दद्याद्दशानां तु गुडौदनम् ॥८५॥
पञ्चानां मुद्गभिन्नान्नं पञ्चानां दधिभक्तकम् । दद्यादपूपं पञ्चानां पञ्चानां क्षीरशर्करे ॥८६॥
पञ्चानां नारिकेलस्य फलक्षोदं गुडान्वितम् । पञ्चानां सितभक्ताभ्यां मोचाफलमुदीरितम् ॥८७॥
मिथुनार्चारतो नित्यं योऽसौ स्यान्मान्त्रिकाग्रणीः ।

॥ विचित्रा (चित्रा) नित्या प्रयोगः॥

सारांश – विचित्रा (चित्रा) का पूजन करने से धन धान्य ऐश्वर्य की समृद्धि होती है। अलग अलग कामना हेतु अलग अलग पूजन व हवन विधि है। श्लोक एक से उनतीस तक सर्वकामना प्राप्ति की विधि वर्णित है।

यन्त्र प्रयोग – पूजन में मन्त्र प्रयोग मूल विद्या व षोड्श कूट का उल्लेख है। अन्य मन्त्र का कहीं वर्णन नहीं दिया है।

अन्य मन्त्र – चक्रौं । (द्वयक्षर)

॥ प्रथम प्रकार यंत्र रचना ॥

त्रिकोण के बाहर २ वृत्त बनायें और उनके बाहर षट्कोण बनाकर पुनः दो वृत्त बनायें। पश्चात् षट्दल बनायें उस पर तीन वृत्त बनायें।

त्रिकोण मध्य में साध्य का नाम तथा त्रिपुर सुन्दरी मन्त्र का प्रथम वर्ण ''**क**'' लिखें इसके साथ ही **अं आं.....अं अः** षोडश स्वर लिखें। त्रिकोण में ''**ए ई ल**'' लिखें।

षट्कोण में ''**ह्रीं ह स क ह ल**'' लिखें तथा षट्दल में ''**ह्रीं सकल ह्रीं श्रीं**'' लिखें।

त्रिकोण के बाहर वृत्त में प्रथम मन्त्राक्षर ''**क**'' लिखें साध्य नाम व कामना लिखें। षट्कोण के बाहर वृत्त में कोण के पास ''**ए ई, ल ह ह, स क हल ह्रीं, सक, ल ह्रीं श्रीं**'' कामना सहित लिखें। षट्दल के बाहर के वृत्त अंतराल में ''**अः आः....लः क्षः**'' विसर्ग युक्त मातृका लिखें।

दूसरे वृत्तांतराल में बिन्दु सहित ''**अं आं......लं क्षं**'' मातृका लिखें। इस तरह यह प्रथम यन्त्र हुआ।

इसी तरह दूसरे यन्त्र हेतु दूसरा अक्षर ''**ए**'' मध्य में लिखें शेष वर्णों को त्रिकोण व षट्कोणादि में लिखें। इस तरह एक-एक वर्णाक्षर को बीच में लिखने से सोलह यन्त्र बनेंगे।

॥ द्वितीय प्रकार यंत्र रचना ॥

अन्य यन्त्र रचना में १८-१८ रेखायें पूर्व-पश्चिम, उत्तर-दक्षिण में खींचने से १७ ×१७ = २८९ कोष्ठक बनेंगे। ३२-३२ कोष्ठक चारों दिशाओं में छोडने से १६१ शेष बचेंगे। उनके वज्र रूप बनायें। चारों दिशाओं में १-१ कोष्ठक छोडें एवं त्रिकोण बनायें। मध्य में ''**ह्रीं**'' युक्त साध्य का नाम लिखें। मूल मन्त्र भी लिखें। चारों दिशाओं के त्रिकोण में ''**ॐ ह्रौं जूं सः**'' लिखें अथवा मूल मन्त्र के चार अक्षर ''**क ए ई ल**'' लिखें। शेष वर्णों को कोष्ठक में पूर्वादि क्रम से लिखें।

इस तरह पूर्वविधि की तरह मूल मन्त्र मातृका वर्ण से सभी कोष्ठकों को भर देवें।

फल प्राप्ति व प्रयोग विधान श्लोक ४१-८७ तक दिया गया है।

॥ इति ललिता त्रिपुरसुन्दरी नित्याः प्रयोगाः ॥

****

॥ अथ कुरुकुल्ला साधना प्रयोग:॥

१. सप्ताक्षरी मन्त्र – ॐ कुरुकुल्ले स्वाहा।

२. त्रयोदशाक्षरी मन्त्र – कुरुकुल्लाया: ॐ कुरुकुल्ले ह्रीं स्वाहा।

३. पंचविंशाक्षरी मन्त्र – कुरुकुल्लाया: ॐ कुरुकुल्ले ह्री: मम सर्वजनं वशमानय ह्रीं स्वाहा।

सभी नित्याओं की बलि हेतु कुरुकुल्ला को बलि प्रदान की जाती है अत : कुरुकुल्ला का पूजन प्रयोग भी समझना चाहिये।

विनियोग – अस्य मंत्रस्य दक्षिणामूर्ति ऋषि:, पंक्तिश्छन्द: कुरुकुल्ला **देवता बलिप्रदान कर्मणे विनियोग:।**

षडङ्गन्यास – ऐं, क्लीं, सौ:, ऐं, क्लीं, सौ: से हृदयादि न्यास करे। पश्चात् कुरुकुल्ला मंत्र से व्यापक न्यास करे।

ऋतुस्नाता दिगंबरा देवी का ध्यान करें।

॥ ध्यानम् ॥

विकीर्णकुन्तलां नग्नां रक्तामानन्दविग्रहाम् । दधानां चिंतयेद्बाण चाप पाश सृणी: करै: ॥
तत्समानायुधाकारवर्णा देव्यस्तु बाह्यगा: । ऋतुस्नाता स्फुरद्योन्य: सदानन्दारुणेक्षणा: ॥

॥ यंत्रपूजनम् ॥

त्रिकोण, अष्टकोण, अष्टदल एवं चार द्वार युक्त भूपुर बनाये। ॐ **मण्डूकादि परतत्वान्त पीठदेवताभ्यो नम:।** से पीठ पूजन करे। पश्चिम से विलोम क्रम से इक्षु, इरा, घृत एवं दुग्ध से अभिषेक करे। एवं इन सागरों की पूजा कल्पना करे। **इक्षुसागरतीरे द्वीपस्य नैऋतकोणे ह्रीं श्रीं वाराही देवी पा.। ह्रीं श्रीं रत्नपोताय नम:।** इसके ऊपर रत्नसिंहासन की पूजा करे। त्रिपुर सुंदरी पूजा के समान मनोन्मनी आदिशक्तियों का पूजन करे। उसके मध्य में **''संविदासनाय नम:''** से आसन देवे पश्चात् देवी की पुरुष शक्ति पूजन करे। **देव्या भर्तृभूतं पुरुषं संपूज्य।** पश्चात् २५ अक्षरवाले मंत्र से देवी का त्रिखण्डामुद्रा से आवाहन करे। स्थापन से परमीकरण तक की मुद्रा दिखा कर प्राण प्रतिष्ठा करे। पाशादि चार मुद्रायें दिखावे। पुष्पांजलि लेकर आज्ञा मांगे।

श्रीकुरुकुल्ले परिवार पूजार्थ मनुज्ञां देहि ।
तदनुज्ञया साधक: स्वयं रत्नपोतमारुह्य ॥

रत्नपोतस्य पूर्व पश्चिम कोट्यो: ह्रीं भ्रामणी श्री पा.। ह्रीं द्राविणी पा.।

प्रथमावरणम् – (भूपुरे)– पश्चिम द्वार की दक्षिणशाखा से प्रदक्षिण पूर्वक नैऋत्य पर्यन्त **ह्रीं सूर्यरूपिणी शक्ति पा.। ह्रीं सोमरूपिणी शक्ति पा.। ह्रीं तिथी रूपिणी शक्ति पा.।** वार **रूपिणी शक्ति पा.। ह्रीं योग रूपिणी शक्ति पा.** (पूर्वद्वारे उत्तरशाखायां) **पूर्वद्वारे दक्षिणशाखायां ह्रीं ऋक्ष**रूपिणी **(नक्षत्र रूपिणी) शक्ति पा.। आग्नेये ह्रीं करणरूपिणी शक्ति पा.।** दक्षिणे– **ह्रीं पक्षरूपिणी शक्ति पा.।** नैऋते **ह्रीं मासरूपिणी शक्ति पा.।**

द्वितीयावरणम् – (अष्टदलेषु) देव्यग्रादि प्रादक्षिण्येन **व्योम रूपिणी शक्ति पा.। शब्द रू. पा.। वायु रू. पा.। स्पर्श रू. पा.। अग्नि रू. पा.। रूप रू. पा.। तोय रू. पा.। रस रू. पा.। पुन: वायवे क्ष्मा रू. पा.। ईशाने गंध रू. पा.। आग्नेये प्राण रू. पा.। निर्ऋति बुद्धि रू. पा.। मध्ये शक्ति** रू. पा.।

॥ श्री कुरुकुल्ला यन्त्रम् ॥

तृतीयावरणम् – (अष्टयोनिकोणेषु) श्री यंत्र पूजन की तरह वशिन्यादि अष्ट वाग्देवता का पूजन करे।

चतुर्थावरणम् – (त्रिकोण एवं अष्टयोनि के मध्य में) **वाणरूपिणी शक्ति पा.। चाप रू. पा.। पाश रू. पा.। अंकुश रू. पा.।**

पंचमावरणम् – (त्रिकोणे) देवी के अग्रकोण से **इच्छा रू. शक्ति पा.। ज्ञान रू. पा.। किया रू. पा.।**

पश्चात् संविद से देवि का अर्चन करे। सर्वोपचार पूजन कर – **श्री कुरुकुल्ले इदं बलिं गृहण गृहण सर्वकार्य साधय साधय ह्रीं स्वाहा** बलिप्रदान करे ॐ **तारेनुतारेतुरे स्वाहा।**

गायत्री मन्त्र – **कुरुकुल्लायै विद्महे सर्वशक्ति च धीमहि तन्नो नित्या प्रचोदयात्**॥

॥ इति कुरुकुल्ला प्रयोगविधिः ॥

॥ अथ नित्या कवचम् ॥

समस्तापद्विमुक्त्यर्थं सर्वसंपदवाप्तये । भूतप्रेतपिशाचादिपीडाशान्त्यै सुखाप्तये ॥१॥
समस्तरोगनाशाय समरे विजयाय च । चौरसिंहद्वीपिग जगवयादिभयानके ॥२॥
अरण्ये शैलगहने मार्गे दुर्भिक्षके तथा । सलिलाग्निमरुत्पीडास्वब्धौ पोतादिसंकटे ॥३॥
प्रजप्य नित्याकवचं सकृत्सर्व तरत्यसौ। सुखी जीवति निर्द्वन्द्वो निःसपत्नो जितेन्द्रियः ॥४॥
शृणु तत्कवचं देवि वक्ष्ये तव नवात्मकम् । येनाहमपि युद्धेषु देवासुरजयी सदा ॥५॥
सर्वतः सर्वदात्मानं ललिता पातु सर्वदा। कामेशी पुरतः पातु भगमाला त्वनन्तरम् ॥६॥
दिशं पातु तथा दक्षपार्श्वं मे पातु सर्वदा । नित्यक्लिन्ना तु भेरुण्डा दिशं पातु सदा मम ॥७॥
तथैवं पश्चिमं भागं रक्षेत्सा वह्निवासिनी । महावज्रेश्वरी रक्षेदनन्तरदिशं सदा ॥८॥
वामपार्श्वं सदा पातु दूती मे त्वरिता ततः । पालयेत्तु दिशं वात्यां रक्षेत्मां कुलसुन्दरी ॥९॥
नित्या मामूर्ध्वतः पातु साधो मे पातु सर्वदा । नित्या नीलपताकाख्या विजया सर्वतश्च माम् ॥१०॥
करोतु मे मङ्गलानि सर्वदा सर्वमङ्गला । देहेन्द्रियमनः प्राणान् ज्वालामालिनिविग्रहा ॥११॥
पालयेदनिशं चित्रा चित्तं मे पातु सर्वदा। कामात् क्रोधात् तथा लोभान्मोहान्मानान्मदादपि ॥१२॥
पापान्मत्सरतः शोकात् संशयात् सर्वतः सदा। स्तैमित्याश्च समुद्योगादशुभेषु तु कर्मसु ॥१३॥
असत्यात् क्रूरचिन्तातो हिंसातश्चोरतस्तथा। रक्षन्तु मां सर्वदा ताः कुर्वन्त्विच्छां शुभेषु च ॥१४॥

नित्याः षोडश मां पान्तु गजारूढाः स्वशक्तिभिः। तथा हयसमारूढाः पान्तु मां सर्वतः सदा ॥१५॥

सिंहारूढास्तथा पान्तु मां तरक्षुगता अपि । रथारूढाश्च मां पान्तु सर्वतः सर्वदा रणे ॥१६॥

ताक्ष्यारूढाश्च मां पान्तु तथा व्योमगतास्तु ताः । भूगताः सर्वदा पान्तु मां सर्वत्र च सर्वदा ॥१७॥

भूतप्रेतपिशाचापस्मारकृत्यादिकान् गदान् । द्रावयन्तु स्वशक्तीनां भीषणैरायुधैर्मम ॥१८॥

गजाश्वदीपिपञ्चास्यताक्ष्यारूढाखिलायुधाः । असंख्याः शक्तयो देव्यः पान्तु मां सर्वतः सदा ॥१९॥

सायं प्रातर्जपन्नित्याकवचं सर्वरत्नकम् । कदाचिन्नाशुभं पश्येन्न श्रृणोति च तत्समः ॥२०॥

॥ अथ त्रिपुर भैरवी स्तुतिः ॥

क्ष्माम्ब्वग्नीरणखार्केन्दुयष्ट्टप्राययुगस्वरैः । मातृभैरवगां वन्दे देवीं त्रिपुरभैरवीम् ॥१॥

कादिवर्गाष्टकाकारसमस्ताष्टकविग्रहाम् । अष्टशक्त्यावृतां वन्दे देवीं त्रिपुरभैरवीम् ॥२॥

स्वरषोडशकानां तु षट्त्रिंशद्धिः परापरैः । षट्त्रिंशत्तत्त्वगां वन्दे देवीं त्रिपुरभैरवीम् ॥३॥

षट्त्रिंशत्तत्त्वसंस्थाप्यशिवचन्द्रकलास्वपि । कादितत्त्वान्तरां वन्दे देवीं त्रिपुरभैरवीम् ॥४॥

आइमायाद्वयोपाधिविचित्रेन्दुकलावतीम् । सर्वात्मिकां परां वन्दे देवीं त्रिपुरभैरवीम् ॥५॥

षडध्वपिण्ड योनिस्थां मण्डलत्रय कुण्डलीम् । लिङ्गत्रयातिगां वन्दे देवीं त्रिपुरभैरवीम् ॥६॥

स्वयम्भूहृदयां बाणभूकामान्तः स्थितेतराम् । प्राच्यां प्रत्यक्चितिं वन्दे देवीं त्रिपुरभैरवीम् ॥७॥

अक्षरान्तर्गताशेषनामरूपां क्रियां पराम् । शक्तिं विश्वेश्वरीं वन्दे देवीं त्रिपुरभैरवीम् ॥८॥

त्रिपुर सुंदरी की नित्या पूजन से साधना का पूर्ण फल मिलता हैं। प्रतिदिन (तिथि) की नित्या पूजन में नित्या कवच का पाठ भी विशेष महत्व रखता है।

॥ अथ वार, तिथि, नक्षत्र पूजा प्रयोगः॥

॥ वारेशानां पूजा प्रयोगः॥

पूर्णाभिषेक प्रयोग के दिन या अनुष्ठानिक काम्य प्रयोग के दिवस उस दिन के अधिपति एवं अन्यवारेशों का पूजन करना चाहिये। वेददिका पर षट्कोण मण्डल बनाये। मध्य में उस दिन के वाराधिपति एवं उस दिन के वारदेवता का पूजन करे। सप्तवाराधिपति के अन्य देवताओं का पूजन करे। वाराधिपति व उनके देवता इस प्रकार है।

रविवारस्य - सूर्य, शिवौ। चन्द्रवारस्य - सोमाम्बिके। मंगलवारस्य - भौम, कुमारौ। सोम्यवारस्य - ब्रह्म, बुधौ। गुरुवारस्य - बृहस्पति, विष्णू। भृगवारस्य - शुक्र, उमा। शनिवारस्य - कुबेर, सौरी।

जैसे कार्य दिवस रविवार है तो मध्य में ''**शिवसहिताय सूर्याय नमः।**'' षट्कोण में शेष देवताओं का पूजन करे। यथा- **सोमाम्बिके नमः। कुमार सहिताय भौमाय नमः** इस तरह क्रमश पूजन करे।

॥ तिथीशार्चन प्रयोगः॥

वेदिका पर चतुर्दशदल पद्म बनाये। मध्य में कार्य दिवस की तिथी एवं उसके देवता का अर्चन करे। अन्य देवों का पूजन चतुर्दशदल में करे। तिथि देवता इस प्रकार है-

प्रतिपद्यग्निः। द्वितीयायामश्विनौ। तृतीयायामुमा। चतुर्थ्यां विघ्नराजः। पञ्चम्यां सर्पः। षष्ठ्यां षणमुखः। सप्तभ्यां रविः। अष्टम्यां मातरः। नवम्यां दुर्गा। दशम्यां दिशः। एकादश्यां धनदः। द्वादश्यां केशवः। त्रयोदश्यां यमः। चतुर्दश्यां हरः। पञ्चदश्यां चन्द्रः। अमावस्यां पितरः। इति तिथीश पूजाक्रमः॥

॥ प्रत्येक तिथि का ध्यान एवं तिथिकवच स्तोत्र॥

'**तिथिपूजा**' का क्या महत्व है, यह '**गायत्री तन्त्र**' की निम्नोक्ति से स्पष्ट है-

तिथेर्ध्यानं बिना देवि ! तिथेर्मन्त्रं तथैव च। अज्ञात्वा परमेशानि ! दिनकृत्यं करोति यः। तस्य सर्वं भवेद् व्यर्थ दिनकृत्यं वरानने, या तिथिः सा महामाया आद्य मूर्तिर्जगन्मयी॥

'**तिथि**' के ध्यानादि से पूर्व '**पक्ष**' का ध्यानादि करना चाहिए। पक्षों के ध्यान और मंत्र इस प्रकार हैं।

॥ शुक्लपक्षस्वरूपिणी देवी का ध्यान और मंत्र॥

शङ्खकुन्दसमाभासां नवयौवनसंयुतां । चतुर्भुजां त्रिनयनांमत्त द्विरदगामिनीम् ॥
ललाटपट्टिकामध्ये सिन्दूर तिलकोज्ज्वलां । भ्रमद्भ्रमर नीलाभामञ्जनाञ्चितलोचनाम् ॥
पीतांशुकपरीधानां कृष्णवस्त्रोत्तरीयिणीं । नानालंकारसुभगां नीलपद्मोपरिस्थिताम् ॥
घूर्णायमाननयनां नीलपद्मविधारिणीं । सदा षोडशवर्षीयां कदम्बकोरकस्तनीम् ॥

हीरकद्युतिसंकाश दशज्योतिरुज्ज्वलां । नानापुष्पमयैहरिनैर्नानागन्धमयीं परम् ॥

मन्त्र – ऐं ऐं क्रीं क्रीं शुक्लपक्षाय स्वाहा क्रीं क्रीं ऐं ऐं।

॥ कृष्ण पक्ष स्वरूपिणी देवी का ध्यान और मंत्र॥

महामरकतश्यामां चतुर्बाहुसमन्वितां । पीनोत्तुंगकुचां रम्यां चित्रवस्त्र विलासिनीम् ॥
नानाशृंगार वेशाढ्यां स्फुरच्चकितलोचनां । सिन्दूर तिलकोद्दीप्तामञ्जनाञ्चितलोचनाम् ॥
कन्दर्पधनुराकारभ्रू लतापरिशोभितां । रत्नहारेण सहितनागहारविराजिताम् ॥
पीतपद्मसमासीनां चित्रचूडाविराजितां । पीतविद्युत्समाकाशां तामुत्तरीयवसनच्छविम् ॥
पूर्णचन्द्रमुखीं देवीं कृष्णपक्षस्वरूपिणीम् ।

मन्त्र – ॐ ॐ कृष्ण पक्षाय स्वाहा ॐ ॐ।

कृष्ण एवं शुक्ल पक्षों में 'तिथि' को अपने 'पक्ष' के वर्ण अर्थात् काले या गौर स्वरूप का ध्यान करना चाहिये।

॥ शुक्लपक्ष की प्रत्येक तिथि का ध्यान और मन्त्र॥

१. द्विभुजांशुक्लरूपां च खेलत्खञ्जनगामिनीं ।
द्विलोचनां शशिकलां सिंदूरतिलकोज्ज्वलां ॥
तप्तहाटकनिर्माणनानालङ्कार भूषितां ।
दाडिमीबीजसदृश दशनद्युतिशोभनाम् ॥
ध्याये प्रतिपदं देवीं जपपूजाविशुद्धये ।

मन्त्र – ग्रीं प्रतिपद्भ्यः स्वाहा ॥१॥

२. द्विलोचनां शशिकलां शुद्धस्फटिकशोभनां ।
शुद्धाभरणशोभाढ्यां शुक्लवस्त्रपरिच्छदाम् ॥
नानाकटाक्षसंयुक्तभ्रूलता – परिशोभितां ।
सिन्दूरतिलकोद्दीप्तां खञ्जनाञ्चितलोचनां ॥
द्विभुजां सुन्दराङ्गीं च किशोरीं नवयौवनां ।

मन्त्र – ऐं द्वितीयायै स्वाहा ॥२॥

३. शुक्लपद्मप्रतीकाशां शुक्लवस्त्रपरिच्छदां ।
शुक्लाभरणशोभाढ्यां पुण्डरीकोपरिस्थिताम् ॥
द्विलोचनां शशिकलां सिन्दूरतिलकोज्ज्वलां ।
कटाक्षविशिखोपेतां द्विभुजां तृतीयां भजे ॥

मन्त्र – ॐ ऐं तृतीयायै स्वाहा ॥३॥

४. चतुर्थीं शुक्लचार्वङ्गीं लोललोचनां ।

कुन्दपुष्पसमाभासां द्विभुजां लोललोचनाम् ॥
शुक्लवस्त्रपरीधानां शुक्लाभरणभूषितां ।
सिन्दूरतिलकोद्दीप्तां खञ्जनाञ्चितलोचनाम् ॥

मन्त्र – ऐं हुं चतुर्थ्यै स्वाहा ॥४॥

५. शुद्धस्फटिकसंकाशां श्वेतपद्मोपरिस्थितां ।
हास्ययुक्तां प्रसन्नास्यां कटाक्षविशिखोज्ज्वलां ॥
कन्दर्पधनुराकारभ्रूलता – परिशोभितां ।
द्विभुजां श्वेतवर्णां च श्वेताकारभूषिताम् ॥
लोचनद्वयसंयुक्तां सिन्दूरतिलकोज्ज्वलां ।
मृणालसदृशाकारबाहुवल्ली – विराजिताम् ॥
खेलत्खञ्जनगामीं च चारुचूडाविराजिताम् ।

मन्त्र – ह्रीं ऐं ह्रीं पञ्चम्यै स्वाहा ॥५॥

६. कुन्दपुष्पसमाभासां द्विभुजां लोललोचनां ।
कटाक्षविशिखोद्दीप्तां सिन्दूरतिलकोज्ज्वलाम् ॥
दाडिमीबीजसदृश दशनद्युतिमुज्ज्वलां ।
शुक्लालंकारसुभगां शुक्लासननिवासिनीम् ॥
शुक्लवस्त्रपरिच्छिन्नां शुक्लहारविनोदिनीं ।
द्विभुजां चन्द्रवदनां ध्याये चात्मविभूतये ॥

मन्त्र – ॐ ह्रीं षष्ठ्यै स्वाहा ॥६॥

७. शरच्चन्द्रप्रतीकाशां द्विभुजां शशिशेखरां ।
लोचनद्वयसंयुक्तां खेलत्खंजनगामिनीम् ॥
सिन्दूरतिलकोद्दीप्तामंजनाञ्चित – लोचनां ।
कटाक्षविशिखोपेतां भ्रूलतापरिशोभिताम् ॥
शुक्लासनसमासीनां शुक्लाभरणभूषितां ।
शुक्लवस्त्रपरीधानां ध्याये चात्मविभूतिये ॥

मन्त्र – ह्रीं ॐ सप्तम्यै स्वाहा ॐ ह्रीं ॥७॥

८. साकाचन्द्रप्रतीकाशां द्विभुजां चन्द्रशेखरां ।
पूर्णचन्द्रमुखश्रेणीं कुटिलालकशोभिताम् ॥
हास्ययुक्तां प्रसन्नास्यां श्वेतवस्त्रपरिच्छदां ।
श्वेताभरणशोभाढ्यां किशोरीं नवयौवनां ॥

मालाकटाक्षसंयुक्तां भ्रूलतापरिशोभितां ।
सिन्दूरतिलकोद्दीप्तामंजनाञ्चित लोचनाम् ॥

मन्त्र – क्रीं हुं ऐं अष्टम्यै स्वाहा ऐं हुं क्रीं ॥८॥

९. श्वेतपद्मप्रतीकाशां द्विभुजां लोललोचनां ।
दाडिमीबीजांसदृश दन्तपंक्ति परिच्छदाम् ॥
शुक्लपट्टाम्बरधरां शुक्लवस्त्रोत्तरीयिणीं ।
ललाटे पट्टिकां शुद्धां सिन्दूरतिलकोज्ज्वलां ॥
मुक्तावर्तुलहारेण कम्बुकण्ठसुशोभितां ।
नानामाल्यपरिच्छिन्नां चित्रराजविराजिताम् ॥

मन्त्र – ॐ हुं नवम्यै स्वाहा हुं ॐ ॥९॥

१०. मल्लिकापुष्पसंकाशां द्विभुजां लोललोचनां ।
श्वेतासनोपविष्टां च श्वेतांशुकपरिच्छदाम् ॥
श्वेताभरणसंयुक्तां श्वेतगन्धविलेपिनीं ।
सिन्दूरतिलकोद्दीप्तामञ्जनाञ्चित – लोचनाम् ॥

मन्त्र – ऐं ॐ दशम्यै स्वाहा ॐ ऐं ॥१०॥

११. केतकीपुष्पसंकाशां भ्रूलतापरिशोभितां ।
नानाकटाक्षसंयुक्तां मत्तद्विरदगामिनीम् ॥
नानालंकारसुभगां पीतवस्त्रपरिच्छदां ।
पीतगन्धप्रलिप्ताङ्गीं सिन्दूरतिलकोज्ज्वलां ॥
दाडिमीवीजसदृश – दन्तपंक्तिमनुत्तमां ।
द्विभुजां सुन्दरीं देवीं नमाम्यात्मविभूतये ॥

मन्त्र – ॐ क्रीं ॐ एकादश्यै स्वाहा ॐ क्रीं ॐ ॥११॥

१२. पीतगन्ध समाभासां शुक्लवस्त्रपरिच्छदां ।
शुक्लचन्दनसिक्ताङ्गीं द्विभुजां लोललोचनाम् ॥
शुक्लाभरणशोभाढ्यां शुक्लासनसमाश्रयां ।
दाडिमीबीजसदृशदशनद्युति – शोभनाम् ॥
सिंदूरतिलकोद्दीप्तां ललाटपट्टिकां शुभां ।

मन्त्र – ह्रीं ॐ ह्रीं द्वादश्यै स्वाहा ह्रीं ॐ ह्रीं ॥१२॥

१३. रक्तचन्द्रप्रतीकाशां किशोरीं नवयौवनां ।

रक्तपीतपरीधानां कुटिलालकमण्डिताम् ॥
द्विभुजां सुन्दरीं शुद्धां पूर्णचन्द्रमुखप्रभाम् ।
द्विलोचनां चन्द्ररेखां विष्णुपूज्यां वृहत्कटीम् ॥
सिन्दूरतिलकोद्दीप्तामंजनाञ्चित - लोचनां ।
नानाकटाक्षसंयुक्तां नानाशृङ्गारशोभनाम् ॥

मन्त्र - ॐ ऐं त्रयोदश्यै स्वाहा ऐं ॐ ॥१३॥

१४. शुद्धस्फटिकसंकाशां हरिहस्तविनोदिनीं ।
नानालंकारसुभगां पीतमाल्यपरिच्छदाम् ॥
श्वेतपद्मसमासीनां द्विभुजां लोललोचनां ।
कटाक्षविशिखोद्दीप्तां सिन्दूरतिलकोज्ज्वलां ॥
दाडिमीवीजसदृश दशनद्युतिमुज्ज्वलां ।
कदम्बकोरकाकार स्तनद्वयमनोहराम् ॥
हास्ययुक्तां प्रसन्नास्यां किशोरीं नवयौवनाम् ।

मन्त्र - क्रीं ॐ ह्रीं चतुर्दश्यै स्वाहा ह्रीं ॐ क्रीं ॥१४॥

१५. कोटिविद्युल्लताकारां चतुर्बाहुसमन्वितां ।
पीतांशुकपरीधानां रत्नसारविराजिताम् ॥
शंखकंकणकेयूरनाना शृङ्गारभूषितां ।
रत्नकुण्डलसंयुक्तस्फुरद गण्डमनोहराम् ॥
त्रिभंगललिताकारां सिन्दूरतिलकोज्ज्वलां ।
कटाक्षलक्षसंयुक्तां भ्रूलतापरिशोभिताम् ॥

मन्त्र - ह्रीं ॐ क्रीं ॐ पूर्णिमायै स्वाहा ॐ क्रीं ॐ ह्रीं ॥१५॥

कृष्णपक्ष में तिथियों का ध्यान निम्र प्रकार करे-

नीलाञ्जनचयप्रख्याः किशोर्यो नवयौवनाः ।

यही ध्यान कृष्णपक्ष की प्रत्येक तिथि का करना चाहिये और 'मंत्र' पूर्वतिथियों के क्रमानुसार ही इस पक्ष की तिथियों के भी होते हैं। अतः उन्हीं मंत्रों का जप करना चाहिए। यह श्लोक कृष्ण पक्ष की तिथि हेतु शुक्ल पक्ष की तिथि ध्यान से पहले पढ़ें या "**नीलाञ्जन चयप्रख्या किशोर्यो नवयौवनां भजे**" यह पूर्वोक्त ध्यानों के अन्त में पढ़ें।

॥ अमावास्या का ध्यान और मंत्र ॥

दलिताञ्जनसंकाशां पीतांशुकपरिच्छदां ।
पीतगन्धप्रलिप्ताङ्गीं पीताभरणभूषिताम् ॥
पीतपद्मसमासीनां किशोरीं नवयौवनां ।

द्विलोचनां चन्द्ररेखां द्विभुजां कोरकस्तनीम् ॥
ललाटपट्टिकाशुद्धां सिन्दूरतिलकोज्ज्वलां ।
खेलत्खंजनगामीं च त्रिभंगललिताकृतिम् ॥
दाडिमीबीज सदृशदशनज्योतिरुज्ज्वलाम् ।

मन्त्र – ॐ ह्लीं ह्लीं ॐ अमावास्यायै स्वाहा ॐ ह्लीं ह्लीं ॐ।

पक्षों और तिथियों के ध्यान एवं मन्त्रों के साथ ही 'तिथि' के 'कवचस्तोत्र' की भी अपनी उपयोगिता है। अतः उसे भी यहाँ उद्धृत किया जा रहा है-

॥ तिथि कवचम् ॥

विनियोगः – अस्यतिथीनां कवचस्य अश्वत्थामाबलिव्यास हनुमद्विभीषणकृप परशुरामा ऋषयो, गायत्री छन्दः, श्रीमृत्युंजयशिवो देवता, धर्मार्थकाममोक्षेषु विनियोगः।

पूर्वे पातु सदा नित्याक्रीङ्कारी प्रतिपत्तिथिः । क्लींकारी पातु मे नित्यं द्वितीया ब्रह्मपूजिता ॥
ऐङ्कारी पातु मे नित्यं तृतीया पश्चिमे परा । व्लुङ्कारी पातु मे नित्या चतुर्थी विष्णुपूजिता ॥
व्लुङ्कारी पातु मे नित्यमूर्ध्वदेहमहर्निशं । ह्रीङ्कारी पातु मे नित्यं पञ्चमी मुखमण्डलम् ॥
श्रीङ्कारी पातु मे नित्यं षष्ठीरूपा च पार्वती । स्त्रीङ्कारी सप्तमी पातु नित्यं मे नाभिमण्डलम् ॥
हुंकारी चाष्टमी नित्यं कण्ठं मे पातु सर्वदा । श्रींकारी नवमी नित्यं स्वाधिष्ठानं सदाऽवतु ॥
दशमी पातु मे नित्यं हस्तयुग्मं यथा तथा । एकादशी सदा पातु चाक्षियुग्ममहर्निशम् ॥
द्वादशी पातु मे नित्यं हस्तयुग्मं यथा तथा । त्रयोदशी महालक्ष्मीः क्षेत्रस्थाननिवासिनी ॥
त्रयोदशी पातु नित्यं हंस इत्यक्षरात्मिका । हंकारः पातु मे नित्यं पादयुग्ममहर्निशम् ॥
सःकारः पातु मे नित्यं पादाग्रात् केशमण्डलम् । चतुर्दशी महामाया सर्वत्र परिरक्षतु ॥
स्वाकारश्चतुर्दशी नित्या नित्यं मे धनसम्पदं । हाकारः पूर्णिमा नित्यं देहि मे आयुवर्धनम् ॥
श्रीं हुं ह्लीं स्वाहा सर्वरूपा देवी तिथिरूपा च मां परिरक्षतु सर्वदा ।
हुं ह्लीं अमावास्या सदा पातु दारान् पुत्रपरिच्छदम् ।
ह्लीं हुं ह्लीं स्वाहा कथितं कवचं देवि! त्रैलोक्येषु दुर्लभम् ॥

॥ मास, तिथी, वारानुसार देवी नैवेद्यम् ॥

किस तिथि में, किस वार में, कौनसा 'नैवेद्य' लगाना चाहिए, इसकी तालिकाएँ यहाँ दी जा रही है। श्रद्धालु जन इनके अनुसार यथासम्भव पूजन कर विशेष लाभ प्राप्त कर सकते हैं। ये तालिकाएँ 'श्रीमद्देवीभागवत' के आधार पर हैं। 'भारत' के ऋषियों द्वारा यहाँ के वातावरण के अनुरूप निर्दिष्ट इन तालिकाओं का महत्त्व स्वतः स्पष्ट है। हम सभी को इन्हें अपनाकर सहज रूप में लाभ उठाना चाहिए॥

१. मासाऽनुसार देवीनैवेद्य		२. तिथिऽनुसार देवीनैवेद्य			३. वाराऽनुसार देवीनैवेद्य	
मास	वस्तुएँ एवं पदार्थ	तिथि	वस्तु	फल	वार	वस्तु
चैत्र	गोघृत के ५ व्यञ्जन	प्रतिपदा	गोघृत	नीरोगता	रवि	खीर
वैशाख	गुड़	द्वितीया	शक्कर	दीर्घायु	सोम	दूध
ज्येष्ठ	मधु	तृतीया	दूध	दु:खों से निवृत्ति	मङ्गल	केला
आषाढ़	मक्खन या महुआ रस	चतुर्थी	मालपूआ	विघ्नों का नाश	बुध	मक्खन
श्रावण	दही	पञ्चमी	केला	बुद्धि का विकास	गुरु	खाँड
भाद्रपद	शक्कर	षष्ठी	मधु	सुन्दर व्यक्तित्व	शुक्र	चीनी
आश्विन	खीर (पायस)	सप्तमी	गुड़	शोक से मुक्ति	शनि	गोघृत
कार्त्तिक	दूध	अष्टमी	नारिकेल	सन्ताप निवारण		
मार्गशीर्ष	फेनी	नवमी	धान का लावा	उभय सुख		
पौष	लस्सी	दशमी	काले तिल	मृत्यु से निर्भयता		
माघ	गोघृत	एकादशी	दही	देवी की प्रसन्नता		
फाल्गुन	नारिकेल	द्वादशी	चिउड़ा	देवी की प्रसन्नता		
		त्रयोदशी	चना	सन्तानप्राप्ति		
		चतुर्दशी	सत्तू	शङ्कर की भक्ति		
		पूर्णिमा	खीर	पितर उद्धार		
		अमावास्या	खीर	पितरों का उद्धार		

॥ नक्षत्र देवता पूजा प्रयोग:॥

सप्तविंशतिदल का पद्म बनाये। कार्य दिवस के नक्षत्र का मध्य में पूजन करे। अन्य का २७ पत्रपद्म में पूजन करे, तथा अभिजित सहित २८ नक्षत्रों का पूजन करें।

नक्षत्रेशास्तु अश्विन्यामश्विनौ भरण्यां यम। कृत्तिकायामग्नि। रोहिण्यां धाता। मृगशिरसि चन्द्र:। आर्द्रायां शिव:। पुनर्वसावदिति:। पुष्ये गुरु:। आश्लेषायां सर्प:। मघायां पितर:। पूर्वायामर्यमा। उत्तरायां भग:। हस्ते सूर्य:। चित्रायां त्वष्टा। स्वात्यां मारुत:। विशाखायामिन्द्राग्नी। अनुराधायां मित्र:। ज्येष्ठायामिन्द्र:। मूलायां निर्ऋति:। पूर्वाषाढायां तोयं। उत्तराषाढायां विश्वेदेवा:। अभिजिते प्रजापति:। श्रवणे हरि:। धनिष्ठायां वसव:। शतभिषणि वरुण:। पूर्वाभाद्रपदायामजैकपात्। उत्तराभाद्रपदायामहिर्बुध्न्य:। रेवत्यां षूषा। इति नक्षत्रेश सपर्याविधि:॥

प्रत्येक नक्षत्र के साथ उसके देवता का नाम दिया गया है, अत: उसी अनुसार पूजा करें यथा –

अश्विन्याधिपति: अश्विनौ नम:। भरण्याधिपति यमाय नम:।

॥ अथ मातृकापुटित नवग्रह पूजन प्रयोग:॥

तीन हस्त प्रमाण की चौकोर वेदी बनाये। उसके विभाग करके नवकोष्ठक बनाये। प्रत्येक कोष्ठक में ३-३ वृत्त बनाये। इसमें ग्रहों का दिशा क्रम वैदिक विधि से दिया गया है।

****

१. नवकोष्ठों के मध्य कोष्ठ में वृत्त मध्य में '**मों**' लिखें, उसके चारों ओर आठों दिशाओं में **अं आं इं ईं उं ऊं ऋं ॠं** लिखे। बाहर के वृत्त की वीथी में **मं मां मीं मुं मूं मृं मॄं में मैं** मों मौं **मं मः** वृत्ताकार लिखे। दूसरे एवं तीसरे वृत्त की मध्य वीथी में **अं आं....लं क्षं** मातृका वर्ण लिखे। पश्चात् सूर्य का ध्यान पूर्वक पूजन करे।

२. नवकोष्ठों में पूर्व के कोष्ठ में पहले वृत्त में '**ह्रीं**' लिखे। उसके आठों दिशाओं में **लृं ॡं एं ऐं ओं औं अं अः** लिखे। पहले व दूसरे वृत्त के बीच की वीथी में पूर्व की तरह **हं हां हीं** ......**हं हः** वर्ण लिखे। दूसरे व तीसरे वृत्त के बीच की विथि में अं आं........हं लं क्षं मातृका वर्ण लिखें। ध्यान पूर्वक **सों सोमाय नमः** से पूजन करे।

३. अग्निकोण के कोष्ठ में पहले वृत्त में "**क**" लिखे उसके आठों दिशाओं में "**कं खं गं घं ङं मङ्गल**" ये आठ वर्ण लिखे है। पहले एवं दूसरे वृत्त के अंतर में **कं कां कीं**......कं **कः** स्वर युक्त लिये। दूसरे एवं तीसरे वृत्त की वीथी में **अं आं....क्षं** मातृका वर्ण लिखे। पश्चात् भौम का पूजन करे।

४. दक्षिण दिशा के कोष्ठ में मध्य में "**चं**" लिखें उसके आठों दिशाओं में **चं छं जं झं ञं बुधाय** ये आठ वर्ण लिखे। पहले व दूसरे वृत्त के मध्य में वृत्ताकार **चं चां**....चं चः स्वर युक्त लिखे। दूसरे व तीसरे वृत्त के अंतराल में **अं आं....लं क्षं** मातृका वर्ण लिखे। पश्चात् बुध का पूजन करे।

५. नैऋत्य कोण के कोष्ठ मध्य में "**टं**" लिखे उसकी आठों दिशाओं में "**टं ठं डं ढं नं सौरये**" अष्ट वर्ण लिखे। पहले एवं दूसरे वृत्त के अंतराल में **टं टां टीं....टं टः** स्वरयुक्त लिखे। दूसरे व तीसरे वृत्त के अंतराल **अं आं.....लं क्षं** मातृका वर्ण लिखे। पश्चात् शनि का पूजन करे।

६. पश्चिम दिशा के कोष्ठ मध्य में "**तं**" लिखें उसकी आठों दिशाओं में "**तं थं दं धं नं गुरवे**" लिखे। पहले व दूसरे वृत्त के अंतराल में **तं तां तीं.....तं** तः स्वर युक्त लिखे। दूसरे व तीसरे वृत्त के अंतराल **अं आं.....लं क्षं** मातृका वर्ण लिखे। पश्चात् गुरु का पूजन करे।

७. वायव्य कोण के कोष्ठ मध्य में "**पं**" लिखे। इसकी आठों दिशाओं में **पं फं बं भं मं शुक्राय** लिखे। पहले व दूसरे वृत्त के अंतराल में **पं पां पीं.....पं पः** स्वर युक्त लिखे। दूसरे व तीसरे वृत्त के अंतराल में ५१ मातृका वर्ण लिखे। पश्चात् शुक्र का पूजन करे।

८. उत्तरकोष्ठ के प्रथमवृत्त के मध्य में "**यं**" लिखे उसकी अष्टदिशाओं में "**यं रं लं वं शं राह्वे**" लिखे। पहले व दूसरे वृत्त के अंतराल में **यं यां यीं.....यं यः** स्वर युक्त लिखे। दूसरे व तीसरे वृत्त के अंतराल में ५१ मातृका वर्ण लिखे। पश्चात् राहु का पूजन करे।

९. ईशान कोष्ठ के मध्य में "**षं**" लिखे उसकी अष्ट दिशाओं में षं सं **हं लं क्षं केतवे** अष्टवर्ण लिखे। प्रथम व दूसरे वृत्त की वीथी में **षं षां षीं....षं षः** स्वर युक्त लिखे। दूसरे व तीसरे वृत्त की वीथी में ५१ मातृका वर्ण लिखे। पश्चात् केतु का पूजन करे।

॥ अथ त्रिपुरसुन्दरी संध्या विधानम ॥

गायत्री की तरह त्रिपुरसुन्दरी की त्रिकाल एवं अर्धरात्रि को तुरीय संध्या की जाती है। अलग अलग समय अलग अलग ध्यान पूर्वक करे। प्रत्येक दिन तिथी की नित्या का पूजन भी विशिष्ट साधक करते है। यह संध्या कर्म साधकों एवं विद्वानों द्वारा किया जाता है अतः इस कर्म की सरल हिन्दी टीका आगे दी गई है

सन्ध्या चतुर्विधा ज्ञेया बाला कौमार यौवना ।
बहुधा ''**दादिदान्तां**'' का तात्पर्य ''**द्योदचोप्र............ तत्**'' अर्थात् विलोम गायत्री मंत्र से मानते है। अत: मंत्र **ॐ त्यादचोप्र (द्यादचोप्र).......... त्त ॐ श्लीं पशुं हुं फट् अमुकं शत्रुं हन हन हुं फट्।**

उपसंहार:- पाशुपतास्त्र के उपसंहार हेतु अनुलोम गायत्री मंत्र के साथ प्रयोग करे।

अनुलोम गायत्री मन्त्र :- ॐ श्लीं पशुं हुं फट् पाशुपतास्त्रं हन हन हुं फट्।

यदि ''**ॐ देवस्य धीमहि .... भर्गोदे**'' के अनुसार मंत्र प्रयोग किया हो तो इस मंत्र को विलोम जप कर ''**ॐ श्लीं पशुं हुं फट् पाशुपतास्त्रं हन हन फट्**'' का मंत्र प्रयोग करे।

॥ गायत्री पाशुपतास्त्र मंत्र ॥

मन्त्र - ॐ द्यादचोप्र नो यो योधि हिमधी स्यवदेर्गोभ ण्यंरेर्वतुविस तद् स्वोवर्भुभूरोम् । श्लीं पशु हुं फट् अमुक शत्रून् हन हन हुं फट् ॥

मंत्र सिद्धि हेतु २ लाख जप करे। यह मंत्र भगवान शिव के पाशुपतास्त्र की शक्ति को बढ़ाकर प्रलयकारी प्रभाव दिखाता है।

॥ ५. महाविपरीत प्रत्यङ्गिरा ॥

इस मंत्र के प्रयोग से शत्रु द्वारा किया कृत्या प्रयोग व षड्यंत्र नष्ट होता है।

मंत्र:- ॐ भूर्भुवः स्व तत्सवितुवरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्।

ह्रीं यां कल्पयन्ती नोऽरय क्रूरां कृत्यां वधूमिव ।
तां ब्रह्मणाप निर्णुद्म प्रत्यक् कर्तारमिच्छतु ॥

द्यादचोप्र नो यो योधि हिमधी स्यवदेर्गोभ ण्यंरेर्वतुविस तद् स्वोवर्भुभूरोम् ।

॥ ६. स्तंभनादि प्रयोग: ॥

पाशुपतास्त्र की तरह पहले विलोम गायत्री पढे फिर जो प्रयोग करना हो वहाँ ''**श्लीं पशुं (पशु) हुं फट्**'' नहीं पढे। अमुकं स्तम्भय-स्तम्भय, अमुकं मारय-मारय, अमुकं विद्वेषय-विद्वेषय पढे।

॥ ७. भद्रकाली गायत्री मंत्र ॥

मन्त्र - भद्रकाल्यै च विद्महे सर्वसिद्धिं च धीमहि सा नो देवि प्रचोदयात् ।

प्रत्यंगिरा मंत्र की तरह इस मंत्र के पहले **लोम** फिर **विलोम** गायत्री मंत्र लगाने से मंत्र विशेष शत्रु संहारक हो जाता है।

॥ ध्यानम् ॥

तां भद्रकालीं तपसा ज्वलन्तीं, महेश्वरीं शुद्धमहत्प्रतिष्ठाम् ।
शुद्धात्मकल्याणगुण स्वभावां, वन्दे सदा चेतसा भद्रकालीम् ॥
भद्रासनस्थां परमां पवित्रां, भद्रार्चिता शङ्खचक्रादियुक्ताम् ।
रुद्राक्षमालां गगने मटन्तीं, वन्दे सदा चेतसा भद्रकालीम् ॥

॥ ८. वायव्यास्त्र मंत्र प्रयोग॥

मंत्रः- ॐ वायव्यया या वायव्ययान्योर्वायया वा अमुकं शत्रुं मे हन हन हुं फट्।

(मम अमुक शत्रून् हन हन हुं फट्) भी प्रयोग किया जा सकता है।

इस मंत्र के प्रयोग से शत्रु का उच्चाटन हो जाता है तथा शत्रु पक्ष छिन्न-भिन्न हो जाता है।

उपसंहार :- वायव्यास्त्र के प्रयोग को शांत करने के लिये इस मंत्र को उल्टा जप कर प्रयोग करे यथा-

ॐ वा ययार्वान्योयाव्ययवा या याव्ययवा वायव्यास्त्रं हन हन हुं फट्। (वायव्यास्त्रं प्रशमय प्रशमय हुं फट्)

॥ ९. आग्नेयास्त्रं मंत्र प्रयोग॥

मंत्रः- ॐ अग्निस्त्यता हृद्भू शिवं वनाश्वाविणि (शिवविणि) हगादशरूपनः सदवा हादति तोयति राममसो हित्वावान सुसेद वेदयाऽमुकं शत्रुं मे हन हन हुं फट्।

इस मंत्र को २ लाख जप कर शत्रु पर वाण संधान करे या शत्रु की पुतली को गर्म लोहे की शलाका से वेधित करे।

उपसंहार :- मंत्र को विलोम क्रम से जपे तथा तिल त्रिमधु से होम करे।

ॐ यादवे दसेसु नवा त्वाहि सोममरा तियसो तिदहा वादस नपरूशदगाह। णिविश्वानाव वंशि भूद्हृ तास्त्याग्नि ॐ आग्नेयास्त्रं हन हन हुं फट्।

शत्रु को पुनः ठीक करना होतो ''**आग्नेयास्त्रं हन हन अमुकं पालय पालय हुं फट्**'' का जप करे।

॥ १०. सिंहास्त्र मंत्र प्रयोग॥

मंत्रः- ॐ वज्रनख वज्रदंष्ट्रायुधाय महासिंहाय हुं फट्।

यदि विशेष उग्र प्रयोग करना हो तो पहले अनुलोम गायत्री मंत्र फिर सिंह मंत्र पश्चात् विलोम गायत्री मंत्र से पुटित करे।

इस मंत्र से पढ़कर वाण चलाने या उड़द के दाने को अभिमंत्रित कर फेंकने से शत्रुसंघ विदीर्ण हो जाता है तथा शत्रु को भय व्याप्त हो जाता है। मार्ग में हिंसक जानवरो से रक्षा होती है। शत्रु की हस्तीसेना विदीर्ण हो जाती है।

उपसंहार - अनुलोम गायत्री के साथ इस मंत्र को विलोम (उल्टा) जपे।

विलोम मंत्र :- ''फट् हुं यहासिंहाम यधायुष्ट्रादं ज्रव खनज्रव ॐ''।

॥ इति ब्रह्मास्त्रादि प्रयोगाः ॥

॥ अथ श्रीदुर्गा तन्त्रम् ॥

॥ अथ महिषमर्दिनी प्रयोगः॥

महिषासुर वध का तीन कल्प में अलग अलग वृत्तान्त है। सर्व प्रथम उग्रचण्डा स्वरूप (१८ भुजाओं वाली) में महिषासुर का वध किया। दूसरे कल्प में १६ भुजा भद्रकाली रूप में महिषासुर का वध किया। तीसरे कल्प में १० भुजा कात्यायनी स्वरूप में महिषासुर का वध किया।

कालिका पुराण के अनुसार यही शक्ति पूर्व कल्प में **शैलपुत्री** कही गई है।

उग्रचण्डा कल्प के तंत्रानुसार **अष्टदल** की अष्टनायिका शक्तियां इस प्रकार है। (कालिका पुराणे) -

कौशिकी, शिवदूती, उमा, हेमवती, ईश्वरी, शाकंभरी, दुर्गा, महोदरी है। भद्रकाली कल्प के अनुसार अष्टदल की अष्टनायिका इस प्रकार है -(कालिका पुराणे)

जयन्ती, मङ्गला, काली, कपालिनी, दुर्गा, शिवा, क्षमा, धात्री, है।

अग्नि पुराण के अनुसार **उग्रचण्डा** की अन्य अष्टनायिकायें इस प्रकार है - इनका पूजन अष्टदल में करें।

रुद्रचण्डा, प्रचण्डा, चण्डोग्रा, चण्डनायिका, चण्डा, चण्डवती, चण्डरूपा, अतिचण्डिका, उग्रचण्डा सहित ये नौ दुर्गायें हैं।

यंत्रार्चन प्रयोग में अष्टदल में उक्त देवियों का भी पूजन करें

अष्टाक्षर मंत्रः- महिषमर्दिनि स्वाहा।

नवाक्षर मंत्राः - ॐ महिषमर्दिनि स्वाहा ॥१॥ ह्रीं महिषमर्दिनि स्वाहा ॥२॥ स्त्रीं महिषमर्दिनि स्वाहा ॥३॥ हुं महिषमर्दिनि स्वाहा ॥४॥ हुं महिषमर्दिनि स्वाहा ॥५॥ क्लीं महिषमर्दिनि स्वाहा ॥६॥ ऐं महिषमर्दिनि स्वाहा ॥७॥

दशाक्षर मंत्रः - ॐ महिषमर्दिनि स्वाहा ह्रीं (हिन्दी तंत्र सारे) **॥१॥ ॐ ह्रीं महिषमर्दिनि स्वाहा ॥२॥ क्लीं ॐ महिषमर्दिनि स्वाहा ॥३॥ क्लीं महिषमर्दिनि स्वाहा** (हिन्दी तंत्र सारे) **॥४॥ इनके ऋषि अष्टाक्षर के समान हैं।**

मेरुतंत्र में मंत्रोद्धारः- **महिषमर्दिनीत्युक्त्वा स्वाहान्तोऽष्टक्षरो मनुः। ऋषि मार्कण्डेय, छन्द गायत्री, देवतासुरासुरनुता देवी महिषमर्दिनी कहा हैं।** मंत्र महार्णव व शारदातिलक के अनुसार अष्टाक्षरी मंत्र विधान इस प्रकार हैं।

॥ महिषमर्द्दिनी मंत्र प्रयोगः॥

मंत्रो यथा शारदातिलके - **महिषमर्द्दिनि स्वाहा** ॥ इत्यष्टाक्षरमंत्रः।

विनियोग :- ॐ अस्य श्री महिषमर्द्दिनीमंत्रस्य नारद ऋषिः। गायत्री छंदः। महिषमर्द्दिनी देवता। सर्वेष्टसिद्धये

जपे विनियोगः।

ऋष्यादिन्यास :- ॐ नारदऋषये नमः शिरसि ॥१॥ गायत्रीच्छंदसे नमोः मुखे ॥२॥ महिषमर्द्दिनीदेवतायै नमो हृदि ॥३॥ विनियोगाय नमः सर्वांगे ॥४॥ इति ऋष्यादिन्यासः।

करन्यास :- महिषहिंसिके हुं फट् अंगुष्ठाभ्यां नमः ॥१॥ महिषश (त्रो) त्त्रीशाङ्गि हुंफट् तर्जनीभ्यां नमः ॥२॥ महिषं भीषय भीषय हुंफट् मध्यमाभ्यां नमः ॥३॥ महिषं हन हन देवि हुंफट् अनामिकाभ्यां नमः ॥४॥ महिषसूदिनि हुंफट् कनिष्ठिकाभ्यां नमः ॥५॥ इति करन्यास्॥

हृदयादिन्यास :- महिषहिंसिके हुं फट् हृदयाय नमः ॥१॥ महिषश (त्रो) त्त्रीशाङ्गि हुं फट् शिरसे स्वाहा ॥२॥ महिषं भीषय भीषय हुंफट् शिखायै वषट् ॥३॥ महिषं हन हन देवि हुं फट् कवचाय हुम् ॥४॥ महिषसूदिनि हुं फट् अस्त्राय फट् ॥५॥ इति पचांगन्यासः।

इति न्यासविधिं कृत्वा ध्यायेत्।

॥ अथ ध्यानम् ॥

गारुडोपलसन्निभां मणिमौलिकुंडलमंडितां नौमि भालविलोचनां महिषोत्तमांगनिषेदुषीम् ।
चक्रशंखकृपाणखेटकबाण कार्मुकशूलकांस्तर्ज्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम् ॥१॥

एवं ध्यात्वा सर्वतोभद्रमंडले '**मं मंडूकादिपरतत्वांतपीठदेवताभ्यो नमः**' इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत्। तद्यथा पूर्वादिक्रमेण - **ॐ जयायै नमः** ॥१॥ **ॐ विजयायै नमः** ॥२॥ **ॐ अजितायै नमः** ॥३॥ **ॐ अपराजितायै नमः** ॥४॥ **ॐ नित्यायै नमः** ॥५॥ **ॐ विलासिन्यै नमः** ॥६॥ **ॐ दोग्ध्यै नमः** ॥७॥ **अघोरायै नमः** ॥८॥ मध्ये **ॐ मंगलायै नमः** ॥९॥

इति पीठशक्तीः संपूज्य स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपर्वकं '**ह्रीं आधारशक्तये नमः**' इति पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य तत्र प्राणप्रतिष्ठां च कृत्वा पुनर्ध्यात्वामूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ।

प्रथमावरणम् :- तत्र क्रमःषट्कोणकेसरेषु अग्निकोणे **महिषहिंसिके हुं फट् हृदयाय नमः** ॥१॥ निर्ऋतिकोणे **महिषश (त्रो) त्त्रीशाङ्गि हुं फट् शिरसे स्वाहा** ॥२॥ वायुकोणे **महिषं भीषय भीषय हुं फट् शिखायै वषट्** ॥३॥ ईशानकोणे **महिषं हन हन देवि हुंफट् कवचाय हुं** ॥४॥ देवीपश्चिमे **महिषसूदिनि हुंफट् अस्त्राय फट्** ॥५॥ इति पंचांगानि पूजयेत्।

॥ श्री महिषमर्दिनी यन्त्रम् ॥

द्वितीयावरणम् :- ततोऽष्टदलेषु पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य पूर्वादिक्रमेण- **ॐ आं दुर्गायै नमः। दुर्गाश्रीपादुकां पूजयामि तर्पयामि नमः** ॥१॥ इति सर्वत्र। **ॐ ईं वरवर्णिन्यै नमः। वरर्णिनीश्रीपा०** ॥२॥ **ॐ ऊं आर्य्यायै नमः। आर्य्याश्रीपा०** ॥३॥ **ॐ ॠं कनकप्रभायै नमः। कनकप्रभाश्रीपा०** ॥४॥ **ॐ लृं कृत्तिकायै नमः। कृत्तिकाश्रीपादु०** ॥५॥ **ॐ ऐं अभयप्रदायै नमः। अभयप्रदाश्रीपा०** ॥६॥ **ॐ औं कन्यायै**

नमः। कन्याश्रीपा० ॥७॥ ॐ अः सरूपायै नमः। सुरूपाश्रीपा० ॥८॥ इत्यष्टौ शक्तीः पूजयेत्।

तृतीयावरणम् :- पत्राग्रेषु पूर्वादिक्रमेण। **यं चक्राय नमः ॥१॥ रं शंखाय नमः ॥२॥ लं खड्गाय नमः ॥३॥ वं खेटकाय नमः ॥४॥ शं बाणाय नमः ॥५॥ षं धनुषे नमः ॥६॥ सं शूलाय नमः ॥७॥ हं कपालाय नमः ॥८॥** इत्यस्त्राणि पूजयेत्।

ततो भूपुरे इन्द्रादीन् वज्रादींश्च पूजयेत्। इत्यारवणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात्। अस्य पुरश्चरणमष्टलक्षजपः। तत्सहस्त्रं होमः। तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात्। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्। तथाचअष्टलक्षं जपेन्मंत्रं तत्सहस्त्रं तिलैः शुभैः। वशयेत्तिलहोमेन नरान्नरपतीनपि ॥१॥ सिद्धार्थैर्जुहुयान्मंत्री रोगान्मुच्येत तत्क्षणात्। पद्मैर्हुत्वा जयेच्छत्रून्दूर्वाभिः शांतिमाप्नुयात् ॥२॥ पलाशकुसुमैर्वृष्टिर्धान्यैर्धान्यश्रियं व्रजेत्। काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम् ॥३॥ मरीचहोमान्मरणं रिपुराप्नोति सर्वथा। क्षुद्रादिचोरभूताद्यान्ध्यात्वा देवी विनाशयेत् ॥४॥

॥ इति महिषमर्द्दिनीमंत्रप्रयोग ॥

॥ महिषमर्दिनी मंत्रः॥

लक्ष्मी प्राप्ति के पश्चात् इर्षा के कारण अनायास शत्रु पैदा हो जाते है। अतः उनके दमन के हेतु महिषमर्दिनि का प्रयोग करे।

मंत्र :-ॐ ह्रीं महामहिषमर्दनि ठं ठः । महिषहिंसके नमः। महिषशत्रुं भ्रामय, ॐ फ ठ ठं महिषं हेषय हेषय ॐ हूं महिषं ह्रेषय ह्रेषय हूं महिषं हन हन देवि हूं महिषनिषूदनि फट्। (अग्नि पुराणे)

शत्रु को महिष का रूप मानकर उसके वध की कल्पना करें।

॥ अथ महिषासुरमर्दिनी स्वरूप भेदाः॥

महिषासुरमर्दिनी दशभुजा दुर्गा कात्यायनी है जिसका पूजन प्रयोग नवदुर्गा के प्रयोगों में क्रमशः अलग से दिया गया है।

षोडशभुजा दुर्गा महिषासुरमर्दिनी भद्रकाली स्वरूपा है तथा अष्टादश भुजा दुर्गा का पूजन उग्रचण्डा क्रम से करें।

॥ दशभुजा दुर्गा ध्यानम् ॥

दशभुजा दुर्गा कात्यायनी स्वरूपा है।

जटाजूटसमायुक्तामर्धेन्दुकृत लक्षणाम् । नेत्रत्रयसमायुक्तां पद्मेन्दुसदृशाननाम् ॥ अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् । नवयौवन संपन्नां सर्वाभरणभूषिताम् ॥ सुचारुदशनां तद्वत्पीनोन्नतपयोधराम् । त्रिभङ्गस्थान संस्थानां महिषासुरमर्दिनीम् ॥ त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं क्रमादधः । तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत ॥ खेटकं पूर्णचापं च पाशमङ्कशमूर्ध्वतः । घण्टां वा परशुं चापि वामतः सन्निवेशयेत् ॥ अधस्तान्महिषं तद्वद्वि शिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥

॥ दशभुजा दुर्गा ध्यानम् ॥

(मत्स्य पुराणे)

महिषासुरमर्दिनी दशभुजा दुर्गा कात्यायनी है जिसका पूजन प्रयोग नवदुर्गा के प्रयोगों में क्रमशः अलग से दिया गया है।

जटाजूट समायुक्तामर्धेन्दुकृत लक्षणाम् । नेत्रत्रयसमायुक्तां पद्मेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् । नवयौवनसम्पन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत्पीनोन्नत पयोधराम् । त्रिभङ्गस्थान संस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं क्रमादधः । तीक्ष्णं बाणं तथा शक्तिं वामातोऽपि निबोधतः ॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्ध्वतः । घण्टां वा परशु चापि वामतः सन्निवेशयेत् ॥
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥
सपाशं वामहस्तेन धृतकेशं च दुर्गया । वमद्रुधिरवक्त्रं च देव्या सिंहं प्रदर्शयेत् ॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् । किञ्चिदूर्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ॥

(कालिका पुराण में - लोचनत्रय संयुक्तां पूर्णेन्दुसदृशाननाम् लिखा है)

भविष्योत्तर पुराण में ध्यान इस प्रकार है।

पीताम्बर परीधानां नीलकौशेय संयुताम् । ग्रैवेयहारकेयूर नूपुरा भरणान्विताम् ॥
नानारत्न विचित्रेण मुकुटेन विराजिताम् । अनेक कुसुमाकीर्णकपर्देन विराजिताम् ॥
नितम्बबिम्ब सन्नद्ण किङ्किणी क्वण नादिनीम् । शूलचक्रदण्ड शक्ति वज्र चापासि धारिणीम् ॥
घण्टाक्षमालाकरक पानपात्र लसत्कराम् । तदग्रे छिन्नशिरसं महिषं रुधिराप्लुतम् ॥
निःसृतार्धतनुं कण्ठनालाच्चर्मासि धारिणीम् । देवीकरधृत ग्रीवं शूलेनोरसि ताडितम् ॥
दैत्यं करालदंष्ट्रास्यं विद्युत्कपिशमूर्धजम् । नागपाशेन विक्षिप्तं हर्यक्षेणाभिविद्रुतम् ॥
वमद्रुधिर वक्त्रेण धुन्वतोऽर्ध शटारुषा । उर्धलाङ्गूल दण्डेन देव्यधिष्ठान शोभिना ॥

॥ षोडशभुजा दुर्गा ध्यानम् ॥

क्षीरोदस्योत्तरे तीरे विभ्रती विपुलां तनुम् । अतसीपुष्पवर्णाभा ज्वलत्काञ्चन कुण्डला ॥
जटाजूटमखण्डेन्दु मुकुटत्रय भूषिता । नागहारेण सहिता स्वर्णहार भूषिता ॥
शूलं खड्ग च शंखं च चक्रं बाणं तथैव च । शक्तिं वज्रं च दण्डं च नित्यं दक्षिणबाहुभिः ॥
विभ्रती सततं देवी विकाशिनयनोज्ज्वलाः । खेटकं चर्मचापं च पाशं चाङ्कुशमेव च ॥
घण्टां परशुं मुशलं विभ्रती वामपाणिभिः । सिंहस्था नयनै रक्तवर्णै स्त्रिभिरभिज्ज्वला ॥
शूलेन महिषं भित्वा तिष्ठन्ती परमेश्वरी । वामपादेन चाक्रम्य तत्र देवी जगन्मयी ॥

॥ षोडशभुजा (भद्रकाली) ॥

महिषासुर मर्दिनी, षोडशभुजा भद्रकाली ने महिषासुर का वध किया था। अग्नि पुराण के अनुसार जो अस्त्रादि १८ भुजा के दिये वे ही हैं, केवल डमरु व तर्जनी मुद्रा का अभाव है। शेष ध्यान वही है जो पूर्व में लिखा है।

कालिका पुराण व पुरश्चर्यार्णव के अनुसार ध्यान इस प्रकार है।

क्षीरोदस्योत्तरे तीरे विभ्रती विपुलां तनुम् । अतसीपुष्पवर्णाभा ज्वलत्काञ्चन कुण्डला ॥
जटाजूटमखण्डेन्दु मुकुटत्रयभूषिता । नागहारेण सहिता स्वर्णहार विभूषिता ॥
शूलं खड्गं शङ्खं च चक्रं बाणं तथैव च । शक्तिं वज्रं च दण्डं च नित्यं दक्षिणबाहुभिः ॥
विभ्रती सततं देवी विकाशिनयनोज्ज्वला । खेटकं चर्म चापं च पाशं चाङ्कुशमेव ॥
घण्टां परशुं मुशलं विभ्रती वामपाणिभिः । सिंहस्था नयनै रक्तवर्णैस्त्रिभिरभिज्ज्वला ॥
शूलेन महिषं भित्वा तिष्ठन्ती परमेश्वरी । वामपादेन चाक्रम्य तत्र देवी जगन्मयी ॥

॥ अष्टादशभुजा दुर्गा ध्यानम् ॥

अष्टादशभुजा दुर्गा उग्रचण्ड स्वरूपा है। कल्पभेद महिषासुरमर्दिनि का महालक्ष्मी स्वरूपा भेद भी यही है।

॥ ध्यानम् ॥

अक्षस्त्रक्परशुं गदेषुकुलिशं पद्मं धनुःकुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाश सुदर्शने च दधतीं हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥

॥ अन्यच्च ॥

ततो ध्यायेन्महालक्ष्मीं महिषासुरमर्दिनीम् । समस्तदेवता तेजोजातां पद्मासन स्थिताम् ॥
अष्टादशभुजामक्षमालां पद्मं च शायकान् । खड्गं वज्रं गदां चक्रं दक्षहस्ते कमण्डलुम् ॥
खड्गं च दधतीं वामे शक्तिं च परशुं धनुः । चर्मदण्डौ सुरापात्रं घण्टां पाशं त्रिशूलकम् ॥

॥ अष्टादशभुजा ध्यानम् ॥

धम्मिल्लसंयतकचा विधोश्चाधोमुखीं कलाम् । केशान्ते तिलकस्योर्ध्वे दधती सुमनोहरा ॥
मणिकुण्डल संधृष्टगण्डा मुकुटमण्डिता । सज्ज्योतिः कर्णपूराभ्यां कर्णावापूर्य सङ्गता ॥
ससुवर्णमणिमाणिक्य नागहार विराजिता । सदासुंधिभिः पद्मैरम्लानैरति सुन्दरी ॥
मालां विभर्त्ति ग्रीवायां रत्नकेयूरधारिणी । मृणालायत वृत्तैस्तु बाहुभिः कोमलै शुभैः ॥
राजन्ती कञ्जुकोपेता पीनोन्नत पयोधरा । क्षीणमध्या पीतवस्त्रा त्रिवलोमध्यभूषिता ॥
अष्टादशभुजैका तु दक्षे मुण्डं च खेटकम् । आदर्शं तर्जनीं चाप ध्वजं डमरुकं चर्मं च ॥
पाशं वामे विभ्रती च शक्ति मुद्गर शूलकम् । वज्र खड्गाङ्कुश शरांश्चक्रं देवी शलाकया ॥
सिंहोस्योपरि तिष्ठन्ती व्याघ्रचर्मणि कौशिकी । विभ्रती रूपममतुलं ससुरासुर मोहनम् ॥

(अस्त्रों का क्रम पुरश्चर्यार्णव में अधूरा है अतः अस्त्रक्रम अग्निपुराण में से दिया है।)

****

वैकृति रहस्य में अस्त्रों का क्रम इस प्रकार से है। -

अक्षमाला च कमलं वाणोऽसि कुलिशं गदा । चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ॥

शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः । अलंकृतभुजामेभिरायुधैः कमलासनम् ॥

इसी तरह मध्यम चरित में १८ भुजा का ध्यान अलग है।

॥ विंशतिबाहु दुर्गा ॥

(अग्नि पुराणे)

चण्डी विंशतिबाहुः स्याद विभ्रती दक्षिणैः करैः । शूलासि शक्ति चक्राणि पाशखेटायुधाभयम् ॥

डमरुं शक्तिकां वामैर्नागपाशं च खेटकम् । कुठाराङ्कुश पाशांश्च घण्टायुध गदास्तथा ॥

आदर्शं मुद्गरान्हस्तैश्चण्डी सा महिषार्दिनी । तदधो महिषश्छिन्नमूर्धा पातितमस्तकः ॥

॥ अष्टभुजा ध्यानम् ॥

अष्टभुजा देवी सर्वमङ्गला भी तथा शुंभ निशुंभ मर्दिनी महासरस्वती भी यही है।-

वरदं चाभयं खड्गमक्षसूत्रं च दक्षिणे ।
दर्पणं शूलचापं च चतुर्थे खेटकं भवेत् ॥
ध्याये चाष्टभुजा देवी मङ्गला सर्वमङ्गला ॥१।
दधत् चाष्टभुजा वाणमुसले शूलचक्रभृत् ।
शङ्खं घण्टां लाङ्गलं च कार्मुकं वसुधाधिप ।
ध्येया संपूजिता भक्ता सर्वतत्वं महेश्वरी ॥२॥

॥ चतुर्भुजा ध्यानम् ॥

सिंहपद्मासना सौम्या जटामुकुटमण्डिता ।
शूलाक्षसूत्र वरदा कमण्डलु करा शुभा ॥
कालाभ्रामां कटाक्षैररिकुल भयदं मौलिबद्धेन्दुरेखां ,
शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्तीं त्रिनेत्राम् ।
सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं ,
ध्यायेद् दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥

॥ अथ महिषमर्दिनी कवचम् ॥

अथ वक्ष्ये महादेवी कवचं सर्वकामदम् । यस्य प्रसादमासाद्य भवेत्साक्षात्सदाशिवः ॥१॥

ॐकारं पूर्वमुच्चार्य मन्त्री मन्त्रस्य सिद्धये । प्रपठेत्कवचं नित्यं मन्त्रवर्णस्य सिद्धये ॥२॥

विनियोगः- ॐ महिषर्द्दिन्याः कवचस्य भगवान्महाकाल ऋषिः, अनुष्टुप् छन्दः, आद्या शक्तिः, महिषमर्द्दिनी देवता चतुर्वर्गफल प्राप्तये जपे विनियोगः।

क्लीं पातु मस्तके देवी कामिनी कामदायिनी । मकारे पातु मां देवी चक्षुर्युग्मं महेश्वरी ॥३॥

****

हिकारे पातु वदने हिंगुलासुर नायिका । षकारे पातु मां श्वेता जिह्वायां त्वपराजिता ॥४॥
मकारे पातु मां देवी मर्दिनी सुरनायिका । र्दिकारे पातु मां देवी सावित्री कालनाशिनी ॥५॥
निकारे पातु मां नित्या हृदये वासपार्श्वयोः । नाभौ लिङ्गे गुदे कण्ठे कर्णयोः पार्श्वयोस्तथा ॥६॥
शिखायां कवचे पादे मुखजङ्घायुगे तथा । सर्वाङ्गे पातु मां स्वाहा सर्वशक्तिसमन्विता ॥७॥
कामाद्या पातु मां स्वाहा सर्वाङ्गे पातु मर्द्दिनी । दशाक्षरी महाविद्या सर्वाङ्गे पातु मर्दिनी ॥८॥
मर्दिनी पातु सततं मर्दिनी रक्षयेत्सदा । राजस्थाने तथा दुर्गे सिंहव्याघ्रभयादिषु ॥९॥
श्मशाने प्रान्तरे दुर्गे नौकायां वह्निमध्यतः । दुर्गा पातु सदा देवी आर्या पातु सदाशिवा ॥१०॥
प्रभा पातु महेशानी गगने पातु सर्वदा । कृत्तिका पातु सततमभया सर्वदाऽवतु ॥११॥
प्रभा पातु महामाया माया पातु सदा मम । नन्दिनी पातु सततं सुप्रभा सर्वदाऽवतु ॥१२॥
विजया पातु सर्वत्र देव्यङ्गे नवशक्तयः । शक्तयः पातु सततं मुद्राः पातु सदा मम ॥१३॥
जया पातु सदा सूक्ष्मा विशुद्धा पातु सर्वदा । डाकिन्यः पातु सततं सिद्धाः पातु सदा मम ॥१४॥
सर्वत्र सर्वदा पातु देवी महिषमर्द्दिनी । इति ते कथितं दिव्यं कवचं सर्वकामदम् ॥१५॥
यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः । गोपितं सर्वतन्त्रेषु विश्वसारे प्रकाशितम् ॥१६॥
सर्वत्र सुलभा विद्या कवचं दुर्लभं महत् । शठाय भक्तिहीनाय निन्दकाय महेश्वरि ॥१७॥
न्यूनाङ्गे ह्यतिरिक्ताङ्गे क्रूरे मिथ्यातिभाषिणि । न स्तवं दर्शयेद्दिव्यं कवचं सुरदुर्लभम् ॥१८॥
यत्र तत्र न वक्तव्यं शंकरेण च भाषितम् । दत्त्वा तेभ्यो महेशानि नश्यन्ति सिद्धयः क्रमात् ॥१९॥
मन्त्राः पराङ्मुखा यान्ति शापं दत्त्वा सुदारुणम् । अशुभं च भवेत्तस्य तस्माद्यत्नेन गोपयेत् ॥२०॥
गोरोचना कुकुमेन भूर्जपत्रे महेश्वरि । लिखित्वा शुभयोगेन ब्राह्मैन्द्रे वैधृतौ तथा ॥२१॥
आयुष्मत्सिद्धियोगे च बालवे कौलवेपि वा । वाणिजे श्रवणायां च रेवत्यां वा पुनर्वसौ ॥२२॥
उत्तरात्रययोगेषु तथा पूर्वात्रयेषु च । अश्विन्यां वाऽथ रोहिण्यां तृतीया - नवमीतिथौ ॥२३॥
अष्टम्यां वा चतुर्दश्यां षष्ठ्यां वा पंचमीतिथौ । अमायां वा पूर्णिमायां निशायां प्रान्तरे तथा ॥२४॥
एकलिङ्गे श्मशाने च शून्यागारे शिवालये । गुरुणावैष्णवैर्वापि स्वयम्भू कुसुमैस्तथा ॥२५॥
शुक्लैर्वा रक्तकुसुमैश्चन्दनै रक्तसंयुतैः । शवाङ्गारचितावस्त्रे लिखित्वा धारयेत्पुनः ॥२६॥
तस्य सर्वार्थसिद्धिः स्याच्छंकरेणैव भाषितम् । कुमारीं पूजयित्वा च देवीसूक्तं निवेद्य च ॥२७॥
पठित्वा पूजयेद्विप्रान्धनवान्वेद पारगान् । आखेटकमुपाख्यानं कुमार्यैव दिनत्रयम् ॥२८॥
तदा धरेन्महारक्षां कवचं सर्वकामदम् । नाधयो व्याधयस्तस्य दुःखशोकैर्भयं क्वचित् ॥२९॥
वादी मूको भवेद्दृष्ट्वा राजा च सेवकायते । मासमेकं पठेद्यस्तु प्रत्यहं नियतः शुचिः ॥३०॥
दिवा भवेद्धविष्याशी रात्रौ शक्ति परायणः । षट्सहस्त्र प्रमाणेन प्रत्यहं प्रजपेत्सदा ॥३१॥
षण्मासैर्वा त्रिभिर्मासैर्विद्वरो भवति ध्रुवम् । अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥३२॥

अरोगी वलवान्श्चैव राजा च दासतामियात् ।
रजस्वलाभगे नित्यं जपेद्विद्यां समाहितः ।
एवं यः कुरुते धीमान्स एव श्रीसदाशिवः ॥३३॥

॥ इति श्रीविश्वसारतन्त्रे महिषमर्द्दिन्यां कवचं समाप्तम् ॥

॥ आश्विन नवरात्रे पूजा क्रम विशेषः ॥

महिषासुर मर्दिनी महामाया का प्राकट्य आश्विन में हुआ तथा राम-रावण युद्ध में भी कालिका श्री राम पर प्रसन्न हुई थी। अतः आश्विन पक्ष के नवरात्र प्रधान है।

देवि के तीन स्वरूप प्रधान है। **(१) दशभुजा (२) षोडशभुजा (३) अष्टादशभुजा।**

वैसे प्रधान पूजा शुक्ल पक्ष की ही कही गयी है। फिर भी विशेष पूजा क्रम में कुछ भिन्नता है। उपासक चतुर्भुजा व अष्टभुजा देवी की भी पूजा करते है।

॥ दशभुजा ॥

दशभिर्बाहुभिर्युक्ता सैव कात्यायनी स्मृता ।

आश्विन कृष्ण १४ को जगन्मयी प्रत्यक्ष रूप में प्रकट हुई। शुक्ल पक्ष में सप्तमी को वह देवों के तेजों की मूर्ति परम शोभन रूप में हुई। अष्टमी को समलंकृत हुई। नवमी को उपहारों से पूजित होकर महिषासुर का वध किया तथा दशमी को अन्तर्धान हो गई। परन्तु मार्कण्डेय पुराणानुसार युद्ध कई दिन चला था।

कन्या राशि में सूर्य आने पर शुक्ल पक्ष की प्रतिपदा को घटस्थापन कर पूजा आरंभ करे। षष्ठी तिथि को बिल्व वृक्ष की शाखाओं में बोधन करें देवी के फल फूल चढावें। सप्तमी तिथी को शाखा का आहरण करके पूजन करना चाहिये। अष्टमी को विशेष रूप से पूजा समाचरण करना चाहिये। स्वयं जागरण करें महानिशा में बलिदान करें। देवी का पूजन कर दशमी तिथि में विसर्जन करना चाहिये। उस तिथि में रात्रि में विसर्जन (संध्या समय दशमी तिथि होवे) करके समाचरण करें। अथवा मूल नक्षत्र में आवाहन एवं श्रवण में विसर्जन करें।

॥ षोडशभुजा ॥

सैवेयं षोडशभुजा भद्रकाली गीयते ।

अतः भद्रकाली तन्त्र से पूजा करें॥ षोडशभुजा देवी की पूजा करें तो विशेषतः दुर्गा तन्त्र से पूजा करें। कन्या की संक्रान्ति में कृष्णा एकादशी को उपवास करें, द्वादशी को एक बार भोजन करें। चतुर्दशी में महामाया का बोधन अर्चन विविध नैवेद्यों से करें। गीत वाद्य यंत्रों से निर्घोष करें।

दूसरे दिन में अयाचित उपवास करें तथा नवमी तक व्रत पूर्वक पूजा करें। ज्येष्ठा नक्षत्र में भली भाँति से अर्चन कर मूल नक्षत्र में प्रतिपूजन करें। पुनः उत्तराषाढा नक्षत्र में पूजन कर श्रवण नक्षत्र में विसर्जन करें।

॥ अष्टादशभुजा दुर्गा ॥

अष्टादशभुजा दुर्गा उग्रचण्डेति या स्मृता ।

अत: उग्रचण्डा तंत्र के अनुसार पूजा करें।

इस देवि का पूजन भी दुर्गा तन्त्र के अनुसार करें। कन्या के सूर्य में कृष्ण पक्ष में आर्द्रा नक्षत्र में दिन में पूजन करें। कृष्णा नवमी तिथि को गीत वाद्यों द्वारा देवी का बोधन करें। शुक्लपक्ष में चतुर्थी तिथि में देवी के केशों का विमोचन करें। पंचमी को प्रात: शुद्ध जल से स्नपन करायें। सप्तमी में नौ तरह के पौधों की पत्रिकाओं की पूजा करें (रंभा पत्रिका, कच्चि, हरिद्रा, जयंती, बिल्व, दाडिम, आशोक, मान, धान्य पत्रिका)।

अष्टमी में भी उपोषण करें। रात्रि में पूजा करें। रात्रि में या नवमी को बलिदान करें। दशमी को क्रीड़ा कौतुक मंगलों द्वारा संप्रेषण करें। (जप होमादि भी नवमी में करें) दशमी को नीराजन करके देवी का विसर्जन करें।

राम रावण युद्ध समय ब्रह्माजी ने देवी का बोधन कृष्णा १४ को किया था। नवमी को रावण का वध हुआ एवं देवों द्वारा शार्वरोत्सवों में दशमी तिथि में देवी संप्रेषित की गई थी।

तृतीया तिथि, स्वाति नक्षत्र तक राक्षसों का बल बहुत बढ गया था। चतुर्थी से देवों का बल बढा था इसलिये प्रधान पूजा तन्त्रोंक्त विधि से चतुर्थी से की गई है।

॥ अष्टनायिका पूजनम् ॥

महिषासुर मर्दिनी (१०, १६, १८, २० भुजा दुर्गा) पूजा प्रयोग में दुर्गा तंत्र के साथ उग्रचण्डा तन्त्र से भी पूजा करनी चाहिये। अग्निपुराण के अनुसार **रुद्रचण्डा, प्रचण्डा, चण्डोग्रा, चण्डनायिका, चण्डा, चण्डवती, चण्डरूपा, अतिचण्डिका और उग्रचण्डा नव नायिकायें (नव सखी) हैं।** अष्टदल में उग्रचण्डा का मध्य में तथा रुद्रचण्डादि अष्टनायिकाओं का पूजन करें।

कालिका पुराण के अनुसार महिषासुर मर्दिनी उग्रचण्डादि अष्टशक्तियों से परिवेष्टित है अष्टदल में उनका पूजन करें।

उग्रचण्डा, प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ॥

वैकृति रहस्यानुसार पूजाक्रम -

समष्टि उपासना क्रम में महाकाली, महालक्ष्मी, महासरस्वती की अभिन्नरूप में संयुक्त पूजा की जाती है।

अपने मूल तत्त्व में ये सभी देवियां चतुर्भुजा है। पश्चात् ये कल्पभेद से दशानना दशभुजा, अष्टादशभुजा व अष्टभुजा स्वरूप धारण किया है।

चतुर्भुजा महालक्ष्मी क्रम की उपासना में मध्य में चतुर्भुजा महालक्ष्मी स्थापित करके उसके दक्षिण ओर चतुर्भुजा महाकाली तथा वाम भाग में चतुर्भुजा महासरस्वती का पूजन करें।

महाकाली के पृष्ठभाग में रुद्र-गौरी, महालक्ष्मी के पृष्ठभाग में ब्रह्मा-सरस्वती तथा महासरस्वती के पृष्ठभाग में विष्णु-लक्ष्मी का पूजन करें। तदनन्तर चतुर्भुजा महालक्ष्मी के सामने की ओर मुंह करती (कुछ तिरछी) अठारह भुजा वाली महालक्ष्मी की स्थापना करें, महाकाली के सामने दशाशना दशभुजा देवी तथा चतुर्भुजा महासरस्वती के सामने अष्टभुजा देवी को स्थापित करें।

रुद्र-गौरी	ब्रह्मा-सरस्वती	विष्णु-लक्ष्मी
चतुर्भुजा महाकाली	चतुर्भुजा महालक्ष्मी	चतुर्भुजा महासरस्वती
दशानना दशभुजा	अष्टादशभुजा	अष्टभुजा

यदि केवल **अठारह भुजा देवी** की पूजा करनी हो तो देवी के दक्षिण भाग में काल एवं वामभाग में मृत्यु की पूजा करें।

यथा - ॐ कालाय नमः, ॐ मृतवे नमः।

सम्मुख में सिंह व महिष की पूजा करें।

यदि **दशभुजा दशवक्त्रा देवी** का पूजन करना हो तो उसके साथ भी **कालमृत्यु** की पूजा करें।

यदि केवल **अष्टभुजा देवी** का पूजन करना हो तो **कालमृत्यु** के साथ देवी के दक्षिण भाग में **रुद्र** व वाम भाग में **विनायक** का पूजन करें। देवी के साथ **ब्राह्मी, माहेश्वरी, कौमारी, वैष्णवी, वाराही, नारसिंही, ऐन्द्री, शिवदूती** और **चामुण्डा** इन नौ शक्तियों का भी पूजन करें।

॥ कल्पभेद प्राकारान्तरे नवदुर्गा स्वरूपम् ॥

उत्तर भारत में शैलपुत्र्यादि नवदुर्गा क्रम प्रचलित है।

(क) मन्त्रमहार्णवे - प्रयोग भेद से मन्त्रमहार्णव में नवदुर्गा के अलग नाम भेद कहें हैं।

जयां च विजयां भद्रां भद्रकाली मनंतरम् ।
सुमुखीं दुर्मुखीं प्रज्ञां पश्चात् व्याघ्रमुखीं तथा ॥
अथ सिंहमुखीं दुर्गां नवदुर्गा विदुर्बुधाः ।
प्रत्येकं तैस्त्रिभिर्बीजै र्जयादि नवनामाभिः ॥
एवं ज्ञात्वा सप्तशतीं यो जपेत् सुसमाहितः ।
तस्य देवी सुप्रसन्ना सर्वाभीष्टप्रदा भवेत् ॥

(ख) उग्रचण्डा कल्पे अग्नि पुराणे - रुद्रचण्डा, प्रचण्डा, चण्डोग्रा, चण्डनायिका, चण्डा, चण्डावति, चण्डरूपा, अतिचण्डिका, उग्रचण्डा।

(ग) दक्षिणभारते - वनदुर्गा, शूलिनी, जातवेद, शान्तिदुर्गा, शबरी, ज्वाला, लवणदुर्गा, आसुरीदुर्गा, दीपदुर्गा।

(घ) अन्यच्च - नीलकण्ठी, क्षेमंकरी, हरसिद्धा, रुद्रांशदुर्गा, वनदुर्गा, अग्निदुर्गा, जयदुर्गा, विन्ध्यवासिनी, रूपमारी।

(ङ) अन्यच्च - जयन्ती, मङ्गला, काली, भद्रकाली, कपालिनी, दुर्गा, शिवा, क्षमा, धात्री।

(च) शैव सम्प्रदायानुसार - शैलपुत्री, ब्रह्मचारिणी, चन्द्रघण्टा, कूष्माण्डा, स्कन्दमाता, कात्यायनी, कालरात्री, महागौरी, सिद्धिदात्री॥

॥ दक्षिणभारते नवदुर्गा स्वरूपाणी॥

(क) वनदुर्गा - ॐ श्रीं ह्रीं क्लीं दुं उत्तिष्ठ पुरुषे किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे

भगवति शमय शमय स्वाहा।

(ख) शूलिनी दुर्गा – श्रीं ह्रीं क्लीं क्ष्रीं दुं ज्वल ज्वल शूलिनि दुष्टग्रह हुं फट्।

(ग) जातवेद दुर्गा – ॐ ह्रीं दुं जातवेदसे सुनवाम सोममराती यतो निदहाति वेदः। स नः पर्षदति दुर्गाणि विश्वानावेवसिन्धुं दुरितात्यग्निः दुं ह्रीं ॐ।

(घ) शान्तिदुर्गा – ॐ ह्रीं दुं दुर्गा देवीं शरणमहं प्रपद्ये दुं ह्रीं ॐ।

(ङ) शबरिदुर्गा – ॐ ह्रां ह्रीं सौः ऐं श्रीं क्षं दुं शबरिदुर्गायै क्रों अमलवरयूं आदिशक्ति स्वरूपिणि अक्षरमये रक्षः कुल नाशिनि मां रक्ष रक्ष मम शत्रून् विदारय विदारय रोगान् भस्मीकुरु भस्मीकुरु कृत्रिमान् दह दह प्राणान् वह वह आभिचारिकान् नाशय नाशय सर्वं मां रक्ष रक्ष शबरिदुर्गायै हुं फट् सवाहा।

(च) ज्वलादुर्गा – ह्रां ह्रीं सौः ग्लौं ऐं श्रीज्वलदुर्गे एह्येहि स्फुर प्रस्फुर आदिविष्णुसोदरि अस्त्रज्वलदुर्गे आवेशयावेशय। ज्वलदुर्गाय विद्महे जाज्वल्यमानाय धीमहि। तन्नो बडवानलः प्रचोदयात्।

(छ) लवणदुर्गा – ॐ खं चिटि चिटि चण्डालि महाचण्डालि सर्वजनं (अमुकं) मे वशमानय स्वाहा।

(ज) दीपदुर्गा – ॐ क्रों ह्रीं आं दुं दुर्गे एह्येहि आवेशयावेशय ह्रीं दुं दुर्गे आं ह्रीं क्रों ॐ हुं फट् स्वाहा।

(झ) आसुरीदुर्गा – ॐ श्रीं ह्रीं कटुके कटुकपत्रे असुभगे (सुभगे) आसुरी रक्तवरानने (रक्तवाससे) अथर्वणस्य दुहिते अघोरे अघोरकर्मकारिके (अमुकस्य) प्रतिस्थतस्य साध्यस्य गतिं दह दह उपविष्टस्य गुदं दह दह प्रसुप्तस्य मनो दह दह प्रबुद्धस्य हृदयं दह दह हन हन पच पच नामरूपं दहदह तावद्दह तावत्पच पच यावन्मे वशमागच्छति तावन्मे वशमानय स्वाहा।

॥ वनदुर्गा मंत्राः॥

(१) मन्त्र – ॐ ऐं श्रीं ह्रीं छ्रीं हूं क्रों स्वाहा।

॥ ध्यानम्॥

कालाभ्रसमदेहाभां सिंहस्कन्धोपरि स्थिताम् । मौलिबद्धेन्दुशकलां कटाक्षैः शत्रुभीतिदाम् ॥१॥
त्रिनेत्रां पीवरोरोजां स्मेरवक्त्रां चतुर्भुजाम् । शङ्खं चक्रं गदां खड्गमुद्वहन्ती हरप्रियाम् ॥२॥

इस विद्या के प्रयोग विन्ध्यवासिनी के नाम से प्रचलित है। इसके स्मरण मात्र से चोर डाकू व हिंसक पयशुओं का भय नहीं रहता है।

(२) वनदुर्गा साधना मन्त्र – ॐ हूं क्रौ महाभय परिपंथिनि वनविहारिणी दुर्गे देवी धन धान्यं रक्ष रक्ष स्वाहा।

इस मंत्र को ५ दिन तक एकांत में बैठकर सिद्ध करे। धनधान्य की समृद्धि कारक है। वन दुर्ग में रक्षा करता है तथा साधक भूत भविष्य का ज्ञाता भी हो जाता है ॥

(३) मंत्र – उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदिशक्यमशक्यं वा तन्मे भगवती शमय स्वाहा।

विनियोग :- अस्य श्री वनदुर्गा मंत्रस्य आरण्यक ऋषिः, अनुष्टुप् छन्दः, सर्वदुर्गति मोचिनी श्री वनदुर्गा देवता, दुं बीजं, स्वाहा शक्तिं, सर्वदुर्गति मोचनार्थे जपे विनियोगः ।

॥ ध्यानम् ॥

सौवर्णाम्बुजमध्यगां त्रिनयनां सौदामिनीसन्निभां, शंखचक्रवराभयानि दधतीमिन्दोः कलां बिभ्रतीम् ।
गैवेयाङ्गदहार कुण्डलधरामाखण्डलाद्यैः स्तुतां, ध्यायेत्विन्ध्यनिवासिनीं शशिमुखीं पार्श्वस्थपञ्चाननाम् ।

॥ अथ वनदुर्गा प्रयोग:॥

वनदुर्गा की उपासना से व्याघ्र, सिंह, सर्प, वृश्चक हाथी वराह इत्यादि हिंसक पशुओं का भय नहीं रहता हैं। वे ही विंध्यवासिनी हैं, भक्तों को अभय प्रदान कर मंगलप्रदान करती हैं। इसका एक सिद्धस्थान चित्रकूट में हैं। धन धान्य वृद्धि हेतु निम्न मंत्र का जप करे।

१. ॐ हूं क्रौं महाभयपरिपन्थिनि वनविहारिणि दुर्गे देवि धन धान्यं रक्ष रक्ष स्वाहा॥

२. शारदातिलक, मंत्ररत्न, मञ्जूषा, प्रपञ्चसार तंत्र, श्रीविद्यार्णवतंत्र में अन्य मंत्र दिया गया हैं।

मन्त्रः- उत्तिष्ठ पुरुषि किं स्वपिषि भयं मे समुपस्थितं यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा।

विनियोगः- अस्य श्री वन दुर्गा मंत्रस्य आरण्यक ऋषिः, अनुष्टुप् छंदः, सर्वदुर्गतिमोचनी श्री वनदुर्गा देवता, दुं बीजं, स्वाहा शक्तिं, सर्वदुर्गति मोचनार्थे जपे विनियोगः।

षडङ्गन्यासः- उत्तिष्ठ पुरुषि हृदयाय नमः। किं स्वपिषि शिरसे स्वाहा। भयं मे समुपस्थितं शिखायै वषट्। यदि शक्यमशक्यं वा कवचाय हुं। तन्मे भगवति नेत्रत्रयाय वौषट्। शमय स्वाहा अस्त्राय फट्।

वर्णन्यास :- प्रत्येक वर्ण के आगे नमः लगाकर न्यास करे। ॐ उं नमः दक्षपादांगुलिमूले। त्तिं दक्ष गुल्फे। ष्ठं दक्षजानुनि। पुं दक्षऊरुमूले। रुं वामपादांगुलिमूले। षिं वामगुल्फे। किं वामजानुनि। स्वं उरुमूले। पिं गुदे। षिं लिङ्गे। भं मूलाधारे। यं उदरे। में दक्ष पार्श्वे। सं वामपार्श्वे। मुं हृदि। पं दक्षस्तने। स्थिं वामस्तने। तं कण्ठे। यं दक्षकरांगुलिमूले। दिं दक्षमणिबन्धे। शं कर्पूरे। क्यं बाहुमूले। मं वामकरांगुलिमूले। शं मणिबन्धे। क्यं कपूरे। वां बाहुमूले। तं मुखे। न्मे दक्षनासापुटे। भं वामनासापुटे। गं दक्षगण्डे। वं वामगण्डे। तिं दक्षनेत्रे। शं वामनेत्रे। मं दक्षकर्णे। यं वामकर्णे। स्वां भ्रूमध्ये। हां नमः शिरसि।

श्री विद्यार्णव तंत्र में ध्यान इस तरह हैं:-

विद्युद्धामप्रभाभां कनकसरसिजे संस्थितां सत्त्रिनेत्रां, हस्ताम्भोजैर्वहन्तीमरिदर वरदाभीति संज्ञाः क्रमेण ।
स्वर्णोद्यत्कान्तिवस्त्रां शशिकलित लसद्रत्नचूडां प्रसन्नां, पार्श्वोद्यत्सन्मृगेन्द्रां हृदि वनवसति दावदुर्गां स्मरेहम् ॥

इनके अलावा ४ प्रकार के अन्य ध्यान हैं प्रथम ध्यान साधना कर्म हेतु, दूसरा रक्षा हेतु, तीसरा आपदनिवारण एवं चौथा ध्यान तामस प्रयोग हेतु हैं। ध्यान मंत्र दुर्गाकल्पतरु से कुछ भिन्न हैं।

हेमप्रख्यामिन्दु खण्डात्तमौलिं शङ्खारीष्टाभीति हस्तां त्रिनेत्राम् ।
हेमाब्जस्थां पीतवस्त्रां प्रसन्नां देवीं दुर्गां दिव्यरूपां नमामि ॥१॥

अरिशङ्ख कृपाण खेटबाणान् सधनुः शूलक तर्जनीर्दधाना ।

****

भवतां महिषोत्तमाङ्ग संस्था नवदूर्वा सदृशी श्रियेऽस्तु दुर्गा ॥२॥

चक्रदर खड्ग खेटक शरकार्मुक शूल संज्ञक कपालैः
ऋष्टिमूसलकुन्त नन्दक वलय गदा भिन्दिपाल शक्त्याख्यै।
उद्यद्विकृति भुजाढ्या महिषके सजल जलद सङ्काशा
सिंहस्था वाऽग्नि निभा पद्मस्था वाथ मरकत श्यामा ॥३॥

व्याघ्र त्वक्परिधाना सर्वाभरणान्विता त्रिनेत्रा च
अहिकलित नीलकुन्तल विलसत् किरीट शशिकला।
सर्पमयवलय नूपुरकाञ्ची केयूरहार संभिन्ना
सुरदितिजाभय भयदा ध्येया कात्यायनी प्रयोग विधौ॥

॥ आवरण पूजा प्रयोगः॥

॥ श्री वनदुर्गा यन्त्रम् ॥

(१) मूल बिन्दु में देवी का ध्यान पूजन करे।

(२) षट्कोण में हृदयादि षडङ्गन्यास पूजा करे।

(३) अष्टदल की कर्णिका (नीचे का भाग) में प्रत्येक नाम के आगे "ॐ" **तथा पश्चात्** 'नमः' लगाकर आवाहन पूजा करें।
यथा - **ॐ आर्यायै नमः। दुर्गायै। भद्रायै। भद्रकाल्यै। अंबिकायै। क्षेम्यायै। वेदगर्भायै, क्षेमङ्कर्यै।**

(४) अष्टदलपत्रों के मध्यभाग में **ॐ चक्रायनमः। शङ्खाय। खड्गाय। खेटकाय। वाणाय। चापाय। शूलाय। ॐ कपालाय नमः।**

(५) अष्टदलों के पत्राग्र भाग में **ब्राह्मी, वैष्णवी, कौमारी, नारसिंही, वाराही, महालक्ष्मी, चामुण्डा, माहेश्वरी** का पूजन करे।

(६) भूपूर (चतुरस्त्र) में इन्द्रादि लोकपालों व उनके आयुधों का पूजन करें।

॥ अथ प्रयोग विधानम्॥

॥ ध्यानम् ॥

श्रिये च दुर्गां महिषोत्तमाङ्गस्थितां च दूर्वादलरुग् (भां) वहन्तीम्।
सचक्रशङ्खासिस खेटबाणचापान् भुजैस्तर्जनिकां वहन्तीम् (त्रिशूलम्) ॥१॥
शङ्ख चक्र कृपाण खेटक बाणधनूंषि शूलवत्। पुंस्कपालसऋष्टिकान् मुसलकुन्तनन्दकान् ॥२॥
सत्कैर्वलय सद्गदा भिण्डिपालकशक्तिकान्। बिभ्रतीं जलदद्युति महिषोत्तमाङ्गनिषेदुषीम् ॥३॥
पावकोल्लसितद्युति हृदि भीमसिंह (समा) गताम्। श्यामलां कमलस्थितां नयनत्रयोल्लसितां शुभाम् ॥३॥
व्याघ्रचर्म सदंशु कामहिबद्ध कुन्तल शोभिताम्। चन्द्रशोभितशेखरां सुरदानवाभयभीतिदाम् ॥४॥

॥ प्रयोगः ॥

प्रजपेत् प्रत्यहं मन्त्री स्वरक्षायै शतं ह्यथ। सहस्त्रं वा तदन्ते च प्रयोगान् कर्तुमर्हति ॥५॥ यद्यदुद्दिश्य च मनुं सहस्त्रं वायुतं जपेत्। अचिराल्लभते तत्तदसाध्यमपि साधकः ॥६॥ प्रातः स्नायी न्यासपूर्वं स्मरन् देवीमनन्यधीः। नित्यं सहस्त्रं प्रजपेन्मन्त्रं साधकसत्तमः ॥७॥ ज्वरसर्पग्रहोत्थांश्च दोषान् प्रशमयेत्सुधीः। हुनेदारण्यकतिलै राजिकाभिश्च वा हुनेत् ॥८॥ अपामार्गसमिद्भिश्च नाशयेत् सकलामयान्। अपस्मारादिकान् मन्त्री नात्र कार्या विचारणा ॥९॥ न्यग्रोधोत्थसमिद्भिर्वा सशुङ्गाभिहुनेत्सुधीः। अयुतं सर्वसम्पत्त्यै सर्वापन्मुक्तयेऽपि च ॥१०॥ ग्रहादिशान्त्यै च तया ह्यभिचारादिशान्तये। अर्कवृक्षसमुद्भूतैर्जुहुयाच्च समिद्वरैः ॥११॥ आरभ्य रविवारं च तद्द्वयं प्रत्यहं सुधीः। दशाहतो वाञ्छितार्थसिद्धिर्भवति नान्यथा ॥१२॥

त्र्यहं वा सप्तरात्रं वा चेध्मैः सारसमुद्भवैः। एकैकं शकलं मन्त्री हुनेद्वाञ्छितसिद्धये ॥१३॥ त्रिंशच्छरान् शिताग्रांश्च निधाय जुहुयादबुधः। कटुतैलैः सहस्त्रं वा ह्ययुतं तदनन्तरम ॥१४॥ सम्पाततैलेन शरान् समभ्युक्ष्य यथाविधि। पूर्ववत् प्रजपेन्मन्त्रं ताञ्शरान् अथ भूपतिः ॥१५॥ शुद्धाचारश्च धीरश्च धन्वी संयतमानसः। गृहीत्वा परसेनाया मध्ये गच्छेदभीः क्षिपेत् ॥१६॥ सा धावति दिशः सर्वाः सम्भ्रान्ता विह्वला तदा। स आगत्य पुनर्भूयो गुरुं धान्यैर्धनैरपि ॥१७॥ वस्त्रालङ्करणैश्चैव तोषयेज्जयदायिनम्। अष्टाधिकशतेनाथ सञ्जप्तं शवभस्म च ॥१८॥ निक्षिपेद्यस्य शिरसि स विद्विष्टो भवेज्जनैः। देशाद् देशान्तरं चैव काकवद् भ्रमते सदा ॥१९॥ कारस्करद्रुमोत्थैश्च पत्रैर्वायुनिपातितैः। सहस्त्रं जुहुयात् पादरजोभिः सह वैरिणः ॥२०॥ उच्चाटोऽस्य भवेत् सद्यो, विषवृक्षसमुद्भवैः। पुष्पैर्हुनेन् सहस्त्रं च सेनां संस्तम्भयेत्बुधः ॥२१॥ तावद्भिस्तस्य पत्रैश्च मन्त्री सेनां निवर्त्तयेत्। विषवृक्षसमुद्भूतां शत्रोः प्रतिकृतिं शुभाम् ॥२२॥

कृत्वा प्रतिष्ठितप्राणां खण्डं खण्डं कृतैर्निशि। कृष्णपक्षचतुर्दश्यां काकोलूकवसाप्लुतैः ॥२३॥ तद्गात्रैर्विपिने होमः कर्त्तव्योऽष्टसहस्त्रकम्। चतुर्दशीत्रयादेवं नाशमेति रिपुर्ध्रुवम् ॥२४॥ उलूकवायसपक्षैः सवसारक्तसंयुतैः। होमाद्रिपुर्नाशमेति ह्युन्मत्तसमिधं तथा ॥२५॥ होमान्मत्तो रिपुर्नूनं भवत्येव सहस्त्रतः। वैरिणः प्रतिमां कृत्वा सम्यक् संस्थापितानिलाम् ॥२६॥ विषत्रिकटुकालिप्तां सम्यगुष्णे जले क्षिपेत्। प्रजपेच्च मनुं सद्यो ज्वराक्रान्तो भवेद्रिपुः ॥२७॥ दुग्धाभिषेकतः शान्तिर्भवत्यस्य न संशयः। प्रतिमां विषवृक्षोत्थां निःक्षिपेदुष्णवारिणि ॥२८॥ उन्मादश्च रिपोः सद्यः पूर्ववच्छान्तिरीरिता। सूर्यबिम्बेऽन्तरारक्तां शूलतर्जनिकाकराम् ॥२९॥ ध्यात्वायुतं प्रजप्याथ मारयेद्रिपुसञ्चयम्। असिखेटकरार्कस्था क्रुद्धा सा वनवासिनी ॥३०॥ संस्मृता मन्त्रजापे तु शमयेच्छत्रुसञ्चयम्। शरधनुष्करां सिंहस्थितां पावकसन्निभाम् ॥३१॥ संस्मृत्य मन्त्रं प्रजपन् क्षिप्रमुच्चाटयेदरीन्। कारस्करद्रुसमिधामयुतं जुहुयात्सुधीः ॥३२॥

रोगिणः करिणः सर्वे जायन्ते ह्यचिरात्सदा। विषवृक्षोत्थितैः पत्रैरमी नाशं प्रयान्ति च ॥३३॥ तद्वृक्षसुमनोभिः स्यादुच्चाटः करिणां ध्रुवम्। राजवृक्षसमिद्भिर्वा रोगा नश्यन्ति दन्तिनाम् ॥३४॥ विषवृक्षप्रसूनैश्च त्रिमध्वक्तैस्तु मानवः (वारणः) वशीभवेत्तथा शीघ्रं पत्रैरानित्यशोभितैः (कोद्रवैः) ॥३५॥ त्रिस्वाधुयुक्तैः करिणो ह्यतिमत्ता भवन्ति च। अभ्यङ्गः पञ्चगव्येन लोके रक्षाकरः परः ॥३६॥ करिणां मनुजस्तोऽयं प्रोक्तो मन्त्रविदुत्तमैः। सर्पिस्तिलानित्यकैस्तु राजिकापञ्चगव्यकैः ॥३७॥ दुग्धतण्डुलकैश्चैव प्रत्येकं च सहस्त्रतः। जुहुयादिभसङ्गानां वृद्धिर्भवति नान्यथा ॥३८॥

महान्तं विष (द्विज) वृक्षं च छित्वा निर्भिद्य पञ्चधा। दिक्क्रमेणैव पञ्चैवमायुधानि प्रकल्पयेत् ॥३९॥ सम्यक् शिल्पविदा शङ्खो नन्दकश्चक्रशार्ङ्गकौ। कौमोदकीति क्रमेण प्रोक्तमायुधपञ्चकम् ॥४०॥ निक्षिप्य पञ्चगव्येतु

जपेन्मन्त्रसहस्त्रकम्। तावच्चाज्येन जुहुयात् सम्पातं तत्र पातयेत् ॥४१॥ भूयश्च पूर्वसंख्याकं जपं कुर्याद्विचक्षणः। विदध्यादायुधान् पञ्च पञ्चगव्यप्रपूरितान् ॥४२॥ मध्यायुधे स्वा(मध्यावटेष्वा) युधानि निक्षिपेत् (तत्र तत्र च) - बलिं हरेत्समीकृत्य तन्मंत्रैर्मन्त्रिणा तथा ॥४३॥ कार्या रक्षा राष्ट्रपुरग्रामाणामेवमेव च। यत्रैवं विहिता रक्षा लक्ष्मीः) तत्र च वर्धते ॥४४॥ धनधान्यसमृद्धिः स्याद्रिपुचौरभयं नच। पद्मैर्नृपं वशीकुर्यात् तत्पत्नीरुत्पलैरपि ॥४५॥ ब्राह्मणान् कुमुदैर्हुत्वा कह्लारैर्विश एव च। शूद्रांल्लवण होमेन ग्रामं जातिप्रसूनकैः ॥४६॥

चक्रशङ्खगदाम्भोजहस्तं सञ्चिन्तयेच्छुभम्। रविबिम्बे मुकुन्दं च मनुं व्यत्यस्तलिङ्गकम् ॥४७॥ प्रजपेच्चाथ पुरुषभगवत्पदयोरथ। सर्वसिद्धिकरः प्रोक्तः प्रकारोऽयं सुमन्त्रिभिः ॥४८॥ साध्यनामाक्षरैः सम्यग्विदर्भितमनुं लिखेत्। यन्त्रे (पत्रे) ततः कुलालस्य करलग्नं प्रगृह्य मृत ॥४९॥ तया कृता या प्रतिमा तस्याश्च हृदि संन्यसेत्। संस्थाप्य स्वाभिमुख्ये तां सप्ताहं प्रजपेन्मनुम् ॥५०॥ सन्ध्यात्रये शतं चाष्टाधिकं वश्यो भवेत्तु सः। व्रीहीन् हुनेदष्टशतं प्रत्यहं वत्सराद्भवेत् ॥५१॥ व्रीहिमान् गोपयोभिश्च पशुमान् भवति ध्रुवम्। घृतहोमान्मन्त्रिणः स्यात् काञ्चनाप्तिर्महीयसी ॥५२॥ दध्ना सर्वसमृद्धिः स्यादन्नैरन्नसमृद्धियुक्। मधुहोमेन रत्नानां निधिर्भवति नान्यथा ॥५३॥ दूर्वाहोमेन दीर्घायुर्मन्त्री भवति निश्चितम्। श्वेतगुञ्जाः समानीय कुडवप्रमिताः शुभाः ॥५४॥ एतन्मन्त्रसुजप्ताश्च विकिरेच्छत्रुसैन्यके। स्वयं मन्त्री सुगुप्तः सन् तेनासौ वैरिणश्चम् ॥५५॥ ज्वरादिकैर्महारोगैः पीडिता स्यान्मृताचिरात्। सेनाधिपतिमुख्यानां परस्परविरोधतः ॥५६॥ एतदुपद्रवैर्नानाविधनाशं प्रयाति च .....॥

तारे शक्तिं ससाध्यां लिखतु रविदले मध्यतः पत्रमूले मर्दिन्या वर्णयुग्मं दलमनु विलिखेद्वह्निशो मूलवर्णान्। अन्त्ये प्र (चा) न्त्येकबीजं बहिरथ लिपिभिर्भूपुरद्वन्द्वसंस्थं दुर्गाया यन्त्रमेतद्युवतितनयदं सर्व रक्षाकरं स्यात् ॥५७॥ सर्वसंपत्करं नृणां सर्वसौभाग्यपुष्टिदम्। राज्यलक्ष्मीविहीनानां भूपतीनां च राज्यदम् ॥५८॥ आमयग्रस्तनृणां च रोगशान्तिकरं परम्। जपहोमाज्यसम्पातसाधितं मन्त्रमुत्तमम् ॥५९॥

रक्षा प्रयोग हेतु यदि यंत्र प्रयोग करना हो तो मध्य में ''ॐ'' ह्रीं पश्चात् साध्यनाम लिखे। बाहर १२ कमल का दल बनायें। १२ कमलों के नीचे के भाग (केसरों) में महिषमर्दिनि के अष्टाक्षर मंत्र के २-२ वर्ण एक दल में लिखे तो मंत्र की ३ आवृत्ति होगी। इसके बाहर २ वृत्त बनायें। दोनों वृत्तों के बीच की वीथिका में **अं आं .... शं षं सं हं लं क्षं** मातृका वर्ण लिखे। दो चतुरस्त्र से अष्टकोण चित्र....... बनाये।

अष्टदलकमलों मे दुर्गा का ध्यान करे व मंत्र जप करे। **ॐ ह्रीं दुं दुर्गायै नमः। इसका बीज मंत्र दुः** अथवा **दुं** हैं। एकाक्षरी मंत्र के कश्यपऋषि, गायत्री छन्दः दुर्गा देवता हैं।

दूर्वाश्यामां त्रिनेत्रां शूलवाणचक्र शङ्खखड्ग खेट धनुः कपालानि। दक्षिणाधः करक्रमेण धारयन्तीं ध्यायेत्।

॥ तारिणी दुर्गा मंत्र ॥

मंत्र :- ॐ श्रीं ऐं श्रीं श्रीं क्लीं श्रीं श्रीं ह्रीं श्रीं दुर्गां दुर्गतारिणीं पद्मानिलनीं मातः प्रपद्ये स्वाहा।

यह मंत्र भय संकट एवं दुर्गति नाशक है। दौर्भाग्य का नाश कर सौभाग्य की वृद्धि करता है ॥

॥ जयदुर्गा मंत्र ॥

मंत्र :- ॐ क्रों क्लीं श्रीं ह्रीं आं स्त्रीं हूं जय दुर्गे रक्ष रक्ष स्वाहा। (महा. संहि.)

॥ ध्यानम् ॥

अतिकालघनाकारा चन्द्रार्द्धकृतशेखरा । कटाक्षैः शत्रुसंघातान् निर्दहन्ती परात्परा ॥
त्रिनेत्रा भृकुटीभङ्गा वित्रासित जगत्त्रया । सिंहधोरण धौरीणा चलच्चिकुरपल्लवा ॥
अष्टवाहा जगद्धात्री विकरालतरानना । शंखं तथाङ्कुशं चापं जीवतो वैरिणः शिरः ॥
सकचं वामपार्श्वस्थकरेण दधती शिवा । करवालं तथा चक्रं विशिखं च गदामापि ॥
दक्षिणेन करेणैव धारयन्ती भयप्रदा । जयदुर्गा सदा ध्येया घोरे समरमूर्द्धनि ॥

युद्ध में विजयप्राप्ति हेतु तथा रक्षा कर्म के लिये इस मंत्र की आराधना करे।

॥ शबरेश्वरी मंत्र ॥

मन्त्र – ॐ ह्रीं आं शबरेश्वर्यै नमः।

॥ ध्यानम् ॥

श्यामा पर्णावृत तनुर्गुञ्जाहार विराजिता । स्मेरा षोडशवर्षीयावतंसितलतादला ॥
वैष्णवं भाजनं वामे कटेरुपरि विभ्रतीम् । फलानि चिन्वतो दक्षकरेण विपिनावनौ ॥
वराटककृत्ताकल्या गायन्ती खर्वविग्रहा । भक्तिभावतया देवी ध्यातव्या शबरेश्वरी ॥

भगवती की उपासना से अकाल व अनावृष्टि योग दूर होकर सुकाल होवे। फूलादि की वृद्धि होवे।

॥ अथ नवचण्डी विधानम् ॥

गुरु, गणेश स्मरण पूर्वकं संकल्पं कुर्यात्। गणेशादि पूजन कर गृह का दिग्रक्षण करें। दशों दिशाओं में देवियों का आवाह्न कर बलि प्रदान करें। दशों दिशाओं में देवियों के आवाह्न हेतु उन्हें आसन प्रदान करें। गंधादि से पूजन करें।

पूर्वे – **ॐ गजारूढे कादंबरि देवि इहागच्छ इह तिष्ठ इत्यावह। तदग्रे घृतशर्करा सहितं पायसं नानाव्यंजनादि सहित निधाय, ॐ कादंबरि एषते बलिर्नमः।** इति बलिमुत्सृज्य, क्षमस्वेति प्रणमेत्।

आग्नेयां – **ॐ अजवाहने उल्के देवि इहागच्छ इह तिष्ठ इत्युल्कामावाह्य संपूज्य बलिं दद्यात्।**

दक्षिणे – **ॐ महिषारूढे करालि देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

नैर्ऋत्ये – **ॐ प्रेतवाहने रक्ताक्षि देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

पश्चिमे – **ॐ श्वेतकौलीरवाहने श्वेताम्बरे देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

वायव्ये – **ॐ मृगवाहने हरितां देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

उत्तरे – **ॐ सिंहासने यक्षिणि देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

ईशाने – **ॐ वृषवाहने कंकालि देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

पूर्वेशानयोर्मध्ये – **ॐ हंसवाहने सुरश्रेष्ठ देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

निर्ऋतिवरुणयोर्मध्ये - **ॐ अहिवाहने सर्पराज्ञी देवि इहागच्छ इह तिष्ठ इत्यावह संपूज्य बलिं च दद्यात्।**

पश्चात् शास्त्र विधि से नवग्रहों की पूजा करें। सर्वतोभद्र मण्डल पर या देवी यंत्र पर देवी की मूर्ति की पूजा करें। देवीघट स्थापना करें। साथ में अन्य स्वरूपों की पूजा करें -

जयन्ती मंगला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वधा स्वाहा नमोऽस्तुते ॥

नैवेद्यादि अर्पण कर प्रार्थना करें।

सर्व मंगल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके गौरी नारायणी नमोस्तुते ॥
शरणागतदीनार्त परित्राण परायणे ।
सर्वस्यार्त्तिहरे देवि नारायणी नमोस्तुते ॥
ॐ महिषघ्नि महामाये चामुण्डे मुण्डमालिनि ।
द्रव्यमारोग्यविजयौ देहि देवि नमः सदा ॥
रूपं देहि यशो देहि देवि भगं (ऐश्वर्य) भगवति देहि मे ।
पुत्रान् देहि धनं देहि सर्वान् कामान् प्रदेहि मे ॥

यदि वृद्धि क्रम से पाठ करना हो तो प्रतिदिन १-१ पाठ की वृद्धि करते हुये २, ३, ४, ५, ६, ७, ८, तथा नवमी को नव पाठ कर दशांश होम करें। कन्या, ब्राह्मण भोजन करायें। हवन समय उवाच स्थल पर पत्र (शमीपत्र या बिल्वपत्र या नागरबेल के पत्ते तांबूल पत्र) एवं पुष्प तथा फल का होम करें।

॥ मासि मासि पूजा फलम् ॥

पूर्णिमा, अष्टमी, नवमी को त्रिकाल पूजा से वाजपेय यज्ञ का फल मिले। संक्रान्ति व अयन परिवर्तन पर पाठ करने से दुर्भिक्ष नाश होवे। आश्विन व चैत्र नवरात्रा विशेष फलदायी है। दुर्गार्चन करने वाले के पाप मेरु पर्वत के समान हो तो भी पाप नष्ट हो जाते हैं।

मासे चाश्वयुजे वीर सर्वपापैः प्रमुच्यते ।
कार्तिके पौर्णमास्यां यः सौपवसोऽर्चयेदुमाम् ॥
सोऽग्निष्टोमफलं विंदेत्सूर्यलोकं च गच्छति ।
आषाढे पौर्णमास्यां तु योऽर्चयेदंबिकां नरः ।
सोपवासो महाभागः स याति परमां गतिम् ॥

पौर्णमास्यां तु यो माघे पूजयेद्विधिवच्छिवाम् । सो ऽश्वमेघमवाप्नोति विष्णुलोके महीयते ॥
अयने दक्षिणे यस्तु पूजयेदंबिकां नृप । सकृद्गंधोदकैश्चैव गंधर्वसदने वसेत् ॥
पंचगव्येन तूक्षित्वा पंच चूडाचलं व्रजेत् । आपः क्षीरं कुशाग्राणि तंडुला हविरक्षिताः ॥
सह सिद्धार्थका दुर्वा कुंकुमं रोचना मधु । अर्घोऽयं कुरु शार्दूल द्वादशांग उदाहृतः ॥

अनेन पूजयेद्यस्तु स यानि परमं पदम् । दारवेणार्घ पात्रेण दत्त्वाऽर्घ्यं विधिवन्नृप ॥
देव्यै तदा महाराज अग्निष्टोमफलं वज्रेत् । अब्देमेकशतं दिव्यं शक्रलोके महीयते ॥
गंधानुलेपनं कृत्वा ज्योतिष्टोमफलं वज्रेत् । चंदनेनावलिप्यार्यामग्निष्टोम फलं व्रजेत् ॥
विलिप्य कृष्णागरुणा वाजपेय फलं भजेत् । कुंकुमेन विलिप्यार्यां गोसहस्रफलं भजेत् ॥
चंदनागकर्पूरैः सूक्ष्मपत्रैः सकुंकुमैः । दुर्गामालिप्य विधिवत्कल्प कोटिं वसेद्दिवि ॥
अग्निहोत्रपरे विप्रे वेदवेदांगपारगे । सुवर्णानां सुवर्णानां शते दत्ते च यत्फलम् ॥
तत्फलं लभते राजन् पूजयित्वा तु चण्डिकाम् । मालया बिल्व पत्राणां नवम्यां च पुरेण च ॥
मालाद्वयेन संपूज्य दुर्गां देवीं नराधिप । बिल्ववृक्षस्य पुष्पैस्च राजसूक फलं लभेत् ॥

करवीर पुष्प व द्रोण पुष्प के पूजन से वाजपेय व राजसूर्य यज्ञ का फल मिलता है।

शमी पुष्प की माला से हजार गायों का फल मिले। नीलकमल के अर्पण से करोड़ वर्षों तक रुद्रलोक में वास करे।

पुष्पादि के अभाव में औषधि अर्पण करें।

पत्राणामप्य लाभे तु औषधीस्तु निवेदयेत् । ओषधीनाम लाभे तु भक्त्या भगवती जिता ॥
प्रत्येक मुक्तपुष्पेषु कुशेष्वपि फलं नृप । आंगिरसेषु तेष्वेव द्विगुणं कांचनस्य तु ॥
मल्लिकायुत्पलं पत्रं शमीपुन्नाग चंपकम् । कर्णिकारमशोकं च द्रोणपुष्पं विशेषतः ॥
चंदनं च जपा पुष्पं नागकेसरमेव च । यः प्रयच्छति पुण्यात्मा पुष्पाण्येतानि भावतः ॥
चण्डिकायै नरश्रेष्ठः स च प्रोक्त फलं भजेत् । सप्राप्य कालाद्राजत्वं चण्डिकानुचरो भवेत् ॥

॥ शतचण्ड्यां रात्रौ होम निषेध॥

''**सिंह सिद्धान्त सिंधु**'' तथा **महाकाल संहिता** के अनुसार दुर्गा होम रात्रि में नहीं करें। परन्तु देश काल परिस्थिति के अनुसार हवनाङ्ग पूर्ण क्रम दिन में संभव नहीं हो तो विधि इस प्रकार से करें।

१. सूर्य की साक्षी में अग्नि स्थापन करें एवं पूर्णाहुति तो सूर्य की साक्षी में दूसरे दिन में ही करें।

२. सायं शुभ मुहुर्त्त में अग्नि स्थापन करें, ग्रह शान्ति पूर्वक आवाहित देवताओं की, दुर्गा व उसके अंग देवताओं की आहुति देकर शेष कर्म व दुर्गा होम दूसरे दिन करके सूर्य साक्षी में पूर्णाहुति करें।

३. रात्रि में शुभ मुहुर्त्त में हवन प्रारंभ कर प्रथम व मध्यम चरित तक होम कर, उत्तर चरित शेष कर्म दूसरे दिन करें सूर्य साक्षी में पूर्णाहुति करें।

''नाप्यदो द्वितयं कार्यं क्षपायां वासशदृते। तस्यां कृते तु विफलं जायते वेदशासनात्''

अर्थात् लुप्त होने वाली रात्रि में दुर्गा होम न करें। परन्तु शारद नवरात्र में पुनः होम की इच्छा को शुभ माना है अतः शेष पाठ दूसरे दिन हो सकता है।

देवी सप्तशती पाठं गृहणाति विधिना कृतम् ।
विधिना वाऽप्यविधिना पुर्नहोंम प्रतिच्छति ॥

तस्माद् यत्नेन कर्तव्यो होमः शारद पूजने ।
होमः सप्तशतिपाठो बलिर्वादित्र वादनम् ॥
चतुष्टयमिदं शस्तं मासीषे कालीकार्चने ॥

(कई बार हमने विशेष परिस्थितिवश दुर्गा प्रधान होम रात्रि में प्रारंभ किया तथा शेषकर्म दूसरे दिन करके सूर्य साक्षी में पूर्णाहुति होम बलि आदि कर्म कर होम का समापन किया तथा परिणाम शुभ रहे)

॥ पवित्रा रोपण ॥

पवित्रा (यज्ञोपवीत, शुभ वस्त्र) का आरोपण देवी की प्रीति बढ़ाने वाला है। आषाढ़ शुक्ला अष्टमी व श्रावण शुक्ला अष्टमी में पवित्रा धारण करायें।

शुभ तिथि व पर्व पर पवित्रा धारण करायें अलग अलग देवता की अलग अलग शुभ तिथि हैं। पवित्री सोना, चांदी, तांबा, रेशम व सूत की होती है। प्रतिप्रदा को कुबेर, द्वितीया को श्रीदेवी, तृतीया को भवभाविनी, चतुर्थी को गणेश, पञ्चमी को सोमराज एवं सरस्वती,, षष्ठी को सुरेश, सप्तमी को सूर्य की, अष्टमी को दुर्गा की, मातृगणों की नवमी, दशमी को वासुकी की, एकादशी को भद्रकाली की, द्वादशी को विष्णु की, त्रयोदशी को कामदेव की, चतुर्दशी को भद्रकाली व शिव, पूर्णीमा को ब्रह्मा व दिग्पालों की शुभ तिथि है। इनको पवित्रा इन तिथियों में चढावें।

कन्या या प्रतिव्रता प्रमदा या साधु स्वभाव वाली विधवा स्त्री सूत से रंग बिरंगी पवित्रा का निर्माण करें। दुःशीला से निर्माण नहीं करायें। अगर, कर्पूर, हल्दी, लाक्षारस, चंदनादि के लेप से तैयार करें।

सूत्र चूहों का कतरा हुआ, नीला, मलिन, भस्म या धूम युक्त सुई से उपयोग किया हुआ नहीं होवे।

२७ तंतुओं की पवित्री कनिष्ठ होती है, मर्त्यलोक में सुख सौभाग्य बढाती है। ५४ तंतुओं की पवित्री मध्यम होती है स्वर्ग व मोक्ष प्रदाता है। १०८ तंतुओं की पवित्री महादेवी के अर्पित करने पर शिव सा पुण्य प्राप्त होता है। १००८ तंतुओं की पवित्री रत्नमाला कही गई है। पवित्रा अर्पण समय पूजा होम करें तथा देवता का अधिवास करायें।

॥ नव भैरव ॥

(पुरश्चर्यार्णवे) **असिताङ्गो रुरु चण्डः क्रोध उन्मत्त एव च ।**

आनन्दश्च कपाली च भीषणस्तदनन्तरम् ।
संहारी सर्वशेषे स्यात् कार्त्तिता नव भैरवाः ॥

असिताङ्ग, रुरु, चण्ड, क्रोधभैरव, उन्मत्तभैरव, आनन्दभैरव, कपाली, भीषण एवं संहार भैरव नाम से नौ भैरव है।

॥ कराल भैरव मंत्रोद्धार – (देवी रहस्ये) ॥

तारं काली शिवो नाम तुरीरूपं च ठद्वयम् ।
मंत्रो भैरव विख्यातः कालौ भोगपवर्गदः ॥

मन्त्र : – ॐ क्रीं हौं करालाय स्वाहा।

॥ विकराल भैरव मंत्रोद्धार ॥

तारं वाग्भव मायाया विकरालाय न्यसेत् ।

अन्ते ठद्वयमुच्चार्य मंत्रराजो ऽप्यमीरितः ॥

मंत्र – ॐ ऐं ह्रीं विकरालाय स्वाहा।

॥ क्रोधनेश भैरव मंत्रोद्धार ॥

तारं काली शिवो देवि क्रोधनेशाय चाश्मरी ।
मंत्राऽयं सर्वसिद्धीशो वैरिवर्ग निवर्दण ॥

मंत्र – ॐ क्रीं ह्रौं क्रौधनेशाय नमः।

॥ क्रूरभैरव मंत्रोद्धार ॥

तारं काली युगं माया क्रूरभैरव प्रोद्धरेत् ।
प्रसीद द्वयमापोऽन्ते मंत्रोऽयं सर्वसिद्धिदः ॥

मंत्र – ॐ क्रीं क्रीं ह्रीं क्रूरभैरव प्रसीद प्रसीद स्वाहा।

॥ संहारभैरव मंत्रोद्धार ॥

तारं वाणी शरत्कामः संहारापाञ्चले वनम् ।
मन्त्रोऽय देवदेवस्य वर्णितस्ते दशाक्षरः ॥

मंत्र – ॐ ऐं ह्रीं क्लीं संहाराय स्वाहा।

॥ रुरु भैरव मंत्रोद्धार ॥

तारं चाब्धिः परा बीजं रुरवे चाश्मरीमनुः ।

मन्त्र – ॐ रूं ह्रीं रुरवे नमः।

॥ कालाग्नि भैरव मन्त्रोद्धार ॥

प्रणवं कमला माया कालाग्नये पदं ततः ।
विश्वमन्ते मनोदैवि मन्त्रराजो ऽयमीरितः ॥

मन्त्र – ॐ श्रीं ह्रीं कालाग्नये स्वाहा।

॥ कपाली भैरव ॥

तारं शिवः कामराजः कपालीशाय संवदेत् ।
अन्ते ठद्वयमुद्धृत मन्त्रोऽयं स्याद् दशाक्षरः ॥

मन्त्र – ॐ ह्रां क्लीं कपालीशाय स्वाहा।

॥ अथ नवदुर्गा प्रयोगाणि ॥

॥ नवदुर्गा प्रार्थना व ध्यान ॥

वंदे वाञ्छितलाभाय चन्द्रार्धकृतशेखराम् । वृषारूढां शूलधरां शैलपुत्रीं यशस्विनीम् ॥१॥
दधाना करपद्माभ्यामक्षमाला कमण्डलू । देवी प्रसीदतु मयि ब्रह्मचारिण्यनुत्तमा ॥२॥
पिण्डजप्रवरारूढा चण्डकोपास्त्रकैर्युता । प्रसादं तनुते मह्यं चन्द्रघण्टेति विश्रुता ॥३॥
सुरासम्पूर्णकलशं रुधिराप्लुतमेव च । दधाना हस्तपद्माभ्यां कूष्माण्डा शुभदास्तु मे ॥४॥
सिंहासनगता नित्यं पद्माञ्चितकरद्वया । शुभदास्तु सदा देवी स्कन्दमाता यशस्विनी ॥५॥
चन्द्रहासोज्ज्वलकरा शार्दूलवर वाहना । कात्यायनी शुभं दद्याद्देवी दानवघातिनी ॥६॥
एकवेणी जपाकर्णपूरा नग्ना खरास्थिता । लम्बोष्ठी कर्णिकाकर्णी तैलाभ्यक्त शरीरिणी ॥६॥
वामपादोल्लसल्लोहलताकण्टक- भूषणा । वर्धन्मूर्धध्वजा कृष्णा कालरात्रिर्भयङ्करी ॥७॥
श्वेते वृषे समारूढा श्वेताम्बरधरा शुचिः । महागौरी शुभं दद्यान्महादेव प्रमोददा ॥८॥
सिद्धगंधर्व यक्षाद्यैरसुरैरमरैरपि । सेव्यमाना सदाभूयात् सिद्धिदा सिद्धिदायिनी ॥९॥

॥ १. शैलपुत्री ॥

कालिका पुराण के अनुसार महिषासुर वध के पूर्व कल्प में शैलपुत्री ही आदि शक्ति है।

पूज्यते वैष्णवी देवी तंत्रोक्ता अष्टयोगिनीः ।
ताः प्रोक्ताः शैलपुत्र्याश्च पूर्व कल्पे च भैरवः ॥

शैलपुत्री ने जब हिमालयराज के यहां जन्म लिया तो हिमालयराज उनको पहचान नहीं सका जगम्दबा ने दिव्यचक्षु से पहले उग्ररूप पश्चात् शान्तरूप के दर्शन कराये। दोनों ध्यान इस प्रकार है -

कोटि सूर्य प्रतीकाशं तेजोबिम्बं निराकुलम् । ज्वालामाला सहस्राढ्यं कालानल शतोपमम् ॥
दंष्ट्राकरालं दुर्धर्षं जटामण्डल मण्डितम् । त्रिशूलवर हस्तं च घोररूपं भयानकम् ॥
प्रशान्तं सौम्यवदनमनन्ताश्चर्य संयुतम् । चन्द्रावयवलक्ष्माणं चन्द्रकोटि समप्रभम् ॥
किरीटिनं गदाहस्तं नूपुरैरुपशोभितम् । दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनम् ॥
शङ्ख चक्रधरं काम्यं त्रिनेत्रं कृत्तिवाससम् । अण्डस्थं चाण्डवाह्यस्थं बाह्यमाभ्यन्तरं परम् ॥
सर्वशक्तिमयं शुभ्रं सर्वाकारं सनातनम् । ब्रह्मेन्द्रोपेन्द्र योगीन्द्रैर्वन्द्यमान पदाम्बुजम् ॥
सर्वतः पाणि पादान्तं सर्वतोऽक्षि शिरोमुखम् । सर्वमावृत्य तिष्ठन्तं ददर्श परमेश्वरम् ॥१॥

नीलोत्पलदलप्रख्यं नीलोत्पल सुगंधिकम् । द्विनेत्र द्विभुजं सौम्यं नीलालक विभूषितम् ॥
रक्तपादाम्बुजतलं सुरक्तकरपल्लवम् । श्रीमद् विशाल संवृत्त ललाट तिलकोज्ज्वलम् ॥
भूषितं चारुसर्वाङ्गं भूषणैरति कोमलम् । दधानमुरसा मालां विशालां हेमनिर्मिताम् ॥
ईषत्स्मितं सुबिम्बोष्ठं नूपुरारावसंयुतम् । प्रसन्नवदनं दिव्यमनन्त महिमास्पदम् ॥२॥

मंत्र – (१) ॐ शां शीं शूं शैलपुत्र्यै स्वाहा।

(२) ॐ शां शीं शूं शैलपुत्र्यै मे शुभं कुरु कुरु कुरु स्वाहा।

॥ ध्यानम् ॥

ॐकाराक्षर बीज च यकारः शक्तिरुच्यते ।
स बीज कथित मंत्र कल्प च शृणु भैरव ॥

मंत्र – ॐ ह्रीं शं शैलपुत्र्यै नमः ॥३॥

चण्डिका गायत्री – महामायायै विद्महे त्वां चण्डिकाख्यां धीमहि धियो यो नः प्रचोदयात् ॥४॥

॥ यन्त्रार्चनम् ॥

॥ श्री शैलपुत्री यन्त्रम् ॥

यन्त्र रचना – बिन्दु, त्रिकोण, षट्कोण, अष्टदल एवं भूपुर की रचना करें।

ॐ मं मण्डूकादिपीठ देवताभ्यो नमः। ॐ मूल प्रकृत्यै नमः। ॐ महामाया योगपीठाय नमः।

उपरोक्त ध्यान मंत्रों से देवी का आवाहन मूल बिन्दु में करें।

प्रथमावरणम् – (त्रिकोणे) **ॐ वामाय नमः। ॐ ज्येष्ठायै नमः। ॐ रोद्रै नमः।**

द्वितीयावरणम् – (षट्कोणे) **ॐ हृदय शक्तये नमः। ॐ शिरशक्त्यै नमः। ॐ शिखा शक्तये नमः। ॐ कवच शक्तये नमः। ॐ नेत्र शक्तये नमः। ॐ अस्त्र शक्तये नमः।**

तृतीयावरणम् – (अष्टदले) कालिका पुराणे – **ताः प्रोक्ताः शैलपुत्र्याश्च पूर्वकल्पे च भैरव।**

जयन्तीं मङ्गलां कालीं भद्रकालीं कपालिनीम् ।
दुर्गां शिवां क्षमां धात्रीं दलेष्वष्ट सु पूजयेत् ॥

यह नव शक्तियों के नाम है। शिवा का मध्य में पूजन करने पर शेष क्रम इस प्रकार है।

ॐ जयन्त्यै नमः। ॐ मङ्गलायै नमः। ॐ काल्यै नमः। ॐ भद्रकाल्यै नमः। ॐ कपालिन्यै नमः। ॐ दुर्गायै नमः। ॐ क्षमायै नमः। ॐ धात्र्यै नमः।

उग्रचण्डा क्रम में (कालिका पुराणे) कौशिकी, शिवदूत, उमा, हेमवती, शाकंभरी, दुर्गा, महोदरी,

ईश्वरी।

पुनः अष्टदल में – **असिताङ्ग भैरव, रुरुभैरव, चण्डभैरव, क्रोधभैरव, कपालभैरव, उन्मत्तभैरव, भीषणभैरव, संहारभैरव** का पूजन करें।

चतुर्थावरणम् – (भूपुरे चतुर्द्वारे) कालिका पुराणे –

नन्दिभृङ्गि महाकाल गणेश द्वारपालकाः ।
उत्तरादिक्रमात् पूज्या आसनानि च मध्यतः ॥

उत्तरे – **नन्दिने नमः।** पूर्वे – **भृङ्गवे नमः।** दक्षिणे – **महाकालाय नमः।** पश्चिमे – **गणेशाय नमः।**

पञ्चमावरणम् – (भूपुरे दशदिक्षुः पूर्वादिक्रमेण) **ॐ इन्द्राय नमः। ॐ अग्नये नमः। ॐ यमाय नमः। ॐ नैर्ऋतये नमः। ॐ वरुणाय नमः। ॐ वायवे नमः। ॐ कुबेराय नमः। ॐ ईशानाय नमः। ॐ पूर्व ईशान मध्ये – ब्रह्मणे नमः। ॐ नैर्ऋत पश्चिम मध्ये – अनंताय नमः।**

षष्ठावरणम् – (भूपुरे इन्द्रादिलोकपाल समीपे) **ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ पाशाय नमः। ॐ अङ्कुशाय नमः। ॐ गदायै नमः। ॐ त्रिशूलाय नमः। ॐ पद्माय नमः। ॐ चक्राय नमः।**

नमस्कार मन्त्र –

वन्देवाञ्छितलाभाय चन्द्रार्धकृत शेखराम् ।
वृषारूढः शूलधरां शैलपुत्रीं यशस्वनीम् ॥

देवी की पूजा अर्चना कर मंत्र के सवा लाख जप करें। बिल्वपत्र व करवीर पुष्पों से होम करे तो वाञ्छित फल प्राप्त होवे।

॥ हिमालयराज कृत शैलपुत्री स्तुति॥

॥ हिमालय उवाच ॥

मातस्त्वं कृपयागृहे मम सुता जातासि नित्यापि यद्भाग्यं मे बहुजन्मजन्मजनितं मन्ये महत्पुण्यदम् । दृष्टं रूपमिदं परात्परतरां मूर्तिं भवान्या अपि माहेशीं प्रति दर्शयाशु कृपया विश्वेशि तुभ्यं नमः ॥१॥

॥ श्रीदेव्युवाच ॥

ददामि चक्षुस्ते दिव्यं पश्य मे रूपमैश्वरम् । छिन्धि हृत्संशयं विद्धि सर्वदेवमयीं पितः ॥

॥ श्रीमहादेव उवाच ॥

इत्युक्त्वा तं गिरिश्रेष्ठं दत्त्वा विज्ञानमुत्तमम् । स्वरूपं दर्शयामास दिव्यं माहेश्वरं तदा ॥
शशिकोटिप्रभं चारुचन्द्रार्धकृतशेखरम् । त्रिशूलवर हस्तं च जटामण्डितमस्तकम् ॥
भयानकं घोररूपं कालानलसहस्त्रभम् । पञ्चवक्त्रं त्रिनेत्रं च नागयज्ञोपवीतिनम् ॥
द्वीपिचर्माम्बरधरं नागेन्द्रकृतभूषणम् । एवं विलोक्य तद्रूपं विस्मितो हिमवान् पुनः ॥
प्रोवाच वचनं माता रूपमन्यत्प्रदर्शय । ततः संहृत्य तद्रूपं दर्शयामास तत्क्षणात् ॥
रूपमन्यन्मुनिश्रेष्ठ विश्वरूपा सनातनी । शरच्चन्द्रनिभं चारुमुकुटोज्ज्वलमस्तकम् ॥

शङ्खचक्रगदापद्महस्तं नेत्रत्रयोज्ज्वलम् । दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम् ॥
योगीन्द्रवृन्दसंवन्द्यं सुचारुचरणाम्बुजम् । सर्वतः पाणिपादं च सर्वतोऽक्षिशिरोमुखम् ॥
दृष्ट्वा तदेतत्परमं रूपं स हिमवान् पुनः । प्रणम्य तनयां प्राह विस्मयोत्फुल्ललोचनः ॥

॥ हिमालय उवाच ॥

मातस्तवेदं परमं रूपमैश्वरमुत्तमम् । विस्मितोऽस्मि समालोक्य रूपमन्यत्प्रदर्शय ॥
त्वं यस्य सो ह्यशोच्यो हि धन्यश्च परमेश्वरि । अनुगृह्णीष्व मातर्मां कृपया त्वां नमो नमः ॥

॥ श्रीमहादेव उवाच ॥

इत्युक्ता सा तदा पित्रा शैलराजेन पार्वती । तद्रूपमपि संहृत्य दिव्यं रूपं समादधे ॥
नीलोत्पलदलश्यामं वनमालाविभूषितम् । शङ्खचक्रगदापद्ममभिव्यक्तं चतुर्भुजम् ॥
एवं विलोक्य तद्रूपं शैलानामधिपस्ततः । कृताञ्जलिपुटः स्थित्वा हर्षेण महता युतः ॥
स्तोत्रेणानेन तां देवीं तुष्टाव परमेश्वरीम् । सर्वदेवमयीमाद्यां ब्रह्मविष्णुशिवात्मिकाम् ॥

॥ हिमालय उवाच ॥

मातः सर्वमयि प्रसीद परमे विश्वेशि विश्वाश्रये, त्वं सर्वं नहि किंचिदस्ति भुवने तत्त्वं त्वदन्यच्छिवे ।
त्वं विष्णुर्गिरिशस्त्वमेव नितरां धातासि शक्तिः परा, किं वर्ण्यं चरितं त्वचिन्त्यचरिते ब्रह्माद्यगम्यं मया ॥
त्वं स्वाहाखिलदेवतृप्तिजननी विश्वेशि त्वं वै स्वधा, पितृणामपि तृप्तिकारणमसि त्वं देवदेवात्मिका ।
हव्यं कव्यमपि त्वमेव नियमो यज्ञस्तपो दक्षिणा, त्वं स्वर्गादिफलं समस्तफलदे देवेशि तुभ्यं नमः ॥
रूपं सूक्ष्मतमं परात्परतरं यद्योगिनो विद्यया, शुद्धं ब्रह्ममयं वदन्ति परमं मातः सुदृप्तं तव ।
वाचा दुर्विषयं मनोऽतिगमपि त्रैलोक्यबीजं शिवे, भक्त्याहं प्रणमामि देवि वरदे विश्वेश्वरि त्राहिमाम् ॥
उद्यत्सूर्यसहस्रभां मम गृहे जातां स्वयं लीलया, देवीमष्टभुजां विशालनयनां बालेन्दुमौलिं शिवाम् ।
उद्यत्कोटिशशाङ्ककान्तिनयनां बालां त्रिनेत्रां परां भक्त्या त्वां प्रणमामि विश्वजननीं देवि प्रसीदाम्बिके ॥
रूपं ते रजताद्रिकान्तिविमलं नागेन्द्रभूषोज्ज्वलं, घोरं पञ्चमुखाम्बुजत्रिनयनैर्भीमैः समुद्भासितम् ।
चन्द्रार्धाङ्कितमस्तकं धृतजटाजूटं शरण्ये शिवे, भक्त्याहं प्रणमामि विश्वजननि त्वां त्वं प्रसीदाम्बिके ॥
रूपं ते शारदचन्द्रकोटिसदृशं दिव्याम्बरं शोभनं, दिव्यैराभरणैर्विराजितमलं कान्त्या जगन्मोहनम् ।
दिव्यैर्बाहुचतुष्टयैर्युतमहं वन्दे शिवे भक्तितः, पादाब्जं जननि प्रसीद निखिलब्रह्मादिदेवस्तुते ॥
रूपं ते नवनीरदद्युतिरुचिफुल्लाब्जनेत्रोज्ज्वलं, कान्त्या विश्वविमोहनं स्मितमुखं रत्नाङ्गदैर्भूषितम् ।
विभ्राजद्वनमालयाविलसितोरस्कं जगत्तारिणि, भक्त्याहं प्रणतोऽस्मि देवि कृपया दुर्गे प्रसीदाम्बिके ॥
मातः कः परिवर्णितुं तव गुणं रूपं च विश्वात्मकं शक्तो देवि जगत्त्रये बहुगुणैर्देवोऽथवा मानुषः ।
तत् किं स्वल्पमतिर्ब्रवीमि करुणां कृत्वा स्वकीयैर्गुणैर्नो मां मोहय मायया परमया विश्वेशि तुभ्यं नमः ॥

अद्य मे सफलं जन्म तपश्च सफलं मम । यत्त्वं त्रिजगतां माता मत्पुत्रीत्वमुपागता ॥
धन्योऽहं कृतकृत्योऽहं मातस्त्वं निजलीलया । नित्यापि मद्गृहे जाता पुत्रीभावेन वै यतः ॥

॥ इति ॥

॥ अथ शैलपुत्री सहस्रनाम ॥

इसे पुराणों काली सहस्रनाम अथवा ललिता सहस्रनाम भी कहा गया है।

भगवान शंकर ने जब कामदेव को भस्म कर दिया तो पार्वतीजी ने कहा कि मुझे पत्नि रूप में प्राप्त करने के लिये ही आपने तपस्या की थी फिर कामदेव को आपने क्यों भस्म कर दिया। शिवजी ने कहा कि मेरी प्राणप्रिया तो सती हैं यदि आप सती ही हैं तो मुझे उसी रूप का दर्शन करायें। तब शैलपुत्री ने अपने आद्य रूप का दर्शन कराया और शिवजी ने शैलपुत्री की सहस्रनाम से स्तुति की।

॥ शिव उवाच ॥

यदि मे प्राणतुल्यासि सती त्वं चारुलोचना । तदा यथा महामेघप्रभा सा भीमरूपिणी ॥
बभूव दक्षयज्ञस्य विनाशाय दिगम्बरी । काली तथा स्वरूपेण चात्मानं दर्शयस्व माम् ॥

॥ श्री महादेव उवाच ॥

इत्युक्ता सा हिमसुता शम्भुना मुनिसत्तम । बभूव पूर्ववत्काली स्निग्धाञ्जनचयप्रभा ॥
दिगम्बरी क्षरद्रक्ता भीमायतविलोचना । पीनोन्नतकुचद्वन्द्वचारुशोभितवक्षसा ॥
गलदापादसंलम्बिकेशपुञ्ज भयानका । ललज्जिह्वाज्वलद्दन्तनखैरुपशोभिता ॥
उद्यच्छशाङ्कनिचयैर्मेघपंक्तिरिवाम्बरे । आजानुलम्बि मुण्डालिमालयाति विशालया ॥
राजमाना महामेघपंक्तिश्चञ्चलया यथा । भुजैश्चतुर्भिर्भूयोच्चैः शोभमाना महाप्रभा ॥
विचित्ररत्न विभ्राजन्मुकुटोज्ज्वलमस्तका । तां विलोक्य महादेवः प्राह गद्गदया गिरा ॥

॥ शिव उवाच ॥

अनाद्या परमा विद्या प्रधाना प्रकृतिः परा । प्रधानपुरुषाराध्या प्रधानपुरुषेश्वरी ॥
प्राणात्मिका प्राणशक्तिः सर्वप्राणहितैषिणी । उमा चोत्तमकेशिन्युत्तमा चोन्मत्तभैरवी ॥
उर्वशी चोन्नता चोग्रा महोग्रा चोन्नतस्तनी । उग्रचण्डोग्रनयनामहोग्रदैत्यनाशिनी ॥
उग्रप्रभावती चोग्रवेगानुग्रप्रमर्दिनी । उग्रतारोग्रनयना चोर्ध्वस्थाननिवासिनी ॥
उन्मत्तनयनात्युग्रदन्तोत्तुङ्गस्थलालया । उल्लासिन्युल्लसचित्ता चोत्फुल्लनयनोज्ज्वला ॥
उत्फुल्लकमलारूढा कमला कामिनी कला । काली करालवदना कामिनी मुखकामिनी ॥
कोमलाङ्गी कृशाङ्गी च कैटभासुरमर्दिनी । कालिन्दी कमलस्था च कान्ता काननवासिनी ॥
कुलीना निष्कला कृष्णा कालरात्रिस्वरूपिणी । कुमारी कामरूपा च कामिनी कृष्णपिङ्गला ॥
कपिला शान्तिदा शुद्धा शंकरार्धशरीरिणी । कौमारी कार्तिकी दुर्गा कौशिकी कुण्डलोज्ज्वला ॥

कुलेश्वरी कुलश्रेष्ठा कुन्तलोज्ज्वलमस्तका । भवानी भाविनी वाणी शिवा च शिवमोहिनी ॥
शिवप्रिया शिवाराध्या शिवप्राणैकवल्लभा । शिवपत्नी शिवस्तुत्या शिवानन्दप्रदायिनी ॥
नित्यानन्दमयी नित्या सच्चिदानन्दविग्रहा । त्रैलोक्यजननी शम्भुहृदयस्था सनातनी ॥
सदया निर्दया माया शिवा त्रैलोक्यमोहिनी । ब्रह्मादित्रिदशाराध्या सर्वाभीष्टप्रदायिनी ॥
ब्रह्माणी ब्रह्मगायत्री सावित्री ब्रह्मसंस्तुता । ब्रह्मोपास्या ब्रह्मशक्तिर्ब्रह्मसृष्टिविधायिनी ॥
कमण्डलुकरा सृष्टिकर्त्री ब्रह्मस्वरूपिणी । चतुर्भुजात्मिका यज्ञसूत्ररूपा दृढव्रता ॥
हंसारूढ़ा चतुर्वक्त्रा चतुर्वेदाभिसंस्तुता । वैष्णवी पालनकरी महालक्ष्मीर्हरिप्रिया ॥
शङ्खचक्रधरा विष्णुशक्तिर्विष्णुस्वरूपिणी । विष्णुप्रिया विष्णुमाया विष्णुप्राणैकवल्लभा ॥
योगनिद्राक्षरा विष्णुमोहिनी विष्णुसंस्तुता । विष्णुसम्मोहनकरी त्रैलोक्यपरिपालिनी ॥
शङ्खिनी चक्रिणी पद्मा पद्मिनी मुशलायुधा । पद्मालया पद्महस्ता पद्ममालाविभूषिता ॥
गरुडस्था चारुरूपा सम्पद्रूपा सरस्वती । विष्णुपार्श्वस्थिता विष्णुपरमाह्लाददायिनी ॥
सम्पत्तिः सम्पदाधारा सर्वसम्पत्प्रदायिनी । श्रीविद्या सुखदा सौख्यदायिनी दुःखनाशिनी ॥
दुःखहन्त्री सुखकरी सुखासीना सुखप्रदा । सुखप्रसन्नवदना नारायणमनोरमा ॥
नारायणी जगद्धात्री नारायणविमोहिनी । नारायणशरीरस्था वनमालाविभूषिता ॥
दैत्यघ्नी पीतवसना सर्वदैत्यप्रमर्दिनी । वाराही नारसिंही च रामचन्द्रस्वरूपिणी ॥
रक्षोघ्नी काननावासा चाहल्याशापमोचिनी । सेतुबन्धकरी सर्वरक्षःकुलविनाशिनी ॥
सीता पतिव्रता साध्वी रामप्राणैकवल्लभा । अशोककाननावासा लङ्केश्वरविनाशिनी ॥
नीतिः सुनीतिः सुकृतिः कीर्तिर्मेधा वसुन्धरा । दिव्यमाल्यधरा दिव्या दिव्यगन्धानुलेपना ॥
दिव्यवस्त्रपरीधाना दिव्यस्थाननिवासिनी । माहेश्वरी प्रेतसंस्था प्रेतभूमिनिवासिनी ।
निर्जनस्था श्मशानस्था भैरवी भीमलोचना । सुघोरनयना घोरा घोररूपा घनप्रभा ॥
घनस्तनी वरा श्यामा प्रेतभूमिकृतालया । खट्वांगधारिणी द्वीपिचर्माम्बरसुशोभना ॥
महाकाली चण्डवक्त्रा चण्डमुण्डविनाशिनी । उद्यानकाननावासा पुष्पोद्यानवनप्रिया ॥
बलिप्रिया मांसभक्ष्या रुधिरासवभक्षिणी । भीमरावा साट्टहासा रणनृत्यपरायणा ॥
असुरासृक्प्रिया तुष्टा दैत्यदानवमर्दिनी । दैत्यविद्राविणी दैत्यमथनी दैत्यसूदनी ॥
दैत्यघ्नी दैत्यहन्त्री च महिषासुरमर्दिनी । रक्तबीजनिहन्त्री च शुम्भासुरविनाशिनी ।
निशुम्भहन्त्री धूम्राक्षमर्दिनी दुर्गहारिणी । दुर्गासुरनिहन्त्री च शिवदूती महाबला ॥
महाबलवती चित्रवस्त्रा रक्ताम्बरामला । विमला ललिता चारुहासा चारुत्रिलोचना ॥
अजेया जयदा ज्येष्ठा जयशीलापराजिता । विजया जाह्नवी दुष्टजृम्भिणी जयदायिनी ॥

जगद्रक्षाकरी सर्वजगच्चैतन्यकारिणी । जया जयन्ती जननी जनभक्षणतत्परा ॥
जलरूपा जलस्था च जप्यजापकवत्सला । जाज्वल्यमाना यज्ञाशा जन्मनाशविवर्जिता ॥
जरातीता जगन्माता जगद्रूपा जगन्मयी । जङ्गमा ज्वालिनी जृम्भास्तम्भिनी दुष्टतापिनी ॥
त्रिपुरघ्नी त्रिनयना महात्रिपुरतापिनी । तृष्णाजातिः पिपासा च बुभुक्षा त्रिपुरप्रभा ॥
त्वरिता त्रिपुटा त्र्यक्षा तन्वी तापविवर्जिता । त्रिलोकेशी तीव्रवेगा तीव्रा तीव्रबलालया ॥
निःशङ्का निर्मलाभा च निरातङ्काऽमलप्रभा । विनीता विनयाभिज्ञा विशेषज्ञा विलक्षणा ॥
वरदा वल्लभा विद्युत्प्रभा विनयशालिनी । बिम्बोष्ठी विधुवक्त्रा च विवस्त्रा विनयप्रभा ॥
विश्वेशपत्नी विश्वात्मा विश्वरूपा बलोत्कटा । विश्वेशी विश्ववनिता विश्वमाता विचक्षणा ॥
विदुषी विश्वविदिता विश्वमोहनकारिणी । विश्वमूर्तिर्विश्वधरा विश्वेशपरिपालिनी ॥
विश्वकर्त्री विश्वहर्त्री विश्वपालनतत्परा । विश्वेशहृदयावासा विश्वेश्वरमनोरमा ॥
विश्वहा विश्वनिलया विश्वमाया विभूतिदा । विश्वा विश्वोपकारा च विश्वप्राणात्मिकापि च ॥
विश्वप्रिया विश्वमयी विश्वदुष्टविनाशिनी । दाक्षायणी दक्षकन्या दक्षयज्ञविनाशिनी ॥
विश्वम्भरी वसुमती वसुधा विश्वपावनी । सर्वातिशायिनी सर्वदुःखदारिद्र्यहारिणी ॥
महाविभूतिरव्यक्ता शाश्वती सर्वसिद्धिदा । अचिन्त्याऽचिन्त्यरूपा च केवला परमात्मिका ॥
सर्वज्ञा सर्वविषया सर्वोपरिपरायणा । सर्वस्यार्तिहरा सर्वमङ्गला मङ्गलप्रदा ॥
मङ्गलार्हा महादेवी सर्वमङ्गलदायिका । सर्वान्तरस्था सर्वार्थरूपिणी च निरञ्जना ॥
चिच्छक्तिश्चिन्मयी सर्वविद्या सर्वविधायिनी । शान्तिः शान्तिकरी सौम्या सर्वसर्वप्रदायिनी ॥
शान्तिः क्षमा क्षेमकरी क्षेत्रज्ञा क्षेत्रवासिनी । क्षणात्मिका क्षीणतनुः क्षीणाङ्गी क्षीणमध्यमा ॥
क्षिप्रगा क्षेमदा क्षिप्ता क्षणदा क्षणवासिनी । वृत्तिर्निवृत्तिर्भूतानां प्रवृत्तिर्वृत्तलोचना ॥
व्योममूर्तिर्व्योमसंस्था व्योमालयकृताश्रया । चन्द्रानना चन्द्रकान्तिश्चन्द्रार्धाङ्कितमस्तका ॥
चन्द्रप्रभा चन्द्रकला शरच्चन्द्रनिभानना । चन्द्रात्मिका चन्द्रमुखी चन्द्रशेखरवल्लभा ॥
चन्द्रशेखर वक्षःस्था चन्द्रलोकनिवासिनी । चन्द्रशेखरशैलस्था चञ्चला चञ्चलेक्षणा ॥
छिन्नमस्ता छागमांसप्रिया छागबलिप्रिया । ज्योत्स्ना ज्योतिर्मयी सर्वज्यायसी जीवनात्मिका ॥
सर्वकार्यनियन्त्री च सर्वभूतहितैषिणी । गुणातीता गुणमयी त्रिगुणा गुणशालिनी ॥
गुणैकनिलया गौरी गुह्यगोपकुलोद्भवा । गरीयसी गुरुरता गुह्यस्थाननिवासिनी ॥
गुणज्ञा निर्गुणा सर्वगुणार्हा गुह्यकाम्बिका । गलज्जटा गलत्केशा गलद्रुधिरचर्चिता ॥
गजेन्द्रगमना गन्त्री गीतनृत्यपरायणा । गमनस्था गयाध्यक्षा गणेशजननी तथा ॥
गानप्रिया गानरता गृहस्था गृहिणी परा । गजसंस्था गजारूढा ग्रसन्ती गरुडासना ॥

****

योगस्था योगिनीगम्या योगचिन्तापरायणा । योगिध्येया योगिवन्द्या योगलभ्या युगात्मिका ॥
योगिज्ञेया योगयुक्ता महायोगेश्वरेश्वरी । योगानुरक्ता युगदा युगान्तजलदप्रभा ॥
युगानुकारिणी यज्ञरूपा सूर्यसमप्रभा । युगान्तानिलवेगा च सर्वयज्ञफलप्रदा ॥
संसारयोनिः संसारव्यापिनी सकलास्पदा । संसारतरुनिःसेव्या संसारार्णवतारिणी ॥
सर्वार्थसाधिका सर्वा संसारव्यापिनी तथा । संसारबन्धकर्त्री च संसारपरिवर्जिता ॥
दुर्निरीक्ष्या सुदुष्प्राप्या भूतिर्भूतिमतीत्यपि । अत्यन्त विभवारूपा महाविभवरूपिणी ॥
शब्दब्रह्मस्वरूपा च शब्दयोनिः परात्परा । भूतिदा भूतिमाता च भूतिस्तन्द्री विभूतिदा ॥
भूतान्तरस्था कूटस्था भूतनाथप्रियाङ्गना । भूतमाता भूतनाथा भूतालयनिवासिनी ॥
भूतनृत्यप्रिया भूतसङ्गिनी भूतलाश्रया । जन्ममृत्युजरातीता महापुरुषसङ्गता ॥
भुजगा तामसी व्यक्ता तमोगुणवती तथा । त्रितत्त्वतत्त्वरूपा च तत्त्वज्ञातत्त्वकप्रिया ॥
त्र्यम्बका त्र्यम्बकरता शुक्ला त्र्यम्बकरूपिणी । त्रिकालज्ञा जन्महीना रक्ताङ्गी ज्ञानरूपिणी ॥
अकार्या कार्यजननी ब्रह्माख्या ब्रह्मसंस्थिता । वैराग्ययुक्ता विज्ञानगम्या धर्मस्वरूपिणी ॥
सर्वधर्मविधानज्ञा धर्मिष्ठा धर्मतत्परा । धर्मिष्ठपालनकरी धर्मशास्त्रपरायणा ॥
धर्माधर्मविहीना च धर्मजन्यफलप्रदा । धर्मिणी धर्मनिरता धर्मिणामिष्टदायिनी ॥
धन्या धीर्धारणा धीरा धन्वनी धनदायिनी । धनुष्मती धरासंस्था धरणिस्थितिकारिणी ॥
सर्वयोनिर्विश्वयोनिरपांयोनिरयोनिजा । रुद्राणी रुद्रवनिता रुद्रैकादशरूपिणी ॥
रुद्राक्षमालिनी रौद्री भुक्तिमुक्तिफलप्रदा । ब्रह्मोपेन्द्रप्रवन्द्या च नित्यं मुदितमानसा ॥
इन्द्राणी वासवी चैन्द्री विचित्रैरावतस्थिता । सहस्रनेत्रा दिव्याङ्गा दिव्यकेशविलासिनी ॥
दिव्याङ्गना दिव्यनेत्रा दिव्यचन्दनचर्चिता । दिव्यालङ्करणा दिव्यश्वेत चामरवीजिता ॥
दिव्यहारा दिव्यपदा दिव्यनूपुरशोभिता । केयूरशोभिता हृष्टा हृष्टचित्तप्रहर्षिणी ॥
सम्प्रहृष्टमना हर्षप्रसन्नवदना तथा । देवेन्द्रवन्द्यपादाब्जा देवेन्द्रपरिपूजिता ॥
रजसा रक्तनयना रक्तपुष्पप्रिया सदा । रक्ताङ्गी रक्तनेत्रा च रक्तोत्पलविलोचना ॥
रक्ताभा रक्तवस्त्रा च रक्तचन्दनचर्चिता । रक्तेक्षणा रक्तभक्ष्या रक्तमत्तोरगाश्रया ॥
रक्तदन्ता रक्तजिह्वा रक्तभक्षणतत्परा । रक्तप्रिया रक्ततुष्टा रक्तपानसुतत्परा ॥
बन्धूककुसुमाभा च रक्तमाल्यानुलेपना । स्फुरद्रक्ताञ्चिततनुः स्फुरत्सूर्यशतप्रभा ॥
स्फुरन्नेत्रा पिङ्गजटा पिङ्गला पिङ्गलेक्षणा । बगला पीतवस्त्रा च पीतपुष्पप्रिया सदा ॥
पीताम्बरा पिबद्रक्ता पीतपुष्पोपशोभिता । शत्रुघ्नी शत्रुसम्मोहजननी शत्रुतापिनी ॥
शत्रुप्रमर्दिनी शत्रुवाक्यस्तंभनकारिणी । उच्चाटनकरी सर्वदुष्टोत्सारणकारिणी ॥

शत्रुविद्राविणी शत्रुसम्मोहनकरी तथा । विपक्षमर्दनकरी शत्रुपक्षक्षयङ्करी ॥
सर्वदुष्टघातिनी च सर्वदुष्टविनाशिनी । द्विभुजा शूलहस्ता च त्रिशूलवरधारिणी ॥
दुष्टसंतापजननी दुष्टक्षोभ प्रवर्धिनी । दुष्टानां क्षोभसम्बद्धा भक्तक्षोभनिवारिणी ॥
दुष्टसंतापिनी दुष्टसन्तापपरिमर्दिनी । सन्तापरहिता भक्तसन्तापपरिनाशिनी ॥
अद्वैता द्वैतरहिता निष्कला ब्रह्मरूपिणी । त्रिदशेशी त्रिलोकेशी सर्वेशी जगदीश्वरी ॥
ब्रह्मेशसेवितपदा सर्ववन्द्यपदाम्बुजा । अचिन्त्यरूपचरिता चाचिन्त्यबलविक्रमा ॥
सर्वाचिन्त्यप्रभावा च स्वप्रभावप्रदर्शिनी । अचिन्त्यमहिमाचिन्त्यरूपसौन्दर्यशालिनी ॥
अचिन्त्यवेशशोभा च लोकाचिन्त्यगुणान्विता । अचिन्त्यशक्तिर्दुश्चिन्त्यप्रभावा चिन्त्यरूपिणी ॥
योगचिन्त्या महाचिन्तानाशिनी चेतनात्मिका । गिरिजा दक्षजा विश्वजनयित्री जगत्प्रसूः ॥
संनम्या प्रणता सर्वप्रणतार्तिहरा तथा । प्रणतैश्वर्यदा सर्वप्रणताशुभनाशिनी ॥
प्रणतापन्नाशकरी प्रणताशुभमोचनी । सिद्धेश्वरी सिद्धसेव्या सिद्धचारणसेविता ॥
सिद्धिप्रदा सिद्धिकरी सर्वसिद्धगणेश्वरी । अष्टसिद्धिप्रदा सिद्धगणसेव्यपदाम्बुजा ॥
कात्यायनी स्वधा स्वाहा वषड्वौषट्स्वरूपिणी । पितृणां तृप्तिजननी कव्यरूपा सुरेश्वरी ॥
हव्यभोक्त्री हव्यतुष्टा पितृरूपाऽसितप्रिया । कृष्णपक्षप्रपूज्या च प्रेतपक्षसमर्पिता ॥
अष्टहस्ता दशभुजा चाष्टादशभुजान्विता । चतुर्दशभुजाऽसंख्यभुजवल्लीविराजिता ॥
सिंहपृष्ठसमारूढा सहस्रभुजराजिता । भुवनेशी चान्नपूर्णा महात्रिपुरसुन्दरी ॥
त्रिपुरा सुन्दरी सौम्यमुखी सुन्दरलोचना । सुन्दरास्या शुभदंष्ट्रा सुभ्रूः पर्वतनन्दिनी ॥
नीलोत्पलदलश्यामा स्मेरोत्फुल्लमुखाम्बुजा । सत्यसंधा पद्मवक्त्रा भ्रूकुटीकुटिलानना ॥
विद्याधरी वरारोहा महासंध्यास्वरूपिणी । अरुन्धती हिरण्याक्षी सुधूम्राक्षी शुभेक्षणा ॥
श्रुतिः स्मृतिः कृतिर्योगमाया पुण्या पुरातनी । वाग्देवता वेदविद्या ब्रह्मविद्यास्वरूपिणी ॥
वेदशक्तिर्वेदमाता वेदाद्या परमागतिः । आन्वीक्षिकी तर्कविद्या योगशास्त्रप्रकाशिनी ॥
धूमावती वियन्मूर्तिर्विद्युन्मालाविलासिनी । महाव्रता सदानन्दनन्दिनी नगनन्दिनी ॥
सुनन्दा यमुना चण्डी रुद्रचण्डी प्रभावती । पारिजातवनावासा पारिजातवनप्रिया ॥
सुपुष्पगन्धसन्तुष्टा दिव्यपुष्पोपशोभिता । पुष्पकाननसद्वासा पुष्पमालाविलासिनी ॥
पुष्पमाल्यधरा पुष्पगुच्छालंकृतदेहिका । प्रतप्तकांचनाभासा शुद्धकाञ्चनमण्डिता ॥
सुवर्णकुण्डलवती स्वर्णपुष्पप्रिया सदा । नर्मदा सिन्धुनिलया समुद्रतनया तथा ॥
षोडशी षोडशभुजा महाभुजगमण्डिता । पातालवासिनी नागी नागेन्द्रकृतभूषणा ॥
नागिनी नागकन्या च नागमाता नगालया । दुर्गापत्तारिणी दुर्गदुष्टग्रहनिवारिणी ॥

****

अभयापन्निहन्त्री च सर्वापत्परिनाशिनी । ब्रह्मण्या श्रुतिशास्त्रज्ञा जगतां कारणात्मिका ॥
निष्कारणा जन्महीना मृत्युञ्जयमनोरमा । मृत्युञ्जयहृदावासा मूलाधारनिवासिनी ॥
षट्चक्रसंस्था महती महोत्सवविलासिनी । रोहिणी सुन्दरमुखी सर्वविद्याविशारदा ॥
सदसद्वस्तुरूपा च निष्कामा कामपीडिता । कामातुरा काममत्ता काममानससत्तनुः ॥
कामरूपा च कालिन्दी कचालम्बितविग्रहा । अतसीकुसुमाभासा सिंहपृष्ठनिषेदुषी ॥
युवती यौवनोद्रिक्ता यौवनोद्रिक्तमानसा । अदितिर्देवजननी त्रिदशार्तिविनाशिनी ॥
दक्षिणाऽपूर्ववसना पूर्वकालविवर्जिता । अशोका शोकरहिता सर्वशोकनिवारिणी ॥
अशोककुसुमाभासा शोकदुःखक्षयङ्करी । सर्वयोषित्स्वरूपा च सर्वप्राणिमनोरमा ॥
महाश्चर्या मदाश्चर्या महामोहस्वरूपिणी । महामोक्षकरी मोहकारिणी मोहदायिनी ॥
अशोच्या पूर्णकामा च पूर्णा पूर्णमनोरथा । पूर्णाभिलषिता पूर्णनिशानाथसमानना ॥
द्वादशार्कस्वरूपा च सहस्त्रार्कसमप्रभा । तेजस्विनी सिद्धमात्रा चन्द्रानयनरक्षणा ॥
अपरापारमाहात्म्या नित्यविज्ञानशालिनी । विवस्वती हव्यवाहा जातवेदःस्वरूपिणी ॥
स्वैरिणी स्वेच्छविहरा निर्बीजा बीजरूपिणी । अनन्तवर्णाऽनन्ताख्याऽनन्तसंस्था महोदरी ॥
दुष्टभूतापहन्त्री च सद्वृत्तपरिपालिका । कपालिनी पानमत्ता मत्तवारणगामिनी ॥
विन्ध्यस्था विन्ध्यनिलया विन्ध्यपर्वतवासिनी । बन्धुप्रिया जगद्बन्धुः पवित्रा सपवित्रिणी ॥
परामृताऽमृतकला चापमृत्युविनाशिनी । महारजतसंकाशा रजताद्रिनिवासिनी ॥
काशीविलासिनी काशीक्षेत्ररक्षणतत्परा । योनिरूपा योनिपीठस्थिता योनिस्वरूपिणी ॥
कामालसितचार्वङ्गी कटाक्षक्षेपमोहिनी । कटाक्षक्षेपनिरता कल्पवृक्षस्वरूपिणी ॥
पाशाङ्कुशधरा शक्तिर्धारिणी खेटकायुधा । बाणायुधाऽमोघशस्त्रा दिव्यशस्त्रास्त्रवर्षिणी ॥
महास्त्रजालविक्षेप विपक्षक्षयकारिणी । घण्टिनी पाशिनी पाशहस्ता पाशाङ्कुशायुधा ॥
चित्रसिंहासनगता महासिंहासनस्थिता । मन्त्रात्मिका मन्त्रबीजा मन्त्राधिष्ठातृदेवता ॥
सुरूपाऽनेकरूपा च विरूपा बहुरूपिणी । विरूपाक्षप्रियतमा विरूपाक्षमनोरमा ॥
विरूपाक्षा कोटराक्षी कूटस्था कूटरूपिणी । करालास्या विशालास्या धर्मशास्त्रार्थपारगा ॥
अध्यात्मविद्या शास्त्रार्थकुशला शैलनन्दिनी । नगाधिराजपुत्री च नगपुत्री नगोद्भवा ॥
गिरीन्द्रबाला गिरिशप्राणतुल्या मनोरमा । प्रसन्ना चारुवदना प्रसन्नास्या प्रसन्नदा ॥
शिवप्राणा पतिप्राणा पतिसम्मोहकारिणी । मृगाक्षी चञ्चलापाङ्गी सुदृष्टिर्हंसगामिनी ॥
नित्यं कुतूहलपरा नित्यानन्दाभिनन्दिता । सत्यविज्ञानरूपा च तत्त्वज्ञानैककारिणी ॥
त्रैलोक्यसाक्षिणी लोकधर्माधर्मप्रदर्शिनी । धर्माधर्मविधात्री च शम्भुप्राणात्मिका परा ॥

मेनकागर्भसम्भूता मैनाकभगिनी तथा । श्रीकण्ठाकण्ठहारा च श्रीकण्ठहृदयस्थिता ॥
श्रीकण्ठकण्ठजप्या च नीलकण्ठमनोरमा । कालकूटात्मिका कालकूटभक्षणकारिणी ॥
महाकालप्रिया कालकलनैकविधायिनी । अक्षोभ्यपत्नी संक्षोभनाशिनी ते नमो नमः ॥

॥ श्रीमहादेव उवाच ॥

एवं नामसहस्रेण संस्तुता पर्वतात्मजा । वाक्यमेतन्महेशानमुवाच मुनिसत्तम ॥

॥ श्रीदेव्युवाच ॥

अहं त्वदर्थे शैलेन्द्रतनयात्वमुपागता । त्वं मे प्राणसमो भर्ता त्वदनन्याहमङ्गना ॥
त्वं मदर्थे तपस्तीव्रं सुचिरं कृतवानसि । अहं च तपसाराध्या त्वां लप्स्यामि पुनः पतिम् ॥

॥ श्रीमहादेव उवाच ॥

त्वमाराध्यतमा सर्वजननी प्रकृतिः परा । तवाराध्यो जगत्यत्र विद्यते नैव कोऽपि हि ॥
अहं त्वया निजगुणैरनुग्राह्यो महेश्वरि । प्रार्थनीयस्त्वयि शिवे एष एव वरो मम ॥
यत्र यत्र तवेदं हि कालीरूपं मनोहरम् । आविर्भवति तत्रैव शिवरूपस्य मे हृदि ॥
संस्थातव्यं त्वया लोके ख्याता च शववाहना । भविष्यसि महाकाली प्रसीद जगदम्बिके ॥

॥ श्रीमहादेव उवाच ॥

इत्युक्ता शम्भुना काली कालमेघसमप्रभा । तथेत्युक्त्वा समभवत्पुरगौरी यथा पुरा ॥
य इदं पठते देव्या नाम्नां भक्त्या सहस्रकम् । स्तोत्रं श्रीशम्भुना प्रोक्तं स देव्याः समतामियात् ॥
अभ्यर्च्य गन्धपुष्पैश्च धूपदीपैर्महेश्वरीम् । यः पठेत्स्तोत्रमेतच्च स लभेत्परमं पदम् ॥
अनन्यमनसा देवीं स्तोत्रेणानेन यो नरः । संस्तौति प्रत्यहं तस्य सर्वसिद्धिः प्रजायते ॥
राजानो वशगास्तस्य नश्यन्ति रिपवस्तथा । सिंहव्याघ्रमुखाः सर्वे हिंसका दस्यवस्तथा ॥
दूरादेव पलायन्ते तस्य दर्शनमात्रतः । अव्याहताज्ञः सर्वत्र लभते मङ्गलं महत् ॥
अन्ते दुर्गास्मृतिं लब्ध्वा स्वयं देवी कलामियात् ॥

॥ इति श्रीमहाभागवते देवीपुराणे श्रीमहादेवनारद संवादे शिववक्त्रविनिर्गतं ललिता (शैलपुत्री) सहस्रनाम स्तोत्रम् ॥

॥ २. ब्रह्मचारिणी ॥

हेमवती पार्वती ने शिव को ही अपना पति मानने हेतु कठोर तपस्या की एवं प्रतिज्ञा की यदि मैं शिव को प्रसन्न करने में असफल रही तो ब्रह्मचारिणी रहूंगी। पिता ने उसे उस समय समझाया कि उ-मा अर्थात् उसे मत कर इसी से उनका नाम उमा हो गया।

उमेति चपले पुत्रि त्वयोक्ता तनया ततः ।
उमेति नाम तेनास्या भुवनेषु भविष्यति ॥

कालिका पुराण में ब्रह्मचारिणी होने के लिये लिखा है –

विनापि शंभुं रुद्राणीं भक्तस्तु परिचिन्तयेत् ।

उमा मन्त्र हेतु पार्वती का बीज मन्त्र कहा है।

पादिः समाप्ति साहितः फडन्ती नान्त एव च ।
एकाक्षरस्त्र्यक्षरश्च उमा मंत्र इति स्मृत ॥

१. एकाक्षर मन्त्र – पां ॥

२. त्र्यक्षर मन्त्र – पार्वती ॥

३. षडक्षर मन्त्र – उं उमायै नमः ॥ ४. ॐ ब्रां ब्रीं ब्रूं ब्रह्मचारिण्यै नमः ॥॥

॥ द्विभुजा ध्यानम् – (कालिका पुराणे) ॥

द्विभुजां स्वर्ण गौरांगी पद्मचामर धारिणीम् ।
व्याघ्रचर्म स्थिते पद्मे पद्मासन गता सदा ॥

पद्म का रंग नील तथा चामर का श्वेत वर्ण कहा गया है।

॥ चतुर्भुजा ध्यानम् ॥

दधाना करपद्माभ्यामक्षमाला कमण्डलू ।
देवी प्रसीदस्तु मयि ब्रह्मचारिण्यनुत्तमा ॥

॥ यन्त्रार्चनम् ॥

यन्त्र रचना – बिन्दु, त्रिकोण, षट्कोण, अष्टदल एवं भूपुर बनायें।

ॐ मं मण्डूकादि पीठ देवतायै नमः से पीठ पूजा कर देवी का ध्यान मन्त्रसे आवाहन करें।

प्रथमावरणम् – (त्रिकोणे) **ॐ सत्त्वाय नमः। ॐ रजसे नमः। ॐ तमसे नमः।**

द्वितीयावरणम् – (षट्कोणे) **ॐ हृदय शक्तये नमः। ॐ शिर शक्तये नमः। ॐ शिखा शक्तये नमः। ॐ कवच शक्तये नमः। ॐ नेत्र शक्तये नमः। ॐ अस्त्र शक्तये नमः।**

तृतीयावरणम् – (अष्टदले) कालिका पुराणे **ॐ जयायै नमः। ॐ विजयायै नमः। ॐ मातङ्ग्यै नमः। ॐ ललितायै नमः। ॐ नारायण्यै नमः। ॐ सावित्र्यै नमः। ॐ स्वधायै नमः। ॐ स्वाहायै नमः।**

॥ श्री ब्रह्मचारिणी यन्त्रम् ॥

पुनः **असिताङ्ग भैरव, रुरुभैरव, चण्डभैरव, क्रोधभैरव, कपालभैरव, उन्मत्तभैरव, भीषणभैरव, संहारभैरव** का पूजन करें।

चतुर्थावरणम् - (भूपुरे चतुर्द्वारे) पूर्वे - **गं गणेशाय नमः**। दक्षिणे - **वं वटुकाय नमः**। पश्चिमे - **यां योगिन्यै नमः**। उत्तरे - **क्षां क्षेत्रपालाय नमः**।

पञ्चमावरण हेतु भूपुर में **इन्द्रादि दिक्पालों** का एवं **षष्ठमावरण** में उनके अस्त्रों का पूजन करें।

देवि की पूजा अर्चना कर मन्त्र का अनुष्ठान करें।

किंशुक पुष्पों को अर्पण करें आसन व पूजा द्रव्यों की कुशा से शुद्धि करें।

॥ ३. चन्द्रघण्टा ॥

देवी चन्द्रघण्टा को कहीं कहीं पुराणों व तन्त्रग्रन्थो में चन्डघण्टा नाम से भी संबोधन किया गया है। महाकाल संहिता के कामकला खण्ड में चण्डघण्टा व चण्डेश्वर्या नाम से दो ध्यान मन्त्र भी दिये गये हैं। देवी अपने दाहिने हाथ में पद्म, धनुष, बाण, अभयमुद्रा, धारण किये हुये हैं तो बाँयें हाथ में त्रिशूल, गदा, खड्ग व घण्टा धारण किये हुये हैं। यह देवी एक वक्त्रा है। तथा चण्डघण्टा स्वरूप में तीन मुख वाली है। यह देवि दश भुजा भी कही गई है, वर, अभय, मुद्रा, घण्टा, व अन्य दिव्यास्त्र धारण किये हुये है। मस्तक में घण्टा के आकार का चन्द्रमा धारण किये हुये है। यह अपने घण्टे की ध्वनि से दैत्य समूह को स्तंभित कर देती है। तथा वीररस की मूर्ति है तथा सदैव युद्ध के लिये उद्यत् रहती है। सिंह वाहन पर आरूढ़ है।

(१) चन्द्रघण्टा मन्त्र - ॐ ह्रीं क्लीं श्रीं चन्द्रघण्टायै स्वाहा॥

॥ ध्यानम् ॥

पिण्डजप्रवरारूढा चण्डकोपास्त्रकैर्युता ।
प्रसादं तनुते मह्यं चन्द्रघण्टेति विश्रुता ॥

(२) चण्डघण्टा मन्त्र - क्रीं क्रीं हूं हूं हूं हूं क्रों क्रों क्रों श्रीं ह्रीं ह्रीं छ्रीं छ्रीं फ्रें स्त्रीं चण्डघण्टे शत्रून् स्तंभय स्तंभय मारय मारय हुं फट् स्वाहा।

॥ ध्यानम् ॥

ध्यायेद् दूर्वादलश्यामां पूर्णचन्द्रानन त्रयाम् । एकैक वक्त्र नयन त्रितयोज्ज्वल विग्रहाम् ॥
पीताम्बर परीधानां पीतस्त्रगनुलेपनाम् । सर्वाभरणनद्धाङ्गीं रत्नाकल्प परिष्कृताम् ॥
चण्डघण्टामष्टभुजां स्थितां मत्तगजोपरि । खड्गं त्रिशूलं विशिखं कर्तृकां दक्षिण करे ॥
चर्मपाश धनुर्दण्ड खर्पराणि च वामतः । धारयन्तीं क्रूरदृष्टि चण्डघण्टां विचिन्तयेत् ॥

देवि अपने वृहदाकार घण्टे की आवाज से ही शत्रु सेना का स्तंभन कर देती है उन्हे विवेकहीन कर देती है। कई ग्रंथों में चन्द्रघण्टा व चण्डघण्टा की उपमा एक ही दी गई है।

(३) चण्डेश्वर्या मन्त्र - (महाकाल संहितायाम् कामकला खण्डे) - **ॐ ह्रीं श्रीं हूं क्रों क्रीं स्त्रीं क्लीं स्हजलक्षम्लवन उं क्षमवह्र हसव्म्र उं क्लहह्रझकह्रनसक्ल ईं सस्लक्षकम हूं व्रूं क्ष्लहमव्य्र उं चण्डेश्वरी ख्रों छ्रीं फ्रें क्रौं हूं हूं फट् स्वाहा ॥३॥**

॥ यंत्रार्चनम्॥

यन्त्र रचना – बिन्दु, त्रिकोण, षट्कोण, अष्टदल एवं भूपुर बनाकर यंत्र पर **"ॐ मं मण्डूकादि पीठ देवताभ्यो नमः"** से पीठ पूजा कर मध्य बिन्दु में देवी का आवाहन करें।

॥ श्री चन्द्रघण्टा यन्त्रम् ॥

प्रथमावरणम् – (त्रिकोणे) **ॐ वामायै नमः। ॐ ज्येष्ठायै नमः। ॐ रौद्र्यै नमः।**

द्वितीयावरणम् – (षट्कोणे) **ॐ हृदय शक्तये नमः। ॐ शिरशक्तये नमः। ॐ शिखाशक्तये नमः। ॐ कवचशक्तये नमः। ॐ नेत्रशक्तये नमः। ॐ अस्त्रशक्तये नमः।**

तृतीयावरणम् – (अष्टदले) **शैलपुत्र्यादि नवदुर्गाओं का चन्द्रघण्टा को छोड़कर अन्य देवियों का अर्चन करें।**

दक्षिण भारत में नवदुर्गा क्रम इस प्रकार है – वनदुर्गा, शूलिनी दुर्गा, जातवेद दुर्गा, शान्तिदुर्गा, शबरीदुर्गा, ज्वालादेवी, लवणदुर्गा, आसुरीदुर्गा।

अष्टदले पूर्वादिक्रमेण – **ॐ शैलपुत्र्यै नमः। ॐ ब्रह्मचारिण्यै नमः। ॐ कुष्माण्डायै नमः। ॐ स्कन्दमात्र्यै नमः। ॐ कात्यायन्यै नमः। ॐ कालरात्र्यै नमः।** ॐ महागौर्यै **नमः। ॐ सिद्धिदात्र्यै नमः।**

पुनः अष्टदलकर्णिकायां – **ॐ असितांग भैरवाय नमः। ॐ रुरु भैरवाय नमः। ॐ चण्ड भैरवाय नमः। ॐ क्रोध भैरवाय नमः। ॐ कपाली भैरवाय नमः। ॐ उन्मत्त भैरवाय नमः। ॐ भीषण भैरवाय नमः। ॐ संहार भैरवाय नमः।**

चतुर्थावरणम् – (भूपुरे चतुर्द्वारेषु) – पूर्वे – **गं गणेशाय नमः।** दक्षिणे – **वं वटुकाय नमः।** पश्चिमे – **यां योगिन्यै नमः।** उत्तरे – **क्षां क्षेत्रपालाय नमः।**

पञ्चमावरणम् में **इन्द्रादि दिक्पालों** का एवं **षष्ठमावरणम्** हेतु इन्द्रादि के **अस्त्रों वज्रादि** का पूजन भूपुर में करें।

नियम पूर्वक मंत्र का पुरश्चरण करे। शत्रुस्तंभन हेतु होम द्रव्य में हरिद्रा व हरताल का भी प्रयोग करें।

॥ ४. कूष्माण्डा ॥

यह देवि ब्रह्माण्ड को कूष्माण्ड की तरह आकृति में धारण करती है। ईषत् हँसने से अण्ड को अर्थात् ब्रह्माण्ड को पैदा करती है। इन्हें कुम्हड़े की बलिप्रिय है अतः इन्हें कूष्माण्डा नाम से संबोधित किया जाता है।

अष्टभुजा स्वरूप में सातभुजाओं में अस्त्र धारण करती हैं तथा दाहिनी भुजा में जप माला है। सिंह वाहिनी दुर्गा है।

यह देवी विन्ध्यवासिनी का ही स्वरूप है। तत्संबंधी नवदुर्गा इस प्रकार है।

नीलकण्ठी, क्षेमङ्करी, हरसिद्धा, रुद्रांशदुर्गा, वनदुर्गा, अग्निदुर्गा, जयदुर्गा, विन्ध्यवासिनी, रूपमारी दुर्गा॥

अतः विन्ध्यवासिनी के अलावा अन्य अष्टदेवियाँ अष्टनायिका हुई जिनका पूजन अष्टदल में करें।

तन्त्र ग्रन्थों में कूष्माण्डा के प्रश्न के शुभाशुभ ज्ञान हेतु स्वप्न सिद्धि हेतु किया जाता है।

जैन ग्रन्थों में भी कूष्माण्डा के घट चालन के मंत्र व प्रयोग मिलते हैं। घटचालन हेतु शुद्ध भूमि पर अक्षतादि रखकर कलश स्थापित कर उसमें कूष्माण्डा का आवाह्न पूजन किया जाता है। पश्चात् मंत्र पढ़ते हुये दो व्यक्ति हाथ से कलश का स्पर्श करते है। मंत्र पढ़ते हुये प्रश्न कामना की शुभाशुभ सिद्धि हेतु कलश का वाम या दक्षिण की ओर घूमने की प्रार्थना की जाती है अतः कलश के भ्रमणानुसार अपना शुभाशुभ जाने।

कुष्माण्डा देवी का प्रेत कुष्माण्डा नाम से प्रयोग शत्रु को पीड़ा देने हेतु किया जाता है। यह प्रेतासना देवी है।

मंत्रोयथा -

(१) **ॐ ह्रीं जगत्प्रसूत्यै नमः ।**

(२) **ॐ ह्रीं कूष्माण्डायै जगत्प्रसूत्यै नमः।**

(३) **ॐ ह्रीं नमो भगवति कूष्माण्डायै मम शुभाशुभं स्वप्ने सर्व प्रदर्शय प्रदर्शय।**

(४) **ॐ ह्रीं नमो भगवति प्रेतकूष्माण्डायै पर प्रयोग भक्षिणी मम शत्रून् भञ्जय-भञ्जय मर्दय-मर्दय मां रक्ष रक्ष सर्वकार्य साधय-साधय ह्रीं स्वाहा।**

(५) **ॐ अग्रे कुष्माण्डिनी कनकप्रभे सिंहमस्तक समारूढे अवतर अवतर अमोघ वागेश्वरी सत्यवादिनी सत्यं कथय कथय ह्रीं ॐ स्वाहा ।**

(६) **ॐ नमो भगवति अप कूष्माण्डि महाविद्ये कनकप्रभे सिंहरथ गामिनी त्रैलोक्या शूलिनी ऐह्ये ऐह्ये मम चिंतितं कार्यं कुरू कुरू भगवती स्वाहा ।(पाठान्तर) भगवत्यं अप।**

॥ ध्यान व प्रार्थना ॥

सुरासंपूर्ण कलशं रुधिराप्लुतमेव च ।
दधाना हस्त पद्माभ्यां कूष्माण्डा शुभदास्तु मे ॥

॥ यंत्रार्चनम्॥

यन्त्र रचना - बिन्दु, त्रिकोण, षट्कोण, अष्टदल एवं भूपुर सहित यंत्र बनाये।

॥ श्री कूष्माण्डा यन्त्रम् ॥

ॐ मं मण्डूकादि पीठ देवताभ्यो नमः से योग पीठ का पूजन कर मध्य में देवि का ध्यान पूर्वक आवहन करे ।

प्रथमावरणम् - (त्रिकोणे) **ॐ सं सत्त्वाय नमः। ॐ रं रजसेनमः। ॐ तं तमसे नमः।**

द्वितीयावरणम् - (षट्कोणे) **ॐ हृदय शक्तये नमः। ॐ शिरशक्त्ये नमः। ॐ शिखाशक्तये नमः। ॐ कवच शक्तये नमः। ॐ नेत्रशक्तये नमः। ॐ अस्त्र शक्तये नमः।**

तृतीयावरणम् - (अष्टदलकेसरेषु) **ॐ असितांग भैरवाय नमः।**

ॐ रुरु भैरवाय नमः। ॐ चण्ड भैरवाय नमः।ॐ क्रोध भैरवाय नमः। ॐ कपालि भैरवाय नमः। ॐ उन्मत्त भैरवाय नमः। ॐ भीषण भैरवाय नमः। ॐ संहार भैरवाय नमः।

चतुर्थावरणम् – (अष्टदलाग्रे) ॐ नीलकण्ठ्यै नमः। ॐ क्षेमङ्कर्यै नमः। ॐ हरसिद्ध्यै नमः। ॐ रुद्रांशदुर्गायै नमः। ॐ वनदुर्गायै नमः। ॐ अग्निदुर्गायै नमः। ॐ जयदुर्गायै नमः। ॐ रूपमारी दुर्गायै नमः।

पंचमावरणम् –(भूपुरे चतुर्द्वारे) पूर्वे – **गं गणेशाय नमः**। दक्षिणे – **वं वटुकाय नमः**। पश्चिमे – **यां योगिन्यै नमः**। उत्तरेक्षां – **क्षेत्रपालाय नमः**।

षष्ठमावरणम् – (भूपुरे) – इन्द्रादि लोकपालों व उनके वज्रादि आयुधों का पूजन करे।

देवि की पूजा अर्चना कर नियमित क्रम से पुरश्चरण करे। देवि के कुष्माण्ड की बलि प्रिय है अतः इसे निवेदित करे।

॥ आम्रकूष्माण्डा मन्त्राः॥

प्राकृत ग्रन्थे

१. ॐ हूं ह्रौं भों हैं ह्रौं मों हैं ह्रौं स्वाहा।

२. ॐ हूं ह्रौं हैं उं हैं ह्रौं स्वाहा उं ह्रीं क्ष्मं ठः नमः। स्फ्रां आम्रकुष्माडिनी नमः

३. ॐ नमो भगवति आम्रकुष्माण्डी अंबा अम्बालिके (अंबोल) अंबिके स्वाहा।

४. ॐ नमो भगवति आम्रकुष्माण्डी ॐ जयंतगिरिशिखर निवासिनी सर्वाङ्गसुन्दरी वामरूपधारिणी पूर्व द्वारं बंधामि अग्निद्वारं बंधामि दक्षिणद्वारं बंधामि नैरृत्यद्वारं बंधामि पश्चिमद्वारं बंधामि वायव्यद्वारं बंधामि उत्तरद्वारं बंधामि ईशानद्वारं बंधामि उर्ध्वद्वारं बंधामि अधोद्वारं बंधामि शिरःद्वारं बंधामि कुक्षिद्वारं बंधामि सर्वप्रदेशे बंधामि आत्मरक्षे भूतरक्षे पिशाचरक्षे चोररक्षे सर्वरक्षे कामरक्षे स्वाहा वज्रप्राकार अग्निप्राकारः प्राकारं भूमि बंध आकाशबंध दिगंबंध चोरबंध आत्मरक्षा सर्वरक्षानाम विद्या।

५. ॐ नमो भगवति आम्रकुष्माण्डी सर्वमुख रञ्जिनी सर्वमुख स्तम्भनी हुं फट् स्वाहा।

॥ ध्यानम् ॥

हरितमणि स्वर्णवेदी पर श्यामदेह वाली देवि विराजमान है। इस देवि के भट्टारक (शिव) अरिष्टनेमि है। उनके पास में देवि की स्थापना करें।

अष्टमहाप्राति हार्य्य समन्विता द्वादशगण परिवृताम् ।
अरिष्टनेमि भट्टारकस्य प्रतिमा मालिख्य तस्य पादमूले ॥
आम्रकुष्माण्डि अष्टभुजां शंख चक्र धनुः परशु तोमरः ।
खड्ग पासको द्रव्याष्टकैः देवीं चतुर्भुजां शङ्ख चक्र वरदः ॥
पाशन्य स्वरूपेण सिंहासनस्थिता शान्ति द्विभुजा स्थिता ।
पार्श्वे देवकन्या वामहस्त स्थित विमुकादिश्रमताम् ॥

आम्रकुष्माण्डी की मूर्ति बनाकर आभूषणो से संजाये दोनो तरफ एक एक पुत्र खड़ा करें। शुक्लपक्ष में पूजन प्रारंभ करें। त्रयोदशी से पूर्णिमा तक अरहंत देव का पूजन करें, १००८ जप नित्य करें। पूर्णिमा को मन्त्र द्वारा ९००० चमेली के पुष्प चढ़ावें।

॥ प्रेतकूष्माण्डा मन्त्र ॥

यह देवि प्रेत पर सवार है। भैरवी के समान है। शत्रुसंहार भी करती है तथा भरण पोषण भी करती है।

मन्त्र :- स्हौः हसौः हसखफ्रें सहखफ्रें हक्षम्लव्र्यूं प्रेतकूष्माण्डायै स्वाहा।

॥ ५. स्कन्द माता ॥

भगवान शंकर ने पार्वती को एक बार "काली" कह दिया जिससे वे रुष्ट होकर तप करने चली गई। ब्रह्मा के वरदान से गौराङ्ग होकर पुनः शिव के साथ रहने लगी एवं स्कन्द कुमार को जन्म दिया।

ये स्कन्द माता अग्निमण्डल की देवता है, स्कन्द इनकी गोद में बैठे हैं, इनकी तीन आँखें तथा चार भुजायें हैं। ये शुभ्रवर्णा है तथा पद्म के आसन पर विराजमान है। इनका वाहन सिंह ही है।

मंत्र - ॐ ह्रीं सः स्कंदमात्र्यै नमः।

॥ ध्यान एवं प्रार्थना ॥

सिंहासनगता नित्यं पद्माञ्चित करद्वया ।
शुभदास्तु सदा देवीं स्कन्दमाता यशस्विनी ॥

॥ यंत्रार्चनम् ॥

कल्पभेद से अलग अलग नवदुर्गायें हुई है। यथा -

जया, विजया, भद्रा, भद्रकाली, सुमुखी, दुर्मुखी, प्रज्ञा, व्याघ्रमुखी एवं सिंहमुखी। ये अष्टदेवियाँ इसके अष्टदल की नायिका मानी जाती है।

यन्त्र रचना - त्रिकोण, षटकोण, अष्टदल एवं भूपुर बनाकर यंत्रार्चन करें।

ॐ मं मण्डूकादि पीठ देवतायै नमः। से योग पीठ देवता का पूजन करें। फिर पीठ शक्तियों का पूजन करें।

यथा पूर्वादिक्रमेण - **ॐ बलायै नमः। ॐ ज्येष्ठायै नमः। ॐ रौद्र्यै नमः। ॐ काल्यै नमः। ॐ कलविकरण्यै नमः। ॐ बलप्रमथिन्यै नमः। ॐ सर्वभूतदमन्यै नमः। ॐ मनोन्मन्यै नमः।**

॥ श्री स्कन्दमाता यन्त्रम् ॥

बिन्दुमध्य में देवि का आवाहन करें।

प्रथमावरणम् - (त्रिकोणे) **ॐ सं सत्त्वाय नमः। ॐ रं रजसेनमः। ॐ तं तमसे नमः।**

द्वितीयावरणम् - (षट्कोणे) **ॐ हृदय शक्तये नमः। ॐ शिरशक्तये नमः। ॐ शिखाशक्तये नमः। ॐ कवच शक्तये नमः। ॐ नेत्रशक्तये नमः। ॐ अस्त्र शक्तये नमः।**

पुनः षट्कोणे षड् कृत्तिका मातृकायै नमः।

तृतीयावरणम् - (अष्टदलेकेसरेषु) **ॐ असितांग भैरवाय नमः।**

ॐ रुरु भैरवाय नमः। ॐ चण्ड भैरवाय नमः। ॐ कपाल भैरवाय नमः। ॐ क्रोध भैरवाय नमः। ॐ उन्मत्त भैरवाय नमः। ॐ भीषण भैरवाय नमः। ॐ संहार भैरवाय नमः।

चतुर्थावरणम् - (अष्टदलाग्रे) **ॐ जयायै नमः। ॐ विजयायै नमः। ॐ भद्रायै नमः। ॐ भद्रकाल्यै नमः। ॐ सुमुख्यै नमः। ॐ दुमुख्यै नमः। ॐ प्रज्ञायै नमः। ॐ व्याघ्रमुख्यै नमः।**

पंचमावरणम् - (भूपुरे चतुद्वारे) उत्तरे - **ॐ नंदिने नमः।** पूर्वे - **ॐ भृङ्गवे नमः।** दक्षिणे - **ॐ महाकालाय नमः।** पश्चिमे - **ॐ गणेशाय नमः।**

षष्ठमावरणम् - (भूपुरे) - इन्द्रादि लोकपालों व सप्तमावरण में उनके वज्रादि आयुधों का पूजन करे।

पुत्र प्राप्ति हेतु स्कन्दमाता का पूजन करें। षष्ठी तिथि इनकी प्रिय तिथी है। मंत्र जप कर दशांश हवन बिल्व फल से करें।

॥ ६. कात्यायनी ॥

कात्यायनी दशभुजा देवी ही महिषासुर मर्दिनी है। प्रथम कल्प में उग्रचण्डा रूप में, द्वितीय कल्प में १६ भुजा भद्रकाली रूप में तथा तृतीय कल्प में कात्यायनी ने दश भुजा रूप धारण करके महिषासुर का वध किया।

कात्यायनी मुनि के द्वारा स्तुति करने पर बिल्व वृक्ष के पास देवी प्रकट हुई थी। आश्विन कृष्णा १४ को भगवती प्रकट हुई थी। शुक्ला सप्तमी को देवी की तेजोमयी मूर्ति ने शोभनरूप धारण किया। अष्टमी को समलंकृत की गई तथा नवमी को उपहारों से पूजित हुई एवं उसने महिषासुर का वध किया तथा दशमी को देवी विदा हुई (इति कालिका पुराणे)।

॥ नमस्कार ध्यान ॥

चन्द्रहासोज्ज्वल करा शार्दूलवरवाहना ।
कात्यायनी शुभं दद्याद् देवि दानव घातिनी ॥

कात्यायनी गायत्री - **ॐ कात्यायनाय विद्महे कन्यकुमारी धीमहि तन्नो दुर्गः प्रचोदयात्।**

॥ कात्यायनी ध्यानम् ॥

चन्द्रहासोज्ज्वलकरा शार्दूलवरवाहना ।
कात्यायनी शुभं दद्याद् देवी दानवघातिनी ॥
देवि प्रपन्नार्तिहरे प्रसीद, प्रसीद मातर्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥

॥ कात्यायनी ऋषि कृत स्तुति ॥

(महाकाल संहितायाम्)

जगदंब जयानन्ते सर्वैकसाक्षिणि । संकटोद्धारिणि शिवे भक्तानामभयङ्करे ॥
समस्त जगताधारभूते ब्रह्मस्वरूपिणि । विधीश हरि शक्रादि देवा विदित वैभवे ॥
सृष्टि स्थिति प्रलयकृत् त्रिगुणात्मक विग्रहे । परापरेशि प्रणतमनुज-प्राणदायिनि ॥

मदुपास्यतया ख्यातनाम्नि त्रिभुवनेश्वरि । कात्यायनि जगद्वन्द्ये महाकालि नमोस्तुते ॥
मत्प्राणरक्षणकृते भीनाशय दिवौकसाम् । स्वरूपं दर्शयामुष्मै विल्ववृक्षाद् विनिःसृता ॥

॥ दशभुजा कात्यायनी ध्यानम् ॥

॥ ध्यानम् ॥

जटाजूटसमायुक्तामर्धेन्दुकृत लक्षणाम् । नेत्रत्रयसमायुक्तां पद्मेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् । नवयौवन संपन्नां सर्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत्पीनोन्नतपयोधराम् । त्रिभङ्गस्थान संस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूलं दक्षिणे दद्यात् खड्गं चक्रं क्रमादधः । तीक्ष्णं बाणं तथा शक्तिं वामतोऽपि निबोधत ॥
खेटकं पूर्णचापं च पाशमङ्कुशमूर्ध्वतः । घण्टां वा परशुं चापि वामतः सन्निवेशयेत् ॥
अधस्तान्महिषं तद्वद्वि शिरस्कं प्रदर्शयेत् । शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् ॥

॥ षोडशभुजा दुर्गा ध्यानम् ॥

महिषासुर मर्दिनी षोडशभुजा दुर्गा भद्रकाली ही है।

क्षीरोदस्योत्तरे तीरे विभ्रती विपुलां तनुम् । अतसीपुष्पवर्णाभा ज्वलत्काञ्चनकुण्डलाम् ॥
जटाजूटमखण्डेन्दुमुकुटत्रय भूषिता । नागहारेण सहिता स्वर्णहार विभूषिता ॥
शूलं खड्गं च शङ्खं च चक्रं बाणं तथैव च । शक्तिं वज्रं च दण्डं च नित्यं दक्षिणबाहुभिः ॥
विभ्रती सततं देवी विकाशिनयनोज्ज्वला । खेटकं चर्म चापं च पाशंचाङ्कुशमेव च ॥
घण्टां परशुं मुशलं विभ्रतो वामपाणिभिः । सिंहस्था नयनै रक्तवर्णैस्त्रिभिरभिज्वला ॥
शूलेन महिषं भित्त्वा तिष्ठती परमेश्वरी । वामपादेन चाक्रम्य तत्र देवी जगन्मयी ॥

॥ अष्टादशभुजा दुर्गा ध्यानम् ॥

अष्टादशभुजा दुर्गा उग्रचण्ड स्वरूपा है। कल्पभेद महिषासुरमर्दिनि का महालक्ष्मी स्वरूपा भेद भी यही है।

॥ ध्यानम् ॥

अक्षस्त्रक्परशुं गदेषुकुलिशं पद्मं धनुःकुण्डिकां दण्डं शक्तिमसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाश सुदर्शने च दधतीं हस्तैः प्रसन्नाननां सेवे सैरिभमर्दिनीमिह महालक्ष्मीं सरोजस्थिताम् ॥२॥

॥ अन्यच्च ॥

ततो ध्यायेन्महालक्ष्मीं महिषासुरमर्दिनीम् । समस्तदेवता तेजोजातां पद्मासन स्थिताम् ॥
अष्टादशभुजामक्षमालां पद्मं च शायकान् । खड्गं वज्रं गदां चक्रं दक्षहस्ते कमण्डलुम् ॥
खड्गं च दधतीं वामे शक्तिं च परशुं धनुः । चर्मदण्डौ सुरापात्रं घण्टां पाशं त्रिशूलकम् ॥

****

॥ अष्टादशभुजा ध्यानम् ॥

धम्मिल्लसंयतकचा विधोश्चाधोमुखीं कलाम् । केशान्ते तिलकस्योर्ध्वे दधती सुमनोहरा ॥
मणिकुण्डल संधृष्टगण्डा मुकुटमण्डिता । सज्ज्योतिः कर्णपूराभ्यां कर्णावापूर्य सङ्गता ॥
ससुवर्णमणिमाणिक्य नागहार विराजिता । सदासुंधिभिः पद्मैरम्लानैररति सुन्दरी ॥
मालां विभर्त्ति ग्रीवायां रत्नकेयूरधारिणी । मृणालायत वृत्तैस्तु बाहुभिः कोमलै शुभैः ॥
राजन्ती कञ्जुकोपेता पीनोन्नत पयोधरा । क्षीणमध्या पीतवस्त्रा त्रिवलोमध्यभूषिता ॥
अष्टादशभुजैका तु दक्षे मुण्डं च खेटकम् । आदर्शं तर्जनीं चाप ध्वजं डमरुकं चर्मं च ॥
पाशं वामे विभ्रती च शक्ति मुद्गर शूलकम् । वज्र खड्गाङ्कुश शरांश्चक्रं देवी शलाकया ॥
सिंहोस्योपरि तिष्ठन्ती व्याघ्रचर्मणि कौशिकी । विभ्रती रूपममतुलं ससुरासुर मोहनम् ॥

(अस्त्रों का क्रम पुरश्चर्यार्णव में अधूरा है अतः अस्त्रक्रम अग्निपुराण में से दिया है।)

वैकृति रहस्य में अस्त्रों का क्रम इस प्रकार से है। -

अक्षमाला च कमलं वाणोऽसि कुलिशं गदा । चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकः ॥
शक्तिर्दण्डश्चर्म चापं पानपात्रं कमण्डलुः । अलंकृतभुजामेभिरायुधैः कमलासनम् ॥

इसी तरह मध्यम चरित में १८ भुजा का ध्यान अलग है।

॥ अथ कात्यायनी मंत्र प्रयोग॥

अष्टाक्षर मंत्रः- ॐ ह्रीं कात्यायन्यै स्वाहा ॥१॥ ह्रीं श्रीं कात्यायन्यै स्वाहा ॥२॥

दशाक्षर मंत्रः- ऐं ह्रीं श्रीं चौं चण्डिकायै नमः।

विवाह हेतु मंत्रः- ॐ कात्यायनि महामाये महोयोगिन्यधीश्वरि। नन्दगोपसुते देवि पतिं मे कुरु ते नमः।।

मंत्रो यथा -'ॐ ह्रीं कात्यायनि स्वाहा' इत्यष्टाक्षरो मंत्रः।

विनियोग :- अस्य कात्यायनीमंत्रस्य कपिलो मुनिः। गायत्रीच्छंदः। चंडिका कात्यायनी देवता। ह्रीं श्रीं बीजम्। स्वाहा शक्तिः। मम सर्वेष्टसिद्ध्यर्थे जपे विनियोगः।

ऋष्यादिन्यास :- ॐ कपिलमुनये नमः शिरसि ॥१॥ गायत्रीच्छंदसे नमः मुखे ॥२॥ चण्डिकाकात्यायनी देवतायै नमः हृदि ॥३॥ ह्रीं श्रीं बीजाय नमः गुह्ये ॥४॥ स्वाहाशक्तये नमः पादयोः ॥५॥ विनियोगाय नमः सर्वाङ्गे ॥६॥ इति ऋष्यादिन्यासः।

करन्यास :- ॐ ह्रीं श्रीं अंगुष्ठाभ्यां नमः ॥१॥ ॐ ह्रीं श्रीं तर्जनीभ्यां नमः ॥२॥ ॐ ह्रीं श्रीं मध्यमाभ्यां नमः ॥३॥ ॐ ह्रीं श्रीं अनामिकाभ्यां नमः ॥४॥ ॐ ह्रीं श्रीं कनिष्ठिकाभ्यां नमः ॥५॥ ॐ ह्रीं श्रीं करतलकरपृष्ठाभ्यां नमः ॥६॥ इति करन्यासः। एवमेव हृदयादि षडंगन्यासं कुर्यात्। एवं न्यासं कृत्वा ध्यायेत्।

॥ ध्यानम् ॥

**ॐ सव्यपादसरोजेनालंकृतोरु मृगाधिपाम् । वामपादाग्रदलित महिषासुरनिर्भराम् ॥१॥
सुप्रसन्नां सुवदनां चारुनेत्रत्रयान्विताम् । हार नूपुर केयूर जटामुकुटमंडिताम् ॥२॥
विचित्रपट्टवसनामर्द्धचन्द्रविभूषिताम् । खड्ग खेटकवज्राणि शूलं च विशिखं तथा ॥३॥
धारयंतीं धनुः पाशं शंखघंटे सरोरुहम् । बाहुभिर्ललितैर्देवि कोटिचन्द्रसमप्रभाम् ॥४॥
समाहृतैर्दिविषदैर्वैः- राकाशसंस्थितैः । स्तूयमानां मोदमानैर्लोकपालादिभिः सदा ॥५॥**

इति ध्यायेत्। ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य '**ॐ मं मंडूकादिपरतत्त्वांत पीठदेवताभ्यो नमः**' इति पीठदेवताः संपूज्य नव पीठशक्तिः पूजयेत्।

तद्यथा-पूर्वादिक्रमेण- **ॐ प्रभायै नमः ॥१॥ ॐ मायायै नमः। ॐ जयायै नमः ॥३॥ ॐ सूक्ष्मायै नमः ॥४॥ ॐ विशुद्धायै नमः ॥५॥ ॐ नंदिन्यै नमः ॥६॥ ॐ सुप्रभायै नमः ॥७॥ ॐ विजयायै नमः ॥८॥** मध्ये। **ॐ सर्वसिद्धिदायै नमः ॥९॥**

इति नव पीठशक्तीः संपूज्य ततस्ताम्रादिपात्रे रक्तचन्दनेन यंत्रं विलिख्य '**ॐ आधारशक्तिकात्यायन्यै नमः**' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा मूलेन मूर्ति प्रकल्प्यावाहनादि पुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात्।

॥ यंत्रार्चनम् ॥

तत्र क्रमः- षट्कोणकेसरेषु- अग्निकोणे - **ह्रीं श्रीं हृदयाय नमः ॥१॥** निर्ऋति - **ह्रीं श्रीं शिरसे स्वाहा ॥२॥** वायु०- **ह्रीं श्रीं शिखायै वषट् ॥३॥** ईशानकोणे- **ह्रीं श्रीं कवचाय हुं ॥४॥** देवीपूजकयोर्मध्ये - **ह्रीं श्रीं नेत्रत्रयाय वौषट् ॥५॥** देवी पश्चिमे - **ह्रीं श्रीं अस्त्राय फट् ॥६॥** इति षडंगानि पूजयेत्।

अष्टदले - अष्टशक्तिं पूजयेत्-

**उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपा च चण्डिका ॥
अभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।**

कालिका पुराण में चामुण्डा सहित आदि नवदुर्गा माना है।

अतः पूर्वादि क्रमेण - **ॐ उग्रचण्डायै नमः ।ॐ प्रचण्डायै नमः। ॐ चण्डोग्रायै नमः। ॐ चण्डनायिकायै नमः। ॐ चण्डायै नमः। ॐ चण्डवत्यै नमः। ॐ चण्डरूपायै नमः। ॐ चण्डिकायै नमः।**

परन्तु कालिका पुराण में लिखा है कि यदि उग्रचण्डा तंत्र से देवी की पूजा की जाती है तो अष्टदल की नायिकाओं पूजन इस तरह करे -

ॐ कौशिके नमः। ॐ शिवदूत्यै नमः। ॐ उमायै नमः ।ॐ हेमवत्यै नमः। ॐ ईश्वर्यै नमः। ॐ शाकम्भर्यै नमः। ॐ दुर्गायै नमः। ॐ महोदर्यै नमः।

ततो भूपुराभ्यंतरे पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य प्राच्यादिचतुर्दिक्षु वामावर्तेन च **ॐ डाकिन्यै नमः ॥१॥ ॐ योगिन्यै नमः ॥२॥ ॐ खेचर्यै नमः ॥३॥ ॐ शाकिन्यै नमः ॥४॥** इति पूजयेत्।

भूपुराद्वाहिः इन्द्रादिदशदिग्पालान् वज्राद्यायुधानि च पूजयेत्। इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात्। अस्य पुरश्चरणं लक्षजपः। तत्तद्दशांशेन होमतर्पणमार्जन ब्राह्मणभोजनानि कुर्यात्। एवं कृते मंत्रः सिद्धो भवति। सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्। तथा च लक्षमेकं जपेन्मंत्रं दशांशं जुहुयात्ततः। मंत्रोऽयं चिंतितो देवि सभायां पुरतो यदि ॥१॥ कोटिसूर्यप्रतीकाशो दृश्यते वादिभिस्तथा। पलायंते महादेवि साध्वसेन क्षणात्ततः ॥२॥ कार्तिकस्य सिते पक्षे नवम्यामारभेज्जपम्। सहस्त्रं प्रत्यहं कृत्वा संप्राप्य नवमीं सिताम् ॥३॥ विजयं खड्गमादाय पूजयित्वा यथाविधि। अर्द्धरात्रे बलिं दत्वा प्रातर्यात्रां समाचरेत् ॥४॥ रणभूमिं समासाद्य सहस्त्रं प्रजपेन्मनुम्। तं दृट्वा पुरुषं देवि हृत्क्षोभो जायते रिपोः ॥५॥

॥ श्री कात्यायनी यन्त्रम् ॥

सदूतं यममायांतं मन्यमाना नराधिपाः। पलायंते महादेवि नात्र कार्या विचारणा ॥६॥ शुक्लांबरधरो मौनी ब्रह्मचारिव्रते स्थितः। शुक्लवर्णां महादेवीं ध्यात्वा शुक्लविभूषणाम् ॥७॥ सहस्त्रं मासमेकं तु जपोन्नित्यं यथाविधि। मालतीबकुलैः कुंदैर्मंत्री मधुरसंप्लुतैः ॥८॥ सहस्त्रत्रितयं हुत्वा वागीशो जायतेऽचिरात्। हेलया कवितां देवि विशदां कुरुते द्रुतम् ॥९॥ जपं या कुरुते नित्यं शतशो वत्सरावधि। वंध्यापि लभते पुत्रं कार्त्तिकेयमिवापरम् ॥१०॥ दुर्भगा च भवेत्पत्युः सुभगाऽतिमनोरमा। रूपं विचिंत्य पूर्वोक्तं लक्षं जप्त्वायुतं ततः। नीलोत्पलैः सरोजैर्वा हुत्वा वैश्रवणायते ॥११॥

॥ अन्यच्च ध्यानम् ॥

व्याघ्रचर्मपरीधानां मुंडमालाविभूषिताम्। रक्तवर्तुलभीमाक्षीं जिह्वया लीलयासुरान् ॥१२॥ चर्वयंतीं महाकालीं कालरात्रिमिवापराम्। क्षोभयतीं जगत्सर्वं ससुरासुरपर्वतम् ॥१३॥

एवं ध्यात्वा जपेद्देवि श्मशाने वा चतुष्पथे। सप्ताहं विशसं कृत्वा व्रतस्थः स्थिरमानसः ॥१४॥ जपेद्यो नियतं देवि स रिपून्नाशयेद्ध्रुवम्। अनेनैव विधानेन बलिं दद्याच्चतुष्पथे ॥१४॥ दग्धं मत्स्यं च सक्त्वन्नं पिंडं कृत्वा समाहितः। आममांसं हरिद्राक्तं यं विचिंत्य प्रदापयेत् ॥१५॥ सप्ताहाल्लभते शत्रुर्यमसद्म न संशयः। हरिर्वा शंकरो वापि न शक्तो रक्षितुं क्वचित् ॥१६॥

बलिमंत्रो यथा- ''ह्लीं ह्लीं चौं चौं कालिके खादय खादय वशीकुरु वशीकुरु शत्रुं मारय मारय स्वाहा''।

इति मंत्रः। अंगारकदिने चैव निंदितासु तिथिष्वपि। पूजितं खड्गमादाय निशीथे बलिमाहरेत् ॥१७॥ प्रहारशोणितं चास्य दद्याद्देव्यै यथाविधि। अच्छेद्याभेदकायः स्याद्रिपूणां नात्र संशयः ॥१८॥

॥ इति कात्यायनीमहाकल्पः ॥

॥ पाण्डवाः कृत कात्यायनी स्तुति ॥

॥ पाण्डवा ऊचुः ॥

कात्यायनि त्रिदशवन्दितपादपद्मे, विश्वोद्भवस्थितिलयैकनिदानरूपे ।

देवि प्रचण्डदलिनि त्रिपुरारिपत्नि, दुर्गे प्रसीद जगतां परमार्तिहन्त्रि ॥
त्वं दुष्टदैत्यविनिपातकरी सदैव, दुष्टप्रमोहनकरी किल दुःखहन्त्री ।
त्वां यो भजेदिह जगन्मयि तं कदापि, नो बाधते भवसु दुःखमचिन्त्यरूपे ॥
त्वामेव विश्वजननीं प्रणिपत्य विश्वं, ब्रह्मा सृजत्यवति विष्णुरहोत्ति शम्भुः ।
काले च तान्सृजसि पासि विहंसि मात स्त्वल्लीलयैव नहि तेऽस्ति जनैर्विनाशः ॥
त्वं यैः स्मृता समरमूर्धनि दुःखहन्त्रि तेषां तनून्नहि विशन्ति विपक्षबाणाः ।
तेषां शरास्तु परगात्रनिमग्नपुङ्खाः प्राणान्ग्रसन्ति दनुजेन्द्रनिपातकर्त्रि ॥
यस्त्वन्मनुं जपति घोररणे सुदुर्गे, पश्यन्ति कालसदृशं किल तं विपक्षाः ।
त्वं यस्य वै जयकरी खलु तस्य वक्त्राद् ब्रह्माक्षरात्मकमनुस्तव निःसरेच्च ॥।
त्वामाश्रयन्ति परमेश्वरि ये भयेषु तेषां भयं नहि भवेदिह वा परत्र ।
तेभ्यो भयादिह सुदूरत एव दुष्टास्त्रस्ताः पलायनपराश्च दिशो द्रवन्ति ॥
पूर्वे सुरासुररणे सुरनायकस्त्वां, सम्प्रार्थयन्नसुरवृन्दमुपाजघान ।
रामोऽपि राक्षसकुलं निजघान तद्वत्त्वत्सेवनादृत इहास्ति जयो न चैव ॥
तत्त्वां भजामि जयदां जगदेकवन्द्यां विश्वाश्रयां हरिविरिञ्चिसुसेव्यपादाम् ।
त्वं नो विधेहि विजयं त्वदनुग्रहेण शत्रून्निपात्य समरे विजयं लभामः ॥

॥ श्रीराम कृत कात्यायनी स्तुति ॥

॥ श्रीराम उवाच ॥

नमस्ते त्रिजगद्वन्द्ये संग्रामे जयदायिनि । प्रसीद विजयं देहि कात्यायनि नमोऽस्तु ते ॥१॥
सर्वशक्तिमये दुष्टरिपुनिग्रहकारिणि । दुष्टजृम्भिणि संग्रामे जयं देहि नमोऽस्तु ते ॥२॥
त्वमेका परमा शक्तिः सर्वभूतेष्ववस्थिता । दुष्टं संहर संग्रामे जयं देहि नमोऽस्तु ते ॥३॥
रणप्रिये रक्तभक्षे मांसभक्षणकारिणि । प्रपन्नार्तिहरे युद्धे जयं देहि नमोऽस्तु ते ॥ ४॥
खट्वाङ्गासिकरे मुण्डमालाद्योतितविग्रहे । ये त्वां स्मरन्ति दुर्गेषु तेषां दुःखहरा भव ॥५॥
त्वत्पादपङ्कजाद्दैन्यं नमस्ते शरणप्रिये । विनाशय रणे शत्रून् जयं देहि नमोऽस्तु ते ॥६॥
अचिन्त्यविक्रमेऽचिन्त्यरूपसौन्दर्यशालिनि । अचिन्त्यचरितेऽचिन्त्ये जयं देहि नमोऽस्तु ते ॥७॥
ये त्वां स्मरन्ति दुर्गेषु देवीं दुर्गविनाशिनीम् । नावसीदन्ति दुर्गेषु जयं देहि नमोऽस्तु ते ॥८॥
महिषासृक्प्रिये संख्ये महिषासुरमर्दिनि । शरण्ये गिरिकन्ये मे जयं देहि नमोऽस्तु ते ॥९॥
प्रसन्नवदने चण्डिचण्डासुरविमर्दिनि । संग्रामे विजयं देहि शत्रुञ्जहि नमोऽस्तु ते ॥१०॥

रक्ताक्षि रक्तदशने रक्तचर्चितगात्रके । रक्तबीजनिहन्त्री त्वं जयं देहि नमोऽस्तु ते ॥११

निशुम्भशुम्भसंहन्त्रि विश्वकर्त्रि सुरेश्वरि । जहिशत्रून् रणे नित्यं जयं देहि नमोऽस्तु ते ॥१२॥

भवान्येतज्जगत्सर्वं त्वं पालयसि सर्वदा । रक्ष विश्वमिदं मातर्हत्वैतान् दुष्टराक्षसान् ॥१३॥

त्वं हि सर्वगता शक्तिर्दुष्टमर्दनकारिणि । प्रसीद जगतां मातर्जयं देहि नमोऽस्तु ते ॥१४॥

दुर्वृत्तवृन्ददमनि सद्वृत्तपरिपालिनि । निपातय रणे शत्रुञ्जयं देहि नमोऽस्तु ते ॥१५॥

कात्यायनि जगन्मातः प्रपन्नार्तिहरे शिवे । संग्रामे विजयं देहि भयेभ्यः पाहि सर्वदा ॥१६॥

॥ श्रीमहादेव उवाच॥

एवं संस्तुवतस्तस्य श्रीरामस्य महात्मनः । बभूवाकाशतो वाक्यं सहसा मुनिसत्तम ॥१७॥

मा भैस्त्वं रघुशार्दूल महाबलपराक्रमान् । विजेष्यस्यचिरेणैव लङ्कां हत्वा निशाचरान् ॥१८॥

अहं सम्पूजिता बिल्वे ब्रह्मणा लोककर्तृणा । दास्यामि त्वां मनोऽभीष्टं वरं शत्रुनिबर्हण ॥१९॥

इति श्रुत्वा रघुश्रेष्ठो वाक्यमाकाशसम्भवम् । असंशयं मुनिश्रेष्ठ मेने विजयमात्मनः ॥२०॥

एवं चिन्तयतः काले समरे भीमविक्रमः । आयातः कुम्भकर्णो वै राक्षसैः परिवेष्टितः ॥२१॥

तस्य नादेन घोरेण सशैलवनकाननम् । चकम्पे धरणिः क्षुब्धो बभूव सरितां पतिः ॥२२॥

रथाश्वकुञ्जराणां च सुघोरैरपि बृंहितैः । चकम्पे वसुधा वीरबलात्कारेण वायुना ॥२३

चुक्षुभुर्वानराः सर्वे भीता दिक्षु विदिक्षु च । दृष्ट्वा तमतिदुर्धर्षमुद्यतास्त्रं महाबलम् ॥२४॥

अथ रामस्तमायान्तं समालोक्य भयप्रदम्। देवीं प्रणम्य कोदण्डं वामेनादाय पाणिना ॥२५॥

सोऽपि पादावघातेन करघातेन वानरान् । विमर्द्य भक्षयंश्चान्यानाससाद रघुत्तमम् ॥२६॥

स सम्प्रेक्ष्य रघुश्रेष्ठं श्यामं दूर्वादलप्रभम् । उद्यतास्त्रं महाबाहुं रक्षसामन्तकारिणम् ॥२७॥

सानुजं समरेऽक्षोभं नीलोत्पलदलेक्षणम् । ननाद बलवान् घोरो युगान्तजलदो यथा ॥२८॥

राघवोऽपि महानादं ब्रह्माण्डक्षोभकारकम् । चक्रे मुदा मुनिश्रेष्ठ ततो युद्धमवर्तत ॥२९॥

ब्रह्मास्त्रजालैः संक्षिप्तैः परस्परजिगीषया । तयोरासीन्महायुद्धं सुरासुरदुरासदम् ॥३०॥

सैन्यैश्च राक्षसश्रेष्ठैर्वानराणां महात्मनाम् । आसीत्सुतुमुलं युद्धं संग्रामे जयमिच्छताम् ॥३१॥

॥ इति श्रीमहाभागवते देवीपुराणे श्रीमहादेवनारद संवादे श्रीरामकुम्भकर्णयोर्युद्धवर्णनम्॥

॥ ७. कालरात्रि ॥

॥ कालरात्रि प्रयोग विधानम्॥

कालरात्रि का प्रयोग अचूक हैं। यह संहार व सम्मोहन दोनों की अधिष्ठात्री हैं। ब्रह्मा, विष्णु, महेश इन्हीं के प्रभाव से योगनिद्रा में रहते हुये आराधना व तपस्या में लीन रहते हैं। मेरा यह अनुभव हैं कि जब शत्रु बाधा, प्रेतादिकबाधा

प्रबल हो बगला, प्रत्यंगिरा, शरभराजादि के प्रयोग शिथिल हो रहे हो तो इस विद्या का प्रयोग साथ में करना चाहिये जैसे विष्णु के द्वारा ५००० वर्षो तक युद्ध करने पर भी मधुकैटम को नहीं मार सके तो **इन्ही कालरात्रि** ने उनका संमोहन किया तब ही वे राक्षस मारे गये। यह विद्या तीव्र संमोहन से शत्रु को शिथिल व निष्प्राण भी कर सकती हैं। कालरात्रि के २-३ तरह के ध्यान है। एक ध्यान जो सर्व विदित हैं वे खरारूढ है, भीषण आकृति हैं ऊपर के दांये हाथ में खड्ग हैं व बाँये हाथ में मशाल है जिससे वे भक्तों का मार्ग प्रदर्शन कर अंधकार को दूर करती हैं शत्रुबाधा व विघ्नों को जलाकर नष्ट कर देती हैं। नीचे के हाथों में वर अभय मुद्रा है। कहीं एक तरफ खट्वांग व दण्ड धारण किये हुये है दूसरी तरफ के हाथों में वर अभय मुद्रा है।

मंत्र :- ॐ ऐं ह्रीं क्लीं श्रीं कालरात्रि सर्वं वश्यं कुरु कुरु वीर्यं देहि देहि गणेश्वर्यै नमः। (देवी रह.)

उत्कीलन - ऐं ह्रीं क्लीं कालरात्र्यै नमः।

ब्रह्मास्त्र शमन मंत्र - ग्लौं हूं ऐं ह्रीं श्रीं एहि एहि कालरात्रि आवेशय आवेशय प्रस्फुर प्रफुर सर्वजन संमोहय संमोहय हुं फट् स्वाहा।

॥ ध्यानम् ॥

एक वेणी जपाकर्णपूरा नग्न खरास्थिता, लंबोष्ठी कार्णिकाकर्णी तैलाभ्यक्त शरीरिणी।
वामपादोल्लसल्लोह लताकण्टकभूषणा, वर्धन् मूर्धध्वजा कृष्णा कालरात्रिर्भयङ्करी ॥

कालरात्रि महाकाली व महाषोडशी की समयाविद्या है अर्थात् इनके साथ समयाधार पर कालरात्रि की भी पूजा की जानी चाहिये। "मंत्र कोष" में दोनों विद्याओं के अलग अलग ध्यान हैं मूल मंत्र में सामान्य भेद हैं।

कालीक्रमे मंत्रः- ॐ ऐं ह्रीं क्लीं श्रीं कान्हेश्वरि सर्वजनमनोहरि सर्वमुखस्तंभनि सर्वराजवशङ्करि, सर्वदुष्टनिर्दलनि सर्वस्त्रीपुरुषाकर्षिणि : बन्दीश्रृखलाँस्त्रोटय -त्रोटय सर्वशत्रून् भञ्जय- २ द्वेष्टन् निर्दलय- २ सर्वं स्तंभय २ मोहनास्त्रेण द्वेषिण उच्चाटय- २ सर्वंवशं कुरु कुरु स्वाहा देहि देहि सर्वं कालरात्रि! कामिनि! गणेश्वरि नमः। (मंत्र महार्णव में मनोहरे लिखा हैं, तथा सर्वमुखस्तंभिनि, लिखा हैं, मंत्रमहोदधि में देहि देहि सर्वकालरात्रि लिखा हैं।) मंत्रमहोदधि में द्वेष्टन की जगह "**द्वेषिणः उच्चाटय- २ सर्ववशं कुरु कुरु स्वाहा देहि देहि सर्वकालरात्रि कामिनि गणेश्वरि नमः**" लिखा हैं। इस मंत्र का प्रयोग आगे दिया गया है।

षोड़शीक्रमोक्त मंत्रः- ऐं ह्रीं क्लीं श्रीं कालेश्वरि सर्वजनमनोहारि सर्वमुखस्तंभिनि सर्वराजवशङ्करि सर्वदुष्टनिर्दलनि सर्वस्त्रीपुरुषाकर्षणि बन्दिश्रृङ्खलास्त्रोटय त्रोटय सर्वशत्रूञ्झम्भय जम्भय द्वेषं निर्दलय२ सर्वं स्तंभय२ उच्चाटय २ सर्ववश्यं कुरु कुरु सर्वकालरात्रि कामिनि गणेश्वरि हुं फट् स्वाहा।

विनियोगः- अस्य श्री कालरात्रि महाविद्यामंत्रस्य भैरव ऋषि, अनुष्टुप् छन्दः, श्रीकालरात्रि देवता, ह्रीं बीजं स्वाहा शक्तिं, हुं कीलकं, आत्मनोऽभीष्ट सिद्ध्यर्थे जपे विनियोगः। ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः से षडङ्गन्यास करे।

आरक्त भानुसदृशीं यौवनोन्मत्त विग्रहां चतुर्भुजां त्रिनयनां भीषणां चन्द्रशेखराम्।
प्रेतासनसमासीनं भजतां सर्वकामदां दक्षिणे चाऽभयं पाशं वामे भुवनमेव च ॥

रक्तदण्डधरां कालरात्रिं विचिन्तयेत्॥

शापोद्धार - ॐ ऐं ह्रां कालरात्रि शिवस्य शाप विमोचय

उत्कीलन – ॐ ॐ ॐ मा मा मा।

संजीवन – हूं गणेश्वरी कालरात्रि श्रीं।

॥ अथ कालरात्रि मंत्र प्रयोगः॥

कालरात्रि प्रयोग पूर्व पुस्तक नवदुर्गा दशमहाविद्या रहस्य में दुर्गातन्त्र में दिया जा चुका है। पुनः कुछ विशेष इस प्रकार श्रीविद्यार्णव तन्त्र में है।

मन्त्राः –

(१.) ॐ ऐं ह्रीं श्रीं क्लीं काह्लेश्वरि सर्वजनमनोहारि सर्वमुख स्तंभिनि सर्वराजवशंकरि सर्वस्त्रीपुरुषाकर्षिणि बन्दीश्रृंखलास्त्रोटय त्रोटय सर्वशत्रून् भंजय भंजय द्विषिणो दलय दलय सर्वं स्तंभय स्तंभय सर्वं स्तंभय स्तंभय मोहनास्त्रेण द्वेषिण उच्चाटयोच्चाटय सर्वं वशं कुरु कुरु स्वाहा देहि देहि सर्वं कालरात्रि कामिनि गणेश्वरि नमः।

विनियोग – अस्य मन्त्रस्य दक्ष ऋषिः, जगतीछन्दः, अलर्कनिवासिनी कालरात्रि देवता, क्रीं बीजं **मायाराज्ञाशक्तिः, ममाभीष्ट सिद्धये जपे विनियोगः।**

(२.) ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः जगत्त्रयविमोहिनि भुवनव्यापिनि दण्डधारिणि दुर्गा दुर्गतिहन्त्री नानासिद्धि विधायिनि सर्वं वशं कुरु कुरु स्वाहा।

षडङ्गन्यास – ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से षडङ्गन्यास करे।

॥ ध्यानम् ॥

आरक्तभानु सदृशीं कामिनीं मदनातुराम् । चतुर्भुजां त्रिनयनां कवरीमुक्त केशिकाम् ॥
मोहनं दक्षिणे हस्ते वरदं च तथोपरि । भुवनं वामहस्ते च अधोर्दण्डं सुशोभितम् ॥
चूडाकलापिकाशोभां मातृका परिवेष्टिताम् । कृष्णाम्बरधरां देवीं कृष्णकञ्चुकभूषिताम् ॥
कर्णताटङ्क संयुक्तां नानारक्त सुमौक्तिकाम् । विचित्र चाम्पेयपुष्पैः वणिनद्धां सुकुन्तलाम् ॥
सुनासामौक्तिकां चारु ताम्बूलापूरिताननाम् । ग्रैवेयहारपदक स्तनाभरण भूषिताम् ॥
ऋषिभिः सिद्धगंधर्वः स्तूयमानां मदालसाम् । कन्याकागण संसेव्या मायाराज्ञीं गणेश्वरीम् ॥

यन्त्रोद्धार – बिन्दु, त्रिकोण, षट्कोण उसके बाद दो वृत्त, अष्टदल पुनः दो वृत्त पश्चात् षोडशदलयुक्त भूपुर बनाये।

॥ काम्य प्रयोग ॥

ऐन्द्री सहस्त्रदृक सौम्या हेमाभा गजसंस्थिता ।
वरदा सूत्रिणी वज्रं विभ्रत्यर्ध्वं तु दक्षिणे ।
वामे तु कलशं पात्रं त्वभयं तदधः करे ॥

प्रणाम मन्त्र – इन्द्राणी गज कुम्भस्थां सहस्त्र नयनोज्ज्वलाम् ।
नमामि वरदां देवीं सर्वदेव नमस्कृताम् ॥

मन्त्र – इं इन्द्राण्यै नम:।

॥ इन्द्राणी मंत्रा: ॥

१. ॐ ह्रीं श्रीं हूं इन्द्राणि ह्रीं ह्रीं हं हं क्षौं क्षौं फट् फट् स्वाहा। (महा. सं.)

॥ ध्यानम् ॥

कैलासाचलसंकाश तुङ्गैरावतसंस्थिता । नीलोत्पलदलश्यामा कवचावृत विग्रहा ॥१॥
रक्ताम्बर परीधाना पीवरा खर्वविग्रहा । अनर्घ्यरत्नघटित चलच्छ्रवण कुण्डला ॥२॥
सर्वाङ्ग व्याप्त शोणाब्ज सहस्त्र नयनोज्ज्वला । चतुर्भुजा महापीनोत्तुङ्ग वक्षोजमण्डिता ॥३॥
बाहुभ्यां दक्षवामाभ्यां स्थिताभ्यामुपरि क्रमात् । कुलिशं खेटकं चापि बिभ्रती समरोत्सुका ॥४॥
वामेनास्फालयन्ती च गण्डं करिषतेर्महत् । दक्षेण बाहुना कुंभं दधती ददती शृणिम् ॥५॥
चतुर्दन्तो मदोन्मत्तस्तुषाराचल सन्निभः । ऐरावतोऽपि ध्यातव्यो यमिन्द्राणी समाश्रिता ॥६॥

२. इं इन्द्राणी नमः। (पुरुश्चार्याणवे)

विनियोग – **ॐ अस्य श्री इन्द्राणी मन्त्रस्य गुरु ऋषिः, गायत्री छन्दः, इन्द्रवल्लभा देवता, इं बीजं, इन्द्राणी शक्तिः, नमः कीलकम्, पुरुषार्थ चतुष्टय प्राप्त्यर्थे जपे विनियोगः।**

॥ ध्यानम् ॥

वज्रपाश वराभीति हस्ता श्यामाम्बरावृता ।
चतुर्दन्तगजाकल्पच्छाया संस्था हिरण्यप्रभा ॥

॥ यन्त्रार्चन ॥

यन्त्र रचना – यन्त्रार्चन मेरुतन्त्रोक्त है परन्तु हमने अष्टदल में अग्निपुराणोक्त ऐन्द्री कुल की ८ कन्याओं का पूजन भी दिया है।

त्रिकोणे – मध्य में देवी का आवाहन करें। तीनों कोणों – **सं सत्त्वाय नमः, रं रजसे नमः, तं तमसे नमः।** से पूजन करें।

षट्कोण में – इं हृदयाय नमः। इं शिरसे स्वाहा। न्द्रां शिखायै वषट्। ण्यैं कवचाय हुम्। नं नेत्रत्रयाय वौषट्। मं: अस्त्राय फट्।

अष्टदले – (पूर्वादिक्रमेण) बगलायै नमः, छिन्नमस्तायै नमः, तारायै नमः, दक्षिणकालिकायै नमः, धूमावत्यै नमः, भद्रकाल्यै नमः, महाकाल्यै नमः, प्रतिक्रियायै नमः।

अष्टदलकर्णिका में – अग्निपुराणोक्त इद्राणी कुल की **अष्ट कन्याओं** का पूजन करें। यथा नाम –

॥ श्री इन्द्राणी यन्त्रम् ॥

चम्पा, चम्पावती, प्रचम्पा, ज्वलितानना, पिशाची, पिचुवक्त्रा, लोलुपा, विश्वयोन्या।

पश्चात् अष्टभैरव – **असिताङ्ग भैरव, रुरुभैरव, चण्डभैरव, क्रोधभैरव, कपालभैरव, उन्मत्तभैरव, भीषणभैरव, संहारभैरव** का पूजन करें।

भूपुरे – इन्द्रादि लोकपालों व उनके आयुधों का पूजन करें।

॥ इन्द्राक्षी मन्त्र प्रयोगः॥

(देवी रहस्ये)

मन्त्र – (१) ॐ श्रीं ह्रीं ऐं सौः क्लीं इन्द्राक्षि वज्रहस्ते फट् स्वाहा।

(२) ॐ क्रीं क्रीं हूं हूं म्लौं ह्रीं श्रीं ऐं इन्द्राक्षी वज्रहस्ते ऐं श्रीं ह्रीं म्लौं हूं हूं क्रीं क्रीं ॐ फट्।

उत्कीलनम् – क्लीं सौः स्वाहा।

संजीवन – ॐ ग्लौं इन्द्राक्ष्यै स्वाहा।

शापोद्धार – ॐ ऐं क्लीं इन्द्राक्षी ब्रह्मशाप मोचय मोचय स्वाहा।

अष्टविंशाक्षर मंत्र - **ॐ क्रीं क्रीं हूं हूं म्लौं ह्रीं श्रीं ऐं इन्द्राक्षि वज्र हस्ते श्रीं ह्रीं म्लौं हूं हूं क्रीं क्रीं ॐ ऐं फट् स्वाहा**॥ (देवी रहस्ये- रुद्रयामले)

॥ ध्यानम् ॥

मालास्यङ्कुश पद्मयुग्मकधरां चक्षुः सहस्राङ्कितां, मत्तैरावण पृष्ठगां शशिमुखिं त्रैलोक्य रक्षापराम् ।
दोर्भिर्गातरतां स्फुटांम्बुजनिभां ब्रह्मादिदेवैः स्तुतामिन्द्राक्षिं जनमातरं हृदि भजे कारण्यरूपां पराम् ॥

॥ इन्द्राक्षी यंत्रार्चनम् ॥

यन्त्र रचना - बिन्दु, त्रिकोण, षट्कोण के ऊपर छः दल पुनः छः दल फिर अष्टदल के बाद भूपुर बनायें।

देवी रहस्य में उक्त यन्त्र के अनुसार अर्चन नहीं दिया गया है अत: निम्न विधानानुसार अर्चन करें।

त्रिकोण, षट्कोण, अष्टदल तथा भूपुर का निर्माण करें।

बिन्दु मध्य में - **देवी का ध्यान** करें।

त्रिकोण में - **सत, रज, तम** का पूजन करें।

षट्कोण में - **हृदयादि शक्तियों** का पूजन करें।

अष्टदल में - **ब्राह्मयादि अष्टमातृकाओं** का पूजन करें ।

भूपुर पें - **इन्द्रादि लोकपालों** व उनके **आयुधों** का पूजन करें।

॥ १. इन्द्राक्षी स्तोत्रम् ॥

॥ ध्यानम् ॥

मालास्याङ्कुश पद्मयुग्मकधरां चक्षु सहस्राङ्कितां, मत्तैरावणपृष्ठगां शशिमुखीं त्रैलोक्य रक्षापराम् ।
दोर्भिर्गानरतां स्फुटांबुजनिभां ब्रह्मादिदैवै स्तुता, मिन्द्राक्षीं जनमातरं हृदि भजे कारण्यरूपां पराम् ॥१॥
इन्द्राक्षीं द्विभुजां देवी पीतवस्त्रसमन्विताम् । वामहस्ते वज्रधरां दक्षिणे च वरप्रदाम् ॥
इन्द्राक्षीं नाम सज्योतिर्नाना रत्नविभूषिताम् । प्रसन्नवदनांभोजामप्सरोगण सेविताम् ॥

॥ इन्द्र उवाच ॥

इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता । गौरी शाकंभरी देवी दुर्गानाम्नाऽति विश्रुता ॥१॥
कात्यायनी महादेवी चन्द्रघण्टा महातपा । गायत्री सा च सावित्री ब्रह्माणी ब्रह्मवादिनी ॥२॥
नारायणी भद्रकाली रुद्राणी कृष्णपिंगला । अग्निज्वाला रौद्रमुखी कालरात्रिस्तपस्विनी ॥३॥
मेघश्यामा सहस्राक्षी विष्णुमाया जलोदरी । महोदरी मुक्तकेशी घोररूपा महाबला ॥४॥
अच्युता भद्रदा नंदा रोगहन्त्री शिवप्रिया । शिवदूती कराली च प्रत्यक्ष परमेश्वरी ॥५॥
महिषासुरहंत्री च चामुण्डा सप्तमातरः । इन्द्राणी चेन्द्ररूपा च रुद्रशक्तिः परायणा ।
शिवा च शिवरूपा च शिवशक्ति परायणा । सदा संमोहिनी देवी सुन्दरी भुवनेश्वरी ॥७॥

आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा । वाराही नारसिंही च भीमा भैरवनादिनी ॥८॥
श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती । अनंता विजया पूर्णा मानस्तोकापराजिता ॥९॥
भवानी पार्वती दुर्गा हैमवत्यंबिका शिवा । शिवा भवानी रुद्राणी शंकरार्द्धशरीरिणी ॥१०॥
मृत्युंजया महामाया सर्वरोग प्रणाशिनी । ऐरावतगजारूढा भूषिता कंकणप्रभा ॥११॥
एतैर्नामपदैर्दिव्यैः स्तुता शक्रेण धीमता । शतमावर्ततें यस्तु मुच्यते व्याधिबंधनात् ॥१२॥
आवर्तयेत्सहस्त्रं यो लभते वांछितं फलम् । इन्द्रेण कथितं स्तोत्रं सत्यमेव न संशयः ॥१३॥

॥ २. इन्द्राक्षी स्तोत्रम् ॥

विनियोग – अस्य श्री इन्द्राक्षीस्तोत्रस्य शचीपुरन्दर ऋषिः, अनुष्टुप् छन्दः, श्रीइन्द्राक्षी दुर्गा देवता, महालक्ष्मीः बीजं, भुवनेश्वरी शक्तिः, भवानी कीलकं ममाभीष्ट सिद्ध्यर्थे जपे विनियोगः।

षडङ्गन्यास :- हृदय, शिर, शिखा, कवच, नेत्र, अस्त्रादि अंगों में क्रमशः न्यास करे -

इन्द्राक्ष्यै नमः। महालक्ष्म्यै नमः। माहेश्वर्यै नमः। अम्बुजाक्ष्यै नमः। कात्यायन्यै नमः। कौमार्यै नमः।

॥ ध्यानम् ॥

नेत्राणां दशभिः शतैः परिवृतां अत्युग्र चर्माम्बराम् । हेमाभां महतीं विलंबित-शिखामामुक्त केशान्विताम् ॥
घण्टामण्डित पादपद्म युगलां नागेन्द्रकुम्भस्तनीम् । इन्द्राक्षीं परिचिन्तयामि मनसा कल्पोक्त सिद्धिप्रदाम् ॥
इन्द्राक्षीं द्विभुजां देवीं पीतवस्त्र द्वयान्विताम् । वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥
इन्द्रादिभिः सुरैर्वन्द्यां वन्दे शङ्करवल्लभाम् । एवं ध्यात्वा महादेवीं पठामि सर्वसिद्धये ॥

॥ इन्द्र उवाच ॥

इन्द्राक्षी पूर्वतः पातु पात्वाग्नेयां तथेश्वरी । कौमारी दक्षिणे पातु नैऋत्यां पातु पार्वती ॥
वाराही पश्चिमे पातु वायव्यां नारसिंह्यपि । उदीच्यां कालरात्रिर्मां ऐशान्यां सर्वशक्तयः ॥
भैरव्यूर्ध्वं सदापातु पात्वधरे वैष्णवी तथा । एवं दशदिशो रक्षेत् सर्वा सर्वाङ्गं भुवनेश्वरी ॥
ॐ नमो भगवति इन्द्राक्षि महालक्ष्मी सर्वजन वशङ्करि सर्वदुष्टग्रह स्तंभिनि स्वाहा ॥

ॐ नमो भगवति पिङ्गलभैरवि त्रैलोक्यलक्ष्मि त्रैलोक्यमोहिनि इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा।

ॐ नमो भगवती भद्रकालि महादेवि कृष्णवर्णे तुङ्गस्तने शूर्पहस्ते कपाटवक्षः स्थले कपालमालाधरे परशुधरे चापधरे विकृतरूपधरे विकृतरूप- महाकृष्णसर्प- यज्ञोपवीतिनि भस्मोद्धूलित- सर्वगात्रि इन्द्राक्षि मां रक्ष रक्ष हुं फट् स्वाहा।

ॐ नमो भगवति प्राणेश्वरि प्रेतासनि सिंहवाहने महिषासुरमर्दिनि उष्णाज्वर, पित्त ज्वर, वातज्वर, श्लेष्मज्वर, कफज्वर, आलापज्वर, सन्निपातज्वर, माहेन्द्रज्वर, कृत्यादिज्वर, एकाह्निकज्वर, द्व्याह्निकज्वर, त्र्याह्निकज्वर, चातुरह्निकज्वर, पाञ्चाह्निकज्वर, पक्षज्वर, मासज्वर, षाणमासज्वर, संवत्सरज्वर, सर्वाङ्गज्वर, नाशय नाशय हर हर हन हन दह दह पच पच ताडय ताडय आकर्षय आकर्षय विद्वेषय विद्वेषय स्तंभय स्तंभय मोहय मोहय

उच्चाटय उच्चाटय हुं फट् स्वाहा।

ॐ ह्रीं ॐ नमो भगवति प्रेतासने लम्बोष्ठी कंबुकण्ठि कालकालि कामरूपिणि परमंत्र परयन्त्र परतंत्र प्रभेदिनि प्रतिभट-विध्वंसिनि परबलतुरगविमर्दिनि शत्रुकरच्छेदिनि शत्रुमांसभक्षिणि सकलदुष्टज्वर निवारिणि भूत प्रेत पिशाच ब्रह्मराक्षस यक्ष यमदूत शाकिनी डाकिनी कामिनि स्तंभिनि मोहिनि वशङ्करि कुक्षिरोग शिरोरोग नेत्ररोग क्षयापस्मार कुष्ठादि महारोगनिवारिणि मम सर्वरोगं नाशय नाशय ह्रां ह्रीं ह्रूं ह्रैं ह्रौं हुं फट् स्वाहा।

ॐ ऐं श्रीं हुं हुं इन्द्राक्षि मां रक्ष रक्ष मम शत्रून् नाशय-नाशय जलरोगं शोषय-शोषय दुःख व्याधीन् स्फोटय-स्फोटय क्रूरान् अरीन् भंजय- भंजय मनोग्रंथिं प्राणग्रंथिं शिरोग्रंथिं घातय- घातय इन्द्राक्षि मां रक्ष-रक्ष हुं फट् स्वाहा।

ॐ नमो भगवति माहेश्वरि महाचिन्तामणि सकलसिद्धेश्वरि सकलजन मनोहारिणि काल कालरात्रि अनले अजिते अभये महाघोर प्रतिहत विश्वरूपिणि मधुसूदनि महाविष्णुस्वरूपिणि नेत्रशूल कर्णशूल कटिशूल पक्षशूल पाण्डुरोगादीन् नाशय नाशय वैष्णवि ब्रह्मास्त्रेण विष्णु चक्रेण रुद्रशूलेन यमदण्डेन वरुण पाशेन वासव वज्रेण सर्वान् अरीन भंजय भंजय यक्षग्रह राक्षसग्रह स्कंदग्रह विनायकग्रह बालग्रह चोरग्रह कुष्माण्डग्रहादीन् निग्रह निग्रह राजयक्ष्म क्षयरोग तापज्वर निवारिणि मम सर्वज्वरं नाशय नाशय सर्वग्रहान् उच्चाटय उच्चाटय हुं फट् स्वाहा।

उक्त प्रयोग के करने से व्याधिनाश व शत्रुनाश होवे। अभिमंत्रित जल पिलाने से ज्वारादि रोग शांत होवे।

॥ अथ मीनाक्षी ध्यानम्॥

इलावृत के उत्तरी भाग में मीनाक्षी देवी रहती है।

नीलाम्बरा रौद्रमुखी नीलालकयुता च सा । नाकिनां देवसंघाणां फलदा वरदा च सा ॥
अतिमान्याऽतिपूज्या च मत्तमातंग गामिनी । मदनोन्मादिनी मानप्रिया मानप्रियांतरा ॥
मारवेगधरा मारपूजिता मारमादिनी । मयूरवरशोभाढ्या शिखिवाहन गर्भभूः ॥
एभिर्नामपदैर्वंद्या देवी सा मीनलोचना । जपतां स्मरतां मानदात्री चेश्वरसंगिनी ॥

॥ ७. चामुण्डा (काली, शिवदूती, अपराजिता) ॥

मन्त्र - ह्रीं चामुण्डायै नमः।

विनियोग - अस्य मंत्रस्य शिवऋषिः, गायत्री छंदः, चामुण्डा देवता सर्वाभीष्टसिद्धये विनियोगः।

षडङ्गन्यास - ह्रीं। चामुण्डायै। नमः। ह्रीं। चामुण्डायै। नमः। से हृदयादि न्यास करें।

॥ ध्यानम् ॥

नीलोत्पलदलश्याम चतुर्बाहु समन्विता ,
खडवाङ्गं चन्द्रहासं च बिभ्रती दक्षिणे करे ।
वामे चर्म वै पाशं च उर्ध्वतो भावतः पुनः ,

दधतीं मुण्डमालां च व्याघ्रचर्माम्बरधरा ।
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घाऽति भीषणा ,
लोलजिह्वा निम्नरक्त नयनाकार भीषणा ।
कबन्धवाहना ऽसीना विस्तारि श्रवणानना ॥

सात लाख जप कर, मधु युक्त पायस से होम करे।

॥ चामुण्डा मन्त्रः॥

चामुण्डा ही प्राकारान्तर में चण्डिका कही गयी है।

नवार्ण मन्त्र - ऐं ह्रीं क्लीं चामुण्डायै विच्चे।

॥ यन्त्र पूजनम् ॥

नवार्ण मन्त्र के अनुसार त्रिकोण, षट्कोण, अष्टदल, चौबीसदल एवं भूपुर में पूजन करें। यही प्रचलित विधि है। इसका वर्णन दुर्गा पूजा में दिया गया है।

कालिका पुराण के अनुसार कल्पभेद से चामुण्डा दशभुजा महिषमर्दिनी है। इनकी उग्रचण्डादि शक्तियाँ है।

जटाजूटसमायुक्तामर्द्धेन्दुकृत शेखराम् ।
लोचनत्रय संयुक्तां पूर्णेन्दु सदृशाननाम् ॥
तप्तकाञ्चन वर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्वाभरण भूषिताम् ॥
सुचारुदशनां तीक्ष्णां पीनोन्नत पयोधराम् ।
त्रिभङ्गस्थान संस्थानां महिषासुरमर्दिनीम् ॥
त्रिशूल दक्षिणे देयं खड्ग चक्र क्रमादधः ।
तीक्ष्णवाणं तथा शक्तिबाहुसंघेषु संगताम् ॥
खेटकपूर्णचाप च पाश चांकुशमूर्धतः ।
घण्टां च परशुं चापि वामऽधः प्रतियोजयेत् ॥
अधस्तांमहिषं तद्वद्विशिरस्कं प्रदर्शयेत्।

॥ श्री चामुण्डा यन्त्रम् ॥

शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिनम् । हृदि शूलेन निर्भिन्नं नियंदन्त्र विभूषिताम् ॥
देव्यास्तु दक्षिणं पाद समं सिंहोपरि स्थितम् । किंचिदूर्ध्वं तथा वाममगुष्ठ महिषोपरि ॥

उपरोक्त ध्यान के अनुसार आवाहन करें। अष्टदल में जिन शक्तियों का पूजन करें वे इस प्रकार है -

उग्रचण्डा, प्रचण्डा, चण्डोग्रा, चण्डनायिका, चण्डा, चण्डवती, चामुण्डा, चण्डिका।

अग्निपुराण के अनुसार **चामुण्डा कुल** की ८ शक्तियाँ उत्पन्न हुई अतः यदि उनका पूजन भी अष्टदल में करें तो उत्तम होगा।

चामुण्डा कुल शक्तियाँ - पावनी, याचिनी, वामिनी, दमनी, विन्दुवेला, बृहत्कुक्षी, विद्युता, विश्वरूपिणी।

॥ चामुण्डा मंत्रः ॥

मंत्र :- ॐ क्रों क्रीं फ्रें फ्रों छ्रीं ख्रौं हूं हसखफ्रें ब्लौं जूं क्लूं ह्रीं क्रम्लैं (ह्सौं) क्षूं क्रौं चामुण्डे ज्वल ज्वल हिलि हिलि किलि किलि मम शत्रून् त्रासय त्रासय मारय मारय हन हन पत पत भक्षय भक्षय क्रीं क्रीं ह्रीं ह्रीं हूं हूं फट् फट् स्वाहा। (महा. सहि.)

॥ ध्यानम् ॥

धरालग्नशिरोजानु प्रसुप्तकुणपोपरि । निषेदुषीं निः पललसर्वावयव भीषणाम् ॥१॥
त्वगस्थिमात्र घटितामत्युग्राकार दर्शनाम् । कपालाकारशिरसं विलुण्ठित शिरोरूहाम् ॥२॥
स्कन्धावसक्त युगल कुण्डलीकृत खर्पराम् । नारास्थिनिर्मितानेक भूषणां भीषणाकृतिम् ॥३॥
मुण्डमालापरिक्षिप्तां ललज्जिह्वाभयानकाम् । विकरालमहादंष्ट्रां रौद्रीं रुद्रपरिग्रहाम् ॥४॥
अतिशुष्कोदर श्रोणिनितम्बोरु पयोधराम् । गणेयोभयपार्श्वस्थ पञ्जरास्थि करालिनीम् ॥५॥
दीर्घतालद्रुमाकार करपादां हसन्मुखीम् । खर्ज्जूर कण्टकाकार रोमराजि विराजिताम् ॥६॥
लोहसूर्पाकृतिनखां समुत्कम्पि शिरोधराम् । कूपाकार त्रिनयनां विद्युच्चपलतारकम् ॥७॥
लम्बमानौष्ठाधरां तां वलीलग्न पयोधराम् । विदीर्णसुक्कयुगलां नारान्त्रकटिसूत्रिणीम् ॥८॥
दिगम्बरां चर्वयन्तीं शवं कटकटारवैः । अष्टादशभुजां भीमां चरन्तीं पित्तृकानने ॥९॥
वामकरे चर्मचाप खट्वाङ्ग डमरून् क्रमात्। अंकुशं च तथा पाशं भिन्दिपालं शवं तथा ॥१०॥
रक्तपूर्णं कपालं च धारयन्तीं महोदरीम् । दक्षिणे विभ्रतीं खड्गं विशिखं च त्रिशूलकम् ॥११॥
चक्रं शक्तिं गदां पर्शुमस्थिमालां च कर्त्तृकाम्। दिवाकालाभ्रसदृशां जवापुष्पारुणां निशि ॥१२॥
वलाकासमदन्तालीं भुजङ्गकुटिलभ्रुवम् ।
अतिक्रूराकृतिधरां दृष्टैव मरणप्रदाम् ।
घोराट्टहासां गगने प्लवन्तीं सर्वतोमुखीम् ॥१३॥

शत्रु संहार हेतु इस विद्या का प्रयोग श्रेष्ठ है।

॥ चामुण्डा मन्त्र ॥

धरालग्नशिरो जानु प्रसुप्त कुणपोपरि । निषेदुषीं निःपललसर्वावयव भीषणाम् ॥१॥
त्वगस्थिमात्र घटितामत्युग्राकारदर्शनाम् । कपालाकारशिरसं विलुण्ठित शिरोरुहाम् ॥२॥
स्कन्धावसक्त युगल कुण्डलीकृत खर्पराम् । नारास्थिनिर्मितनेकभूषणा भीषणाकृतिम् ॥३॥
मुण्डमालापरिक्षिप्तां ललज्जिह्वा भयानकाम् । विकराल महादंष्ट्रां रौद्रीं रुद्रपरिग्रहाम् ॥४॥

अतिशुष्कोदरश्रोणि नितम्बोरुपयोधराम् । गणेयोभयापार्श्वस्थ पञ्जरास्थि करालिनीम् ॥५॥
दीर्घतालद्रुमाकारकरपादां हसन्मुखीम् । खर्ज्जूरकण्टकाकार रोमराजि विराजिताम् ॥६॥
लौहसूर्पाकृतिनखां समुत्कंपि शिरोधराम् । कूपाकार त्रिनयनां विद्युच्चपलतारकाम् ॥७॥
लम्बमानौष्ठाधरां तां वलीलग्र पयोधराम् । विदीर्णसृक्कयुगलां नारान्त्रकटिसूत्रिणीम् ॥८॥
दिगम्बरां चर्वयन्तीं शवंकटकटारवैः । अष्टादशभुजां भीमां चरन्तीं पितृकानने ॥९॥
वामे करे चर्मपाप खट्वांग डमरून् क्रमात् । अंकुशं च तथा पाशं भिन्दिपालं शवं तथा ॥१०॥
रक्तपूर्णं कपालं च धारयन्ती महोदरीम् । दक्षिणे विभ्रतीं खड्गं विशिखं च त्रिशूलकम् ॥११॥
चक्रं शक्तिं गदां पर्शुमस्थिमालां च कर्त्तृकाम् । दिवाकालाभ्रसदृशां जवापुष्पारुणां निशि ॥१२॥

बलाकासमदन्ताली भुजङ्ग कुटिलभ्रुवम् ।
अतिक्रूराकृतिधरां दृष्ट्यैव मरणप्रदाम् ॥
घोराट्टहासां गगने प्लवन्तीं सर्वतो मुखीम् ॥१३॥

मन्त्र – ॐ क्रों क्रीं फ्रें फ्रों छ्रीं ख्रौं हूं हसखफ्रें ब्लौं जूं क्लूं क्रम्लैं (ह्स्त्रौं) क्षूं क्रौं चामुण्डे ज्वल ज्वल हिलि हिलि किलि किलि मम शत्रून् त्रासय त्रासय मारय मारय हन हन पत पत भक्षय भक्षय क्रीं क्रीं ह्रीं ह्रीं हूं हूं फट् फट् स्वाहा।

॥ चण्डेश्वर्या मंत्र ॥

मंत्र :- ॐ श्रीं हूं क्रों क्रीं स्त्रीं क्लीं स्हजहलक्षम्लवनऊं क्षमक्लह्हसव्यऊं क्लह्झकह्नसक्लई सस्लक्षकमहू ब्रूं क्ष्लहूमव्यऊं चण्डेश्वरि ख्रों छ्रीं फ्रें क्रौं हूं हूं फट् फट् स्वाहा। (महा. संहि)

॥ ध्यानम् ॥

इन्द्रगोपनिभां देवीं प्रोढास्त्रीरूपधारिणीम् । पञ्चवक्त्रां महाभीमां दष्ट्राभिर्विकरालिनीम् ॥१॥
प्रविस्त्रस्तजटाभारां नरास्थिकृत भूषणाम्। केयूरांगद कोटीरहार नूपुर शालिनीम् ॥२॥
किं किणी कुण्डलापीड धारिणीं न्रस्थिनिर्मिताम्। रांकवत्वक् परीधानां शुष्कलंब स्तनद्वयाम् ॥३॥
शवद्वयोपरिगतां दक्षवामांघ्रियोगतः । सकेशनरमुण्डाभ्यां बद्धाभ्यां पादयोर्द्वयोः ॥४॥
त्रित्रिलोचन संयुक्तवदनां घोररूपिणीम् । चण्डेश्वरीं दशभुजामट्टहासं वितन्वतीम् ॥५॥
वक्त्रं मुखद्वयं वामे दक्षिणे वदनद्वयम् । संमुखे वदनं चैकं धारयन्तीं प्रकल्पितम् ॥६॥
हस्तमात्र विनिष्क्रान्त लेलिहान भयानकम् । जिह्वायुगं दक्षिणयोः करयोर्विभ्रतीं सदा ॥७॥
तथैव रसनायुग्मं दधतीं वामहस्तयोः । संमुखास्यगतां जिह्वां नभः स्थलप्रसारिताम् ॥८॥
दधतीं घोरनादाट्टहास त्रस्त जगत्त्रयाम् । सद्यः कृत्तस्त्रवद्रक्त धारं मुण्डं कचान्वितम् ॥९॥
कराभ्यां वामदक्षाभ्यां वहन्तीं सकलोपरि। ततो हस्तद्वये जिह्वां विस्फुरन्तीं च विभ्रतीम् ॥१०॥

मुण्डवृतासृजां धारां पतन्तीं रसनोपरि । पिबन्तीं शीत्कृतिं कृत्वा हूं हूंकारविनादिनीम् ॥११॥
तथा नृमण्डयुगलं पुनर्दक्षिण वामयोः । पुनर्जिह्वायुगं वद्वद्वामदक्षिण हस्तयोः ॥१२॥
धायन्तीं पूर्ववद्रक्तं सशब्दपरिघोषिताम् । पुरः स्थिताभ्यां द्योराभ्यां करालाभ्यामतीव हि ॥१३॥
योगिनी डाकीनीभ्यां च रक्तपूर्णं घटद्वयम् । सर्वदापातयन्तीभ्यां स्थिताभ्यां पुरतः सदा ॥१४॥

संमुख स्थितजिह्वायां मांसखण्डास्थिपूरितम् ।
पिबन्तीमीदृशाकारां दुर्निरीक्ष्यां सुरासुरैः ।
कपालं खर्प्परं शेषभुजाभ्यां विभ्रतीं पराम् ॥१५॥

जिस तरह चण्ड मुण्ड का संहार किया उसी तरह शत्रुओं का वध करती है। साधक को अभय प्रदान करती है।

॥ चामुण्डा काली मन्त्राः॥

कौशिकी के कोप से ललाट से काली की उत्पत्ति हुई। चण्ड मुण्ड का वध करने से वे ही चामुण्डा के नाम से प्रख्यात हुई है।

॥ मंत्रोद्धार ॥

समाप्ति सहितो दन्त्य प्रान्तस्मात् पुरः सरः ।
षष्ठस्वराग्निविन्द्विन्दु सहितः सादिरेव च ।
कालीमन्त्रमसि शोक्तं धर्मकामार्थदायकम् ॥

एकाक्षरी मन्त्र – (१) वं (२) व्रं

समाक्षरी मन्त्र – वं चामुण्डायै नमः।

षड्ंग न्यास – व्रां, व्रीं, व्रूं, व्रैं, व्रौं, व्रः से न्यास करें।

(ध्यान यंत्रार्चन में दिया गया है।)

॥ श्री चामुण्डाकाली यन्त्रम् ॥

॥ यंत्रार्चनम्॥

अष्टदल की शक्तियों के नाम कालिका पुराण के अनुसार है। शेष कर्म तंत्र मार्गोक्त है।

प्रथमावरणम् – बिन्दु में देवी का ध्यान करें।

नीलोत्पलदल श्यामा चतुर्बाहुसुमन्विता ।
खट्वांगं चन्द्रहास च विभ्रती दक्षिणे ॥
वामे चर्म च पाशं च उर्ध्वाधोभागतः पुनः ।
दधती मुण्डमालां च व्याघ्रचर्मधरा वराम् ॥
कृशांगी दीर्घदंष्ट्रा च अतिदीर्घाति भीषणा ।
लोलजिह्वा निम्नरक्तः नयना नादभैरवा ।
कबन्धवाहनासीना विस्तार श्रवणानना ॥

इसी देवी को तारा का स्वरूप भी कहा है।

एषा ताराह्वया देवी चामुण्डेति च गीयते: ;

द्वितीयावरणम् – (त्रिकोणे) **वामायै नमः। ज्येष्ठायै नमः। रौद्र्यै नमः।**

तृतीयावरणम् – **व्रां हृदयाय नमः। व्रीं शिरसे स्वाहा। व्रूं शिखायै वषट्। व्रैं कवचाय हुं। व्रौं नेत्रत्रयाय वौषट्। व्रः अस्त्राय फट्।**

चतुर्थावरणम् – (अष्टदले) **असिताङ्ग भैरव, रुरुभैरव, चण्डभैरव, क्रोधभैरव, कपालभैरव, उन्मत्तभैरव, भीषणभैरव, संहारभैरव** का पूजन करें।

पंचमावरणम् – (अष्टदलाग्रे) अष्टदल के अग्रभाग कर्णिका में शक्तियों का पूजन करे।

यथा – **ॐ त्रिपुरायै नमः। ॐ भीषण्यै नमः। ॐ चण्ड्यै नमः। ॐ कर्त्र्यै नमः। ॐ हर्त्र्यै नमः। ॐ विधायिन्यै नमः। ॐ कराल्यै नमः। ॐ शूलिन्यै नमः।**

॥ श्री चामुण्डा यन्त्रम् ॥

भूपुरे – में इन्द्रादि लोकपालों व उनके अस्त्रों का पूजन करें।

॥ स्वामिवश्यकरी शत्रुविध्वंसिनी स्तोत्रम् ॥

यदि स्वामी क्रोधी, दुष्ट, दुराचारी व लोभी होवे, दुस्विचार वाला हो उसको दण्ड देकर अपने अनुकूल करने के लिये भगवती वैष्णवी के इस स्तोत्र का जप करना चाहिये। सहस्रावृत्ति हेतु श्लोक १ से ३ की आवृत्तियां करे। श्लोक ४ से ६ श्लोक महात्म खण्ड के है जो अंतिम बार पढे।

विभीषण द्वारा की गई भगवती की यह स्तुति श्रीराम की भक्ति करने तथा उनकी अनुकम्पा प्राप्त करने के लिये की गई थी।

विनियोग – **ॐ अस्य श्री स्वामिवश्यकरी शत्रुविध्वंसिनी स्तोत्रमंत्रस्य पिप्पलायन ऋषि अनुष्टुप् छन्दः श्रीरामचन्द्रो देवता मम स्वामिप्रीत्यर्थ मत् सकाशात् शत्रोः पिशाचवत् पलायनार्थे जपे विनियोगः।**

षडङ्गन्यास – **ॐ रां अनुष्ठाभ्यां नमः ॐ रीं तर्जनीभ्यां नमः। ॐ रूं मध्यमाभ्यां नमः। ॐ रैं अनामिकाभ्यां नमः। ॐ रौं कनिष्ठिकाभ्या नमः। ॐ रः अस्त्राय फट्।**

॥ ध्यानम् ॥

ॐ कालाम्भोधर कांतिकायमनसं वीरासनाध्यासितम्। मुद्रां ज्ञानमयी दधानमपरां हस्ताम्बुजे जानुनी॥
सीतां पार्श्वगतां शिरोरूहकरां विद्युन्निमं राघवम्। पश्यन्तीं मुकुटं गदादिविविधं कल्पोज्ज्वलांगीं भजे॥

॥ विभीषण उवाच ॥

ॐ स्वामिवश्यकरी देवी प्रीतिवृद्धिकरी मम। शत्रुविध्वंसिनी रौद्री त्रिशिरा सा विलोचनी ॥१॥
अग्निर्ज्वाला रौद्रमुखी घोरदंष्ट्रा त्रिशूलिनी। दिगंबरी मुक्तकेशी रणपाणिर्महोदरी ॥२॥

एकराड् वैष्णवी घोरे शत्रुमुद्दिश्य ते विषम् । प्रभुमुद्दिश्य पीयूषं प्रसादादस्तु ते सदा ॥३॥
मंत्रमेतज्जपेन्नित्यं विजयं शत्रुनाशनम् । स्वामिप्रीत्यभिवृद्धिर्हि जपात्तस्य न संशयः ॥४॥
सहस्त्रं त्रितयं कृत्वा कार्यसिद्धिर्भविष्यति । जपाद्दशांशतो होमः सर्षपैस्तन्दुलैः घृतैः ॥५॥
पञ्चखाद्ययुतैर्हुत्वा स्वामिवश्यकरी तथा । ब्राह्मणान् भोजयेत् पश्चादात्माभीष्ट फलप्रदः ॥६॥

॥ इति स्वामिवश्यकरी शत्रुविध्वंसिनी स्तोत्रम् ॥

॥ ८. महालक्ष्मी ॥

मन्त्र – ह्रीं श्रीं महालक्ष्म्यै नमः।

विनियोगः – अस्य मंत्रस्य शिव ऋषिः, गायत्री छंदः महालक्ष्मी देवता सर्वाभीष्ट सिद्धये विनियोगः।

षडङ्गन्यास – मं। हां। लं। क्ष्म्यैं। नं। मः। से हृदयादि न्यास करे।

॥ ध्यान् ॥

सुवर्णवर्ण दीप्ताङ्गी त्रिनेत्रा सिंहवाहिनी ईषत् प्रहसिता देवी नीलोत्पलदलेक्षणा ।
भुजषोडश संपन्ना सर्वालङ्कार भूषिता, खड्गं घण्टां शरं सूत्रमंकुशं शूलपद्मम् ॥
दधाना दक्षिणैर्हस्तैरनाथेभ्यो वरप्रदा, तथा वामैर्हस्तपद्मै खेटकं डिण्डिमं धनुः ।
कमण्डलुं नागपाशं कपालं पुस्तकाऽभयं, जाज्वल्पमाना तेजोभिरतीवाह्लाद कारिणी ॥

१ लाख जप कर मधु युक्त पायस से होम करे।

॥ महालक्ष्मी मन्त्रः ॥

मन्त्र – (देवीरहस्ये) ॐ ह्रीं श्रीं क्लीं ऐं सौः महालक्ष्मी प्रसीद प्रसीद श्रीं ठः ठः ठः स्वाहा।

तन्त्रसारे – ॐ ऐं ह्रीं श्रीं क्लीं ह्सौः जगत् प्रसूत्यै नमः।

विनियोग – ॐ अस्य श्री महालक्ष्मी मन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, जगत्प्रसूता श्रीमहालक्ष्मी देवता, ममाभीष्टसिद्धये जपे विनियोगः।

षड्ङ्गन्यास – ॐ ऐं हृदयाय नमः। ह्रीं शिरसे स्वाहा। श्रीं शिखायै वषट्। क्लीं कवचाय हुं। ह्सौः नेत्रत्रयाय वौषट्। जगत्प्रसूत्यै नमः अस्त्राय फट्।

पुनः हृदयादिन्यास – ऐं ज्ञानाय हृदयाय नमः। ह्रीं ऐश्वर्याय शिरसे स्वाहा। श्रीं शक्तये शिखायै वषट्। क्लीं बलाय कवचाय हुं। ह्सौः वीर्याय नेत्रत्रयाय वौषट्। जगत्प्रसूत्यै नमः अस्त्राय फट्।

पुनः – मस्तके ॐ नमः। मुखे ह्रीं नमः। हृदये श्रीं नमः। गुह्ये क्लीं नमः। पदे ह्सौः नमः। नाभौ त्वक्मास रक्त मेदास्थि मज्जा शुक्रादि सप्तधातुषु जगत्प्रसूत्यै नमः।

॥ ध्यानम् ॥

बालार्कद्युतिमिन्दु खण्ड विलसत् कोटीर हारोज्ज्वलाम् । रत्नाकल्प विभूषितां कुच नतां शाले करैर्मञ्जरीम् । पद्मकौस्तुभ रत्नमप्यविरतं संविभ्रतीं सस्मिताम् । फुल्लाम्भोज विलोचन त्रययुतां ध्यायेत् पराम्बिकाम् ॥

॥ यन्त्र पूजनम् ॥

॥ श्री महालक्ष्मी यन्त्रम् ॥

यन्त्र रचना – त्रिकोण, षट्कोण, अष्टदल पश्चात् दो वृत्त एवं भुपूर बनायें।

त्रिकोण मध्य में देवि का आवाहन करें।

देवी के दक्षिण भाग में – **ॐ शङ्करनन्दनाय नमः**। वामभाग में – **ॐ पुष्पधनवे नमः**।

षट्कोण एवं मध्य में – **ऐं ज्ञानाय नमः, ह्रीं ऐश्वर्याय नमः, श्रीं शक्तये नमः, क्लीं बलाय नमः, ह्सौः वीर्याय नमः, ॐ जगत् प्रसूत्यै नमः**। मध्ये – **ॐ तेजसे नमः**।

अष्टदले – **ॐ उमायै नमः**। **श्रियै, सरस्वत्यै, दुर्गायै, धरण्यै, गायत्रै, देव्यै, उषायै नमः**।

उक्त अष्टशक्ति अतिशोभना व पद्महस्ता है।

देवि के दक्षिण में – **गंगायै नमः**। वामभाग में – **यमुनायै नमः**। पुनः दक्षिणे – **ॐ शङ्खनिधये नमः**। वामे – **ॐ पद्मनिधये नमः**। पश्चिमे – **ॐ वरुणाय नमः**।

इसके बाहर दो वृत्तों के बीच की वीथिका में – **मेष, वृष, मिथुन, कर्क, सिंह, कन्या, तुला, वृश्चिक, धनु, मकर, कुम्भ, मीन राशियों का तथा सूर्यादि नवग्रहों** का पूजन करें।

भुपूरे – आठों दिशाओं में **चारदाँत वाले ऐरावत, पुण्डरीक, वामन, कुमुद, अंजन, पुष्पदन्त, सर्वभौम तथा सुप्रतीक इन आठों दिग्गजों** का पूजन करें।

पश्चात् **इन्द्रादि लोकपालों का उनके आयुधों** सहित पूजन करें।

पुनः अष्टदले – लक्ष्मी की प्रसन्नता के लिये

लक्ष्मी कुल में उत्पन्न ८ शक्तियाँ – यमजिह्वा, जयन्ती, दुर्जया, यमान्तिका, विडाली, रेवती, जया, विजया (अग्निपुराणे) का पूजन करें।

॥ इन्द्रकृत महालक्ष्मी स्तोत्रम् ॥

॥ पुरंदर उवाच ॥

नमः कमलवासिन्यै नारायण्यै नमो नमः । कृष्णप्रियायै सततं महालक्ष्म्यै नमो नमः ॥
पद्मपत्रेक्षणायै च पद्मास्यायै नमो नमः । पद्मासनायै पद्मिन्यै वैष्णव्यै च नमोनमः ॥
सर्वसंपत्स्वरूपिण्यैसर्वाराध्यै नमो नमः । हरिभक्ति प्रदात्र्यै च हर्षदात्र्यै नमोनमः ॥

कृष्णवक्षः स्थितायै च कृष्णेशायै नमो नमः । चंद्रशोभास्वरूपायै रत्नपद्मे च शोभने ॥
संपत्त्यधिष्ठातृदेव्यै महादेव्यै नमो नमः । नमो वृद्धिस्वरूपायै वृद्धिदायै नमो नमः ॥
वैकुंठे या महालक्ष्मीर्या लक्ष्मीः क्षीरसागरे । स्वर्ग लक्ष्मीरिंद्रगेहे राजलक्ष्मीर्नृपालये ॥
गृहलक्ष्मीश्च गृहिणां गेहे च गृहदेवता । सुरभिः सागरे जाता दक्षिणा यज्ञकामिनी ॥
अदितिर्देवमाता त्वं कमला कमलालया । स्वाहा त्वं च हविर्दाने काव्यदाने स्वधा स्मृता ॥
त्वं हि विष्णुस्वरूपा च सर्वधारा वसुन्धरा । शुद्धसत्त्वस्वरूपा त्वं नारायणपरायणा ॥
क्रोधहिंसावर्जिता च वरदा शारदा शुभा । परमार्थप्रदा त्वं च हरिदास्यप्रदा परा ॥
यया विना जगत्सर्वं भस्मीभूतमसारकम् । जीवन्मृतं य विश्व च शश्वत्सर्वं यया विना ॥
सर्वेषां च परा माता सर्वबांधवरूपिणी । धर्मार्थकाममोक्षाणां त्वं च कारणरूपिणी ॥
यथा माता स्तनांधानां शिशूनां शैशवे सदा । यथा त्वं सर्वदा माता सर्वेषां सर्वरूपतः ॥
मातृहीनः स्तनांधस्तु स च जीवति दैवतैः । त्वया हीनो जनः कोऽपि न जीवत्येव निश्चितम् ॥
सुप्रसन्नस्वरूपा त्वं मां प्रसन्ना भवांबिके । वैरिग्रस्तं च विषयं देहि मह्यं सनातनि ॥
अहं यावत्त्वया हीनो बन्धुहीनश्च भिक्षुकः । सर्वसंपद्विहीनश्च तावदेव हरिप्रिये ॥
ज्ञानं देहि च धर्मं च सर्वसौभाग्यमीप्सितम् । प्रभावं च प्रतापं च सर्वाधिकारमेव च ॥
जयं पराक्रमं युद्धे परमैश्वर्य मेव च । इत्युक्त्वा च महेन्द्रश्च सर्वै सुरगणैः सहः ॥
प्रणनाम साश्रुनेत्रो मूर्ध्ना चैव पुनः पुनः । ब्रह्मा च शंकरश्चैव शेषो धर्मश्च केशवः ॥
सर्वे चक्रुः परीहारं सुरार्थे च पुनः पुनः । देवेभ्यश्च वरं दत्त्वापुष्पमालां मनोहराम् ॥
केशवाय ददौलक्ष्मीः संतुष्टा सुरसंसदि । ययुर्देवाश्च संतुष्टाः स्वं स्थानं च नारद ॥
देवी ययौ हरेः स्थानं ह्रतष्टा क्षीरोदशायिनी । ययतुश्चैव स्वगृहं ब्रह्मेशानौ च नारद ॥
दत्त्वा शुभाशिषं तौ च देवेभ्यः प्रीतिपूर्वकम् । इदं स्तोत्रं महापुण्यं त्रिसंध्यं यः पठेन्नरः ॥
कुबेरतुल्यः स भवेद्राजराजेश्वरो महान् पञ्च लक्ष जपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम् ॥
सिद्धस्तोत्रं यदि पठेन्मासमेकं च संततम् । महासुखी च राजेन्द्रो भविष्यति न संशयः ॥

॥ इति श्रीदेवीभागवते महापुराणे नवमस्कंधे द्विचत्वारिंशोऽध्याये महालक्ष्मी स्तोत्रम् ॥

॥ श्रीसूक्तपुरश्चरण ॥

पुरश्चः – प्रत्येक श्लोक के ऋषि, छंद नवदुर्गा दशमहाविद्या रहस्य की कमला उपासना में श्रीसूक्त के प्रयोग दिये गये है। पुरश्चरण हेतु शुक्लपक्ष की प्रतिपदा से एकादशी तक बारह हजार जप करे पश्चात् घृत, मधु शर्करा युक्त शाकल्य से होम करे। कमल, विल्वफल व विल्व की समिधा व सर्षप से होम करे। **श्रीसमद्धिः सर्पिषा च प्रत्येकं त्रिशतं हुनेत्।** द्वादशी को ही ब्राह्मण भोजन कराये।

लक्ष्मी के प्रिय पुष्प – कुन्दमन्दार, कुमुद, मालती, पद्म, केतकी, जाती, कल्हार, चंपक, लालपुष्प प्रिय है। प्रयोग समय धन देती हुयी लक्ष्मी का ध्यान करे।

कान्त्या कांचन सन्निभां हिमगिरिपख्यैश्चतुर्भिर्गजै-
हस्तोत्क्षिप्त हिरण्यमयामृतघटैराषिच्यमानां श्रियम् ।
बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरोटोज्ज्वलां
क्षौमाबद्ध नितम्ब विम्बललितां वन्देऽरविन्दस्थिताम् ॥१॥
मणिक्यप्रतिमप्रभां हिमनिभैस्तुङ्गैश्चतुर्भिर्गजै
र्हस्ताग्राहित रत्नकुभं सलिलैराषिच्यमानां सदा ।
हस्ताब्जैर्वरदानमब्ज युगलाभीतीर्दधानां हरैः
कान्तां कांक्षित परिजात लतिकां वन्दे सरोजाननाम् ॥२॥
अतशीपुष्पसकाशां रत्नभूषण भूषिताम् ।
शङ्खचक्र प्रादा पद्म शार्ङ्गवाणधरां करैः ।
षड्भिः कराभ्यां देवेशीं वरदाभयशोभिताम् ॥३॥

॥ ९. नारसिंही ॥

मन्त्र – क्ष्रौं नारसिंहयै नमः।

क्ष्रां, क्ष्रीं ......से षडङ्गन्यास करे।

भीषणास्य क्रोधदीप्तो रक्तवर्णेन्दु शेखरः सोमसूर्याग्नि नेत्रश्च नानामणि विभूषितः ।
दक्षाद्यूर्ध्व क्रमेणैव चक्रशङ्खौ गुणांकुशौ, वज्रं गदां दारयन्तं द्वाभ्यां दैत्येश्वरोदरम् ॥१॥
नृसिंहरूपिणी देवीं दैत्य दानवदर्पहाम्। शुभां शुभप्रदां शुभ्रां नारसिंहीं नमाम्यहम् ॥२॥

॥ नारसिंही मंत्र ॥

मंत्र :- ॐ आं क्रों हूं जूं ह्रीं क्लीं स्त्रीं क्षूं क्ष्रौं फ्रों जूं फ्रें (रक्रां) जिह्वासटाघोररूपे दंष्ट्राकराले नारसिंहि ह्रीं ह्रीं ह्रीं हूं हूं हूं फट् फट् स्वाहा। (महा. सं.)

॥ ध्यानम् ॥

हिमानीकुन्द कैलास रजताचलसन्निभा । वितस्तकेशरभरा विकीर्णवदनाकृतिः ॥१॥
सृक्कक्षरद्रक्तधारा लम्बमानाधरागलम् । द्विगुणीकृत शीतांशु कलातुल्यरदावलिः ॥२॥
अवभ्रटा क्षीणमध्यालातसंकाश दृग्द्वया । कृशदीर्घ समस्ताङ्गी सर्वालङ्कार मण्डिता ॥३॥
प्रोद्यन्मार्तण्ड विम्बाभकौस्तुभोद्भासिनी हृदि । मुखावट विनिर्गच्छ जिह्वा कोटिशत ह्रदा ॥४॥
केशराधूननस्त्रस्त खचरा खचरास्पदा । वज्राधिक नखस्पर्शा लोचनाभ्यां मुखादपि ॥५॥

****

वमन्ती कल्पकालाग्निं चर्वयन्ती दितेसुतान् । हसन्ती चाट्टहासेन नृत्यन्ती व्योममण्डले ॥६॥
गच्छन्ती वातवेगेन चरन्ती पितृकानने । दैत्यवक्षः पातनोत्थ रुधिरोक्षित विग्रहा ॥७॥
सुदीर्घ षोडशभुजा शीतिदम्भोलि धारिणी । चापकं वज्र चर्माणि मुशलं परशुं तथा ॥८॥
धारयन्ती करे वामे पट्टिशं च विदारणम् । वाण चक्र गदा खड्ग पाशाङ्कुशपवीनपि ॥९॥
विदारणं दक्षिणेन करेण दधती तथा । प्रतप्तहेमपिङ्गसटाभारावगुण्ठिता ॥१०॥
प्रकम्पिततनूयष्टिः परिप्लकनीनिका । प्रसुप्तभुजगाकार लूमखण्डविराजिता ॥११॥
नक्षत्रमालयितया रम्या नक्षत्रमालया ।
संवर्त्तकालकोट्यर्क दुर्निरीक्ष्य भयङ्करा ।
कोटिप्रलयकालाग्नि प्रत्यनीकतनु प्रभा ॥१२॥

॥ नारसिंही यन्त्रार्चनम्॥

मन्त्र – ॐ क्ष्रौं नमो भगवते नृसिंह्यै हूं फट्।

इस मन्त्र के वामदेव ऋषि, जगती छन्द है।

॥ ध्यानम् ॥

उद्यत् सहस्त्रार्कभासं भीषणाकृतिं, वज्रतुल्येक्षणं वह्निकान्तिं नानाभुजैवृत्तम् ।
नखैर्दारित दैत्यशं रक्तधारात्त कायकं, क्रूरकर्मादि विषये स्मरेद्देवि भयानकम् ॥

यन्त्र रचना – त्रिकोण, षटकोण एवं अष्टदल और भूपुर बनायें।

त्रिकोणे – तीनों कोणों में "**इच्छा, ज्ञान एवं क्रिया**" शक्ति का पूजन कर मध्य में देवी का आवाहन करें।

षट्कोणे – क्ष्रां, क्ष्रीं, क्ष्रूं, क्ष्रैं, क्ष्रौं, क्ष्रः से हृदयादि अङ्ग शक्तियों का पूजन करें।

अष्टदले – **ॐ भास्वत्यै नमः, ॐ भास्कर्यै नमः, ॐ चिन्तायै नमः, ॐ द्युतये नमः, ॐ उन्मीलिन्यै नमः, ॐ रमायै नमः, ॐ काल्यै नमः, ॐ रुचये नमः।** (ये अष्ट कन्यायें नारसिंही कुल में उत्पन्न हुई)

॥ श्री नारसिंही यन्त्रम् ॥

भुपूरे – **इन्द्रादि लोकपालों व उनके वज्रादि आयुधों** का पूजन करें।

साथ में नृसिंह का पूजन करें – **ॐ क्ष्रौं नमो भगवते नारसिंहाय ज्वालामालिने दीप्तदंष्ट्रयाग्नि नेत्राय सर्वरक्षोघ्नाय सर्वभूत विनाशाय सर्वज्वर विनाशाय दह दह पच पच रक्ष रक्ष हुं फट्।** (अग्नि पुराणे)

मन्त्रकोष में – **सर्वज्वर** की जगह **सर्वघोर** है तथा **हुं फट्** के स्थान पर **हूं फट् स्वाहा** है।

****

॥ १०. शिवदूती ॥

दुर्गा सप्तशती में कहा है "**ततो देवी शरीरात्....** तब चण्डिका के शरीर से अत्यंत भयङ्करि अतिक्रोध युक्ता शब्द करने वाली असंख्य शिवाओं से घिरी हुई" शक्ति अपराजिता बाहर निकल आई। अपराजिता या शिवदूती चण्डिका की दूसरी शक्ति है। पहली शक्ति है काली या चामुण्डा जो पहले आविर्भूत हुई थी। "**सा चाह धूम्रजटिलमीशानमपराजिता....**" उन अपराजिता नामक चण्डिका ने धूम्रजटा वाले ईशान शिव से कहा....। **यतो नियुक्तो दौत्येन तथा देव्या शिवः स्वयम्। शिव दूतीति...**। क्यों कि उन देवी अपराजिता द्वारा स्वयं शिव ही दूत रूप में नियुक्त हुये थे इसलिये इस संसार में वे शिवदूती नाम से प्रसिद्ध हो गई।

मंत्र - ह्रीं शिवदूत्यै नमः।

षडङ्गन्यास - ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से षडङ्गन्यास करे। कालिका पुराण में ध्यान दिया है-

रूपमस्याः प्रवक्ष्यामि श्रृणु वत्सैक सम्मतः चतुर्भुजं महाकायं सिन्दूर सदृशद्युति ।
रक्तदंतं मुण्डमाला जटाजूटार्द्धचन्द्रधृक् । नागकुण्डलहाराभ्यां शोभितं नखरोज्वलाम् ॥
व्याघ्रचर्म परीधानं दक्षिणे शूलखड्गधृक् , वामे पाशं तथा चर्म विभ्रदूर्ध्वापर क्रमात् ।
स्थूलवक्त्रं च पीनोष्ठं तुङ्गमूर्तिं भयङ्करम् । निक्षिप्य दक्षिणं पादं संतिष्ठत् कुणपोपरि ॥
वामपादं श्रृगालस्य पृष्ठे फेरुशतैवृतम् । ईदृशीं शिवदूत्यास्तु मूर्तिं ध्यायेद विभूतये ॥

॥ शिवदूती मन्त्रः ॥

मन्त्र - ह्रीं शिवदूत्यै नमः।

विनियोग - अस्य मन्त्रस्य रुद्र ऋषिः, गायत्री छन्दः, शिवा देवता, ह्रीं बीजं, नमः शक्तिः, शिवदूत्यै कीलकं, ममाभीष्टये विनियोगः।

षड्ङ्गन्यास - ह्रां, ह्रीं, ह्रूं, ह्रैं, ह्रौं, ह्रः से क्रमशः हृदयादि न्यास करें।

वर्णन्यास - ह्रीं, शिं दोनों कानों पर, **वं, दूं** दोनों नासापुटे, **त्यैं नं** दोनों कपालों पर, **मंः** से कण्ठ पर न्यास करें। तथा मूलमन्त्र से नाभि में न्यास करें। पुनः मूल मन्त्र से व्यापक न्यास करें।

॥ ध्यानम् ॥

निदाघकाल मध्याह्न दिवाकर समप्रभाम् । नवरत्न किरीटां च त्रीक्षणामरुणाम्बराम् ॥
नानाभरण संभिन्न देहकांति विराजिताम् । शुचिस्मितामष्टभुजां स्तूयमानाम्महर्षिभिः ॥
पाशं खेटङ्गदां रत्नचषकं वामबाहुभिः । दक्षिणेरंकुशं खड्गकुठार कमलन्तथा ॥
दधानां साधकाभीष्ट दानोद्यम समन्विताम् । ध्यात्वैवम्पूजयेद् देवीं दूतीं दुरितनाशिनीम् ॥

॥ यन्त्रार्चन ॥

यन्त्र रचना - दो वृत्त बनाकर, त्रिकोण, षट्कोण, अष्टदल एवं भुपूर बनायें। (मेरु तन्त्रे)

त्रिकोणे - मध्य में **देवि का आवाहन** करें। तीनों कोणों में - **ॐ इच्छायै नमः, ॐ ज्ञानायै नमः, ॐ क्रियायै**

नमः।

षड्दले - सिद्धा, वाणी, पूर्णसिद्धा, विग्रहवती, नादा एवं मनोन्मनी का पूजन करें।

अष्टदले - शिवदूती के समान आयुध व वर्ण वाली देवियों का पूजन करें। यथा -

सुमुखी, सुन्दरी, सारा, सुमना, सरस्वती, समया, सर्वगा, सिद्धायै नमः।

अष्टदल बाह्यवे - ॐ वागीशायै, वरदायै, विश्वायै, विनदायै, विघ्नकारिण्यै, वीरायै, विघ्नहरायै, विद्यायै नमः।

भुपूरे - दक्षिण भाग से आरंभ करें -

ॐ विह्वलायै, कर्षिण्यै, लोलायै, नित्यायै, मदनमालिन्यै, प्रमोदायै, कौतुकायै, पुण्यायै नमः।

॥ श्री शिवदूती यन्त्रम् ॥

पश्चात् **इन्द्रादि लोकपालों व उनके वज्रादि आयुधों** का पूजन करें।

लक्ष जप कर गुग्गलु, शर्करा, मधु, नाकरीकेल, फल, गुड़, के हवन से लक्ष्मी प्राप्ति होवे। कह्लार, लालपुष्प, त्रिमधु, चम्पा, वकुल पुष्प होम से वशीकरण होवे। शत्रुनाश हेतु पुतली बनाकर प्रयोग करें।

॥ शिवदूती मन्त्राः॥

कालिका पुराण के अनुसार शिवदूती की उत्पत्ति कौशिकी के हृदय से हुई । मार्कण्डेय पुराण के अनुसार शिव जी दूत के रूप में शुंभ निशुम्भ के पास गये अतः उनका शिवारूप ही शिवदूती रूप में प्रसिद्ध हुआ।

॥ मंत्रोद्धार ॥

अंतः समाप्तिसहितो बिन्द्विन्दुभ्यां दशावरः ।
स्वरेणोपान्तदन्त्येन संस्पृष्टोऽन्तेन पूर्वशः ॥
स एव बिन्दुयुगल पूर्वस्थोपान्तपावकः ।
षष्ठस्वरकलाशन्यै सहितः प्रथम स्थितः ॥
मंत्रोऽयं शिवदूत्यास्तु शिवदूती जयप्रदः ॥

मंत्रोद्धार में बिन्दु व इन्दु लिखा है। इन्दु के कई अर्थ है। यथा -

ऐ, स, म, द्रां अतः मंत्र भेद गुरुमुख से जाने।

यथा एकाक्षरी मंत्र - "स्त्रं" । उपयुक्त लगता है। (प अंत - म, द अंत - न, ओ अंत - अः, पावक = र अतः मन्त्र **म्रों:** भी बनता है।)

अन्य मंत्र - स्त्रां स्त्री स्त्रूं शिवदूत्यै नमः।

॥ ध्यानम् ॥

चतुर्भुजं महाकायं सिन्दुरसदृशद्युति । रक्तदन्तं मुण्डमालाः जटाजूटार्ध चन्द्रधृक् ॥
नागकुण्डलहाराभ्यां शोभितं नखराज्वलम् । व्याघ्रचर्म परीधान दक्षिणे शूलखण्डधृक् ॥
वामे पाशं तथा चर्म विभ्रदूर्ध्वापरक्रमात् । स्थूलवक्त्रं च पीनोष्ठं तुंगमूर्ति भयंकरम् ॥
निक्षिप्य दक्षिणं पादं सन्तिष्टत् कुणपोपरि । वामपादं शृगालस्य पृष्ठे फेरुशतैर्वतृम् ॥
ईदृशी शिवदूत्यास्तु मूर्ति ध्यायेत् विभूतये । ध्यानमात्रावथैतस्ता नरः कल्याणमाप्नुयात् ॥

॥ यंत्रार्चनम् ॥

कालिका पुराण के अनुसार शिवदूती की १२ शक्तियाँ है।

॥ श्री शिवदूती यन्त्रम् ॥

यन्त्र रचना – विन्दु, त्रिकोण, षट्कोण, अष्टदल पश्चात् द्वादशदल एवं भूपुर बनाये।

प्रथमावरणम् – बिन्दु में ध्यानपूर्वक देवी का आवाहन करे

द्वितीयावरणम् – (त्रिकोणे) **वामायै नमः। जेष्ठायै नमः। रौद्र्यै नमः।**

तृतीयावरणम् – (षट्कोणे) **स्त्रां हृदयाय नमः। स्त्रीं शिरसे स्वाहा। स्त्रूं शिखायै वषट्। स्त्रैं कवचाय हुं। स्त्रौं नेत्रत्रयाय वौषट। स्त्रः अस्त्राय फट् ।**

चतुर्थावरणम् – (अष्टदले) **असिताङ्ग भैरव, रुरुभैरव, चण्डभैरव, क्रोधभैरव, कपालभैरव, उन्मत्तभैरव, भीषणभैरव, संहारभैरव** का पूजन करें।

पंचमावरणम् – (द्वादश दले) ॐ क्षेमकर्यै नमः। ॐ शान्त्यै नमः। ॐ वेदमात्रै नमः। ॐ महोदर्यै नमः। ॐ कराल्यै नमः। ॐ कामदादेव्यै नमः। ॐ भगास्यायै नमः। ॐ भगमालिन्यै नमः। ॐ भगोदर्यै नमः। ॐ भगारोहायै नमः। ॐ भगजिह्वायै नमः। ॐ भगायै नमः।

षष्ठमावरण में **इन्द्रादिलोकपाल** व **सप्तमावरण** में उनके **वज्रादि आयुधों** का पूजन करे।

॥ ११. अपराजिता ॥

वैष्णवी, चण्डिका एवं शिवदूती ये अपराजिता शक्ति ही मानी गई है। शत्रु का मान मर्दन करने हेतु विजयादशमी को इसकी आराधना पूजा करनी चाहिये। राजा को अपराजिता वृक्ष बेल को अपने दाहिनी और धारण करनी चाहिये।

मंत्र – ॐ आकर्षिणी आवेशिनि ज्वालामालिनि रमणि रामणि धरणि, धारणि तपनि तापिनि मनोन्मादिनि शोषिणि पताके महानीले महाप्रिये महाग्रेयि महाचण्डे महारौद्रि महावज्रिणि आदित्यरश्मि जाह्नवि यमघण्टे किलि किलि चिंतामणि सुरभि सुरोत्पन्ने सरस्वति सर्वकामदुधे ममनीषितं कार्यं तन्मे सिध्यतु स्वाहा।

मेरु तंत्र के अनुसार ऋष्यादि अष्टाक्षर वैष्णवी मंत्र के समान । १२६०० जप कर दशांश होम करे। इस मंत्र से पताका पूजन भी करे।

॥ कौशिकी ॥

मार्कण्डेय पुराण के अनुसार पार्वती के कोष से **कौशिकी** तथा कालिकापुराणानुसार मातंगी के कोष से कौशिकी उत्पन्न हुई।

कालिका पुराणानुसार ध्यान मंत्र एवं अष्टदल की शक्तियों का जो वर्णन है उसी के अनुसार पूजन क्रम दिया गया है।

बीज मंत्र व मंत्रोद्धार जो दिया गया है उसकी टीका प्राप्त नहीं है तथा संकेत भाषा में एक शब्द के कई अर्थ बनते हैं। अत: हमने भी मंत्र की शक्ति की टीका नहीं की।**

मंत्र बीज – नेत्र बीज – इसका भावार्थ '**इ**' एवं '**औ**' दोनों ही बनते हैं अनुस्वार लगाने पर बीज '**इं**' या '**औं**' बनता है।

॥ मंत्रोद्धार ॥

मन्त्रमस्या: प्रवक्ष्यामि मूर्तिरूपं च भैरव । समाप्तिनान्त्यस्तु षड्वर्गादि सविन्दुभि: । षष्ठस्वरेण संस्पृष्टो बिन्दुना समलंकृत: । कौशिकी मन्त्रतन्त्रोऽयं सर्वकामार्थ दायक: ॥

अन्यमन्त्र –

(१) पां पीं पूं पें पौं प: कौशिक्यै नम:।

(२) क्रां क्रीं क्रूं क्रैं क्रौं क्र: कौशिक्यै नम:।

(३) पं प: कौशिक्यै नम:।

॥ ध्यानम् ॥

धम्मिल्ल संयतकचां विधोश्चाधोममुखीं कलाम् । केशान्ते तिलकस्योर्ध्वे दधती सुमनोहरा ॥
मणिकुण्डल संघृष्ट गण्डा मुकुटमण्डिता । सज्ज्योति कर्णपूराभ्यां कर्णमापूर्य संगता ॥
सवर्णमणि माणिक्य नागहार विराजिता । सदा सुगंधिभि: पद्मैरम्लानैति सुन्दरी ॥
मालां विभूति ग्रीवायां रत्नकेयूर धारिणी । मृणालायत वृत्तेस्तु बाहुभि: कोमलै शुभै: ॥
राजन्ती कञ्चुकोपेत पीनोन्नत पयोधरा । क्षीणमध्य पीतवस्त्रा त्रिवली प्रख्य भूषिता ॥
शूलं वज्रं च वाणं च खड्गं शक्ति तथैव च । दक्षिण: पाणिभिर्देवी गृहीत्वा तु विराजिता ॥
गदां घण्टां च चापं च चर्म शंखं तथैव च । उर्ध्वदिक्रमतो देवी दधती वामपाणिभि: ॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्माणि कौशिकी । विभ्रर्ता रूपमतुलं ससुरासुर मोहनम् ॥

॥ यंत्रार्चनम् ॥

प्रथमावरणम् – विन्दु में देवी का ध्यान पूर्वक आवाहंन करें।

द्वितीयावरणम् – (त्रिकोणे) **ॐ वामायै नम:। ॐ ज्येष्ठायै नम:। ॐ रौद्र्यै नम:।**

तृतीयावरणम् – (षट्कोणे) **पां हृदयाय नमः। पीं शिरसे स्वाहा। पूं शिखायै वषट्। पैं कवचाय हुम्। पौं नेत्रत्रयाय वौषट्। पः अस्त्राय फट्।**

॥ श्री कौशिकी यन्त्रम् ॥

चतुर्थावरणम् – (अष्टदले) **असिताङ्ग भैरव, रुरुभैरव, चण्डभैरव, क्रोधभैरव, कपालभैरव, उन्मत्तभैरव, भीषणभैरव, संहारभैरव** का पूजन करें।

पंचमावरणम् – (अष्टदलाग्रे) दल के अग्रभाग में शक्तियों का पूजन करें। **ॐ ब्राह्मयै नमः। ॐ माहेश्वर्यै नमः। ॐ कौमार्यै नमः। ॐ वाराह्यै नमः। ॐ वैष्णव्यै नमः। ॐ नारसिंह्यै नमः। ॐ ऐन्द्र्यै नमः। ॐ शिवदूत्यै नमः।**

षष्ठमावरण में **इन्द्रादि लोकपालों** व **सप्तमावरण** में उनके **वज्रादि आयुधों** का पूजन करें।

इस देवी का विधिवत् पूजन करने से युद्ध में विजय प्राप्त होती है। इस देवी को ही तन्त्र ग्रन्थों में प्रत्यंगिरा कहा हैं।

॥ भगवती नन्दा ॥

भगवती नन्दा का नन्दजा स्तोत्र अनु. प्रकाशः भाग ३ देवी खण्ड पूर्वार्द्ध में पृष्ठ संख्या ७७८ पर दिया गया है। इस देवि के विन्ध्यवासिनी नाम से प्रयोग दिये गये है।

मंत्र – **ॐ ह्रीं श्रीं विशालाक्षी नन्दजायै नमः।**

॥ ध्यानम् ॥

नवीनाऽर्ककोटिप्रभा भासयन्ती, चतुर्भिः करैः शङ्खचक्रे दधन्ती ।
वरं चाऽभयं वैभवं भावयन्ती, जगत्यत्र विन्ध्येश्वरी क्रीडयन्ती ॥१॥
कनकोत्तमकान्तिः सा सुकान्तिकनकाम्बरा ।
देवी कनकवर्णाभा कनकोत्तमभूषणा ।
कमलाङ्कुशपाशाब्जैरलंकृत चतुर्भुजा ॥२॥
ध्यायेद् देवी विशालाक्षीं तप्तकाञ्चन सुप्रभाम् ।
द्विभुजामम्बिकां चण्डीं खड्ग खर्परधारिणीम् ।
नानालङ्कार सुभगां रक्ताम्बरधरां शुभाम् ।
सदा षोडशवर्षीयां प्रसन्नास्यां त्रिलोचनाम् ॥३॥

पुत्र प्राप्ति हेतु इस विद्या का प्रयोग करे। मक्खन को अभिमंत्रित कर स्त्री को खिलावें।

॥ भगवती रक्तदन्तिका ॥

भगवती का स्वरूप भीषण है, शत्रु संहार करने में दक्ष है। अपने भक्त की पति के समान परिपालना करती है।

मंत्र - (१) ॐ रां रीं रूं रक्तदंतिकायै नमः ॥१॥

(२) ॐ क्रां क्रीं क्रूं रां रीं रूं वैप्रचित्तान् भक्षकारिण्यै रक्तदंतिकायै नमः ॥२॥

॥ ध्यानम् ॥

रक्ताम्बरा रक्तवर्णा रक्तसर्वाङ्गभूषणा ।
रक्तायुधा रक्तनेत्रा रक्तकेशातिभीषणा ॥
रक्ततीक्ष्णनखा रक्तदशना रक्तदंतिका ।
वसुधेव विशाला सा सुमेरुयुगलस्तनी ॥
दीर्घौ लम्बावतिस्थूलौ तावतीव मनोहरौ ।
खड्गं पात्रं च मुसलं लाङ्गुलं च बिभर्ति सा ।
कर्कशावतिकान्तौ तौ सर्वानन्दपयोनिधी ॥१॥

ताम्रविद्रुमबिम्बाभ रक्तोष्ठीममृतोपमाम् ।
दाडिमीबीजपंक्त्याभ दन्तपंक्तिविराजिताम् ॥२॥

॥ तामस ध्यान ॥

क्षुत्क्षामा कोटराक्षी मसिमलिनमुखी मुक्तकेशी रुदन्ती ।
नाहं तृप्ता वदन्ती जगदखिलं ग्रासमेकं करोमि ॥
हस्ताभ्यां धारयन्ती ज्वलदनल शिखासन्निभं पाशमुग्रं ।
दन्तैर्दाडिमीपुष्पैः परिहरतु भयं पातु मां भद्रकाली ॥३॥

इस देवी के अनुष्ठान, पूजा-अर्चना सब रक्तवर्ण से होवे। लालचन्दन की माला से जप व रक्त पुष्पों से होम करें।

॥ रक्तदन्तिका साधना ॥

मंत्र :- ॐ श्रीं रं भगवति रक्तदंतिके अनुरक्ते स्वाहा। (देवी रहस्ये)

२१ माला ५१ दिन तक करें। मंत्र सिद्ध होने पर इस मंत्र से अभिमंत्रित कर पान खाकर शत्रु के सामने जाये तो शत्रु स्तंभित व संमोहित हो जाता है ॥

॥ भगवती भीमा ॥

भगवती का भैरव स्वरूप विशाल है। संहार में कालरात्रि के समान है।

मंत्र - ॐ ह्रीं भैं भीमायै नमः। (देवी रहस्ये)

मंत्रोद्धार - तारं परा भद्रिका च भीमायान्तेऽश्मरी मनुः ।

॥ ध्यानम् ॥

भीमापि नीलवर्णा सा दंष्ट्रादशनभासुरा ।
विशाललोचना नारी वृत्तपीनपयोधरा ॥
चन्द्रहासं च डमरु शिरः पात्रं च विभ्रती ।
एक वीरा कालरात्रिः सैवोक्ता कामदा स्तुता ॥

॥ भगवती भीडा ॥

भगवती भीमा का सौम्यरूप भीडा है। यह ज्ञान की वृद्धि करती है एवं सरस्वती स्वरूपा है।

मंत्र :- ॐ ह्रीं श्रीं हस्त्रैं ऐं क्लीं सौः भीडाभगवति हंसरूपिणि स्वाहा। (देवी रहस्ये)

उत्कीलनम् :- ॐ हस्त्रैं नमः।

शाप विमोचनम् :- ॐ ह्रीं श्रीं भीडे ध्रुवशाप विमोचय-विमोचय स्वाहा।

॥ भीडा ध्यानम् ॥

उद्यच्छीतांशुरश्मिद्युतिचयसदृशीं फुल्ल-पद्मोपविष्टां ।
वीणानागेन्द्र शङ्खायुध परशुधरां दोर्भिरीड्यैश्चतुर्भिः ।
मुक्ताहारांशुनानामणियुतहृदयां शीधुपात्रं वहन्तीं ।
वन्दे भीडां भवानीं प्रहसितवदनां साधकेष्ट प्रदात्रीम् ॥

यंत्रोद्धार :- विन्दु, त्रिकोण, षट्कोण, वृत्त, अष्टकोण, फिर षोडशदल पश्चात् तीन रेखाओं वाला, चार द्वार युक्त भूपुर बनायें।

देवी रहस्य में यन्त्रार्चन नहीं दिया गया है।

॥ भीडा ध्यान ॥

देवीरहस्ये॥

उद्यच्छीतांशुरश्मिद्युति चयसदृशीं फुल्लपद्मोपविष्टां
वीणानागेन्द्र शङ्खायुधपरशुधरां दोर्भिरीड्यैश्चतुर्भिः।
मुक्ताहारांशुनानामणियुत हृदयां शीधुपात्रं वहन्तीं
वन्दे भीडां भवानीं प्रहसितवदनां साधकेष्टप्रदात्रीम्।

मंत्र - ॐ ह्रीं श्रीं हस्त्रै हस्त्रां ऐं क्लीं सौः भीडा भगवति हंसरूपिणि स्वाहा।

उत्कीलन - ॐ भीडायै नमः।

॥ श्री भीड़ा यन्त्रम् ॥

॥ भगवती शाकम्भरी ॥

भगवती शाकम्भरी की उपासना से अनावृष्टी, अकाल दोष दूर होकर अन्न धन की वृद्धि, दुःख दरिद्रता दूर होवे। यही देवी शताक्षी नाम से भी पुकारी जाती है।

मंत्र :- ॐ आं फ्रां शां शाकम्भर्यै नमः ।

नीलाञ्जन समप्रख्य नीलपद्मायतेक्षणाम् । सुकर्कश समोत्तुङ्ग वृत्तपीनघनस्तनम् ॥
वाणमृष्टिं व कमलं पुष्पपल्लवमूलकान् । शाकादीन्फल संयुक्ताननन्त रस संयुक्तान् ॥
क्षुत्तुङ् जरपहान् हस्तै विभ्रती व महाधनुः । सर्वसौन्दर्यसारं तद्रूपं लावण्य शोभिताम् ॥
कोटिसूर्य प्रतीक्षाकाशां करुणारस सागराम् । दर्शयित्वा जगद्धात्री साऽनन्त नयनोद्भवा ॥१॥
शाकम्भरी नीलवर्णा नीलोत्पलविलोचना । गंभीरानाभिस्त्रिवली विभूषिततनूदरी ॥
सुकर्कश समोत्तुङ्ग वृत्तपीनघनस्तनी । मुष्टिं शिलीमुखापूर्णं कमलं कमलालया ॥
पुष्पपल्लव मूलादि फलाढ्यं शाकसञ्चयम् । काम्यानन्तरसैर्युक्तं क्षुत्तृण्मृत्युभयापमहम् ॥
कार्मुकं च स्फुरत्कांति विभ्रती परमेश्वरी । शाकम्भरी शताक्षी सा सैव दुर्गा प्रकीर्तिता ॥२॥

इस अनुष्ठान में हरा आसन, हरे वस्त्र होवे। यदि अकाल निवारण एवं वृष्टि प्रयोग करना हो तो शरीर पर गीला वस्त्र धारण कर जप करें। ५१ मेघो की पूजा करे तथा वरुण मण्डल बनाकर पूजा करे। सर्वकर्म अनुष्ठान प्रकाश भाग २ में मण्डल पूजा दी गई है।

॥ शताक्षी महिमा ॥

(देवी भागवते)

शताक्षी ही शाकम्भरी है। प्रारम्भ में ध्यान व स्तुति है, पश्चात् देवा चरित है। उस समय दुर्ग नामक राक्षस से उनका संग्राम हुआ। पहले काली तारादि १६ शक्तियाँ फिर ३२ पश्चात् ६४ शक्तियाँ देवि के शरीर से उत्पन्न हुई। उन्होनें दैत्य की १०० अक्षोहिणी सेना को परास्त कर दिया। ग्यारहवें दैत्य ने उन सभी शक्तियों को जीत लिया तो देवी शाकम्भरी ने उसे मार दिया।

भावार्थ यह है कि जिस कल्प में जो शक्ति प्रकट होती है उस कल्प में वही अपना प्रभाव दिखाती है, शेष शक्तियाँ गौण रहती है। दुर्ग नामक राक्षस को मारने से ही माता ''दुर्गा'' कहलाई। देवा ऊचु में पुनः प्रार्थना है।

॥ पूर्व पीठिका ॥

अनर्थे त्वेवमुद्भूते ब्राह्मणाः शांतचेतसः । गत्वा हिमवतः पार्श्वे रिराधयिषव शिवाम् ॥
समाधिध्यानपूजाभिर्देवीं तुष्टुवुरन्वहम् । निराहारास्तदासक्तास्तामेव शरणं ययुः ॥
दयां कुरु महेशानि पामरेषु जनेषु हि । सर्वापराधयुक्तेषु नैतच्छ्लाघ्यं तवांबिके ॥
कोपं संहर देवेशि सर्वांतर्यामि रूपिणि । त्वया तथा प्रर्यतेऽयं करोति स तथा जनः ॥
नान्या गतिर्जनस्यास्य किं पश्य पुनः पुनः । यथेच्छसि यथा कर्तुं समर्थाऽसि महेश्वरि ॥
समुद्धर महेशानि संकटात्पर मोत्थितात् । जीवनेन विनास्माकं कथं स्यात्स्थितिरंबिके ॥

प्रसीद त्वं महेशानि प्रसीद जगदंबिके । अनंतकोटिब्रह्मांडनायिके ते नमो नमः ॥
नमः कूटस्वरूपायै चिद्रूपायै नमो नमः । नमो वेदांतवे द्यायै भुवनेश्यै नमो नमः ॥
नेति नेतीति वाक्यैयी बोध्यते सकलागमैः । तां सर्वकारणां देवीं सर्वभावेन सन्नताः ॥
इति संप्रार्थिता देवी भुवनेशी महेश्वरी । अनंताक्षिमयं रूपं दर्शयामास पार्वती ॥

॥ ध्यानम् ॥

नीलांजनसमप्रख्यं नीलपद्मायतेक्षणम् । सुकर्कश समोत्तुंगवृत्तपीनघनस्तनम् ॥
बाणमुष्टिं च कमलं पुष्पपल्लवमूलकान् । शाकादीन्फलसंयुक्ताननंतरससंयुतान् ॥
क्षुत्तृड् जरपहान्हस्तैबिभ्रती च महाधनुः । सर्वसौंदर्यसारं तद्रूपं लावण्यशोभितम् ॥
कोटिसूर्यप्रतीकाशं करुणारससागरम् । दर्शयित्वा जगद्धात्री साऽनंतनयनोद्भवा ॥

॥ स्तोत्रम् ॥

मोचयामास लोकेषु वारिधाराः सहस्त्रशः । नवरात्रं महावृष्टिरभून्नेत्रोद्भवैर्जलैः ॥
दुःखितान्वीक्ष्य सकलान्नेत्राश्रूणि विमुञ्चती । तर्पितास्तेन ते लोका ओषध्यः सकला अपि ॥
नदीनदप्रवाहा स्तैर्जलैः समभवन्नृप । निलीय संस्थिताः पूर्वं सुरास्ते निर्गता बहिः ॥
मिलित्वा ससुरा विप्रा देवीं समभितुष्टुवुः । नमो वेदांतवेद्ये ते नमो ब्रह्मस्वरूपिणि ॥
स्वमायया सर्वजगद्विधात्र्यै ते नमो नमः । भक्तकल्पद्रुमे देवि भक्तार्थं देहधारिणि ॥
नित्यतृप्ते निरुपमे भुवनेश्वरि ते नमः । अस्मच्छांत्यर्थमतुलं लोचनानां सहस्त्रकम् ॥
त्वया यतो धृतं देवि शताक्षी त्वं ततो भव । क्षुधया पीडिता मातः स्तोतुं शक्तिर्न चाऽस्ति नः ॥
कृपां कुरु महेशानि वेदानप्याह रांबिके ।

॥ व्यास उवाच ॥

इति तेषां वचः श्रुत्वा शाकान्स्वकरसंस्थितान् ॥
स्वादूनि फलमूलानि भक्षणार्थं ददौ शिवा । नानाविधानि चान्नानि पशुभोज्यानि यानि च ॥
काम्यानंतरसैर्युक्तान्यानवीनोद्भवं ददौ । शाकंभरीति नामाऽपि तद्दिनात्समभून्नृप ॥
ततः कोलाहले जाते दूतवाक्येन बोधितः । ससैन्यः सायुधो योद्धुं दुर्गमाख्योऽसुरो ययौ ॥
सहस्त्राक्षौहिणीयुक्तः शरान्मुंच स्त्वरान्वितः । रुरोध देवसैन्यं तद्यद्देव्यग्रे स्थितं पुरा ॥
तथा विप्रगणं चैव रोधयामास सर्वतः । ततः किलकिलाशब्दः समभूद्देवमंडले ॥
त्राहि त्राहीति वाक्यानि प्रोचुः सर्वे द्विजामराः । ततस्तेजोमयं चक्रं देवानां परितः शिवः ॥
चकार रक्षणार्थाय स्वयं तस्माद्बहिः स्थिता । ततः समभवद्युद्धं देव्या दैत्यस्य चोभयोः ॥
शरवर्षसमाच्छन्नसूर्यमंडलमद्भुतम् । परस्परशरोद्घर्षसमुद्भूताग्निसुप्रभम् ॥
कठोरज्याटणत्कारबधिरीकृतदिक्तटम् । ततो देवीशरीरात्तु निर्गतास्तीव्र शक्तयः ॥

****

कालिका तारिणी बाला त्रिपुरा भैरवी रमा । बगला चैव मातंगी तथा त्रिपुरसुंदरी ॥
कामाक्षी तुलजा देवी जंभिनी मोहिनी तथा । छिन्नमस्ता गुह्यकाली दशसाहस्त्रबाहुका ॥
द्वात्रिंशच्छक्तयश्चान्याश्चतुष्षष्टिमिताः परा । असंख्यातास्ततो देव्यः समुद्भूतास्तु सायुधाः ॥
मृदंगशंखवीणादिनादितं संगर स्थलम् । शक्तिभिर्दैत्यसैन्ये तु नाशितेऽक्षौहिणीशते ॥
अग्रेसरः समभवद्दुर्गमो वाहिनीपतिः । शक्तिभिः सह युद्धं च चकार प्रथमं रिपुः ॥
महद्युद्धं समभवद्यत्राभूद्रक्तवाहिनी । अक्षौहिण्यस्तु ताः सर्वा विनष्टा दशभिर्दिनैः ॥
तत एकादशे प्राप्ते दिने परमदारुणे । रक्तमाल्यांबरधरो रक्तगंधानुलेपनः ॥
कृत्वोत्सवं महांतं तु युद्धाय रथसंस्थितः । संरंभेणैव महता शक्तीः सर्वाविजित्य च ॥
महादेवीरथाग्रे तु स्वरथं संन्यवेशयत् । ततोऽभवन्महद्युद्धं देव्या दैत्यस्य चोभयोः ॥
प्रहरद्वयप र्यंतं हृदयत्रासकारकम् । ततः पंचदशात्युग्रबाणान्देवी मुमोच ह ॥
चतुर्भिश्चतुरो वाहान्बाणेनैकेन सारथिम् । द्वाभ्यां नेत्रै भुजौ द्वाभ्यां ध्वजमेकेन पत्रिणा ॥
पंचभिर्हृदयं तस्य विव्याध जगदंबिका । ततो वमन्स रुधिरं ममार पुर ईशितुः ॥
तस्य तेजस्तु निर्गत्य देवीरूपे विवेश ह । हते तस्मिन्महावीर्ये शांतमासीज्जगत्रयम् ॥
ततो ब्रह्मादयः सर्वे तुष्टुवुर्जगदंबिकाम् । पुरस्कृत्य हरीशानौ भक्त्या गद्गदया गिरा ॥

॥ देवा ऊचुः ॥

जगद्भ्रमविवर्तैककारणे परमेश्वरि । नमः शाकंभरि शिवे नमस्ते शतलोचने ॥
सर्वोपनिषदुद्घुष्टे दुर्गमासुरनाशिनि । नमो मायेश्वरि शिवे पंचकोशांतरस्थिते ॥
चेतसा निर्वि कल्पेन यां ध्यायंति मुनीश्वराः । प्रणवार्थस्वरूपां तां भजामो भुवनेश्वरीम् ॥
अनंतकोटिब्रह्मांडजननीं दिव्यविग्रहाम् । ब्रह्मविष्ण्वादिजननीं सर्व भावैर्नता वयम् ॥
कः कुर्यात्पामरान्दृष्ट्वा रोदनं सकलेश्वरः । सदयां परमेशानीं शताक्षीं मातरं विना ॥

॥ व्यास उवाच ॥

इति स्तुता सुरैर्देवी ब्रह्मविष्ण्वादिभिर्वरैः । पूजिता विविधैर्द्रव्यैः संतुष्टाभूच्च तत्क्षणे ॥
प्रसन्ना सा तदा देवी वे दानाहृत्य सा ददौ । ब्राह्मणेभ्यो विशेषेण प्रोवाच पिकभाषिणी ॥
ममेयं तनुरुत्कृष्टा पालनीया विशेषतः । यया विनाऽनर्थ एष जातो दृष्टोधुनैव हि ॥
पूज्याऽहं सर्वदा सेव्या युष्माभिः सर्वदैव हि । नातः परतरं किंचित्कल्याणायोपदिश्यते ॥
पठनीयं ममैतद्धि माहात्म्यं सर्वदोत्तमम् । तेन तुष्टा भविष्यामि हरिष्यामि तथाऽऽपदः ॥
दुर्गमासुरहंत्रीत्वाद्दुर्गेति मम नाम यः। गृह्णाति च शताक्षीति मायां भित्त्वा व्रजत्यसौ ॥
किमुक्तेनात्र बहुना सारं वक्ष्यामि तत्त्वतः । संसेव्याऽहं सदा देवाः सर्वै रपि सुरासुरैः ॥

|| भगवती भ्रामरी ||

इसके प्रयोग से शत्रुपक्ष में फूट पड़ती है तथा शत्रु का उच्चाटन भी किया जा सकता है।

इस मंत्र का प्रयोग करे, मधुमक्खियों के छत्ते के पास जाकर संकल्प कर शत्रुसंघविदीर्ण हेतु उनका आवाहन, पूजन करे। पश्चात् शत्रु संहार हेतु उनका भद्रकाली रूप में ध्यान कर शत्रुसंघ विदीर्ण हेतु प्रार्थना करें तो मक्खियां उड़कर शत्रु पर टूट पड़ेगी। यह प्रयोग आज से १२५ वर्ष पहले हमारे पास के सरवाड़ गाँव के एक तांत्रिक ने प्रयोग किया तो किशनगढ़ स्टेट की बड़ी फौज भी भाग खड़ी हुई।

मंत्र :- ॐ ह्रीं भैं भ्रामयैं नमः।

|| ध्यानम् ||

तेजोमण्डलदुर्धर्षां भ्रामरी चित्रकांतिभृत् ।
चित्रानुलेपना देवी चित्राभरण भूषिता ॥

इस देवी के प्रयोग समय स्वयं शहद का भक्षण नहीं करे। देवी को शहद से स्नान कराये। घृत, मधु, शर्करा से नित्य मधुपर्क अर्पण करें।

हवन में त्रिमधु (घृत, मधु, शर्करा) से होम करें।

|| अथ भगवती त्वरिता प्रयोगः ||

शत्रु को दण्ड देने हेतु भगवती की ९ शक्तियाँ प्रमुख है। सर्वजनक्षोभिणी, आकर्षिणी, वशंकरी, स्तंभिनी, क्षोभिणी इत्यादि शक्तियाँ मारण, मोहन, संमोहन, द्रावण, क्षोभण, संतापन, उच्चाटन, विद्वेषण, आकर्षण इत्यादि शक्तियाँ शीघ्र कार्य करती है। अतः ये त्वरिता विद्या के नाम से जानी जाती है।

त्वरिताविद्या मंत्रः- ह्रीं सर्वजन क्षोभिणी जनानुकर्षिणी ततः। ॐ खे ख्यां सर्वजनवशंकरी तथा स्याज्जनमोहिनी ॥ ॐ ख्यौं सर्वजनस्तंभनी ऐं खं खां क्षोभणी तथा ।
ऐं त्रितत्त्वं बीजं श्रेष्ठं कुले पञ्चाक्षरी तथा ॥१॥
(मूलमंत्र):- फं श्रीं क्षीं श्रीं ह्रीं क्षें वच्छे क्षे क्षे ह्री फट् ह्रीं नमः ॥२॥
ॐ ह्रां क्षे वच्छे क्षे क्षो ह्रीं फट्।
देवी को **ॐ ह्रौं सिंहाय नमः** से आसन प्रदान करे।

|| भगवती त्वरिता मन्त्राः ||

अग्निपुराण में त्वरिता विद्या विषय में विस्तृत वर्णन है। यह विद्या तोतला, त्वरिता, एवं तूर्णा नाम से प्रसिद्ध है।

इसके विविध नाम **पार्वती, शबरी, ईशा, वरदा, श्यामला, अभयहस्तिका, मयूरवलया, पिच्छमौलि, किंसलयांशुका, सिंहासनस्था, मयूरबर्हच्छत्रसमान्विता, त्रिनेत्रा, वनमालाविभूषणा, विप्राहिकर्णाभरणा, क्षत्रकेयूरभूषणा, वैश्यनागकटीबन्धा, वृषाहिकृतनूपुरा** है।

यह विद्या आदि भूता है। यही देवी सृष्टि के आरंभ में जल में तीव्र गति पैदा करती है अतएव इस देवी को तोतला

भी कहा है। इसके प्रयोग से विष तथा शत्रुबाधा का निवारण होता है। यह देवी दोभुजा व १८ भुजावाली है।

सिंहमंत्रा – १. ॐ प्रों पुरु पुरु महासिंहाय नमः ॥

२. त्तु त्तु हेति वज्रदेति पुरु पुरु लुलु गर्ज गर्ज ह ह सिंहाय नमः।

मंत्रा :- १. ॐ ह्रीं हूं खे छे क्षः स्त्रीं हूं क्षें ह्रीं फट् त्वरितायै नमः॥

२. ॐ ह्रीं हूं खे च च्छे क्षः स्त्रीं हूं क्षें ह्रीं फट् त्वरितायै नमः॥

३. ॐ हूं खे च्छे क्षः स्त्रीं क्षें हुं फट् नमः॥

त्वरिता गायत्री :- ॐ त्वरिता विद्यां विद्महे तूर्णविद्यां च धीमहि तन्नो देवी प्रचोदयात्।

षडङ्गन्यास :- खे च हृदयाय नमः। च च्छे शिरसे नमः। छे क्षः शिखायै नमः। क्षः स्त्रीं कवचाय नमः। स्त्रीं हूं नेत्राय नमः। हूं क्षेमस्त्राय फट् नमः।

पुनः – ॐ ह्रीं हूं हः हृदयाय नमः। हां हः शिरसे स्वाहा। ह्रीं ज्वल ज्वल शिखायै वषट्। हनु हनु (हलु हलु) कवचाय हुं। ह्रीं श्रीं क्षूं नेत्रत्रयाय वौषट्। क्षौं हः खौं अस्त्राय फट्।

पुनः – ॐ हूं हृदयाय नमः। खे च्छे शिरसे स्वाहा। क्षः स्त्री शिखायै वषट्। क्षें हुं कवचाय हुं। फट् नेत्रत्रयाय वौषट्।

इन्द्रदूतिका (वज्रतुण्डिका) मंत्र :- तोतले वज्रतुण्डे ख ख हूं ।

ज्वालिनि विद्या मंत्र :- खेचरि ज्वालिनी ज्वाले ख ख ।

शबरी विद्या मंत्र :- वर्चे शरविभीषणी ख ख ।

कराली विद्या मंत्र :- छे छेदनि करालिनि ख ख ।

प्लवंगदूती विद्या मंत्र :- क्षः श्रव द्रव प्लवङ्गि ख ख ।

श्वसन वेगिका विद्या मंत्र :- स्त्रीबलं कलिधुनंनि शासी।

कपिल दूतिका मंत्र :- क्षे पक्षे कपिले हस हस ।

रौद्रि दूतिका मंत्र :- हूं तेजावति रौद्रि मातंगी ।

ब्रह्मदूतिका मंत्र – पुटे पुटे ख ख खड्गे फट् ।

॥ ध्यानम् ॥

अठारह भूजावाली देवी सिंहारूढ है। बाँयी जंघा सिंहपर है। दाहिनी जंघा को दुगने आकार में फैला रखा है। अनेकानेक अस्त्र धारण किये हुए है।

श्यामां वर्हिकलाप शेखर-युतामाबद्ध पर्णांशुकां, गुञ्जाहारलसत्पयोधरभरामष्टाहिपान् बिभ्रतीम् ।
ताटङ्काङ्गद मेखलां गुणरणन्मञ्जीरतां प्रापितां, कैरीतीं वरदाभयोद्यतकरां देवीं त्रिनेत्रां भजे ॥१॥
अष्टादशभुजां सिंहे वामजङ्घा प्रतिष्ठिता । दक्षिणा द्विगुणा तस्याः पादपीठे समीप्सिता ॥
नागभूषां वज्रदण्डे खड्गं चक्रं गदां क्रमात् । शूलं शरं तथा शक्तिं वरदं दक्षिणैः करैः ॥

धनुः शरं घण्टां तर्जनीं शङ्खमंकुशम् । अभयं च तथा वज्रं वामपार्श्वे धृतायुधम् ॥२॥

॥ प्रयोग विधि॥

॥ भाण्डिरेक संप्रदायानुसार बिन्दुपूजनम् ॥

पुनः शाबर तन्त्रज्ञा भाण्डिकेराः प्रयुञ्जते । बीजाक्षरों सहित मन्त्रोद्धार व नामावलि अनुसार पूजन इस प्रकार है।

तारमायारमाः शक्ति सुधा सोमास्ततः परम् । पाशप्रेत पराश्चापि योगिनी शाकिनी स्त्रियः ॥
चूड़ामणि शिखा जम्भास्तुङ्ग मन्दारवेदयः । सुरसः समरो रागः कुटिला रंजिनी घटी ॥
नादान्तकश्चामरश्च व्यंजनं तदनन्तरम् । चर्पटं माणेमाला च हारिणी तदनुस्मृता ॥
मारणडश्च विनादश्च विमर्दस्तदनूदितः । दाक्षिकं सौमतं चापि प्रतानं सर्वशेषगम् ॥
त्रिबीजानि द्वादशैवं तव देवि मयोदिता । ङयन्तानिदानीं कलय शब्दान् क्रमत एव हि ॥
पृथिव्यापश्च वह्निश्च वायुः सूर्यस्तथैव च । चन्द्रो विद्युश्च माया च प्रपञ्चो ब्रह्म तत्परम् ॥
अद्वैतं परमात्मा च क्रमतो व्याहृता इमे । एतेषामुत्तरपदं गौणं हि कलयाधुना ॥
उद्वेतृत्वं क्लेदत्वं दाहिका शोषिकातथा । प्रभा कौमुद्यपि तथा पुनरुद्योतिकापि च ॥

विक्षेपासत्त्वमिति च ततः परमुदीरितम् । आविर्भाव तिरोभावः कैवल्यं तदनन्तरम् ॥
सर्वशेषे परिज्ञेयं निर्वाणमिति वै पदम् । इति कर्तव्यता चास्य पुरैव प्रतिपादिता ।
षडक्षरी तु कूर्चास्त्रे हृदयं शिर एव च क्रमोऽयं भाण्डिकेराणां बिन्दूपूजा विधौ मतः ॥

॥ त्रिपुरघ्न मतेन बिन्दु पूजनम् ॥

तारो माया योगिनी च वधू रावश्च डाकिनी । प्रासादो गरुढश्चापि प्रेतो नरहरिस्तथा ॥
कपालं काकिनी चापि क्षेत्रपालश्च फैरवम् । सूत्रं द्वीपश्च तुङ्गश्च जम्भस्तदनु कर्णिका ॥
भूतिनी केकराक्षी च कालरात्रिरतः परम् । मन्द संमोह पतन संहारास्तदनन्तरम् ॥
सर्वेषां चरमस्था तु ज्ञेया चिच्छक्तिनामिका । नित्या शुद्धाऽक्षरा सूक्ष्माऽग्राह्याऽरूपाप्यनिन्द्रिया ॥
निर्गुणा निर्विकारा च निराभासा निरञ्जनी । अवासना च निर्बंधा कूटस्था चिद्विलासिनी ॥
अनिमित्ता च कैवल्याऽद्वैता ऽबाधप्रकाशिका । वेदान्तवेद्या चैतन्याकारा साक्षिण्यथामृता ॥
परानन्दा गुणातीता ऽनिर्देश्या तदनन्तरम् ।
तुरीया सर्वशेषस्था यया मुक्तिरवाप्यते ॥
इत्येवं बिन्दुगापूजा त्रिपुरघ्नमुखोद्गता ॥

॥ सकलसम्प्रदायानुसार बिन्दु पूजनम् ॥

आदित, भरत, हिरण्यकश्यप, राम, रावण, इत्यादि द्वारा उपासित मन्त्रों के उच्चारण पश्चात् कहा है-

मन्त्र नवनवार्णाख्यं तं सहस्राक्षरीमनुम् । शक्तौ सत्यां सुरामध्ये बीजमालामयिमयि ॥
नोपात्तेयमशक्तौ तु त्रिपुरघ्न वचो यथा । ततोऽनु शांभवी विद्या या महाशाम्भवी तथा ॥
तुरीयाख्या ऽप्यथ महातुरीया तदनन्तरम् । निर्वाणमप्यनु महानिर्वाणं जगदीश्वरि ॥
द्वात्रिंशत् संख्यकैरेतैर्मनुभिः फलदायिभिः ॥

बिन्दु पूजा समापन मन्त्र -

षोडश बीज मन्त्र उच्चारण पश्चात् (ॐ ह्रीं श्रीं क्लीं छ्रीं स्त्रीं हूं फ्रें क्रीं ख्फ्रें ठ्रीं छ्रीं फ्रों रह्रीं स्वाहा) ॐ भगवती गुह्यकाली साङ्गायै सवाहनायै सपरिवारायै हुं फट् स्वाहा।

॥ तदग्रे पूजा विधानम् ॥

आवरण पूजा पश्चात् पात्रा सादन करें।

सभी आवरण देवताओं को गणेश, वटुक, क्षेत्रपाल, मातृगण, योगिनी, डाकिनी व नृसिंहादि देवताओं को बलि प्रदान करें तथा अन्य पूजा क्रम शक्ति पूजा कर शान्ति स्तोत्र का पाठ करें।

॥ इति भरतच्यवनहारीतजाबालदक्षपूजितं गुह्यकाली यन्त्रार्चनम् ॥

॥ अथ शान्ति स्तोत्रम् ॥

काली काली महाकालि कालिके पापहारिणि । धर्ममोक्षप्रदे देवि गुह्यकालि नमोऽस्तुते ॥१॥
संग्रामे विजयं देहि धनं देहि सदा गृहे । धर्मकामार्थसंपत्तिं देहि कालि नमोऽस्तुते ॥२॥
उल्कामुखि ललज्जिह्वे घोररावे भगप्रिये । श्मशानवासिनि प्रेते शवमांसप्रियेऽनघे ॥३॥
अरण्य चारिणि शिवेकुलद्रव्यमयीश्वरि । प्रसन्नांभव देवेशि भक्तस्य मम कालिके ॥४॥
शुभानि सन्तु कौलानांनश्यन्तु द्वेषकारकाः । निन्दाकरा क्षयं पान्तुये च हास्य प्रकुर्वते ॥५॥
ये द्विषन्ति जुगुप्सन्ते ये निन्दन्ति हसन्ति ये । येऽसूयन्ते च शङ्कन्ते मिथ्येति प्रवदन्ति ये ॥६॥
ते डाकिनीमुखे यान्तु सदारसुतबान्धवाः । पिबत्वं शोणितं तस्य चामुण्डा मांसमत्तु च ॥७॥
आस्थीनिचर्वयन्त्वस्य योगिनी भैरवीगणाः । यानिन्दागमतन्त्रादौ या शक्तिषु कुलेषु या ॥८॥
कुलमार्गेषु या निन्दा सा निन्दा तव कालिके । त्वन्निन्दाकारिणां शास्त्री त्वमेव परमेश्वरि ॥९॥
न वेदं न तपो दानं नोपवासादिकं व्रतम् । चान्द्रायणादि कृच्छं च न किञ्चिन्मानयाम्यहम् ॥१०॥
किन्तु त्वच्चरणाम्भोज सेवां जाने शिवाज्ञया । त्वदर्चा कुर्वतो देवि निन्दापि सफला मम ॥११॥
राज्यं तस्य प्रतिष्ठा च लक्ष्मीस्तस्य सदा स्थिरा । तस्य प्रभुत्वं सामर्थ्यं यस्य त्वं मस्तकोपरि ॥१२॥
धन्योऽहं कृतकृत्योऽहं सफलं जीवतं मम । यस्य त्वच्चरणद्वन्दे मनो निविशते सदा ॥१३॥
दैत्याः विनाशमायान्तु क्षयं यान्तु च दानवाः । नश्यन्तु प्रेतकूष्माण्डा राक्षसा असुरास्तथा ॥१४॥
पिशाच भूत वेतालां क्षेत्रपाला विनायकाः । गुह्यकाः घोणकाश्चैव विलीयन्ता सहस्त्रधा ॥१५॥
भारुण्डा जंभकाः स्कान्दाः प्रमथाः पितरस्तथा । योगिन्यो मातरश्चापि डाकिन्यः पूतनास्तथा ॥१६॥
भस्मीभवन्तु सपदि त्वत् प्रसादात् सुरेश्वरि । दिवाचरा रात्रिचरा ये च संध्याचरा अपि ॥१७॥
शाखाचरा वनचराः कन्दराशैलचारिणः । द्वेष्टारो ये जलचरा गुहाबिलचरा अपि ॥१८॥
स्मरणादेव ते सर्वे खण्डखण्डा भवन्तु ते । सर्पानागा यातुधाना दस्युमायाविनस्तथा ॥१९॥
हिंसका विद्विषो निन्दाकरा ये कुलदूषकाः । मारणोच्चाटनोन्मूल द्वेष मोहन कारकाः ॥२०॥
कृत्याभिचारकर्तारः कौलविश्वासघातकाः । त्वत्प्रसादाज्जगद्धात्रि निधनं यान्तु तेऽखिलाः ॥२१॥
नवग्रहाः सतिथयो नक्षत्राणि च राशयः । संक्रान्तयोऽब्दा मासाश्च ऋतवो द्वे तथायने ॥२२॥
कलाकाष्ठामुहुर्ताश्च पक्षाहोरात्रयस्तथा । मन्वतराणि कल्पाश्च युगानि युगसन्धयः ॥२३॥
देवलाकाः लोकपालाःपितरो वह्नयस्तथा । अध्वरा निधयो वेदाः पुराणागमसंहिता ॥२४॥
एते मया कार्तिता ये ये चान्ये नानुकीर्तिताः । आज्ञया गुह्यकाल्यास्ते मम कुर्वन्तु मङ्गलम् ॥२५॥

भवन्तु सर्वदा सौम्याः सर्वकालं सुखावहाः । आरोग्यं सर्वदा मेऽस्तु युद्धे चैवापराजयः ॥२६॥
दुःखहानिः सदैवास्तां विघ्ननाशः पदे पदे । अकालमृत्यु दारिद्र्यं बंधनं नृपतेर्भयम् ॥२७॥
गुह्यकाल्याः प्रसादेन न कदापि भवेन्मम । सन्त्विन्द्रियाणि सुस्थानि शान्तिः कुशलमस्तु मे ॥२८॥
वाञ्छाप्तिर्मनसः सौख्यं कल्याणं सुप्रजास्तथा । बलं वित्तं यशः कान्तिर्वृद्धिर्विद्या महोदयः ॥२९॥
दीर्घायुरप्रधृष्यत्वं वीर्यं सामर्थ्यमेव च ।
विनाशो द्वेषकर्तृणां कौलिकानां महोन्नतिः ।
जायतां शान्तिपाठेन कुलवर्त्म धृतात्मनाम् ॥

॥ अथ विश्वमङ्गल गुह्यकाली कवचम् ॥

विनियोगः – ॐ अस्य श्रीविश्वमङ्गलनाम्नो गुह्यकाली महावज्र कवचस्य संवर्तऋषिरनुष्टुप्छन्दः, एकवक्त्रादि शतवक्त्रान्ता गुह्यकाली देवता, फ्रें बीजं, खफ्रें शक्तिः, छ्रीं कीलकं सर्वाभीष्टसिद्धि पूर्वकात्मरक्षणे जपे विनियोगः।

ॐ फ्रें पातु शिरः सिद्धिकराली कालिका मम । ह्रीं छ्रीं ललाटं मे सिद्धिविकरालि सदावतु ॥१॥
श्रीं क्लीं मुखं चण्डयोगेश्वरी रक्षतु सर्वदा । हूं स्त्रीं कर्णौं वज्रकापालिनी मे कालिकाऽवतु ॥२॥
ऐं क्रौं हनू कालसंकर्षणा मे पातु कालिका । क्रीं क्रौं भ्रुवावुग्रचण्डा कालिका मे सदावतु ॥३॥
हां क्षौं नेत्रे सिद्धिलक्ष्मीरवतु प्रत्यहं मम । हूं ह्रौं नासां चण्डकापालिनी मे सर्वदावतु ॥४॥
आं ईं ओष्ठाधरौ पातु सदा समयकुब्जिका । ग्लूं ग्लौं दन्तान् राजराजेश्वरी मे रक्षतात् सदा ॥५॥
जूं सः सदा मे रसनां पातु श्रीजयभैरवी । स्फ्रें स्फ्रें पातु स्वर्णकूटेश्वरी मे चिबुकं सदा ॥६॥
ब्लूं ब्लौं कण्ठं रक्षतु मे सर्वदा तुम्बुरेश्वरी । क्ष्रूं क्ष्रौं मे राजमातङ्गी स्कन्धौ रक्षतु सर्वदा ॥७॥
फ्रां फ्रौं भुजौ वज्रचण्डेश्वरी रक्षतु मे सदा । स्त्रें स्त्रौं वक्षःस्थलं जयझङ्केश्वरी मम ॥८॥
फिं फां करौ रक्षतु मे शिवदूती च सर्वदा । छ्रैं छ्रौं मे जठरं पातु फेत्कारी घोरराविणी ॥९॥
स्त्रैं स्त्रौं गुह्येश्वरि नाभिं मम रक्षतु सर्वदा । क्षुं क्षौं पार्श्वौ सदापातु बाभ्रवी घोररूपिणी ॥१०॥
ग्रूं ग्रौं कुलेश्वरी पातु मम पृष्ठं च सर्वदा । क्लूं क्लौं कटिं रक्षतु मे भीमादेवी भयानका ॥११॥
हैं हौं मे रक्षतादूरू सर्वदा चण्डखेचरी । स्फ्रों स्फ्रौं मे जानुनी पातु कोरङ्गी भीषणानना ॥१२॥
त्रीं थ्रीं जङ्घायुगं पातु तामसी सर्वदा मम । त्रैं त्रौं पादौ महाविद्या सर्वदा मम रक्षतु ॥१३॥
ड्रीं ठ्रीं वागीश्वरी सर्वान् सन्धीन् देहस्य मे ऽवतु । खें खौं शराराधातून्मे कामाख्या सर्वदावतु ॥१४॥
ब्रीं ब्रूं कात्यायनी पातु दशवायूंस्तनूद्भवान् । ज्लूं ज्लौं पातु महालक्ष्मीः खान्येकादश सर्वदा ॥१५॥
ऐं औं अनूक्तं यत्स्थानं शरीरेऽन्तर्बहिश्च मे । तत्सर्वं सर्वदा पातु हरसिद्धा हरप्रिया ॥१६॥
फ्रें छ्रीं ह्रीं स्त्रीं हूं शरीरसकलं सर्वदा मम । गुह्यकाली दिवारात्रौ सन्ध्यासु परिरक्षतु ॥१७॥

इति ते कवचं प्रोक्तं नाम्ना च विश्वमङ्गलम् । सर्वेभ्यः कवचेभ्यस्तु श्रेष्ठं सारतरं परम् ॥१८॥
इदं पठित्वा त्वं देहं भस्मनैवावगुण्ठ्य च । तत्तत्स्थानेषु विन्यस्य वद्धवादः कवचं दृढम् ॥१९॥
दशवारान् मनुं: जप्त्वा यंत्र कुत्रापि गच्छतु । समरे निपतच्छस्त्रेऽरण्ये स्वापदसङ्कुले ॥२०॥
श्मशाने प्रेतभूताढ्यकान्तारे दस्युसङ्कुले । राजद्वारे सपिशुने गह्वरे सर्पवेष्टिते ॥२१॥
तस्य भीतिर्न कुत्रापि चरतः पृथिवीमिमाम् । न च व्याधिभयं तस्य नैव तस्करजं भयम् ॥२२॥
नाग्न्युत्पातो नैव भूतप्रेतजः संकटस्तथा । विद्युद्वर्षोपलभयं न कदापि प्रबाधते ॥२३॥
न दुर्भिक्षभयं चास्य न च मारिभयं तथा । कृत्याभिचारजा दोषाः स्पृशन्त्येनं कदापि न ॥२४॥
सहस्त्रं जपतश्चास्य पुरश्चरणमुच्यते । तत्कृत्वा तु प्रयुञ्जीत सर्वस्मिन्नपि कर्मणि ॥२५॥
वश्यकार्यो मोहने च मारणोच्चाटने तथा । स्तम्भने च तथा द्वेषे तथा कृत्याभिचारयोः ॥२६॥
दुर्गभंगे तथा युद्धे परचक्र निवारणे । एतत् प्रयोगात् सर्वाणि कार्याणि परिसाधयेत् ॥२७॥
भूतावेशं नाशयति विवादे जयति द्विषः । संकटं तरति क्षिप्रं कलहे जयमाप्नुयात् ॥२८॥
यदीच्छेत् महतीं लक्ष्मीं तनयानायुरेव च । विद्यां कान्तिं तथौन्नत्यं यश आरोग्यमेव ॥२९॥
भोगान् सौख्यं विघ्नहानिमनालस्यं महोदयम् । अधीहि कवचं नित्यममुनामुञ्च च प्रिये ॥३०॥
कवचेनामुना सर्वं संसाधयति साधकः । यद् यद् ध्यायति चित्तेन सिद्ध्ं तत्तत्पुरः स्थितम् ॥३१॥
दुर्धटं घटयत्येतत् कवचं विश्वमङ्गलम् । विश्वस्य मङ्गलं यस्मादतो वै विश्वमङ्गलम् ॥३२॥
सान्निध्यकारकं गुह्यकाल्या एतत् प्रकीर्तितम् । भुक्तवा भोगानघं हत्वा देहान्ते मोक्षमाप्नुयात् ॥३३॥

॥ इति विश्वमङ्गल कवचम् ॥

॥ अथर्गुह्योपनिषत् ॥

यथोर्णनाभिः सूत्राणि सृजत्यपि गिलत्यपि । यथा पृथिव्यामौषध्यः संभवन्ति गरन्त्यपि ॥१॥
पुरुषात् केशलोमानि जायन्ते च क्षरन्त्यपि । उत्पद्यन्ते विलीयन्ते तथा तस्यां जगन्त्यपि ॥२॥
ज्वलतः पावकात् यद्वत् स्फुलिङ्गाः कोटिकोटिशः । निर्गत्य च विनश्यति विश्वं तस्यास्तथा प्रिये ॥३॥
ऋचो यजूंषि सामानि दीक्षा यज्ञाश्च दक्षिणाः । अध्वर्युर्यजमानश्च भुवनानि चतुर्दश ॥४॥
ब्रह्मविष्ण्वादिका देवाः मनुष्याः पशवो वयः । प्राणापानौ व्रीहयश्च सत्यं श्रद्धा विधिस्तपः ॥५॥
समुद्रा गिरयो नद्यः सर्वं स्थावर जङ्गमम् । विसृज्येमानि सर्गादौ स्वं प्रकाशयते ततः ॥६॥
जङ्गमानि विधायार्थं विष्टभ्य प्रतिभूतकम् । नवद्वारं पुरं कृत्वा गवाक्षाणीन्द्रियाणि च ॥७॥
सा पश्यति वदति गच्छति क्रीडतीच्छति । शृणोति जिघ्रति तथा रमते विरमत्यपि ॥८॥

तया मुक्तं पुरं तद्धि मृतमित्यभिधीयते ।
अन्तः शरीरे ज्यातिर्मयीं तां ।
भाग्येनैव पश्यन्ति यतयः क्षीणदोषाः ॥९॥

वृहच्च तद्दिव्यमचिन्त्यरूपं-सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात् सुदूरे तदिहान्तिके च पश्यतित्स्विहैव निहितं गुहायाम् ॥१०॥

न चक्षुषा गृह्यते नापि वाचा नान्यैर्योगैस्तपसा कर्मणा वा ।
ज्ञान प्रसादेन विशुद्धसत्त्व स्ततस्तु तां पश्यति निष्कलां ध्यायमानः ॥११॥

यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय ।
तथा विद्वान्नारूपाद् विमुक्तः परात्परां जगदम्बामुपैति ॥१२॥

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि ॥१३॥

एषैवालम्बनं श्रेष्ठमेषैवालम्बनं परम् । एषैवालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥१४॥

इन्द्रियेभ्यः पराह्यर्था ह्यर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥१५॥

महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषात्तु परा देवी सा काष्ठा सा परा गतिः ॥१६॥

यथोदकं गिरौ वृष्टं समुद्रेषु विधावति । एवं धर्मान् पृथक् पश्यँस्तामेवानु विधावति ॥१७॥

एका गुह्या सर्वभूतान्तरात्मा एका रूपं बहुधा या करोति ।
तामात्मस्थां येऽनुपश्यन्ति धीरा-स्तेषां सुखं शाश्वतं नेतरेषाम् ॥१८॥

नित्या नित्यानां चेतना चेतनानामेका बहुनां या विदधाति कामान् ।
तामात्मस्था येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥१९॥

न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तामेव भान्तीमनुभाति सर्वं तस्या भासा सर्वमिदं विभाति ॥२०॥

यस्याः परं नापरमस्ति किञ्चित् यस्या नाणीयो न ज्यायोऽस्ति किञ्चित् ।
वृक्ष इव स्तम्भादि वितिष्ठत्येका तयेदं पूर्ण भगवत्या सर्वम् ॥२१॥

ततो युदुत्तरतरं तदरूपमनामयम् । oooooooooooooooooo ॥२२॥

य एतां विदुरमृतास्ते भवन्ति । अथेतरे दुःखमेवापि यन्ति ॥२३॥

सर्वाननशिरोग्रीवा सर्वभूतगुहाशया । सर्वत्रस्था भगवती तस्मात् सर्वगता शिवा ॥२४॥

सर्वतः पाणिपादान्ता सर्वतोऽक्षिशिरोमुखा । सर्वतः श्रुतिमत्येषा सर्वमावृत्य तिष्ठति ॥२५॥

सर्वेन्द्रियगुणाभासा सर्वेन्द्रियविवर्जिता । सर्वेषां प्रभुरीशानी सर्वेषां शरणं सुहृत् ॥२६॥

****

नवद्वारे पुरे देवी हंसी लीलायते बहिः । ध्येया सर्वस्य स्थावरस्य चरस्य च ॥२७॥
अपाणिपादा जवना गृहीत्री पश्यत्यचक्षुः सा शृणोत्यकर्णा ।
सा वेत्ति वेद्यं न तस्या अस्ति वेत्ता तामाहुरग्र्यां जगतो महीयसीम् ॥२८॥
सा चैवाग्निः सा च सूर्यः सा वायुः सा च चन्द्रमा ।
सा चैव शुक्रं सा ब्रह्म सा चापः सा प्रजापतिः ॥
सा चैव स्त्री सा च पुमान् सा कुमारः कुमारिका ॥२९॥
ऋचोऽक्षरे परमे व्योमन् यस्यां देवा अधिरुद्रा निषेदुः ।
यस्तां न वेद किमृचा करिष्यति ये तां विदुस्तद्वैमे समासते ॥३०॥
छन्दासि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदाः वदन्ति ।
सर्वं देवी सृजते विश्वमेतत् तस्याश्चान्यो मायया सन्निरुद्धः ॥३१॥
मायां तु प्रकृति विद्यात् प्रभुं तस्या महेश्वरीम् ।
अस्या अवयवैः सूक्ष्मैर्व्याप्तं सर्वमिदं जगत् ॥३२॥
या देवानां प्रभवा चोद्भवा च विश्वाधिपा सर्वभूतेषु गूढा ।
हिरण्यगर्भं जनयामास पूर्वं सा नो बुद्ध्या शुभया संयुनक्तु ॥३३॥
सूक्ष्मातिसूक्ष्मं सलिलस्य मध्ये विश्वस्य स्त्रष्ट्रीं तामनेकामनाख्याम् ।
विश्वस्यैकां परिवेष्टयित्रीं ज्ञात्वा गुह्यां शान्तिमत्यन्तमेति ॥३४॥
सा ह्येव काले भुवनस्य गोप्त्री विश्वाधिपा सर्वभूतेषु गूढा ।
यस्यां मुक्ता ब्रह्मर्षयो देवताश्च तामेव ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥३५॥
घृतात्परं मण्डमिवातिसूक्ष्मां ज्ञात्वा कालीं सर्वभूतेषु गूढाम् ।
कल्पान्ते वै सर्वसंहारकर्त्रीं ज्ञात्वा गुह्यां मुच्यते सर्वपाशैः ॥३६॥
एषा देवी विश्वयोनिर्महात्मा सदा जनानां हृदये सन्निविष्टा ।
हृदा मनीषा मनसाऽभिक्लृप्ता य एतां विदुरमृतास्ते भवन्ति ॥३७॥
यदा तमस्तं न दिवा न रात्रि-र्न सन्न चासद् भगवत्येव गुह्या ।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्याः प्रसृता पुराणी ॥३८॥
नैनामूर्ध्वं न तिर्यञ्च न मध्ये परिजग्रभत् ।
न तस्याः प्रतिमाप्यस्ति तस्या नाम महद् यशः ॥३९॥
न सदृशं तिष्ठति रूपमस्याः न चक्षुषा पश्यति कश्चनैनाम् ।
हृदा मनीषा मनसाऽभिक्लृप्ता

य एतां विदुरमृतास्ते भवन्ति ॥४०॥

अथेतरे दुःखमेवार्पयन्ति ॥

भूयश्च सृष्ट्वा त्रिदशानप्यथैशी सर्वाधिपत्यं कुरुते भवानी ।

सर्वा दिश ऊर्ध्वमधश्च तिर्यक् प्रकाशयन्ती भ्राजते गुह्यकाली ॥४१॥

नैवा स्त्री न पुमानेषा नैव चेयं नपुसंका । यद्यच्छरीरमादत्ते तेन नेनैव युज्यते ॥४२॥

धर्मावहां पापनुदं भगेशीं ज्ञात्वात्म स्थाममृतं विश्वधाम ।

तामीश्वराणां परमें महेश्वरीं तां देवतानां परमां च देवताम् ॥४३॥

पतिं पतीनां परमां पुरस्तात् विदाम तां गुह्यकालीमनीशाम् ।

तस्या न कार्यं करणं च विद्यते न तत्समा चाभ्यधिका च दृश्यते ॥४४॥

परास्याः शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।

कश्चिन्न तस्याः पतिरस्ति लोके न चेशिता नैव वा किञ्चिल्लिङ्गम् ॥४५॥

सा कारणं कारणाधिपाधिपा कश्चिन्न चास्याः जनिता न चाधिपा ।

एका देवी सर्वभूतेषु गूढा व्याप्नोत्येतत् सर्वभूतान्तरस्था ॥४६॥

कर्माध्यक्षा सर्वभूताधिवासा साक्षिणी वेत्त्री केवला निर्गुणा च ।

एका वशिनी निष्क्रियाणां बहूना-मेकं बीजं बहुधा या करोति ॥४७॥

नानारूपं या च वक्त्रं विधत्ते नानारूपान् या च बाहून् विभर्ति ।

नित्या नित्यानां चेतना चेतनाना-मेका बहूनां या विदधाति कामान् ॥४८॥

तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवीं मुच्यते सर्वपाशैः ।

या ब्रह्माणं विदधाति पूर्वं या वै वेदांश्च प्रहिणोति तस्मै ॥४९॥

या वै विष्णुं पालने सन्नियुङ्क्ते रुद्रं देवं संहृतौ चापि गुह्या ।

तां वै देवीमात्मबुद्धिप्रकाशां मुमुक्षुर्वै शरणमहं प्रपद्ये ॥५०॥

निष्कलां निष्क्रियां शान्तां निरवद्यां निरञ्जनानाम् ।

अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥५१॥

बह्वाननकरां देवीं गुह्यामेकां समाश्रये ।

इयं हि गुह्योपनिषत् सुगूढा यां वै ब्रह्मा वदन्ते विश्वयोनिः ॥

एतां जल्पन्तश्चान्वहं तन्मया ये सत्यं सत्यममृतास्ते बभूवुः ॥५२॥

वेदवेदान्तयोर्गुह्यं पुराकल्पप्रचोदितम् ।

नाप्रशान्ताय दातव्यं नापुत्रशिष्याय वै पुनः ॥५३॥

यस्य देव्यां परा भक्तिर्यथा देव्यां तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥५४॥

॥ इत्यथर्ववेदे गुह्योपनिषत् ॥

॥ अथ कामाख्या कवचम् ॥

॥ श्रीनारद उवाच ॥

कामरूपे महाक्षेत्रे काऽधिष्ठात्री महेश्वरी । विद्यानां दशमूर्तिनां तन्मे ब्रूहि महेश्वर ॥१॥

॥ श्रीमहादेव उवाच ॥

दशैवैता महाविद्याः क्षेत्रस्था मुनिसत्तम । साधकानां हितार्थाय जपपूजाफलप्रदाः ॥२॥
कामाख्या कालिका देवी स्वयमाद्या सनातनी । तस्याः पार्श्वे स्थिताश्चान्या नव विद्या महामते ॥३॥

सर्वविद्यात्मिका काली कामाख्यारूपिणी यतः ।
ततस्तां तत्र सम्पूज्य पूजयित्वेष्टदेवताम् ॥
इष्टमन्त्रं जपेद्भक्त्या सिद्धमन्त्रो भवेत्तदा ॥३॥

ध्यायतां परमेशानीं कामाख्यां कालिकां पराम् । रक्तवस्त्रपरीधानां घोरनेत्रत्रयोज्ज्वलाम् ॥५॥
चतुर्भुजां भीमदंष्ट्रां युगान्तजलदद्युतिम् । मणिसिंहासने न्यस्तां सिंहप्रेताम्बुजस्थिताम् ॥६॥
हरिः सिंहः शवः शम्भुर्ब्रह्मा कमलरूपधृक् । ललजिह्वां महाघोरां किरीटकनकोज्ज्वलाम् ॥७॥
अनर्घ्यमणिमाणिक्यघटितैर्भूषणोत्तमैः । अलंकृतां जगद्धात्रीं सृष्टिस्थित्यन्तकारिणीम् ॥८॥
वामे तारा भगवती दक्षिणे भुवनेश्वरी । अग्नौ तु षोडशीविद्या नैर्ऋत्यां भैरवी स्वयम् ॥९॥
वायव्यां छिन्नमस्ता च पृष्ठतो बगलामुखी । ऐशान्यां सुन्दरी विद्या चोर्द्ध्वमातङ्गनायिका ॥१०॥
याम्यां धूमावती विद्या महापीठस्य नारद । अधस्ताद्भगवान्रुद्रो भस्माचलमयः स्वयम् ॥११॥
ब्रह्मविष्णुमुखाश्चान्ये देवाः शक्तिसमन्विताः । सदा संनिहितास्तत्र पीठे लोके सुदुर्लभे ॥१२॥
तत्र सम्पूजयेद्देवीं परिवारसमन्विताम् । विविधैरुपचारैश्च यथाविभवविस्तरैः ॥१३॥
इच्छन्देव्याः परां प्रीतिं सद्भक्त्या प्रयतो नरः । न पुनर्जननाशङ्का विद्यते मुनिसत्तम ॥१४॥
बिल्वपत्रं महादेव्यै यो दद्याद्भक्तिभावतः । स साक्षाच्छंकरो ज्ञेयः सर्वलोकेश्वरेश्वरः ॥१५॥
त्रिपत्रं बिल्वपत्रं तु ब्रह्मविष्णुशिवात्मकम् । यदात्मकमिदं सर्वं जगत्स्थावरजङ्गमम् ॥१६॥
तद्ददाति च यो देव्यै पूर्णायै मुनिसत्तम । सम्पूर्णजगतो दानफलं सम्प्राप्नुयान्नरः ॥१७॥
सम्पूर्णकामो भूपृष्ठे विहरेन्मानवोत्तमः । तस्य जन्म च सम्पूर्णं न पुनर्जायते क्वचित् ॥१८॥

तत्र यो भक्तिभावेन भस्माचलमयं शिवम् ।

पूजयेद्भस्मलिप्ताङ्गो बिल्वपत्रैर्महामते ।
स याति परमं मोक्षं भुक्त्वा भोगं मनोरथम् ॥१९॥

रुद्राक्षं बिभृयान्नित्यं शैवः शाक्तोऽथ वैष्णवः । युक्तास्तेन महापुण्यं कृत्वा कर्म समश्नुते ॥२०॥
रुद्राक्षधारी सम्पूज्य रुद्रं संहारकारकम् । रुद्रत्वं समवाप्नोति क्षेत्रेऽस्मिन्नात्र संशयः ॥२१॥
अमायां वा चतुर्दश्यामष्टम्यां वा दिनक्षये । नवम्यां रजनीयोगे योजयेद्भैरवीमनुम् ॥२२॥
क्षेत्रेऽस्मिन्प्रयतो भूत्वा निर्भयः साहसं वहन् । तस्य साक्षाद्भगवती प्रत्यक्षं जायते ध्रुवम् ॥२३॥
आत्मसंरक्षणार्थाय मन्त्रसंसिद्धयेऽपि च । प्रपठेत्कवचं देव्यास्ततो भीतिर्न जायते ॥२४॥
तस्मात्पूर्वं विधायैवं रक्षां सावहितो नरः । प्रजपेत्स्वेष्टमन्त्रस्तु निर्भीतो मुनिसत्तम ॥२५॥

॥ नारद उवाच ॥

कवचं कीदृशं देव्या महाभयनिवर्तकम् । कामाख्यायास्तु तद्ब्रूहि साम्प्रतं मे महेश्वर ॥२६॥

॥ श्रीमहादेव उवाच ॥

शृणुष्व परमं गुह्यं महाभयनिवर्तकम् । कामाख्यायाः सुरश्रेष्ठ कवचं सर्वमङ्गलम् ॥२७॥
यस्य स्मरणमात्रेण योगिनीडाकिनीगणाः । राक्षस्यो विघ्नकारिण्यो याश्चान्या विघ्नकारिकाः ॥२८॥
क्षुत्पिपासा तथा निद्रा तथान्ये ये च विघ्नदाः । दूरादपि पलायन्ते कवचस्य प्रसादतः ॥२९॥

निर्भयो जायते मर्त्यस्तेजस्वी भैरवोपमः ।
समासक्तमनाश्चापि जपहोमादिकर्मसु ।
भवेच्च मन्त्रतन्त्राणां निर्विघ्नेन सुसिद्धये ॥३०॥

॥ अथ कवचम् ॥

ओं प्राच्यां रक्षतु मे तारा कामरूपनिवासिनी । आग्नेय्यां षोडशी पातु याम्यां धूमावती स्वयम् ॥३१॥
नैर्ऋत्यां भैरवी पातु वारुण्यां भुवनेश्वरी । वायव्यां सततं पातु छिन्नमस्ता महेश्वरी ॥३२॥
कौबेर्यां पातु मे देवी श्रीविद्या बगलामुखी । ऐशान्यां पातु मे नित्यं महात्रिपुरसुन्दरी ॥३३॥
ऊर्ध्वं रक्षतु मे विद्या मातङ्गी पीठवासिनी । सर्वतः पातु मे नित्यं कामाख्या कालिका स्वयम् ॥३४॥
ब्रह्मरूपा महाविद्या सर्वविद्यामयी स्वयम् । शीर्षे रक्षतु मे दुर्गा भालं श्रीभवगेहिनी ॥३५॥
त्रिपुरा भ्रूयुगे पातु शर्वाणी पातु नासिकाम् । चक्षुषी चण्डिका पातु श्रोत्रे नीलसरस्वती ॥३६॥
मुखं सौम्यमुखी पातु ग्रीवां रक्षतु पार्वती । जिह्वां रक्षतु मे देवी जिह्वाललनभीषणा ॥३७॥
वाग्देवी वदनं पातु वक्षः पातु महेश्वरी । बाहू महाभुजा पातु कराङ्गुलीः सुरेश्वरी ॥३८॥
पृष्ठतः पातु भीमास्या कट्यां देवी दिगम्बरी । उदरं पातु मे नित्यं महाविद्या महोदरी ॥३९॥
उग्रतारा महादेवी जङ्घोरू परिरक्षतु । गुदं मुष्कं च मेढ्रं च नाभिं च सुरसुन्दरी ॥४०॥

पादाङ्गुलीः सदा पातु भवानी त्रिदशेश्वरी । रक्तमांसास्थिमज्जादीन्पातु देवी शवासना ॥४१॥
महाभयेषु घोरेषु महाभयनिवारिणी । पातु देवी महामाया कामाख्या पीठवासिनी ॥४२॥
भस्माचलगता दिव्यसिंहासनकृताश्रया । पातु श्रीकालिकादेवी सर्वोत्पातेषु सर्वदा ॥४३॥
रक्षाहीनं तु यत्स्थानं कवचेनापि वर्जितम् । तत्सर्वं सर्वदा पातु सर्वरक्षणकारिणी ॥४४॥
इदं तु परमं गुह्यं कवचं मुनिसत्तम । कामाख्या या मयोक्तं ते सर्वरक्षाकरं परम् ॥४५॥
अनेन कृत्वा रक्षां तु निर्भयः साधको भवेत् । न तं स्पृशेद्भयं घोरं मन्त्रसिद्धिविरोधकम् ॥४६॥
जायते च मनःसिद्धिर्निर्विघ्नेन महामते । इदं यो धारयेत्कण्ठे बाहौ वा कवचं महत् ॥४७॥
अव्याहताज्ञः स भवेत्सर्वविद्याविशारदः । सर्वत्र लभते सौख्यं मङ्गलं तु दिने दिने ॥४८॥
यः पठेत्प्रयतो भूत्वा कवचं चेदमद्भुतम् । स देव्याः पदवीं याति सत्यं सत्यं न संशयः ॥४९॥

॥ इति श्रीमहाभागवते देवीपुराणे श्रीमहादेवनारद संवादे श्रीमहाकामाख्या कवचम् ॥

॥ अथ कामाख्या मंत्रः॥

१. त्र्यक्षर – त्रीं त्रीं त्रीं

रक्तवस्त्रां वरोद्युक्तां सिन्दूर तिलकान्वितां, निष्कलङ्कां सुधाधाम वदन कमलोज्वलाम् ।
स्वर्णादि मणिमाणिक्य भूषणैर्भूषितां परां, नानारत्नादि निर्माण सिंहासनोपरिस्थिताम् ॥
हास्य वक्त्रां पद्मरागमणिकांति मनुत्तमां, पीनोतुङ्गकुचां कृष्णां श्रुतिमूलगतेक्षणाम् ।
कटाक्षैश्च महासंपददायिनीं हरमोहिनीं, सर्वाङ्ग सुन्दरीं नित्यां विद्याभिः परेवेष्टिताम् ॥
डाकिनी योगिनी विद्याधरीभिः परिशोभितां, कामिनीभिर्युतां नानागंधाये परिगंधिताम् ।
ताम्बूलादि कराभिश्च नायिकाभिर्विराजितां, समस्त सिद्धवर्गाणां प्रणतां च प्रतीक्षणाम् ॥
त्रिनेत्रां संमोहकरीं पुष्पचापेषु विभ्रतीं, भगलिङ्ग समाख्यानां किन्नरीभ्योऽपि नृत्यताम् ।
वाणी लक्ष्मी सुधा वाक्य प्रतिवाक्य महोत्सुकां अशेष गुण संपन्नां करुणासागरां शिवाम् ॥

विनियोग – अस्य मंत्रस्य अक्षोभ्य ऋषिः, अनुष्टुप् छंदः, कामाख्या देवता, चतुर्वर्गफल प्राप्तये विनियोगः।

२. द्वाविंशाक्षर – त्रीं त्रीं त्रीं हूं हूं स्त्रीं स्त्रीं कामख्ये प्रसीद स्त्रीं स्त्रीं हूं हूं त्रीं त्रीं त्रीं ॥

मंत्र के ऋष्यादि त्र्यक्षर मंत्र के समान है।

अतिसुललितवेशां हास्यवक्त्रां त्रिनेत्रां, जितजलदसुकांतिं पट्टवस्त्रां प्रकाशाम् ।
अभयवरकराढ्यां रत्नभूषाभिभव्यां, सुरतरुतल पीठे रत्नसिंहासनस्थाम् ।
हरिहरविधि वन्द्यां शुद्धबुद्धि स्वरूपां, मदनशर संयुक्तां कामिनीं कामदात्रीम् ।
निखिलजन विलासां कामरूपां भवानीं, कलिकलुषनिहन्त्रीं योनिरूपां स्मरामि ॥

एक लाख जप कर मधुयुक्त पायस होम करे।

॥ युधिष्ठिर कृत देवी स्तुति ॥

॥ युधिष्ठिर उवाच ॥

नमस्ते परमेशानि ब्रह्मरूपे सनातनि । सुरासुरजगद्वन्द्ये कामेश्वरि नमोऽस्तु ते ।
न ते प्रभावं जानन्ति ब्रह्माद्यास्त्रिदशेश्वराः । प्रसीद जगतामाद्ये कामेश्वरि नमोऽस्तु ते ।
अनादिपरमा विद्या देहिनां देहधारिणी । त्वमेवासि जगद्वन्द्ये कामेश्वरि नमोऽस्तु ते ।
त्वं बीजं सर्वभूतानां त्वं बुद्धिश्चेतना धृतिः । त्वं प्रबोधश्च निद्रा च कामेश्वरि नमोऽस्तु ते ।
त्वामाराध्य महेशोऽपि कृतकृत्यं हि मन्यते । आत्मानं परमात्माऽपि कामेश्वरि नमोऽस्तु ते ।
दुर्वृत्तवृत्तसंहर्त्रि पापपुण्यफलप्रदे । लोकानां तापसंहर्त्रि कामेश्वरि नमोऽस्तु ते ।
त्वमेका सर्वलोकानां सृष्टिस्थित्यन्तकारिणी । करालवदने कालि कामेश्वरि नमोऽस्तु ते ।
प्रपन्नार्तिहरे मातः सुप्रसन्नमुखाम्बुजे । प्रसीद परमे पूर्णे कामेश्वरि नमोऽस्तु ते ।
त्वामाश्रयन्ति ये भक्त्या यान्ति चाश्रयतां तु ते । जगतां त्रिजगद्धात्रि कामेश्वरि नमोऽस्तु ते ।
शुद्धज्ञानमये पूर्णे प्रकृतिः सृष्टिभाविनी । त्वमेव मातर्विश्वेशि कामेश्वरि नमोऽस्तु ते ।

॥ परिशिष्टम् ॥

॥ श्रीविद्यायां लक्ष्मीपञ्चक ॥

पृष्ठ १३८ का शेषांश -

श्रीविद्यार्चन में पञ्च-पञ्चिका पूजनान्तर्गत लक्ष्मीपञ्चक भी है इसका पूजन पृष्ठ १३३ पञ्चकोष विद्या के पूर्व करें, अथवा पञ्चरत्नेश्वरी विद्या पृष्ठ १३८ के पश्चात् करें।

॥ १. आद्या लक्ष्मी ॥

इनका त्रिपुरसुन्दरी मन्त्र से आद्य लक्ष्मीरूप में पूजन करें।

॥ २. अथैकाक्षरलक्ष्मी ॥

मन्त्र - श्रीं।

विनियोग - अस्य मन्त्रस्य भृगु ऋषिः, निचृच्छन्दः, श्रीदेवी देवता, शं बीजं, ईं शक्तिं, रं कीलकं स्वाभीष्ट सिद्धये विनियोगः।

षडङ्गन्यास - श्रां, श्रीं, श्रूं, श्रैं, श्रौं, श्रः से क्रमशः हृदयादि न्यास करें।

॥ ध्यानम् ॥

तप्तकार्तस्वराभासां दिव्यरत्नविभूषिताम् ।
आसिंच्यमानाममृतैर्मुक्ता रत्नद्रवैरपि ॥
शुभ्राभ्राभेभयुग्मेन मुहुर्मुहुरपि प्रिये ।
रत्नौघबद्धमुकुटां शुद्धक्षौमाङ्गरागिणीम् ॥
पद्माक्षी पद्मनाभेन हृदि चिन्त्यां स्मरेद्बुधः ।
एवं ध्यत्वा जपद्देवीं पद्मयुग्मधरां सदा ।
वरदाभय शोभाढ्यां चतुर्बाहुं सुलोचनाम् ॥

॥ ३. महालक्ष्मी ॥

मन्त्र - ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं ॐ महालक्ष्म्यै नमः।

विनियोग - अस्य मन्त्रस्य दक्षप्रजापति ऋषिः, गायत्री छन्दः, श्रीमहालक्ष्मी देवता, श्रीं बीजं, ह्रीं शक्तिः, ॐ कीलकं, ममाभीष्ट सिद्धये जपे विनियोगः।

षडङ्गन्यास - श्रां, श्रीं, श्रूं, श्रैं, श्रौं, श्रः से क्रमशः हृदयादि न्यास करें।

॥ ध्यानम् ॥

अग्ररत्नावलीराजदादर्श दधतीं पराम् ।
चतुर्भुजां स्फुरद्रत्ननूपुरां मुकुटोज्ज्वलाम् ॥

ग्रैवेयाङ्गदहाराढ्यकङ्कणां रत्नकुण्डलाम् ।
पद्मासनसमासीनां दूतीभिर्मण्डितां सदा ।
शुक्लाङ्गरागवसनां महादिव्याङ्गनानताम् ॥

॥ ४ . त्रिशक्तिलक्ष्मी ॥

मन्त्र - श्रीं ह्रीं क्लीं।

विनियोग - अस्य मन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, त्रिशक्तिलक्ष्मी देवता, श्रीं बीजं, ह्रीं शक्तिः, क्लीं कीलकं, सर्वाभीष्ट सिद्धये जपे विनियोगः।

षडङ्गन्यास - श्रीं, ह्रीं, क्लीं, श्रीं, ह्रीं, क्लीं से क्रमशः हृदयादि न्यास करें।

॥ ध्यानम् ॥

नवहेमस्फुरद्भूमौ रत्नकुट्टिममण्डपे ।
महाकल्पवनान्तःस्थे रत्नसिंहासनेवरे ॥
कमलासनशोभाढ्यां रत्नमञ्जीर मण्डिताम् ।
स्फुरद्रत्नलसन्मौलि रत्नकुण्डल मण्डिताम् ॥
अनर्घ्यरत्नघटित नानामण्डल भूषिताम् ।
दधतीं पद्मयुगलं पाशाङ्कुशधनुःशरान् ।
षड्भुजामिन्दुवदनां दूतीभिः परिवारिताम् ।
चारुचामरहस्ताभी रत्नादर्श सुपाणिभिः ।
ताम्बूलस्वर्णपात्रीभि - र्भूषापेटीसुपाणिभिः ॥
तप्तकार्तस्वरा - भासाम् ॥

॥ ५ . सर्वसाम्राज्य लक्ष्मी ॥

मन्त्र - श्रीं सहकल श्रीं ह्रीं।

विनियोग - अस्य मन्त्रस्य हरि ऋषिः, गायत्री छन्दः, मोहनीलक्ष्मीर्महासाम्राज्यदायिनी देवता, श्रीं बीजं, सहकल शक्तिं, सर्वाभीष्ट सिद्धये जपे विनियोगः।

षडङ्गन्यास - श्रां, श्रीं, श्रूं, श्रैं, श्रौं, श्रः से क्रमशः हृदयादि न्यास करें।

॥ ध्यानम् ॥

अतसीपुष्पसङ्काशां रत्नभूषण भूषिताम् ।
शङ्खचक्रगदापद्म शार्ङ्गबाणधरांकरै ॥
षड्भिः कराभ्यांदेवेशि वरदाभय शोभिताम् ।

(एवमष्टभुजां ध्यात्वेति)

॥ इति पञ्चलक्ष्म्यः ॥

॥ कौशिकी मन्त्र ॥

पृष्ठ ४६५ से संलग्न

॥ मंत्रोद्धार ॥

मन्त्रमस्याः प्रवक्ष्यामि मूर्तिरूपं च भैरव । समाम्निनान्त्यस्तु षड्वर्गादि सविन्दुभिः । षष्ठस्वरेण संस्पृष्टो बिन्दुना समलंकृतः । कौशिकी मन्त्रतन्त्रोऽयं सर्वकामार्थ दायकः ॥

मन्त्र – सूँ, अं कं चं टं पं ॥

महामाया कवच में अन्य मन्त्र इस प्रकार से है – **यूं सः कौशिके नमः ॥**

महामाया कल्पे – ऐं ह्रीं श्रीं कौशिके नमः ।

॥ श्री अमृतेश्वरी यन्त्रम् ॥

॥ श्री ब्राह्मी यन्त्रम् [पुरश्चर्यार्णवे]॥

॥ श्री कौमारी यन्त्रम् [पुरश्चर्यार्णवे]॥

॥ श्री वाराही यन्त्रम् [पुरश्चर्यार्णवे]॥

॥ विधातृकामवरुणोपासित यन्त्रम् ॥

॥ वैश्वानरादितीन्द्राण्युपासित मन्त्राणां यन्त्रम् ॥

॥ दानवालीमृत्युकाल उपासीत गुह्यकाली यन्त्रम् ॥

॥ रामयक्षेशनाहुषैः पूज्य यन्त्रम् ॥

॥ हिरण्यकशिपू उपासित
गुह्यकाली यन्त्रम् ॥

॥ ब्रह्मोपासितायाः सप्तदश्याः
विष्णुतत्त्वाख्य
पञ्चाक्षर मन्त्रस्य यन्त्रम् ॥

॥ वसिष्ठसप्तदश्याः गुह्यकाली यन्त्रम् ॥

॥ रावणोपासित सप्तदश्याः अम्बाहृदयाख्यं यन्त्रम् ॥

॥ महारुद्रोपासित षोडशी यन्त्रम् ॥

॥ षोडशार्णा गुह्यकाली यन्त्रम् ॥

॥ षट्त्रिंशद् अक्षर यन्त्रम् ॥

॥ जय मङ्गला यन्त्रम् ॥

॥ भुवन मोहन महायन्त्रम् ॥

॥ गुह्येश्वरी शताक्षरी यन्त्रम् ॥

॥ नवनवार्णायाः यन्त्रम् ॥

॥ विष्णुपास्यायुतार्णस्य यन्त्रम् ॥

॥ यन्त्रराज गुह्यकाली यन्त्रम् ॥

॥ शाम्भव मन्त्रात्मक गुह्यकाली यन्त्रम् ॥

॥ महाशाम्भव मन्त्रात्मक गुह्यकाली यन्त्रम् ॥

॥ तुरीयाया: गुह्यकाली यन्त्रम् ॥

॥ महातुरीया गुह्यकाली यन्त्रम् ॥

॥ महानिर्वाण गुह्यकाली यन्त्रम् ॥

॥ महानिर्वाण गुह्यकाली यन्त्रम् ॥

॥ अथ तान्त्रिक पञ्चाङ्गम् ॥

जो साधक दैनिक पूजन में तन्त्रोक्त सङ्कल्प से पूजन करना चाहते हैं, वे तान्त्रिक पञ्चाङ्ग का अवलोकन करें। तान्त्रिक पञ्चाङ्ग दतिया एवं मथुरा से प्रकाशित होता है। एक बार पञ्चाङ्ग का अवलोकन कर लेवें। पश्चात् सारणी से सहायता लेवें। सङ्कल्प में देवीमान में कौनसा युग परिवृत्त है, वर्ष का नाम, ऋतु का नाम, मास का नाम, मास की कला का नाम, दिन की नित्या तथा तत्त्व एवं घटिका, प्रयोग के दिन की नित्या का नाम भी उल्लेख करें। इन सभी नाम हेतु साधारण सारणी दी गई है।

वर्तमान में "**खं सदाशिवतत्त्वयुग**" है, तथा **थं त्वक्परिवृत्ति** है। वर्ष, ऋतु, मास, पर्व, वार, नक्षत्र, योग, दिन नित्या हेतु सारणी की सहायता लेवें।

वर्षारम्भ वासराः		ऋतवः	पर्वाणि	
वासरा	र सो मं बु बृ शु श	अ आ मासयोः आं श्रीकरी	पुष्पिणी	वर्ष-मासाक्षरयोर्योगात्
वर्षाणि	ग अ घ क ङ ख च	इ ई मासयोः ईं मोहिनी	मोहिनी	वर्ष-दिनाक्षरयोर्योगात्
	ञ छ ट ज ठ झ ड	उ ऊ मासयोः ऊँ कामिनी	जयिनी	वर्ष-उदययोर्योगात्
	थ ढ द ण ध त न	ऋ ॠ मासयोः ऋं विमला	कुमारी	मास-दिनयोर्योगात्
	भ प म फ य ब र	लृ लॄ मासयोः लृं हारिणी	विमला	मास-उदययोर्योगात्
	ष ळक्षस व ह श ल	ऐ ऐ मासयोः ऐं भ्रामणी	श्रीकरी	दिनोदययोर्योगात्
		ओ औ मासयोः औं गौरी	सूर्यग्रहणं	वर्षमासदिनवारोदययोगात्
		अं अः मासयोः अः लक्ष्मी-कुमारीका	चन्द्रग्रहणं	मासवारनित्योदययोगात्
			श्रीरात्रिः	वारदिननित्योदययोगात्
			नित्यानेलनं	तिथिनित्यादिन-नित्ययोर्योगात्
			वारोदयः	वारोदययोगात्

मासारंभ वासराः

मासारंभ	र.	सौ.	मं.	बु.	बृ.	शु.	श.
र.	अ ऋ अं	आ लृ अः	इ लॄ	ई ए	उ ऐ	ऊ ओ	ऋ औ
सौ.	ऋ ओ	अ ऋ अं	आ लृ अः	इ लॄ	ल ए	उ ऐ	ऊ ओ
मं.	ऊ ओ	ऋ औ	आ लृ अः	आ लॄ अ	इ लृ	ई ऐ	उ ऐ
बु.	उ ऐ	उ औ	ऋ औ	ऋ अं	आ लृ अः	इ लृ	ई ए
बृ.	ई ए	उ ऐ	ऊ ओ	ऋ औ	अ ऋ अं	आ लृ अः	इ लृ
शु.	इ लॄ	ई ए	उ ऐ	उ ओ	ऋ औ	अ लृ अं	आ लृ अः
श.	आ लृ अः	इ लॄ	ई ए	उ ए	उ ऐ	ऊ औ	अ ऋ अं

मास नामानि (प्रतिवर्ष १६ मास)

अं	आं	इं	ईं	उं	ऊं	ऋं	ॠं
अमृता	मानदा	पूषा	तुष्टि	पुष्टि	रति	धृति	शशिनी
लृं	लॄं	एं	ऐं	ओं	औं	अं	अ:
चन्द्रिका	कान्ति	ज्योत्सना	श्री	प्रीति	अङ्गदा	पूर्णा	पूर्णामृता

वर्षाणि	मासा:	मासा:
अ ङ ञ ण न म श क्ष	आ ऋं ऐ	इ ऋ ओ
क च ट त प य ष	अ ऊ ए अ:	आ ॠ ऐ
ख छ ठ थ फ र स	उ लृ अं	अ ऊ ए अ:
ग ज ड द ब ल ह	ई लॄ ओ	उ लृ अं
घ झ ढ ध भ व ळ	इ ऋ औ	इ लृ औ

मासा:	मासा:	मासा:
ई लृ औ	उ लृ अं	अ ऊ ए अ:
इ ऋ ओ	ई लॄ औ	उ लृ अं
आ ऋ ऐ	इ ऋ ओ	ई लॄ औ
अ ऊ ए अ:	आ ऋ ऐ	इ ऋ ओ
उ लॄ अं	अ ऊ ए अ:	आ ऋ ए

रवौ मासारम्भश्चेत्

र.	सो.	मं.	बु.	बृ.	शु.	श.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

सोमेमासारम्भश्चेत्

सो.	मं.	बु.	बृ.	शु.	श.	र
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

भौमे मासारम्भश्चेत्

मं.	बु.	बृ.	शु.	श.	र.	सो.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

बुधे मासारम्भश्चेत्

बु.	बृ.	शु.	श.	र.	सो.	मं.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

बृहस्पते मासारम्भश्चेत्						
बृ.	शु.	श.	र.	सो.	मं.	बु.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

शुक्रे मासारम्भश्चेत्						
शु.	श.	र.	सो.	मं.	बु.	बृ.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

शनौ मासारम्भश्चेत्						
श.	र.	सो.	मं.	बु.	बृ.	शु.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१	३२	३३	३४	३५
३६						

वासराः											
१	अं	प्रकाशा	१०	अं	प्रकाशा	१९	अं	प्रकाशा	२८	अं	प्रकाशा
२	लृं	विमर्शा	११	लृं	विमर्शा	२०	लृं	विमर्शा	२९	लृं	विमर्शा
३	कं	आनन्दा	१२	कं	आनन्दा	२१	कं	आनन्दा	३०	कं	आनन्दा
४	चं	ज्ञाना	१३	चं	ज्ञाना	२२	चं	ज्ञाना	३१	चं	ज्ञाना
५	टं	सत्या	१४	टं	सत्या	२३	टं	सत्या	३२	टं	सत्या
६	तं	पूर्णा	१५	तं	पूर्णा	२४	तं	पूर्णा	३३	तं	पूर्णा
७	पं	स्वभावा	१६	पं	स्वभावा	२५	पं	स्वभावा	३४	पं	स्वभावा
८	यं	प्रतिभा	१७	यं	प्रतिभा	२६	यं	प्रतिभा	३५	यं	प्रतिभा
९	षं	सुभगा	१८	षं	सुभगा	२७	षं	सुभगा	३६	षं	सुभगा

संख्या	तत्त्व दिन		नक्षत्र	योग	करण
१	अं	शिव	लृ	अ	ऋ
२	कं	शक्ति	लॄ	आ	ॠ
३	खं	सदाशिव	ए	इ	लृ
४	गं	ईश्वर	ऐ	ई	लॄ
५	घं	शुद्धविद्या	ओ	उ	ए
६	ङं	माया	औ	ऊ	ऐ
७	चं	कला	अं	ऋ	ओ
८	छं	अविद्या	अः	ॠ	औ
९	जं	राग	क	लृ	अं
१०	झं	काल	ख	लॄ	अः
११	ञं	नियति	ग	ए	क
१२	टं	पुरुष	घ	ऐ	ख

संख्या	तत्त्व दिन		नक्षत्र	योग	करण
१३	ठं	प्रकृति	ङ	ओ	ऋ
१४	डं	अहंकार	च	औ	ॠ
१५	ढं	बुद्धि	छ	अं	लृ
१६	णं	मनस्	ज	अः	लृ
१७	तं	श्रोत्र	झ	क	ए
१८	थं	त्वक्	ञ	ख	ऐ
१९	दं	चक्षु	ट	घ	ओ
२०	धं	जिह्वा	ठ	ग	औ
२१	नं	घ्राण	ड	ङ	अं
२२	पं	वाक्	ढ	च	अः
२३	फं	पाणि	ण	छ	क
२४	बं	पाद	त	ज	ख

संख्या	तत्त्व दिन		नक्षत्र	योग	करण
२५	भं	पायु	थ	झ	ऋ
२६	मं	उपस्थ	द	ञ	ॠ
२७	यं	शब्द	ध	ट	लृ
२८	रं	स्पर्श	न	ठ	लृ
२९	लं	रूप	प	ड	ए
३०	वं	रस	फ	ढ	ऐ
३१	शं	गंध	ब	ण	ओ
३२	षं	आकाश	भ	त	औ
३३	सं	वायु	म	थ	अं
३४	हं	वह्नि	य	द	अः
३५	ळं	सलिल	र	ध	क
३६	क्षं	भूमि	ल	न	ख

दिन नित्या		पक्ष	घटिकोदय
अं	कामेश्वरी	शुक्ल	अ
आं	भगमालिनि		ए
इं	नित्यक्लिन्ना		च
ईं	भेरुण्डा		त
उं	वह्निवासिनि		य
ऊं	महावज्रेश्वरी		अ
ऋं	शिवदूती		ए
ॠं	त्वरिता		च
लृं	कुलसुन्दरी		त
ॡं	नित्या		य
एं	नीलपताका		अ
ऐं	विजया		ए
ओं	सर्वमङ्गला		च
औं	ज्वालामालिनि		त
अं	चित्रा		य
अं	चित्रा	कृष्ण	अ
औं	ज्वालामालिनि		ए
ओं	सर्वमङ्गला		च
ऐं	विजया		त
एं	नीलपताका		य
ॡं	नित्या		अ
लृं	कुलसुन्दरी		ए
ॠं	त्वरिता		च
ऋं	शिवदूती		त
ऊं	महावज्रेश्वरी		य
उं	वह्निवासिनि		अ
ईं	भेरुण्डा		ए
इं	नित्यक्लिन्ना		च
आं	भगमालिनि		त
अं	कामेश्वरी		य
अं	कामेश्वरी	शुक्ल	अ

दिन नित्या		पक्ष	घटिकोदय
आं	भगमालिनि	शुक्ल	ए
इं	नित्यक्लिन्ना		च
ईं	भेरुण्डा		त
उं	वह्निवासिनि		य
ऊं	महावज्रेश्वरी		अ
ऋं	शिवदूती		ए
ॠं	त्वरिता		च
लृं	कुलसुन्दरी		त
ॡं	नित्या		य
एं	नीलपताका		अ
ऐं	विजया		ए
ओं	सर्वमङ्गला		च
औं	ज्वालामालिनि		त
अं	चित्रा		य
अं	चित्रा	कृष्ण	अ
औं	ज्वालामालिनि		ए
ओं	सर्वमङ्गला		च
ऐं	विजया		त
एं	नीलपताका		य
ॡं	नित्या		अ
लृं	कुलसुन्दरी		ए
ॠं	त्वरिता		च
ऋं	शिवदूती		त
ऊं	महावज्रेश्वरी		य
उं	वह्निवासिनि		अ
ईं	भेरुण्डा		ए
इं	नित्यक्लिन्ना		च
आं	भगमालिनि		त
अं	कामेश्वरी		य
अं	कामेश्वरी	शुक्ल	अ
आं	भगमालिनि		ए

दिन नित्या		पक्ष	घटिकोदय
इं	नित्यक्लिन्ना	शुक्ल	च
ईं	भेरुण्डा		त
उं	वह्निवासिनि		य
ऊं	महावज्रेश्वरी		अ
ऋं	शिवदूती		ए
ॠं	त्वरिता		च
लृं	कुलसुन्दरी		त
ॡं	नित्या		य
एं	नीलपताका		अ
ऐं	विजया		ए
ओं	सर्वमङ्गला		च
औं	ज्वालामालिनि		त
अं	चित्रा		य
अं	चित्रा	कृष्ण	अ
औं	ज्वालामालिनि		ए
ओं	सर्वमङ्गला		च
ऐं	विजया		त
एं	नीलपताका		य
ॡं	नित्या		अ
लृं	कुलसुन्दरी		ए
ॠं	त्वरिता		च
ऋं	शिवदूती		त
ऊं	महावज्रेश्वरी		य
उं	वह्निवासिनि		अ
ईं	भेरुण्डा		ए
इं	नित्यक्लिन्ना		च
आं	भगमालिनि		त
अं	कामेश्वरी		य
अं	कामेश्वरी	शुक्ल	अ
आं	भगमालिनि		ए
इं	नित्यक्लिन्ना		च

	दिन नित्या	पक्ष	घटिकोदय
ईं	भेरुण्डा	शुक्ल	त
उं	वह्निवासिनि		य
ऊं	महावज्रेश्वरी		अ
ऋं	शिवदूती		ए
ॠं	त्वरिता		च
लृं	कुलसुन्दरी		त
लॄं	नित्या		य
एं	नीलपताका		अ
ऐं	विजया		ए
ओं	सर्वमङ्गला		च
औं	ज्वालामालिनि		त
अं	चित्रा		य
अं	चित्रा	कृष्ण	अ
औं	ज्वालामालिनि		ए
ओं	सर्वमङ्गला		च
ऐं	विजया		त
एं	नीलपताका		य
लॄं	नित्या		अ
लृं	कुलसुन्दरी		ए
ॠं	त्वरिता		च
ऋं	शिवदूती		त
ऊं	महावज्रेश्वरी		य
उं	वह्निवासिनि		अ
ईं	भेरुण्डा		ए
इं	नित्यक्लिन्ना		च
आं	भगमालिनि		त
अं	कामेश्वरी		य
अं	कामेश्वरी	शुक्ल	अ
आं	भगमालिनि		ए
इं	नित्यक्लिन्ना		च
ईं	भेरुण्डा		त

	दिन नित्या	पक्ष	घटिकोदय
उं	वह्निवासिनि	शुक्ल	य
ऊं	महावज्रेश्वरी		अ
ऋं	शिवदूती		ए
ॠं	त्वरिता		च
लृं	कुलसुन्दरी		त
लॄं	नित्या		य
एं	नीलपताका		अ
ऐं	विजया		ए
ओं	सर्वमङ्गला		च
औं	ज्वालामालिनि		त
अं	चित्रा		य
अं	चित्रा	कृष्ण	अ
औं	ज्वालामालिनि		ए
ओं	सर्वमङ्गला		च
ऐं	विजया		त
एं	नीलपताका		य
लॄं	नित्या		अ
लृं	कुलसुन्दरी		ए
ॠं	त्वरिता		च
ऋं	शिवदूती		त
ऊं	महावज्रेश्वरी		य
उं	वह्निवासिनि		अ
ईं	भेरुण्डा		ए
इं	नित्यक्लिन्ना		च
आं	भगमालिनि		त
अं	कामेश्वरी		य
अं	कामेश्वरी	शुक्ल	अ
आं	भगमालिनि		ए
इं	नित्यक्लिन्ना		च
ईं	भेरुण्डा		त
उं	वह्निवासिनि		य

	दिन नित्या	पक्ष	घटिकोदय
ऊं	महावज्रेश्वरी	शुक्ल	अ
ऋं	शिवदूती		ए
ॠं	त्वरिता		च
लृं	कुलसुन्दरी		त
लॄं	नित्या		य
एं	नीलपताका		अ
ऐं	विजया		ए
ओं	सर्वमङ्गला		च
औं	ज्वालामालिनि		त
अं	चित्रा		य
अं	चित्रा	कृष्ण	अ
औं	ज्वालामालिनि		ए
ओं	सर्वमङ्गला		च
ऐं	विजया		त
एं	नीलपताका		य
लॄं	नित्या		अ
लृं	कुलसुन्दरी		ए
ॠं	त्वरिता		च
ऋं	शिवदूती		त
ऊं	महावज्रेश्वरी		य
उं	वह्निवासिनि		अ
ईं	भेरुण्डा		ए
इं	नित्यक्लिन्ना		च
आं	भगमालिनि		त
अं	कामेश्वरी		य

मयूरेश प्रकाशन

छाबड़ा कॉलोनी, मदनगंज-किशनगढ़
जिला-अजमेर (राज.)
फोन - 01463 244198, 098291 44050

लेखक एवं प्रकाशक **पं० रमेशचन्द्र शर्मा "मिश्र"** के अन्य प्रकाशन

बिना तोड फोड के वास्तुदोष का निवारण

"भवन वास्तुशास्त्र एवं भाग्यफल"

लाल किताब के सिद्धान्तों के आधार पर वास्तु दोष का शमन

(1) जन्म कुण्डली की तरह नूतन मकान कुण्डली सिद्धान्त द्वारा यह सिद्ध किया गया है कि आपकी कुण्डली के योग से आपके मकान में क्या वास्तु दोष होंगे। (2) वास्तु के समस्त नियमों की उत्पत्ति ज्योतिष सिद्धान्त से सिद्ध करने वाली पहली पुस्तक। (3) धन,जमीन, जायदाद, महल या झोपड़ी के आवास का सुख जातक अपनी जन्मकुण्डली के आधार पर भोगता है। **अतः 50 प्रतिशत भाग्य एवं 50 प्रतिशत वास्तुफल होता है।** (4) अशुभवास्तु का निवारण नहीं कर पाने की स्थिति में किये जाने वाले उपायों का भण्डार पुस्तक में है। (5) आपकी राशी व वास्तु दोष के अनुसार मकान के पर्दे, कांच का रंग व किस तरह के चित्र या खिलौने दोष का निवारण करेगें यह भी दिये गये है। (6) नींव रखने की पंचशिला व नवशिला स्थापन विधि ा विशेष रूप से दी गई है। (7) **पिरामिड़ के निर्माण से स्वास्थ्य लाभ एवं उसके उपयोग की विधियाँ। फेंगशुई सिद्धान्त द्वारा बिना तोड़-फोड़ के वास्तु दोष निवारण एवं अच्छे लाभ की जानकारियाँ इस पुस्तक में उपलब्ध है।** मूल्य २००/-

सुबोध दुर्गासप्तशती एवं याग विधानम्

(तंत्र याग दीपिका)

1. इस पुस्तक की सहायता से साधारण व्यक्ति भी शुद्ध दुर्गापाठ सीख सकता है। 2. हर एक मंत्र के हवनीय द्रव्य दिये गये है। 3. कठिन शब्दों का सरलीकरण रंग भेद व संधि विच्छेद द्वारा आसानी से सीखिये। 4. दुर्गा यंत्र, श्रीयंत्र, काली, बगलामुखी, मृत्युंजय, गायत्र्यादि के यंत्रार्चन की सरल व सम्पूर्ण क्रि यें। 5. पूजन के समस्त रंगीनमंडल देवताओं के आवाहन, स्थापन की सरल विधि। 6. पूजन, अर्चन, 9 कुण्डादि निर्माण, यज्ञ की सम्पूर्ण जानकारी एवं सरल विधि। 7. विभिन्न सूक्त व सिद्ध तांत्रिक स्त्रोतादि। 8. कई मार्मिक रहस्य व तंत्र प्रयोग जो विद्वानों के ध्यान में नहीं है। 9. ऐसी अनूठी पुस्तक जो तंत्र व यज्ञविधान की कुंजिका है, । **मूल्य २७०/-**

डाक द्वारा पुस्तक मंगवाने हेतु लिखें –

मयूरेश प्रकाशन छाबड़ा कॉलोनी, मदनगंज-किशनगढ़ जिला-अजमेर (राज.)

सर्वकर्म अनुष्ठानप्रकाशः भाग (२) 'देवखण्ड'

'तन्त्रोक्त देव पूजा रहस्य'

देवखण्ड में गणेश, हनुमान, विष्णु, शिव, भैरव, रुद्रादि देवों के विविधप्रयोग दिये हैं मृत्युञ्जय प्रयोग विविध प्रकार के सविधि दिये गये हैं। शत्रुहंता हेतु भगवान रुद्र के उग्र अवतार भगवान शरभ शालुव पक्षिराज के विविध प्रयोगों का वर्णन है। आशुगरुड़ प्रयोग, गंधर्वराज, कार्त्तवीर्यअर्जुन, परशुरामादि के विविध प्रयोग है। वांछाकल्पलता प्रयोग एवं अन्य कई प्रयोगों का वर्णन किया गया है। **मूल्य ३००/-**

सर्वकर्म-अनुष्ठानप्रकाशः भाग (३)

नवदुर्गा दशमहाविद्या रहस्य

'देवीखण्ड पूर्वार्द्ध'

देवीखण्ड में उत्तर भारतीय व दक्षिण भारतीय पद्धति द्वारा सभी नवरात्र के कर्म का सम्पूर्ण विधान है। भगवती दुर्गा के नवदुर्गा स्वरूपों के प्रयोगों का वर्णन। दशमहाविद्याओं में काली, तारा, षोडशी, त्रिपुरभैरवी, भुवनेश्वरी, छिन्नमस्ता, बगुलामुखी, मातंगी, धूमावती, एवं कमलादि देवियों के यंत्रार्चन का सरल विधान स्तोत्र, कवच, सहस्रनाम एवं विविध काम्य प्रयोगों का वर्णन साधकों के हित के लिये किया गया है। अन्य तंत्र ग्रंथों (मंत्रमहार्णव, मंत्रमहोदधि,) इत्यादि की जटिल भाषा व जटिलता को दूर कर सरलीकरण किया गया है। **मूल्य ६००/-**

तंत्रात्मक दुर्गासप्तशती

(गुप्तवती टीकानुसार)

१. दुर्गासप्तशती के ७०० मंत्र अलग-अलग ७०० बीजाक्षर मंत्रों से पुटित है। २. प्रत्येक मंत्र के ध्यान, विनियोग, न्यास आदि दिये हैं। ३. प्रत्येक विनियोग में ऋषि, छन्द, देवता, बीज, शक्ति, कीलक के अलावा महाविद्या, ज्ञानेनेन्द्रिय, रस, स्वाद, धातु, तत्त्व, गुण एवं उनकी मुद्रा का पूर्ण उल्लेख है। ४. प्रत्येक बीजाक्षर युक्त मंत्र के षडंगन्यास दिये गयें है। ४. प्रत्येक मंत्र की आहुति, द्रव्य का उल्लेख है। ५. कामना सिद्धि हेतु प्रत्येक मंत्र का पुरश्चरण का पर्याप्त विधान है। ६. विशिष्ट कामना सिद्धि तथा शीघ्र फल प्राप्ति हेतु यह पुस्तक श्रेष्ठ फलदायी है। ७. ध्यान मंत्रों की पुनरावृत्ति कम से कम हो इस बात का ध्यान रखा गया है। ८. **गुप्तवती टीका** में मंत्रार्थ उसी श्लोक से संबंध रखता है, प्रचलित कात्यायनी टीका में कई स्थान पर, एक मंत्र की पंक्ति का अर्थ दूसरे श्लोक की पंक्ती में पूर्ण होता है। अतः न्यास ध्यान एवं पाठ क्रम में श्लोक क्रम संख्या में पाठान्तर भेद बहुधा बनता है। **मूल्य ३४०/-**

भिन्नपाद दुर्गासप्तशती

मंत्र की शीघ्र सिद्धि हेतु कामना बीज मंत्रों से या व्याहृतियों से भिन्नपाद करके मंत्र जपने का विधान तांत्रिकों में बहुत समय से प्रचलित है। एक मंत्र के साथ कामना मंत्र का संयोग पाद (चरण)भेद के द्वारा करने का मंत्र विधान भी प्रचलित है। दुर्गासप्तशती के भिन्नपाद मंत्रों की यह सर्वप्रथम कृति है जिसका पहले प्रयास नहीं किया गया है। साथ में गायत्री, शिव, दुर्गा, जातवेददुर्गा, मृत्युञ्जय, शरभ, भैरव एवं अन्य देवताओं के भिन्नपाद मंत्र प्रयोग दिये गये हैं।

मूल्य २००/-

श्रीदुर्गासप्तसती सर्वस्वम्

१. सहस्राधिक श्लोकी दुर्गासप्तसती – मेरूतन्त्र के अनुसारप्रथम चरित्र की सप्त शक्तियाँ है। मध्यम चरित्र की सात प्रकट व सात अप्रकट शक्तियाँ है तथा उत्तर चरित्र की भी सात शक्तियाँ है। ये सभी सात शक्तियाँ सप्त सतियों के नाम से जानी जाती है। अत: सप्तसती नाम से चरित प्रख्यात है।

जो आख्यान मार्कण्डेय पुराणान्तर्गत प्रचलित सप्तशती में हैं उनमें देवी चरित प्रसंगों का पूर्ण वर्णन नहीं है, कुछ प्रसंगों का संक्षिप्त वर्णन है।

इस पुस्तक में तन्त्र ग्रन्थों व देवीभागवत, पुराणादि ग्रन्थों से आख्यान प्रत्येक चरित में समाहित किये गये हैं। जिससे देवी चरित की पूर्ण परिपुष्टि होती है। अत: अनुमानित श्लोक संख्या एक सहस्र है, इनमें उवाच की संख्या सम्मिलित नहीं है।

२. प्रचलित दुर्गा सप्तशती – मार्कण्डेय पुराणान्तर्गत आधारित श्लोक संख्या सात सौ होने से सप्तशती चरित दिया गया है।

३. विलोम दुर्गा सप्तशती – प्रचलित सप्तशती का सश्लोक विलोम पाठ।

४. उत्कीलित दुर्गा सप्तशती – अध्याय क्रम पर आधारित उत्कीलित दुर्गा सप्तशती।

५. प्रतिलोम दुर्गा सप्तशती – प्रति अध्याय, प्रति श्लोक के लोम-विलोम क्रम से उत्कीलित दुर्गा सप्तशती।

मूल्य ३२०/-

साधक का सत्य

☆ पुस्तक में लेखक की 40 वर्ष की साधना के नीजि अनुभव व दिव्य योग विधियाँ दी गई है ☆ गुरु परंपरा, गुरु की महत्ती कृपा कैसे प्राप्त करें ☆ दीक्षा, शक्तिपात की शक्ति व प्रभाव ☆ कुण्डलिनी जागरण के लक्षण ☆ कुण्डलिनी जागरण की विधियाँ ☆ षट्चक्रों का वर्णन। मन्त्र साधना द्वारा घट्चक्र भेदने की विधियाँ ☆ मन्त्र साधना द्वारा ध्यान, धारणा, समाधि, नादसाधना ☆ ध्यान लगाते समय होने वाली समस्याओं का आनुभविक निराकरण ☆ साधना के मार्ग की दिव्य अनुभूतियों का आनुभविक वर्णन। ☆ त्रिनाड़ी शक्ति का वर्णन, ☆ पञ्चकोषमय शरीर का वर्णन

मूल्य १५०/-

श्रीबगलामुखी चालीसा

अद्वितीय बगलामुखी चालिसा, बगलामुखी सप्तक, आरती व भजन, बगलामुखी कवच, बगलामुखी शतनाम स्तोत्र भी पुस्तक में दिये गये हैं।

मूल्य ७/-

वैदिक पूजन के मन्त्र (दण्डक)

दैनिक पूजन के वैदिक मन्त्रों की कुञ्जिका जिससे कर्मकाण्डी विद्वान सभी कार्य सुगमता से करा सकते हैं।

मूल्य - २५/-

डाक द्वारा पुस्तक मंगवाने हेतु लिखें –

मयूरेश प्रकाशन छावड़ा कॉलोनी, मदनगंज-किशनगढ़ जिला-अजमेर (राज.)
फोन - 01463 244198, 098291 44050, 09214512223

हमारे प्रकाशन

लेखक : पं. रमेश चन्द्र शर्मा (मिश्र)

विशेषज्ञ :

ज्योतिष, तंत्रशास्त्र, वास्तुशास्त्र एवं कर्मकाण्ड (डिप्लो. मैकेनिकल इंजि.)

1	सुबोध दुर्गा सप्तशती एवं याग विधानम्	250
2	सचित्र सस्वर रूद्राष्टाध्यायी	100
3	भवन वास्तुशास्त्र एवं भाग्यफल	200
4	सांगोपांग वैवाहिक पद्धति	70
5	नवग्रह एवं नक्षत्र शान्ति	100
6	सर्वकर्म अनु0 भाग 1 पूजा प्रतिष्ठा	250
7	सर्वकर्म अनु0 भाग 2 देवखण्ड	260
8	सर्वकर्म अनु0 भाग 3 देवीखण्ड पूर्वार्द्ध	550
9	सर्वकर्म अनु0 भाग 4 देवीखण्ड उत्तरार्द्ध	450
10	सर्वकर्म अनु0 भाग 5 तंत्रसिद्धि रहस्य	320
11	सर्वकर्म अनु0 भाग 6 सिद्ध विद्या रहस्य	400
12	तंत्रात्मक दुर्गा सप्तशती	320
13	भिन्नपाद दुर्गा सप्तशती	180
14	दुर्गा सप्तशती सर्वस्वम्	300
15	ब्रह्मकर्म सपर्या	300
16	कालसर्प एवं शाप दोष शान्ति	220
17	दैनिक पूजन के वैदिक मंत्र दण्डक	25
18	साधक का सत्य	150
19	बगलामुखी चालीसा	10

सर्वकर्म अनु. प्रकाश भाग (1)

पूजा-प्रतिष्ठा

सभी देवताओ की प्रतिष्ठा, सम्पूर्ण पूजा विधान तथा हवन कुण्ड निर्माण का विधान।

सर्वकर्म अनु. प्रकाश भाग (2)

तन्त्रोक्त देव पूजा रहस्य

सभी देवताओ के तन्त्रोक्त कामना सिद्धि प्रयोग।

सर्वकर्म अनु. प्रकाश भाग (3) देवीखण्ड पूर्वार्द्ध-

नवदुर्गा दशमहाविद्या रहस्य

गायत्री पुरश्चरण प्रयोग। नवदुर्गा के उत्तर भारत, दक्षिण भारत के चारों नवरात्र विधान। दशमहाविद्याओं के विशेष प्रयोग जो एक साथ अन्य किसी पुस्तक में संकलित नहीं हैं।

सर्वकर्म अनु. प्रकाश भाग (4) देवी खण्ड उत्तरार्द्ध-

उपमहाविद्या रहस्य (दो भागों में)

नवदुर्गा, ब्राह्मी आदि अष्टमातृका आवरणपूजा, कौशिकी आदि देवीयों के प्रयोग एवं श्रीविद्या की नित्याओं के प्रयोग व अन्य महाविद्याओं की मातृकाओं का पूजन विधान एवं अन्य विद्याओं के प्रयोग सहित गायत्री ब्रह्मदण्ड, ब्रह्मास्त्र आदि विधान पद्मावती उपासना पंचागुली देवी प्रयोग अन्य कई सिद्ध प्रयोग दिये गये है।

तन्त्रात्मक दुर्गासप्तशती

दुर्गा सप्तशती के 700 श्लोकों के न्यास, ध्यान, विनियोग सहित विधान।

भिन्नपाद दुर्गासप्तशती

नवार्ण मंत्र एवं त्रिपुरसुंदरी मंत्र से चरण भेद पुटित दुर्गा पाठ प्रयोग तथा अन्य कई देवताओं के भिन्नपाद प्रयोग।

ब्रह्मकर्म सपर्या

यह पुस्तक कर्मकाण्डी ब्राह्मणों हेतु सरल वैदिक विधि से संकलित है। रुद्राभिषेक प्रयोग, यज्ञोपवीत, विवाह, गृह प्रवेश, ग्रहशांति आदि कई विधान दिये गये हैं।

कालसर्प एवं शाप दोष शांति

राहु केतु जनित उपद्रव शांति, पूर्वजन्मोक्त, प्रेत, पितर, पिशाच शाप विमुक्ति प्रयोग दिये गये हैं।